This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.

+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.

+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.

+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at `http://books.google.com/`

Digitized by Google

This book should be returned to the Library on or before the last date stamped below.

A fine of five cents a day is incurred by retaining it beyond the specified time.

Please return promptly.

MAR 20 '63 H
CANCELLED
20 '68 H
CANCELLED
STALL-STUDY
CHARGE
CANCELLED
WIDENER
BOOK DUE
CANCELLED
1985
WIDENER
OCT 19 2002
BOOK DUE
CANCELLED

3 2044 058 234 65

Digitized by Google

Digitized by Google

Digitized by Google

चन्द्रो द्वादशभास्करः समभवद्दावाग्निर्भोगानां शतं
मिष्टं तिक्तरसं विलेपनमहो दीप्तानलो मे तव।
विष्फोटो मलयानिलः प्रियतमे! किं कालकूटः श्रुतौ
गीतादिध्वनिरेव वज्रसदृशोऽरण्यं विचित्रं गृहम् ॥५०॥
मानं मानिनि! मुञ्च देवि! दयिते! मिथ्या वचः श्रूयते
किं कोपो निजसेवके यदि वचः सत्यं त्वया गृह्यते।
दोर्भ्यां बन्धनमाप्नु दन्तदलनं पीनस्तनास्फालनं
देशवेशमम ते कटाक्षविशिखैः शस्त्रैः प्रहारं कुरु ॥५१॥
नानाकथा कौतुककेलिभिः सा सार्द्धं तु तेनैव रमेत नित्यम्।
हर्म्ये सुरम्ये रमणेन युक्ता वरासखीभिः परमप्रियाभिः ॥५२॥
कामार्त्तो नवयौवनः कविवरो भूपालपुत्र्या समं
नानाबन्धविनोदनिर्भररतिक्रीड़ारसानन्दितः।
गत्वान्तःपुरतो बहिर्विलक्षितो राजाग्रतो नीयते
चौरो राजनियोजितैःसुपुरुषैश्चारैरुपायक्षमैः ॥५३॥
राजा तानपि सेवकान् सुवसनालङ्कारभूषीकृतान्
कृत्वा प्राह विपक्षकं खरतरं खड्गं समानीय ते।
नीत्वा तं भवनाद्बहिर्विलक्षितं राजात्मजं साहसं
दृष्ट्वा संस्मर देवतामिति तदाप्युचुः स चौरोऽवदत् ॥५४॥

इति विद्यासुन्दरं समाप्तम्।

सम्पूर्णम्।

Digitized by Google

तौ हस्तौ जघनस्थलं स्तनयुगं ते सन्दधानौ च यौ
तद्भावं तपसार्जितं रतिसुखं प्राप्ताङ्गसङ्गञ्च यत् ॥४४॥

त्वद्दिव्यपीनस्तनयुग्ममास्यं
त्वच्चारुरूपं जघनस्थलञ्च ।
त्वत्पीवरं रम्यनितम्बबिम्बं
मज्जीवनं जीवयतिस्म कान्ते ! ॥४५॥

निशावशेषे रमणाभिलाष-
सिद्धिस्तवासीत् किमतःपरन्तु ।
यथा न जानाति जनोऽपि कश्चित्
तथा तथा याहि पुनस्त्वमेहि ॥४६॥

तवास्तु मेऽनुग्रह एष देवि !
त्वदङ्गसङ्गात् सफलं हि जन्म ।
न च प्रिये मां विजहासि नूनं
मनोव्यथाभिंषजमत्र नास्ति ॥४७॥

न स्नानं नच भोजनं न पठनं नान्यत्र सौख्यं रति-
र्नान्यस्त्रीजनसेवनं नच कथा निद्राविलासोद्यमः ।
किन्तु त्वां परिचिन्तयामि सततं ध्यानेन चेतःस्थितां
स्वप्नालोकनकामकेलिविधिना जीवामि कान्ते ! तव ॥४८

रात्रिः कालयुगोपमा मलयजो गन्धानिलः किं विषं
सोमः सूर्य्य इवाभवन्मलयजालेपः स्फुलिङ्गोपमः ।
तिक्तः सुस्वरगीतवाद्यपरभृत्याराववतादिध्वनि—
र्वज्रस्याहतिरेव कर्णयुगले विच्छेदतो मे तव ॥४९॥

दृष्टं तज्जघनस्थलं स्तनयुगं लज्जाभरव्याकुला
बाला सत्कवरीसुपुष्पविलसन्मालाहृते दीपके।
चञ्चद्रत्नसुतेजसा समभवद्दीपोपमेन स्फुटं
दृष्ट्वाकान्तिगुणाधिकं स्मितमुखी सा त्यक्तलज्जाभवत् ॥३९॥
सत्पानं सुमनः स्रजश्च मधुरालापश्च पादद्वये
सौवर्णध्वनि नूपुरद्वयमिदं कर्पूरपर्णानि च।
कर्पूरागुरुचन्दनादिरचनासीत्कारनादाः कथा
एतान्याभरणानि किं निधुवने प्रोत्साहयन्ति स्मरम् ४०

शृङ्गारमेतद्विपरीतमस्याः
समाचरन्त्या नृप राजपुत्र्याः।
कर्णे शशी कुण्डलरूपो
गण्डस्थलीं चुम्बति किं स कामी ॥४१॥

उत्तुङ्गस्तनयुग्मनिर्दयदृढाश्लेषेण तेऽद्य प्रिये!
दन्ताघात नखक्षतैः सुमधुरालापैस्तथा चुम्बनैः।
नानाबन्धविनोदिताधिकरसेनैतत् कृतं सार्थकं
गात्रं मे पुरुषायितेन शमिता कन्दर्पबाणव्यथा ॥४२॥
यद्वक्त्रं मुखरञ्च कुण्डलयुगं लोलायमानं प्रिये!
निःशब्दं वहतीह नूपुरयुगं यद्यत्कृतं भाविनि!।
निःशब्दा कटिमेखला घनरवं विस्तापयन्ती स्मरं
कुर्वन्ती जयडिण्डिमध्वनिमसौ शृङ्गारसत्ताण्डवे ॥४३॥
त्वद्वक्त्रं रुचिरानने! त्वदधराद्दिव्यामृतं स्वादितं
याभ्यां ते नयने निचोलरहितं सर्वाङ्गमालोकितम्।

Digitized by Google

विधेस्तु जानामि सुकौशलत्वं
त्वद्रूपकल्पा यदि दृश्यतेऽन्या ॥२३॥
उक्तं त्वया मदनसुन्दर! पूर्वमस्मत्-
सन्दर्शनाय ननु साम्प्रतमेव दृष्टम्।
गच्छ स्वकीयभवनं त्वरितश्च पश्य
प्राणेश्वरीं तव मनोरथसिद्धिरस्तु ॥२४॥
त्वमेव मे भूपतिजे! निवास-
स्त्वमेव जीवेश्वरि! नास्ति मेऽन्या।
प्रसन्नता ते सकलेष्टसिद्धि-
र्मनोजसम्मोहिनि! मामव त्वम् ॥२५॥
तव नयनकटाक्षक्षिप्तबाणव्रणार्त्तां
मम तनुमनुरक्ते! जीवय त्वौषधेन।
त्वदधरमधुपानं क्षेममेकं परस्तु
स्तनजघनविलग्नालिङ्गनं गात्रलेपः ॥२६॥
क्रीडार्थं मदनातुरा प्रियतमा सञ्जातलज्जादरा
कान्तं केलिनिकेतनं नृपसुता नीत्वात्मशय्योपरि।
संस्थाप्यागुरुचन्दनं सुकुसुमं कर्पूरपूगं पुरो-
दत्वा प्रीतिसखीजनैः प्रहसिता कान्तेन सम्मानिता ॥२७॥
सव्रीडां च्छि विनिर्गतां प्रियसखीं दृष्ट्वा स कामातुर-
स्तस्याः पीनघनस्तनोरुयुगलादाकृष्य चेलांशुकम्।
कृत्वालिङ्गनचुम्बनं नृपसुतां पीत्वाधरं ताड़नं
मन्दं दन्तनखक्षतानि कुरुते क्षोभश्च मीत्यास्ततः ॥२८॥

तव किमु सुसमीक्ष्य व्रीडया पद्मषण्डम्
सरसि सलिलपूर्णे मग्नुकामं विवेश॥ २७॥
ज्योत्स्ना दिवं गच्छति वाञ्छितस्य
सिद्धिर्भवेत् कर्म्मबलेन पुंसाम्।
पुनः पुनर्व्वीक्ष्यमिदं सुलभ्यम्
बुभुक्षितः किं द्विकरेण भुङ्क्ते॥ २८॥
प्राणाधिके! प्रियतमे! तव रूपरज्जु-
बद्धोऽस्मि संप्रति कथं भवने वसामि।
राजात्मजे! त्वमसि सुन्दरि कर्म्मरूपा
त्वत्प्रीतिरम्यसुरतैर्म्मम कार्य्यसिद्धिः॥ २९॥
चन्द्रानने! श्रीफलपीनतुङ्ग-
रम्यस्तनि! स्मेरसुधांशुवक्त्रे।
विद्याविनोदे! सुविचक्षणा त्वं
स्त्रीरत्नभूते! मयि भोः प्रसीद॥ ३०॥
कामाभिराम कामार्त्त प्रीतिविश्रम्भभाजनम्।
साकं सख्या समागच्छ त्वत्तमार्गोऽन्यरूपधृक्॥ ३१॥
अद्यैव पुण्यदिवसो मम देवि! बाले!
तत्पादपङ्कजयुगं ह्यवलोक्यते यत्।
रम्यातिपीनजघनस्तनि! सेवकं मां
मुग्धे! विधेहि! मदयेऽधरसीधुलभ्यम्॥ ३२॥
गुणाकरस्ये। विधानमत्र
त्वं निर्म्मिता देवि! तथा विधात्रा।

Digitized by Google

This book should be returned to the Library on or before the last date stamped below.

A fine of five cents a day is incurred by retaining it beyond the specified time.

Please return promptly.

MAR 20 '63 H
CANCELLED
20 '68 H
CANCELLED
WIDENER
BOOK DUE
JUL 1985
CANCELLED
STALL-STUDY
CHARGE
CANCELLED
WIDENER
OCT 19 2002
BOOK DUE
CANCELLED

3 2044 058 2

Digitized by Google

Digitized by Google

चन्द्रो द्वादशभास्करः समभवद्रात्रिर्युगानां शतं
मिष्टं तिक्तरसं विलेपनमहो दीप्तानलो मे तव।
विष्कं दाम्मलयानिलः प्रियतमे! किं कालकूटः श्रुतौ
गीतादिध्वनिरेव वज्रसदृशोऽरण्यं विचित्रं गृहम् ॥५०॥
मानं मानिनि! मुञ्च देवि! दयिते! मिथ्या वचः श्रूयते
किं कोपो निजसेवके यदि वचः सत्यं त्वया गृह्यते।
दोर्भ्यां बन्धनमाप्नु दन्तदलनं पीनस्तनास्फालनं
देोषश्चेन्मम ते कटाक्षविशिखैः शस्त्रैः प्रहारं कुरु ॥५१॥
नानाकथा कौतुककेलिभिः सा सार्द्धं तु तेनैव रमेत नित्यम्।
हर्म्ये सुरम्ये रमणेन युक्ता वरासखीभिः परमप्रियाभिः ॥५२॥
कामार्त्तो नवयौवनः कविवरो भूपालपुत्र्या समं
नानाबन्धविनोदनिर्भररतिक्रीड़ारसानन्दितः।
गत्वान्तःपुरतो वहिर्विलसितो राजाग्रतो नीयते
चौरो राजनियोजितैःसुपुरुषैश्चारैरुपायक्षमैः ॥५३॥
राजा तानपि सेवकान् सुवसनालङ्कारभूषीकृतान्
कृत्वा प्राज्ञु विपक्षकं खरतरं खड्गं समानीय ते।
नीत्वा तं भवनाद्वहिर्विलसितं राजात्मजं साहसं
दृष्ट्वा संस्मर देवतामिति तदाप्यचुः स चौरोऽवदत् ॥५४॥

इति विद्यासुन्दरं समाप्तम्।

सम्पूर्णम्।

Digitized by Google

तौ हस्तौ जघनस्थलं स्तनयुगं ते सन्दधानौ च यौ
तद्गात्रं तपसार्ज्जितं रतिसुखं प्राप्ताङ्गसङ्गञ्च यत् ॥४४॥

त्वद्दिव्यपीनस्तनयुग्ममास्यं
त्वचारुरूपं जघनस्थलञ्च।
त्वत्पीवरं रम्यनितम्बबिम्बं
मज्जीवनं जीवयतिस्म कान्ते! ॥४५॥

निशावशेषे रमणाभिलाष-
श्चित्तस्तवासीत् किमतःपरन्तु।
यथा न जानाति जनोऽपि कश्चित्
तथा तथा याहि पुनस्त्वमेहि ॥४६॥

तवास्तु मेऽनुग्रह एष देवि!
त्वदङ्गसङ्गात् सफलं हि जन्म।
न च प्रिये मां विजहासि नूनं
मनोव्यथाभैषजमन्य नास्ति ॥४७॥

न स्नानं नच भोजनं न पठनं नान्यत्र सौख्यं रति-
र्नान्यस्त्रीजनसेवनं नच कथा निद्राविलासोद्यमः।
किन्तु त्वां परिचिन्तयामि सततं ध्यानेन चेतःस्थितां
स्वप्नालोकनकामकेलिविधिना जीवामि कान्ते! तव ॥४८

रात्रिः कालयुगोपमा मलयजो गन्धानिलः किं विषं
सोमः सूर्य्य इवाभवन्मलयजालेपः स्फुलिङ्गोपमः।
तिक्तः सुस्वरगीतवाद्यपरभृत्पारावतादिध्वनि—
र्वज्राहतिरेव कर्णयुगले विच्छेदतो मे तव ॥४९॥

Digitized by Google

दृष्टं तन्वघनस्थलं स्तनयुगं लज्जाभरव्याकुला
बाला सत्कबरीसुपुष्पविलसन्मालाहते दीपके।
चञ्चद्रत्नसुतेजसा समभवद्दीपोपमेन स्फुटं
दृष्ट्वा कान्तिगुणाधिकं स्मितमुखी सा त्यक्तलज्जाभवत् ॥३९॥
सत्पानं सुमनः स्रजश्च मधुरालापश्च पादद्वये
सौवर्णध्वनि नूपुरद्वयमिदं कर्पूरपर्णानि च।
कर्पूरागुरुचन्दनादिरचनासीत्कारनादाः कथा
एतान्याभरणानि किं निधुवने प्रोत्साहयन्ति स्मरम् ॥४०॥
शृङ्गारमेतद्विपरीतमस्याः
समाचरन्त्या नृप राजपुत्र्याः।
कर्णे मणी कुण्डलकं प्रकम्पो
गण्डस्थलीं चुम्बति किं स कामी ॥४१॥
उत्तुङ्गस्तनयुग्ममिह यद्गाढाश्लेषेण तेऽद्य प्रिये!
दन्ताघात नखक्षतैः सुमधुरालापैस्तथा चुम्बनैः।
नानाबन्धविनोदिताधिकरणेनैतत् कृतं सार्थकं
गात्रं मे पुरुषायितेन शमिता कन्दर्पबाणव्यथा ॥४२॥
यद्वक्त्रं मुखरञ्च कुण्डलयुगं लोलायमानं प्रिये!
निःशब्दं वहतीह नूपुरयुगं यद्यत्कृतं भाविनि!।
निःशब्दा कटिमेखला घनरवं विस्मापयन्ती स्मरं
कुर्वन्ती जयडिण्डिमध्वनिमसौ शृङ्गारसत्ताण्डवे ॥४३॥
त्वद्वक्त्रं रुचिरानने! त्वदधराद्दिव्यामृतं स्वादितं
याभ्यां ते नयने निमेषरहितं सर्वाङ्गमालोकितम्।

विधेस्तु जानामि सुकौशलत्वं
त्वद्रूपकल्पा यदि दृश्यतेऽन्या ॥२३॥

उक्तं त्वया मदनसुन्दर! पूर्वमस्मत्-
सन्दर्शनाय ननु साम्प्रतमेव दृष्टम्।
गच्छ स्वकीयभवनं त्वरितञ्च पश्य
प्राणेश्वरीं तव मनोरथसिद्धिरस्तु ॥२४॥

त्वमेव मे भूपतिजे! निवास-
स्त्वमेव जीवेश्वरि! नास्ति मेऽन्या।
प्रसन्नता ते सकलेष्टसिद्धि-
र्मनोजसम्मोहिनि! मामव त्वम् ॥२५॥

तव नयनकटाक्षक्षिप्तबाणव्रणार्त्तां
मम तनुमनुरक्ते! जीवय त्वौषधेन।
त्वदधरमधुपानं क्षेममेकं परन्तु
स्तनजघनविलग्नालिङ्गनं गात्रलेपः ॥२६॥

क्रीडार्थं मदनातुरा प्रियतमा सञ्जातलज्जादरा
कान्तं केलिनिकेतनं नृपसुता नीत्वात्मशय्योपरि।
संस्थाप्यागुरुचन्दनं सुकुसुमं कर्पूरपूगं पुरो-
दत्वा प्रीतिसखीजनैः प्रहसिता कान्तेन सम्भाषिता ॥२७॥

सव्रीडां हि विनिर्गतां प्रियसखीं दृष्ट्वा स कामातुर-
स्तस्याः पीनघनस्तनोरुयुगलादाकृष्य चेलांशुकम्।
कृत्वालिङ्गनचुम्बनं नृपसुतां पीत्वाधरं ताड़नं
मन्दं दन्तनखक्षतानि कुरुते क्षोभञ्च नीव्यास्ततः ॥२८॥

Digitized by Google

तव किमु सुखमीक्ष्य क्रीडया पद्मचन्द्रम्
सरसि सलिलपूर्णे मर्त्तुकामं विवेश ॥ २७ ॥

ज्योत्स्ना दिवं गच्छति वाञ्छितस्य
सिद्धिर्भवेत् कर्म्मबलेन पुंसाम्।
पुनः पुनर्वीक्ष्यमिदं सुलभ्यम्
बुभुक्षितः किं द्विकरेण भुङ्क्ते ॥ २८ ॥

प्राणाधिके ! प्रियतमे ! तव रूपरज्जु-
बद्धोऽस्मि संप्रति कथं भवने वसामि।
राजात्मजे ! त्वमसि सुन्दरि कर्म्मरूपा
त्वत्प्रीतिरम्यसुरतैर्मम कार्य्यसिद्धिः ॥ २९ ॥

चन्द्रानने ! श्रीफलपीनतुङ्ग-
रम्यस्तनि ! स्मेरसुधांशुवक्त्रे।
विद्याविनोदे ! सुविचक्षणा त्वं
स्त्रीरत्नभूते ! मयि भोः प्रसीद ॥ ३० ॥

कामाभिराम कामार्त्त प्रीतिविश्रम्भभाजनम्।
साकं सख्या समागच्छ त्वत्कामार्गोऽन्यरूपधृक् ॥ ३१ ॥

अद्यैव पुण्यदिवसो मम देवि ! बाले !
तत्पादपङ्कजयुगं ह्यवलोक्यते यत्।
रम्यातिपीनजघनस्तनि ! सेवकं मां
मुग्धे ! विधेहि ! मदयेऽधरसीधुलुब्धम् ॥ ३२ ॥

गुणाकरस्ये। विधानमत्र
त्वं निर्म्मिता देवि ! तथा विधात्रा।

Digitized by Google

स्वरूपसन्दर्शनमेव देहि चक्षुर्द्वयं मे सफलीकुरुष्व ।
तपःकृतं येन नरोत्तमेन तेनाङ्गसङ्गः स्तव लभ्यते च ॥२१॥
प्रपूर्य्यते किं ननु दर्शनेन विनापि कुक्षिर्वरभोजनेन ।
सखण्डमारीचपयोभवेन रसान्वितस्वादुसुधोपमेन ॥ २२ ॥

भो देवि ! सुभ्रु शशिशीतलकोमलाङ्गि !
नानाविभूषणविभूषितचारुगात्रि ।
आज्ञां विधेहि किमहं करवाणि हृद्ये
प्राणप्रदेऽद्य परिपूरय मेऽभिलाषम् ॥ २३ ॥

विद्याविनोदरसिके ! सुरतैकपात्रे !
सर्व्वाङ्गसुन्दरि ! धराधिपतिप्रसूते ।
यद्यस्ति मेऽद्य सदये न दया तवैव
त्वत्प्राप्तये सुरसरित्सु तनुं त्यजामि ॥ २४ ॥

सुरत्नकैरेष विनोदसौधः
सुदुर्गमोऽन्तःपुरचारिभिश्च ।
सखीजनैरिङ्गितहेत्वभिज्ञैः
कथं हि ते वाञ्छितसिद्धिरस्तु ॥ २५

प्रसन्नतायां त्वयि राजकन्ये !
भवेत् सुसिद्धिर्म्मम वाञ्छितस्य ।
अभीष्टदा कल्पलतेव भासि
सुकेशि ! चिन्तामणिरेव किं त्वम् ॥ २६ ॥

मृदुलकनककान्ति श्वाससौरभ्यरम्यं
वदनकमलमेतन्नवमत्तद्विरेफम् ।

विशालचक्षो ! पद्मिनि ! पद्मगन्धे !
प्रमत्तमातङ्गगतेऽनुरक्ते ।
नृपात्मजे ! जीवय मा मनोज्ञे !
मनोजबाणव्रणखिन्नगात्रम् ॥ १५ ॥
मृदादिपात्रे सलिलं यथा स्यात्
तृष्णाहरं स्वादु सुशीतलञ्च ।
सुवर्णरत्नैरपि निर्म्मिते तु
गतं सुपात्रेऽम्बु तथा न किं स्यात् ॥ १६ ॥
स्वर्णमरत्नचयनिर्म्मितवारिपात्रे
गाङ्गं सुनिर्म्मलहिमं परमं सुरम्यम् ।
कर्पूरवासितजलं सुखदं यथा स्यात्
कौपं पयः किमु भवेन्न तथाविधानम् ॥ १७ ॥
वलित्रयाबद्धसुसूक्ष्ममध्ये !
विशालवक्षोजधनस्वरूपे ! ।
मनोजबाणौघविषार्त्तगात्र-
मनुग्रहं मां कुरु सम्प्रति त्वम् ॥ १८ ॥
कन्दर्पबाणावशचित्तवृत्ते !
किमर्थमेवं वदसि स्मरार्त्तं ! ।
ज्ञातव्यमेवं यदि मे च पिता
कथं त्वया कामुक ! जीवितव्यम् ॥ १९ ॥
जघान बाणैर्दशभिर्दशास्य-शिरांसि सीताहरणे स रामः ।
त्वदङ्गसङ्गाय सदानुरक्ते प्रयातु मे मस्तकमेकमेव ॥२० ॥

धनं त्वमेवात्र सुवर्णवर्णे! स्त्रीरत्नभूते! मम रत्नभूषा।
सेवापि ते भूपतिजे! प्रसन्ने! सौख्यप्रदे! मोक्षदवासुदेवः ॥८॥
प्रिये! सदा पूर्णतरं मनोज्ञं ते विम्बतुल्यं मुखचन्द्रमण्डलम्॥
विलोक्य सव्रीडतया निशापतिर्गतः प्रतप्तोऽम्बुधेर्जलान्तरम्॥९॥

किं केतकीपरिमलोल्लसितगन्धलुब्धो
गुञ्जन् भ्रमन् भ्रमर वाञ्छसि रन्तुमेताम्।
यत् कण्टकैः परिवृतामतुलामगम्यां
संरचितां व्रज निकुञ्जलतां सपुष्पाम्॥१०॥

यत् केतकीकुसुमसौरभगन्धलुब्धो
भृङ्गस्तदर्पितरसोदितचित्तवृत्तिः।
किं कण्टकैर्भवतु दुर्गम एव किंवा
जानाति शुभ्र! वरकुञ्जलतां न चेच्छत्॥११॥

त्वदर्तुल स्वच्छसुवर्णकान्ति रम्यस्तनश्रीफलयुग्ममेतत्।
दृष्ट्वा वने श्रीफलसङ्कुलं किं लज्जाभिरालम्बितमेव वृक्षे॥१२

हे कोकिलाखिललतासु फलानि सन्ति
संत्यज्य तानि ननु चूतलतां सपुष्पाम्।
किं काङ्क्षसीह रमितुं फलभोक्तुकामः
न ज्ञायसे नृपतिसेवकभीषणीयाम्॥१३॥

यथातकोऽन्यानि जलानि हित्वा
धाराजले प्राप्तमतिं करोति।
तथा पिकश्चूतफलानि तानि
रम्याणि दृष्ट्वान्यफलं जहाति॥१४॥

Digitized by Google

विद्यासुन्दरम्।

कालिन्दीतटसन्निधावुपवने गोपाङ्गनालिङ्गन-
क्रीडाकर्षणवेणुनादरसिकः संमूर्च्छितो वेणुना।
स्थित्वा कल्पमहीरुहाश्रितलतावासे सुपुष्पान्विते
नानाभूषणभूषितो विहसितः कृष्णः प्रसन्नोऽस्तु ते॥ १॥
राजात्मजे कामकलाकलापे संगीतविद्यारसिकेऽम्बुजाक्षि।
हेमप्रभे पीननितम्बबिम्बे बिम्बोष्ठि रम्भोरु मयि प्रसीद॥२॥
गिरौ समाकर्ण्य मयूरनादं जगाद विद्या वचसा कुमारम्।
पद्मेन कोऽयं वद रौति शैले मधुस्वरं प्राणवरो यदि स्याः॥३
गीमध्यमध्ये मृगगोधरे हे सहस्रगोभूषणकिङ्कराणाम्।
नादेन गोभ्र्च्छिखरेषु मत्ता नदन्ति गोकर्णशरीरभक्षाः॥४॥
स्वर्योनिभक्षध्वजसम्भवानाम् श्रुत्वा निनादं गिरिगह्वरस्थः।
तमोऽरिबिम्बप्रतिबिम्बधारी रुराव कान्ते पवनाशनाशः॥५॥

बालेऽबलारत्नदयार्द्रचित्ते
प्राणेश्वरि श्रीमति सुप्रसन्ने।
दासोऽस्मि ते सुन्दरि राजपुत्रि
प्राणानि रक्षस्व हि मे मृगाक्षि॥ ६॥
हे पान्थ चिन्ताकुलितातिमूढः
संस्तौषि किं मामबलां कृशाङ्गीम्।
अर्थं यदि प्रार्थयसे भजेथं
मोक्षप्रद लक्ष्मीपतिमम्बुजाक्षम्॥७॥

Digitized by Google

मारुतवेगादुद्गतवत्सवशिखण्डानां
गुञ्जापाङ्कविडम्बितनवशशिखण्डानाम् ।
संघाः शिखिनां प्रायाः शुद्धे कायन्ते
स्ववचनमिति मन्वानाः शुद्धे कायन्ते ॥४८॥
पश्य शिला. शैलेऽस्मिन्नुषावपमानौ
याम्यत्नुसुखवर्णितसुनाम भावपमानौ ।
भ्रमता भ्रमितरिपुस्त्रीशृंगारोहित्वं
याचितद्रवाम्बुनादैः शृङ्गारोहित्वम् ॥४९॥
नदति जलदैर्निदाघे सारङ्गोपास्ते
बिभ्रति केतकवनैः सारङ्गोपास्ते ।
संप्रत्ययमकालो न वाहिनीपानां
त्वमुखसुरभीनां च श्रीर्नवा हि नीपानाम् ॥५०॥
इत्याह पीतवाससमायतनेत्रस्तं
कंसासुरात्पशुमतामायतनेत्रस्तम् ।
हसिताता विमलतया स हली लाजानां
छायां विकिरन्नयनैः सह लीलाजानाम् ॥५१॥

इति श्रीवृन्दावनं नाम यमककाव्यं
मानाङ्ककृतं समाप्तम् ।

Digitized by Google

अथ च कलशोभायां पतिरिव कान्तारमखिलशोभायाम् ।
मुघलीढं तुरगघ्नं वीक्ष्य गिरिं प्राह कुटजरन्तुरगहनम् ॥३७
विदधच्छन्नः छन्नः कुटजैः चरति प्रगीतगोपी गोपः ।
प्रस्रवणशुभ्रो दभ्रः सृष्टिविशेषो यमतुलधातुः धातुः ॥ ३८ ॥
पश्य श्यामा श्यामा वनस्थली भाति वलवदुच्छ्वसा हृष्टा ।
प्रहरा धारा धारा धुन्वन्ति मेघाश्च शिरांसि हन्ते हन्ते ॥ ३९ ॥
अश्मसु कन्दलदशनैः वहमति दरीमुखैश्च कन्दलदशनैः ।
ह्रीयतोऽच्युत हेममयः तव च रवीन्दोरिवाचलो हेममयः ॥ ४० ॥
शकुनिपताकाशबलं घनच्छन्दवपुषा पताकाशबलम् ।
रूपं हारीतानां श्रियं वनानां च मत्तहारीतानाम् ॥ ४१ ॥
पूर्वं स्म हरे शेषे याम्मेघान् वीक्ष्य भूश्रमहरे शेषे ।
जनितरतिरसावसितैः आराध तडिद्गुणाक्षवरसावसितैः ॥ ४२
कार्मुकवलयमनूनं दिशसि यत्तोऽसितोऽसि वलयमनूनम् ।
दृत्याशामुखरतया घनराज्या हरिरिवोच्यते मुखरतया ॥ ४३ ॥
नतवोपरिवर्हेण ग्रथिताभरणस्य गोपपरिवर्हेण ।
छायामसितापघनः सुरचापाङ्कः परैरकसितापघनः ॥ ४४ ॥
हृतगिरिधातुरसङ्गा रुध्वा तव भुजसमोर्मि धातुरसङ्गा ।
कूलानि घनव्यमुना वहति जलमसौ विसर्पति घनव्यमुना ४५
पवनैरजसा ध्वस्तं विश्वाणां नीपमाल्यरजसा ध्वस्तम् ।
पश्यैकान्तरलतां स्थलीमितां वर्हियोगकान्तरलताम् ॥ ४६ ॥
वहने संस्तवन नवा जेतुमलममोघ संस्तवन नवा ।
मधुकरविश्वसितानि श्रितमिह कुटजानि जनितविश्वसितानि ॥ ४

कर्णिकाभिरपां सुखरा वृन्दावनमारुता बभुरपांसुखरा।
यमुना नवमुद्रकपटं भेजे व्रजलोकमाश्रिता मुदकपटम् ॥२८॥
आतपनवसुदे वसुतौ व्रजस्य वाश्रे ततोऽक्लि वसुदेवसुतौ।
अन्तसमधुनीपवनं वृन्दावनमविशतां समधुनीपवनम् ॥२९॥
शिखिसर्वस्वधरस्य ह्रि प्रियतां जग्मतुर्हरेः स्वधरस्य।
भ्रमरकदम्बकरवा वेणुः प्रावृट् तथा कदम्बकरवा ॥३०॥
अंशादामोदस्य स्थानमवभ्रंशि नीपदामोदस्य।
औलंलितमथो व्रजतः कापि बभूवास्य मुष्टिकमथो व्रजतः ३१

घृतकामधुरैः मधुरैः
समरैस्थो मुदितवत्सवकुलैर्वकुलैः।
घातकेशिशिराः शिशिराः
स्थलीर्युताः प्रायशोऽस्तसुरभीः सुरभीः ॥३२॥

ता वृषभरणाभरणा स्तेनयुताः स्वयमिवांञ्जनभसा नभसा।
रेजुः सुतरां सुतरां यमुनामभितः सवञ्जुलता लता ॥३३॥
श्रेष्ठपदारोहिण्याः सुतोप्यलंघ्यमहिमा पदारोहिण्याः।
प्राप्य शरीरं तुङ्गां द्युतिञ्च स इवागतः शरीरं तुङ्गाम् ॥३४॥

निचुलवतीं ककुभानां
समो मतिक्षान्तिकान्तिभिः ककुभानाम्।
अंशेन स्वनवद्यां
अजं वहन्नपिबदलिकुलं स्वनवद्याम् ॥३५॥

हृष्टो द्रवलाषितया लिम्पन्निव दिङ्मुखानि धवलाषितया।
बहुधा पवनेच्छायां प्रावृषि मेघानुयातपवनेच्छायाम् ॥३६॥

Digitized by Google

विद्युद्गौरी हारान् मक्तेव घनेष्वभूच्च सौरीक्षाग्रम् ।
सुखभवबलाकायेषु क्षपितचिरप्रोषितबलाकायेषु ॥ १८ ॥

जात्या सज्जालकया यूथिकया चाप्ययुवतिसज्जालकया ।
कमलानि समर्जीभ्यां भ्रमरः कृष्णो बलादिव समर्जीभ्याम् ॥ १९ ॥

व्याप्य दिशो दश निभृतः क्षणमपि तस्थौ शासनादसविभृतः ।
संशमितागवलस्य ध्वनत् घनौघसमप्रभोगवलस्य ॥ २० ॥

भ्रमर इव कदम्बरजः त्वमितीव वदन् स्वनादसकदम्बरजः ।
कृतं विभ्रमरचितां नलिनीं पथिकाङ्गनाश्च विभ्रमरहिताम् ॥ २१ ॥

ज्योत्स्नालं घनमलिना न बभौ क्रियते स्म कुटजवनमलिना
बलवानवपूरोहन् चचाम नदीतटांश्च नवपूरोऽहन् ॥ २२ ॥

शिखिषु समुत्सु कमनसः
मतिस्वरमुद्धति च खे समुत्सुकमनसः ।
व्यसुखसपवनजवना
वापीहंसाश्च न पवनजवनाः ॥ २३ ॥

शब्दो नादेयानां कलुषतया नो शशाम नादेयानाम् ।
फेनो वा नीरायामाकृष्टोभयतटान्तवानीरायाम् ॥ २४ ॥

प्राप्य सखद्योतायां निशि विद्युज्जितमहत्सखद्योतायाम् ।
प्रियतमसदनं गेहा इवला भयमुत्ससर्ज सदनक्लेशा ॥ २५ ॥

पर्वतकटकेशानां नीपरजः कपिलकुम्भकटकेशानाम् ।
कुम्भनदीनगजानां हर्षो जज्ञे महानदीनगजानाम् ॥ २६ ॥

विविधोपलराशिखरं पिदधे गोवर्द्धनं त्वपैराशिखरम् ।
कालोऽगन्धारावान् अकरोत्कुटजशिखिवाश्च गन्धारावान् ॥ २७

ग्रहपतिरिव हिमहीनः कान्त्याभूदुग्रसेन इति हि महीनः।
प्रकृतिभिररिहेतीह स्वयं हृतः संहताभिररिहेतीह ॥७॥
बलभिद्दरीभागानां जेताविन्ध्यसवदरीभागानाम्।
मौक्तरा दायादस्य प्रभवो यस्य नमश्च दायादस्य ॥८॥
यो भोक्तेव सुधायाः वर्यं कविः प्रश्निता च वसुधायाः।
यस्य परामुद्धीनां तटेषु दत्तिं प्रपद्यते मुदधीनाम् ॥९॥
भरत इव विभावसवः सर्वेषां प्राणिनामथ विभावसवः।
यस्मिन्वसुधामवति स्थिरा बभूवुः समाश्च वसुधामवति ॥१०॥
अनुकृत्य रघो राज्ञः प्रत्याख्यातायनः प्रभुरघो राज्ञः।
योगिभिरित्यस्तमितः केशवमाप्नोमि नायमस्तमितः ॥११॥
तस्येयमकार्येभ्यः च्युतेन तनयेन रचितयमकार्येभ्यः।
दत्ता वाक् स्वाकृतिना मानाङ्केन हरिसंज्ञया स्वाकृतिना ॥१२
अथ जग्मतुरवमत्तौ वयसा वृन्दावनान्तरं रवमत्तौ।
हरिराहितकुमुदसितःस्निग्धतराकृतया हली कुमुदसितः १३
उदधिपयोनिर्घोषं तत्र निवेश्याच्युतोऽपयोनिर्घोषम्।
अविविक्तितकं सबलः चचार भेजे च यामुनकं सबलः ॥१४॥
प्रियसुहृदामोदरयोः ललतो रथरोहिणेयदामोदरयोः।
कृतपद्मवृन्दावनयोः घर्मः क्षयमापदायतवृन्दावनयोः ॥१५॥
क्षोभमगादभ्राणां स्तनितैर्विद्युल्लतामगादभ्राणाम्।
मुनिरपि नीरागमनाः सरितश्चासंप्रवृत्तनीरागमनाः ॥१६॥
रौन्द्रं कन्दर्पस्य प्रथमो हेतुर्बभूव कन्दर्पस्य।
स्त्रीहृदयान्यभिदन्तःमयूरैः प्राप्य सुहृदो घनानभिदन्तः ॥१७

Digitized by Google

ममैषा विज्ञप्तिर्नयनपदवीमेत्य सहसा
सदा सानन्दं तं विरचयतु नित्यं रमयतु ॥
प्रशस्तिपत्रिका यत्नात् श्रीतारानाथशर्मणा ।
द्विजेन रचिता तुभ्यं नृपस्वास्तु चिरं शिवम् ॥

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यविरचिता
राजप्रशस्तिः समाप्ता ।

वृन्दावनयमकं ।

वरदाय नमो हरये पतति जनो यं स्मरन्नपि न मोहरये ।
बकशकचक्रं दहता मनसि दितिर्येन दैत्यचक्रं दहता ॥१॥
स्वमिव भुजं गवि शेषं व्युपधाय स्वपिति यो भुजङ्गविशेषम् ।
नवपुष्करसमकरया श्रीयोर्मिपंक्त्या च सेवितः समकरया ॥२॥
येन च बलिरसुरोधः समवस्थापितः क्षितेरसुरोधः ।
पृथुकः सन्निभवदनः चिक्षेप च यः सरोजसन्निभवदनः ॥३॥
विशेषकम् ।
स्तौमि च लाङ्गलवन्तं देवं यः संयुगे च लाङ्गलवन्तम् ।
कपिमकरोदसुरहितं द्विविदं दृढमुष्टिताड़नादसुरहितम् ॥४॥
आपानपरम्परया भेजे यं रेवती जितपरं परया ।
बिभ्रतमालानाभौ बाहुमशकुसुमाश्च माला नाभौ ॥५॥
यो रूढमदारुणया तन्वा प्रणतं प्रतिद्विषमदारुणया ।
कर्षितदानवकुलया विभवौ गन्धर्विजितेभदानवकुलया ॥६॥

सर्व्वेषां तापनाशाय दक्षिणो मलयाचलः।
कथं न मयि दाक्षिण्यं कुर्य्यात्दाशंसनं मम॥

त्वं दानवारिपरिषेकनमाजकर्मा
नित्यादिकर्म्मसु तथा कृतदानधर्म्मा।
लोकादिरक्षणविधौ कृतधर्मवर्म्मा
दानादिनाश्रितजने कृतदेवकर्मा॥

उज्जृम्भते हि सरसां कमलोदयार्थं
भास्वान् दिवेति विदितं नृप! लोकमध्ये।
त्वं सर्वदा तु जगतां किल सर्वदाना-
दुज्जृम्भसे नरपते! कमलोदयार्थम्॥

उदयेनैव सविता जगद्धर्मप्रवर्त्तकः।
अर्द्धोदयेऽसि नृपते! सर्व्वधर्मप्रवर्त्तकः॥

असकृत् श्रुतोऽसि मनसा परिशीलितोऽसि
ध्यानेन मुद्रितदृशा च विलोकितोऽसि॥
तस्मात्तु ते परिचयो मयि वर्त्ततेऽद्य
त्वय्येव मे परिचयाय ममैष यत्नः।

तव गुणनिकरान्तं नैव गन्तुं समर्थो
वयमिति विरताः स्म श्रान्तियोगाच्च राजन्!।
कलयसि गुणलेशं दोषजालं जहासि
गुणिगणगुणलेशादाग्रतोषो भवान् यत्॥

गुणानामाधारे गुणिजनगुणग्राहकवरे
दयासारे पारेवचन मनुवर्य्यैकनिलये।

शास्त्रेषु प्रथितं सहस्रनयनत्वञ्चेति सूक्ष्मेक्षणात्
पौरस्त्येषु समादरो न च तवेत्येतद्धि चित्रं महत ॥
मित्रोदयाय यतसे सततं पुरस्तात्
तत्रस्यलोकनिवहांस्त्वयि रागयुक्तान् ।
मुक्ताव्यदेशनिकरेषु वसुप्रदोऽभूः
पौरस्त्यवासिषु कथं न वसुप्रसारः ॥
शिरोभिर्देवनान् मूर्ध्नि वसन्नयविभूषणात्।
गङ्गात्वमाश्रितो भूप ! निस्सङ्गत्वं न चाश्रितः ॥
रामलक्ष्मासेवनेन गङ्गासङ्गमनेन च ।
मित्रप्रियत्वात् यमुनाभावेऽपि तव शुद्धता ॥
सुधाऽर्थिर्न तु सर्वभक्षको द्विजराजो न कलङ्कभूषितः ।
धनदोऽपि कुबेरतां त्यजन् कमलेशोऽपि न वा जनार्दनः ।
कुशासनरतोऽपि त्वं कुशासनविवर्जितः।
दानवारिसेवकोऽपि दानदारिद्र्यवर्जकः ॥
कलयसि कलिमलनाशं भजसि च जगदावासम् ।
चलयसि विनतत्रासं रचयसि नृप ! सुरवासम् ॥
नानातीर्थसमाश्रयोद्विजकुलेनाराधितोभूयसा
शश्वत् सौरभशालिनां सुमनसामुल्लासहेतुस्तथा ।
गम्भीरोऽतिदुरासदोऽहितजुषां पद्मैकभूमिर्भवान्
मन्ये कोऽपि जलाशयोऽसि महतां तापस्य संशान्तये ॥
शङ्खचक्रपरिचिह्नितः करे पादयोर्ध्वजमुखादिलाञ्छितः ।
मालया,वनजया च शोभितो वैष्णव,त्वमखिलं त्वमाश्रितः ॥

Digitized by Google

विद्वानां वारणालोके गजराजत्वमागतः ।
तव नो रामवैरित्वं दाने न वारणास्तता ॥
भवान् शक्तिधरः साक्षात् सेनानीत्वमुपागतः ।
सुकुमारो महीपाल ! न च प्राप्तः कुमारताम् ॥
विभूतिभूषितो भूप ! तारानाथकृतेक्षणः ।
गामाश्रित्य शिवो भूत्वा न प्राप्तः कामवैरिताम् ॥
विद्वत्दानसहस्रसामनिरतो बाला च कण्ठे श्रितो
हस्ते साक्षकमण्डलुर्नरपते ! सूत्रं च बिभ्रत् गले ।
वेदानध्ययनादिभिर्वकुलयन्नुच्चैश्चतुर्भिर्मुखैः
त्वं ब्रह्मत्वमुपागतोऽपि रजसा नाक्रान्त इत्यद्भुतम् ॥
नित्यं सत्त्वसमाश्रितो द्विजगतिर्लक्ष्मीपतिर्भूपते !
देवानां हितकृत्सतां गतिरहो वैकुण्ठधामाश्रितः ।
गोलोकैकविभूषणं च शरणं भक्तस्य कामप्रसू-
र्विष्णुस्त्वं बलिदासतां न च गतो जानेऽतिचित्रं महत् ॥
धर्मेण राजसे यस्मात् ततस्ते धर्मराजता ।
प्रजासु दण्डधरता संमता न तु कालता ॥
श्रीदः पुण्यजनेश्वरश्च नृपते ! भूतेशबन्धुस्तथा
जातोऽपि प्रथितः कुवेरपदभाक् नैवासि चित्रं हि मत् ।
पाशाढ्यो नृप ! वाहिनीपतिरथो पश्चाद्दिगीशोऽपि यत्
तच्चित्रं न च वारुणीमधिगतो नो वा जडेशोऽभवान् ॥
जाने शुद्धमतङ्गजाधिपतितां जीवे च ते गौरवं
स्वर्गे त्राशिवलोकतां नरपते ! लोकाधिपत्यं तथा ।

तेजःसहस्रनिलयो जगतां पतिश्च
भास्वांश्च नो खरकरः प्रथितः पृथिव्याम् ॥
कलयन् सकलाः कलाः सदा रचयन् कौमुदमुद्विजृम्भणम् ।
द्विजराजोऽपि कलङ्कभामितां न च दोषाकरताञ्च नाश्रितः ॥
भूमिनन्दनतां बिभ्रत् रक्ताङ्गत्वञ्च धारयन् ।
मङ्गलोऽपि महीपाल ! वक्रत्वं न समाश्रितः ॥
द्विजवरगणराजं नन्दयन् सौम्यमूर्त्तिः
प्रथितबुधसमाख्यो रोहिणीनन्दनश्च ।
नरपतितिलकस्त्वं राजपुत्रत्वमाप्तः
खरतरकरयोगं नाश्रितस्त्वं कदाचित् ॥
गिरांपतिर्जिष्णुमतः कचान्वितस्तारापतिच्छिन्नशिखण्डिभूषितः ।
गुरुर्नियन्ताश्रमवृत्तिभिक्षणात् परं न चार्व्वाकमतप्रवर्त्तकः ॥
कविश्च काव्यप्रणयात् सदा त्वं नीत्यादिशास्त्रेषु च पारदृश्वा
सदोदयस्ते भुवि तीक्ष्णतेजःसम्पर्कता नास्ति मनाक् कदाचित् ॥
प्राणिहिंसाभयेनेव पद्भ्यां मन्दं चरन् भुवि ।
शनैश्चरोऽपि मित्रस्य नन्दनात् क्रूरता न ते ॥
छायया भूमिमाश्रित्य चन्द्रार्कौ तेजसा ग्रसन् ।
राहुत्वं प्राप्तवान् राजन् न चागुत्वमवाप्तवान् ॥
वैरिव्यूहविनाशनाय जगतामुत्पातकेतुर्भवान्
क्रान्तौ खेचरगास्त्वदीयवशगास्ते नापि पातो मतः ।
चित्रास्ते यतयः शिखाः समुदिता बुद्धेश्च वीर्य्यस्य च
जाने नासुरयोनिरद्भुतमिदं लोकेषु तद् विश्रुतम् ॥

Digitized by Google

यशःस्तोमे सोमे तव समुदिते भूमिवलये
तमोवृन्दं स्थानं क्वचिदपि यदा नाप नृपते!।
तदा भ्रामं भ्रामं वियति कृतलक्ष्यं गतमद-
स्तमोरूपेष्वेव स्थितमिति मुधा ज्योतिषकथा॥
सत्कीर्त्तिपूर्त्तिनिवहेन धरातले ते
वर्णान्तरापहरणात् धवलीकृतेऽस्मिन्।
वर्णेषु भेदरहिता इह सर्व्वलोकाः
चित्रं त्वदीयविषये नृप! वर्णभेदः॥
त्वदीयकीर्त्त्या सितया नृपाल! सर्व्वेषु वर्णेषु निवारितेषु।
चित्रं त्वदीये विषये समन्तात् सर्व्वेऽपि लोकाः किल लब्धवर्णाः॥
कुन्देन्दुसुन्दररुचा तव कीर्त्तिपूर्त्त्या
ध्वस्तं गुहास्थमपि यत् तम एतदेत्य।
व्योमापि तद्भयत्रणात् किल कीर्त्तिबन्धुं
चन्द्रं समाश्रितमदो न विधौ कलङ्कः॥
भूमण्डलादपहृता यशसेन्दुना या
तस्यापकारकरणाय कृतोद्यमा ते।
तद्बन्धुचन्द्रमनघं ग्रसतीव रोषात्
राहुच्छलेन किल भूप! तमस्ततिः सा॥
विश्वरूपपरिचिन्तयानिशं विश्वरूपधरतामुपेयिवान्।
यो हि यत्र मन आदधे चिरं तेन तस्य किल रूपमाप्यते॥
विश्वात्मकोऽपि यतसे कमलोदयार्थं
लोकेषु धर्म्मजननात् तमसो निरासात्।

Digitized by Google

यावन्तस्तु गुणा मम स्तुतिगतास्तावन्त एवोदिताः
वक्तव्यं क्षितिपाल! चापलमिदं सोढुः क्षमैवोचिता॥

अहो विधातुः करुणा प्रजासु ययाक्षराणीह समुत्ससर्ज।
येभ्योऽक्षरेभ्यो हृदयस्य भावः प्रकाशतेऽन्यस्य विबोधनार्थम्॥

भावं स्वात्मगुहाशयं न परथा वेद्यं परैर्व्यञ्जयन्
वर्णस्तोममहानिधिर्विधिकृतो लोकोपकाराय यत्।
तेनैव व्यवहारिणो वयमहो वर्णेषु सर्व्वे वशा
वर्णाद्यस्त्वमतश्च वर्णतुलया राजन् पुरो वर्ण्यसे॥

वर्ण्यन्ते विषया यैस्ते लोके वर्णा इतीरिताः।
ज्ञातेषु तेषु वर्णेषु सार्व्वज्ञ्यात् लब्धवर्णता॥

आरात्मकं दुःखमितीह लोके विष्णुर्यथाकारपदाभिधेयः।
नाशाय दुःखग्रहणात्तथैव राजंस्त्वमाकारपदेन वाच्यः॥

कं सुखं हि कुरुते प्रजापतिस्तेन तस्य विदिता ककारता।
सर्व्वलोकसुखकारता यतस्त्वय्यतस्तव ककारता मता॥

अतोऽसि वर्णादिरनाद्यवर्णो वर्गोत्तमश्चादिमवर्गरूपः।
ततो हि लोके मनुजेन्द्र! चित्रं सर्व्वं विरोधास्त्वयि नाशभाजः॥

प्रणयसे येन समस्तलोकैस्तेनैव लोके प्रणवोऽसि राजन्!।
धर्मार्थकामत्रयतत्परत्वात् त्रयीव मूर्त्तिर्भवतश्चकास्ति॥

शासनात् सर्व्वलोकानां शास्त्ररूपोऽसि भूपते!।
सर्व्वस्थितेर्धारणाच्च धर्म्म इत्यभिधीयसे॥

सर्व्वलोके राजमानः प्रकृतीश्चापि रञ्जयन्।
संगतार्थं राजशब्दं बिभ्रत् लोकेषु विश्रुतः॥

Digitized by Google

दोषानशेषानपहाय सम्यगबोधेन जीवन्नपि मुक्त एव ।
प्रारब्धकर्मक्षयतः परस्मादिदेहकैवल्यमवाप्नुहि त्वम् ॥

याथार्थ्यबोधेन निवृत्तमिथ्याज्ञानस्य दोषादिविवर्जितस्य ।
भवत्यनस्ते ब्रमणोऽप्रवृत्तेरात्यन्तिकी दुःखनिवृत्तिरास्ताम् ॥

प्रान्ते स्वान्ते निशान्ते तव वसतुतरां सर्व्वलोकैकसाक्षी
भूयोभूयोऽभिभूया रिपुकुलनिवहं सर्वधामैकधामन् ! ।
प्रत्यूहव्यूहराशिस्तव विलयमितो बुद्धयात्रास्तु भूयात्
भूपेभूपेऽनुरूपे भवतु च नितरां तेऽनुकम्पा सदैव ॥

सर्वप्रत्ययसङ्गता निगदिता सत्साधनैरन्विता
लिङ्गालिङ्गयुता विभक्तिवचनैर्नित्यं समुद्भासिनी ।
स्फोटात्मा प्रकृतिस्त्वदीयहृदये नित्यं जरीजृम्भताम्
नित्या ब्रह्ममयी विवर्त्तजगतामर्थात्मनामाश्रयः ॥

प्रजाः प्रजापाल ! पितेव पाया घोरादपायात् जगदेकमान्य ।
समस्तविज्ञानविवद्ध नार्थं लोकानशेषानिह शिक्षय त्वम् ॥

धर्मेषु चित्तं रमतां निरन्तरं कुकर्मवृत्तेश्च निवर्त्ततां तव ।
प्रजासु कल्याणकरी हृदन्तरे वृत्तिस्त्वदीया सततं विराजताम् ॥

माधुर्य्यादिगुणैजुषां सुवचसां रीत्यादिसंशोभिनां
सर्व्वालङ्कृतिशालिनां कलयसे सम्यक् रसास्वादनम् ।
सत्काव्यार्थविभावनैकनिपुणः प्राज्ञोऽसि तेनास्मदहम्
कीर्त्तिस्तुतगुणादिवर्णनविधौ जातस्तवोत्कण्ठितः ॥

यावद्यस्य मतिर्विधावति परं तावद्धि तेनोद्यते
निःसीमे भवतीगुणार्णव इह प्रान्तं कथं प्राप्नुयाम् ।

Digitized by Google

साद्रूप्यं विषयेषु सन्ततमनुष्ठातं विहायान्तरं
योगं वृत्तिनिरोधलक्षणमथो चित्तस्य भूपानुष्ठि।
येन स्यात् परनिर्वृतिर्न च पुनर्जन्मादिकं भूपते!
जायेतापि भवार्णवे न च मतिः संसारमृत्युप्रदात्॥
शान्तो दान्तेन्द्रियः सन्नुपरतिसहितो दुःखसौख्ये सहिष्णु-
र्विश्वासी शास्त्रवाक्ये गुरुवचसि तथा, श्रद्धया संयतश्च।
आत्मन्येवात्मशीचानियतनिरतिमत् सर्वयोगाद्वियुक्तो
भूया भूपाल! भूयो भवभञ्जनसमुच्छेदबोधोदयार्थम्।
आपाततो ज्ञातवेदवेदान्तार्थोऽपकल्मषः।
नित्यनैमित्तिकप्रायश्चित्तोपास्तिपरोऽसि यत्॥
नित्यानित्यविवेकिता तव सदा मोक्षे च तीव्रस्पृहा
वैराग्यं विषये तवास्ति सततं शान्त्यादिषट्कं तथा।
तेन ब्रह्मविचारणे नरपते! मन्येऽधिकारी भवान्
तस्मात् सद्गुरुसेवनेन सततं तत्रैव यत्नं क्रियाः॥ पुण्यम्
वेदार्थानुगतेन यज्ञविधिना दानैस्तपश्चर्यया
प्रायश्चित्तविधानतो विविदिषा जातेति मन्ये तव।
यस्या ब्रह्मविचारणाय यतये वित्तादिमुक्तैषणा!
भयात् ते नृप! वेदवाक्यजनिता ब्रह्मात्मसाक्षात्कृतिः॥
यथा मत्वा सम्यक् प्रकृतमपि चैतन्यममलं
गुहायां सद्रत्नं तिमिरनिकरेणावृतमिव।
जहि त्वं विघ्नं पावकदपरमग्रमनसा पुनरमुं
ततस्ते चैतन्यं हृदयसदने संस्फुरतु तत्॥

त्रयाणां तापानामतिशयसमूलक्षयकरी
प्रगाढं ते भूयात् प्रकृतिपुरुषव्यक्तिजननी ॥
संप्रज्ञातसमाधिधूतनिरये चित्ते क्रमादुद्गता-
संप्रज्ञातसमाधिना नरपते ! भूयात् विवेकोदयः ।
अत्यन्तः पुरुषार्थलाभ इह ते भूयाच्च भूमीपते !
येनात्मानुभवेन तेन न भवे भूयात् पुनः सम्भवः ॥

चित्तप्रसादनकरी परिकर्म्मरूपा
ज्योतिष्मती मधुमती च तथा विशोका ।
आनन्दया च सहिता सततं चकास्तु
भूपालवर्य्य ! सततं तव चित्तवृत्तिः ॥

मैत्री साधुषु दुःखितेषु करुणोपेक्षा च पापात्मसु
वृत्तिः सा हृदयस्य भूप ! मुदिता सौख्यान्वितेष्वस्तु ते ।
एतासां परिशुद्धभावबलतः स्थैर्य्यान्वितं मानसं
सर्व्वानर्थनिवर्हणाय नृप ! ते शान्तिं परामृच्छतु ॥

योगोक्तसत्त्वयमादिभिरष्टसंख्यै-
र्योगानुशीलनमनुक्षणमातनु त्वम् ।
तुष्टीः सदा नवविधा नृपते ! लभस्व
लस्यन्तु योगजनितास्तव सिद्धयोऽष्टौ ॥

क्लेशजन्मपरिहीण ईश्वरो
वासनारहित एष भूपते ! ।
कर्म्मपाकपरिमुक्त आदिम-
श्चेतसि प्रणिहितः सदास्तु ते ॥

माध्वीकस्यन्दमन्दोदरसुन्दरीं रसमञ्जरीम्।
कुर्वन्तु कवयः कर्णभूषणं कृपया मम॥
तातो यस्य जनेश्वरः कविकुलालङ्कारचूडामणि-
र्देशो यस्य विदेहभूः सुरसरित्कल्लोलकिर्मीरिता।
पद्येनात्मकृतेन तेन कविना श्रीभानुना योजिता
वाग्देवी श्रुतिपारिजातकुसुमं स्पर्द्धाकरी मञ्जरी॥१२८॥
इति श्रीमहामहोपाध्यायभानुदत्तमिश्रविरचिता
रसमञ्जरी समाप्ता॥

राजप्रशस्तिः।

स्वस्ति श्रीमन्महाराजाधिराजेषु निवेदनम्।
तारानाथद्विजस्येदमाशीराशिपुरस्सरम्॥
कमला कमलालयालये लसतात्तेऽचपला निरन्तरम्।
वदने वचनाधिपालिका समरे तेऽग्रसरास्तु कालिका॥
चित्तसद्मनि तवास्तु सन्ततं वासुदेवपदवाच्यधाम तत्।
येन सर्व्वमिदमाततं ततं पालितं तदनु संहृतं क्रमात्॥
योगमार्गनिहितेन चेतसा विश्वरूपमनघं विभावय।
तेन लब्धपुरुषार्थसार्थकं सार्थकं जननमस्तु भूप! ते॥
सबीजा हृद्वृत्तिः क्रममनुगता बीजरहिता
परे तत्त्वे सम्यग् लयमुपगता जन्मशमनी।

Digitized by Google

इत्थं साम्यविधौ तयोः प्रभवति स्वामी तथा भिद्यतां
तन्मानस्तनुतां क्रमादतनुतां नैषा यथा गच्छति ॥१२४॥

विरहव्यथा निष्कारणत्वे बन्धुजीवनावस्था जड़ता।
पाणिर्नीरवकङ्कणस्तनतटी निष्कम्पमानांशुकी
दृष्टिर्निश्चलतारका समभवद्ध्वस्तांशुकं कुण्डलम्।
कश्चिन्नार्पितया समं मृगदृशोर्भेदो वदन्तो यदि
त्वन्नामस्मरणेन कोऽपि पुलकारम्भः समुज्जृम्भते ॥१२५॥

स्वप्नचित्रसाक्षाद्भेदात् दर्शनं त्रिधा। स्वप्नदर्शनं यथा—

मुक्ताहारं न च कुचगिरेः कङ्कणं नैव हस्तात्
कर्णात् स्वर्णाभरणमपि वा नीतवानेव भागात्।
आहो स्वप्ने वकुलकुसुमं भूषणं सन्दधानः
कोऽयं चौरो हृदयमहरत् तन्वि तन्न प्रतीमः ॥१२६॥

चित्रदर्शनं यथा।

नीवी हरेदुरसिजं विलिखेन्न केन
दन्तच्छदश्च दशनेन दशेदकस्मात्।
इत्थं पटे विलिखितं प्रविलोक्य कान्तं
बाला पुरे वनजहारविहारयष्ट्याम् ॥१२७॥

साक्षाद्दर्शनं यथा।

चेतस्त्वं चपलतां त्यज प्रियसखि व्रीड़े न मां पीड़य
भ्रातर्मुञ्च दृशो निमेष भगवन् काम क्षणं क्षम्यताम्।
बर्हं मूर्ध्नि च कर्णयोः कुवलयं वेणुं दधानः करे
सोऽयं लोचनगोचरी भवतु मे दामोदरः सुन्दरः॥१२८॥१६

Digitized by Google

गरलद्रुमकन्दमिन्दुबिम्बं क्रीडावारिजवारणो वसन्तः ।
रजनी स्मरभूपतेः कृपाणी करणीयं किमतःपरं विधातः ॥१२१॥

प्रियाश्रितकाल्पनिकव्यवहारः प्रलापः । यथा । कल्पनायाः कारणमन्तःकरणविक्षेपः । तस्य च निदानमुत्कण्ठा ।

अर्द्धं मुद्रीक्षणं चक्षुरर्द्धं सम्मीलनं मनः ।
अर्द्धं संस्पर्शनं पाणिरद्य मे किं भविष्यति ॥

औत्सुक्यसन्तापादिकारितमनोविपर्य्यासे समुत्थितप्रियाश्रितवृथाव्यापार उन्मादः । व्यापारः कायिको वाचिकश्चेति ।

कायिको यथा ।

प्रतिफलममृतांशोः प्रेक्ष्य कान्तो मृगाक्ष्या
मुखमिति परिहासं कर्त्तुमभ्युद्यतोऽभूत् ।
अथ शिथिलितवाचो मानमाशङ्क्य तस्याः
स्पृशति पुलकभाजा पाणिपङ्केरुहेण ॥१२२॥

वाचिको यथा ।

किं रे विधो मृगदृशो मुखमद्वितीयं
कन्दर्पदर्पसिदृगम्बुजमम्बुदेव ।
भृङ्गारमावहसि भृङ्गतनू न तादृक्
किं कर्म्म किञ्च पुनरीदृशमीक्षणीयम् ॥१२३॥

मदनवेदनासमुत्थसन्तापकार्श्यादिदोषो व्याधिर्यथा ।

कोदण्डं विशिखो मनो निविशते कामस्य तस्या अपि
भ्रूवल्लीनयनाञ्चलं मनसिजो वासः समुन्मीलति ।

प्राणाः पञ्च ब्रहलम्बः कण्ठदेशं प्रयान्ति ।
अन्यद्वसुमस्तव मुखविधुं द्रष्टुमुत्कीव गन्तुं
वक्षःपत्रं सृजति विधिना पक्षवञ्च फलेन ॥११८॥

अभिलाषस्तथा चिन्ता स्मृतिश्च गुणकीर्त्तनम् ।
उद्वेगश्च विलापश्च उन्मादो व्याधिरेव च ।
जड़तानि धनाश्चेता दशावस्थाः प्रकीर्त्तिताः ॥

सङ्गमेच्छाभिलाषो यथा ।

तस्यां सुतनुसरस्यां चेतो नयनञ्च निष्पतितम् ।
चेतो गुरु निमग्नं लघु नयनं सर्वतो भ्रमति ॥

दर्शनसम्भोगयोः प्रकारभावना चिन्ता । यथा

मया विधेयो मुकुरश्च तस्मिन् कुञ्जोपकण्ठे कलकण्ठनादः ।
राधा मधौ विभ्रममावहन्ती कुर्वीत नेत्रोत्पलतोरणानि ॥११९॥

प्रियायाः चेष्टाद्युद्बोधसंस्कारजन्यं ज्ञानं स्मृतिः । यथा

रामो लक्ष्मणदीर्घदुःखचकितो नाविष्करोति व्यथां
श्वासं नोष्णतरं जहाति सलिलं धत्ते न वा चक्षुषि ।
वातावर्त्तविवर्त्तमानदहनक्रूरैरनङ्गज्वरैः
श्यामः किन्तु विदेहराजतनयां भूयः स्मरन् वर्त्तते ॥१२०॥

विरहकालीनकान्ताविषयकप्रशंसाप्रतिपादनं गुणकीर्त्तनम् । यथा

संस्पर्शः स्तनसंस्पर्शो वीक्षणं रमणीक्षणम् ।
तस्याः केलिकलालापसमयः समयः सखे ! ॥

विषयजन्यदुःखकामक्लेशजनितसकलविषयकद्वेषताज्ञानम् उद्वेगः । यथा

स्थानच्युतरञ्जकः यथा ।

स स्मरवृन्दमुखी सह नन्दसूनु-
रेकत् निकुञ्जभवनं समुपाजगाम ।
कथान्तरे सहचरीसरसौ कठोरे
पल्लीवपानकपटेन हरः प्रतस्थे ॥११४॥

अङ्गादिवैकृतैर्हासपरो विदूषकः यथा

स्तनीव नीरजमुखीं सकोपकम्प-
मुर्वीस्थितोऽपि कुचकञ्चुकमोचनाय ।
कथान्तरे मुकुरकारि विदूषकेण
प्रातः स्तनकलशकुक्कुटकूटनादः ॥११५॥

स्वेदस्तम्भोऽथ रोमाञ्चो स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका गुणाः । यथा ।

वेदो यदि द्वयोर्मुखं कुचतटे स्वेदप्रकम्पोऽधरे
पाण्डु गण्डतटी तनुः पुलकितं दीनं मनस्तिष्ठति ।
आलस्यं वचनाक्षरं चरणयोः स्तम्भः समुज्जृम्भते
तत् किं राजपथे कयोरपि द्वयोर्जातोऽतिथिः केशवः ॥११६॥

रतिस्थायिभावः शृङ्गारः, स च द्विविधः, संयोगो विप्रलम्भश्च । संयोगो यथा ।

पिबति विलोलितचन्द्रः स्फुरति कूजति कपोतः ।
निपतति तारकाच्च समान्दोलयति वीचिरमरवाहिन्याः ॥११७॥

विप्रलम्भो यथा ॥

प्रादुर्भूते नवजलधरे तत्पथं द्रष्टुकामः

Digitized by Google

शून्ये सद्मनि योजिता बहुविधा भङ्गी वने निर्जने
पुष्पव्याजमुखेन निर्गतमथ स्मारीकृता दृष्टयः ।
ताम्बूलाम्बरवञ्चलेन विहितौ व्यक्तौ च वक्षोरुहा-
वेतेनापि न वेत्ति दूति कियता यत्नेन संप्राप्स्यति ॥१११

न च नायिकाया इव नायकस्यापि ते ते भेदाः सन्तीति न वाच्यं अस्या अवस्थाभेदेन भेदाः । अस्य च स्वभावभेदेन भेदा इति विशेषात् । अनुकूलत्वं, दक्षिणत्वं धृष्टत्वं शठत्वमिति चत्वार एव नायकानां स्वभावाः । अन्यच अवस्थाभेदेन यदि नायकानां भेदः स्यात् तदा उक्तविप्रलब्धखण्डितादयोऽपि नायकाः स्वीकर्त्तव्या । तथाच सङ्केतव्यवस्थायां स्त्रीणामनागमने अन्यसम्भोगाभ्रह्णाविषयत्वे अन्यसम्भोगचिह्नितत्वं वा नायकानामपि स्यात् नतु नायिकानां, ताः प्रति तदुद्भावे रसाभासतापत्तिरिति । तेषाञ्च पीठमर्द्दविटचेटकविदूषक-भेदाच्चतुर्विधाः । कुपितस्त्रीप्रसादकः पीठमर्दकः । स यथा

कोऽयं कोपविधिः प्रयच्छ करयोरागम्य गीत्रचो जायतां
पीयूषद्रवदीर्घिकापरिमलैरामोदिता मेदिनी ।
आस्तां वा रुषयाल लोचनमिदं व्यावर्त्तयन्ती मुख-
वक्त्रे कुप्यसि तस्य चैव सुतपोवृन्दानि वन्दामहे ॥११२॥

नर्मसचिवोऽप्ययमेव । कामतन्त्रकलाकोविदो विटः । स यथा

आयातः कुसुमेश्वरोऽपि जयते सर्वेश्वरो मारुतो
भृङ्गः स्फूर्जति भैरवो न निकटं प्राणेश्वरो मुञ्चति ।
एते सिद्धरसाः प्रसूनविशिखो वैद्योऽस्य वैद्योत्सवो
मानव्याधिरसौ कृशोदरि ! कथं त्वच्चेतसि स्थास्यति॥११३

कान्ते कनकजम्बीरं करे किमपि कुर्वति ।
आगारलिखिते भानौ बिन्दुमिन्दुमुखी ददौ ॥१०६॥

वचनव्यङ्गसमागमो यथा ।

तमोजटाले हरिदन्तराले
काले निशायां तव निर्गतायाः ।
तटे नदीनां निकटे वनानां
घटेत शातोदरि कः सहायः ॥१०७॥

प्रोषितपतिरुपपतिः वैशिकश्च भवति । क्रमेणोदाहरणानि यथा ।

ऊरू रम्भा दृगपि कमलं शैवलं केशपाशो
वक्त्रं चन्द्रो लपितममृतं मध्यदेशो मृणालम् ।
नाभिः कूपो वलिरपि सरित् पल्लवः किञ्च पाणि-
र्यस्याः सा चेद्वसति न कथं हन्त ! तापस्य शान्तिः॥१०८॥
याम्याः सरः सलिलकेलिकुतूहलाय
व्याजादुपेत्य मयि वर्त्मनि वर्त्तमाने ।
अन्तःस्मितद्युतिचमत्कृतवक्त्ररङ्ग-
रङ्गीकृतं किमपि वामदृशः स्मरामि ॥१०९॥
श्लथपरिपतन्नीवीबन्धं
मुषितनकारमवक्रदृष्टिपातम् ।
प्रकटितहसितमुन्नतास्यपद्मं
पुरसुदृशः स्मरचेष्टितं स्मरामि ॥११०॥

अनभिज्ञनायको नायिकाभाषो यथा ।

Digitized by Google

चक्षुःप्रान्तमुदीक्ष्य पश्यलदृशः शीघारविन्दश्रियं
नोच्चैर्जल्पति न स्मितं वितनुते गृह्णाति वीटिं न वा ।
तस्योपान्तमुपेत्य किन्तु पुलकभ्राजत्कपोलद्युतिः
कान्तः केवलमानतेन शिरसा मन्मालजं गुम्फति ॥१०२॥

प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः । यथा ।

आस्यं यद्यपि हास्यवर्जितमदं लास्येन हीनं वचो
नेत्रे शोणसरोजकान्तिरुचिरे क्वापि व्ययं स्थीयताम् ।
मालायाः करणोद्यमो मकरिकारम्भः कुचाम्भोधरो
धूपः कुन्तलधोरणीषु सुतनोः सायन्तनो दृश्यते ॥१०३॥

भयकृपालज्जाशून्यः कामक्रीडायां अकृतकृत्याविचारोऽधमः । स यथा ।

उदयति हृदि नैव दस्य लज्जा
न च करुणा न च कोऽपि भीतिलेशः ।
बकुलमुकुलकोषकोमलां मां
पुनरपि तस्य करे न पातयेथाः ॥१०४॥

मानी यथा ।

वाग्व्याकूतपरायणं तव वचो वज्रोपमेयं मनः
श्रुत्वा वाचमिमामपास्य विनयं व्याजाद्बहिः प्रस्थिते ।
प्रातर्वीतविलोकने परिहृतालापे विहृत्तानने
प्राणेशे निपतन्ति हन्त कृपणा वामभ्रुवो दृष्टयः ॥१०५॥

वाक्चेष्टाव्यङ्ग्यसमागमचतुरः । चेष्टाव्यङ्ग्यसमागमो यथा ।

Digitized by Google

बद्धो हारैः करकमलयोर्वारितो वारितोऽपि
स्वापं बुद्ध्वा पुनरुपगतो दूरतो दत्तदृष्टिः॥
तस्योपान्ते कनकवलयं मुक्तमन्यं षयन्त्या
दृष्टो धृष्टः पुनरपि मया पार्श्व एव प्रसुप्तः॥९८॥

कामिनीविषयक कपटपटुः शठः। स यथा।

मौलौ दाम विधाय भालफलके व्यालिख्य पत्रावलीं
केयूरं भुजयोर्विधाय कुचयोर्विन्यस्य मुक्तास्रजम्।
विश्वासं समुपार्जयन् मृगदृशः काञ्चीं निवेशच्छलात्
नीविग्रन्थिमपाकरोति मृदुना हस्तेन वामभ्रुवः॥९९॥

आचारहानिहेतुः पतिरुपपतिः। स यथा।

शङ्काशृङ्खलितेन यत्र नयनप्रान्तेन न प्रेक्ष्यते
केयूरध्वनिनिर्भरं भेति चकितं नो यत्र वाश्लिष्यते।
नो वा यत्र शनैरलग्नदशनं बिम्बाधरः पीयते
नो वा यत्र विधीयते चमकितं तत् किं रतं कामिनोः॥१००॥

उपपतिरपि चतुर्धा। परन्तु तत्र शठत्वं नियतम् अनियतमित्यपरे। बहुलवेश्योपभोगरसिको वैशिकः। यथा

काञ्चीकणत्क्वणितकोमलनाभिकान्तिं
पारावतध्वनिविचित्रितकण्ठपालिम्।
उद्भ्रान्तलोचनचकोरमनङ्गरङ्ग-
माशास्महे किमपि वारविलासवत्याः॥१०१॥

वैशिकस्तु उत्तमाधममध्यमभेदात्त्रिविधः। दयितायाः भृशः प्रकोपेऽपि उपचारपरायण उत्तमः। यथा।

अथ शृङ्गारस्य उभयसाधनत्वान्नायकोऽपि निरूप्यते । स च त्रिविधः । पतिरुपपतिर्वैशिकश्चेति ।

विधिवत्पाणिग्राहकः पतिर्यथा ।

त्वं पीयूषमयूख ! मुञ्चसि शिलाविन्दून् सुधाशीकरान्
त्वं भोगीन्द्र ! विलम्बसे किमु फणाभोगैः शनैर्वीजय ।
त्वं स्वर्वाहिनि ! किञ्च सिञ्च सलिलैरङ्गैः शिरीषोपमैः
सेयं शैलसुता कठोरमनसः कान्ता परिक्लाम्यति ॥९५॥

अनुकूलदक्षिणधृष्टशठभेदात् पतिश्चतुर्विधः । सार्वकालिकपराङ्गनापराङ्मुखत्वे सति सर्वकालमनुरक्तोऽनुकूलः यथा ।

स्थलि ! त्वं भव कोमला दिनमणे ! त्वं शैत्यमङ्गीकुरु
त्वं वर्त्मन् ! लघुतां प्रयाहि पवन ! त्वं स्वेदमुत्सारय ।
सान्निध्यं कुरु दण्डकाननगिरे ! निर्गच्छ मार्गाद्बहिः
सीतासौ विपिनं मया सह यतो गन्तुं समुत्कण्ठते ॥९६॥

सकलनायिकाविषयसहजानुरागो दक्षिणः यथा ।

अन्तःपुरे स्फुरति पद्मदृशां सहस्र-
मच्चिद्वयं कथय कुत्र निवेशयामि ।
इत्याकलय्य नयनाम्बुरुहे निमील्य
रोमाञ्चितेन वपुषा स्थितमच्युतेन ॥९७॥

भूयोनिःशङ्ककृतदोषोऽपि भूयोनिवारितोऽपि भूयः-प्रश्रयपरायणो धृष्टः । स यथा ।

Digitized by Google

इत्थं वचोऽमलवचः प्रतिपद्य सद्यः
सीता स्मितस्तुतिभिरुत्तरयाञ्चकार ॥९०॥

सख्याः परिहास इव प्रियस्य परिहासः। यथा

भ्रूसंज्ञया ह्रियसि तन्वि! सखीं न वाभि-
रित्थं विहस्य मुरवैरिणि भाषमाणे।
राधा चिराय दशनग्रहदूयमान-
बिम्बाधरा वदनमाननमयाञ्चकार ॥९१॥

प्रियस्य परिहासवत्प्रियाया अपि परिहासः, यथा।

दिव्यं वारि कथं यतः सुरधुनी मौलौ कथं पावको
दिव्यं तद्धि विलोचनं कथमहो दिव्यं सचाङ्गे तव।
तस्माद्द्यूतविधौ त्वयाद्य मुषितो हारः परित्यज्यता-
मित्थं शैलभुवा विहस्य लपितः शम्भुः शिवायास्तु वः ॥९२

दूतव्यापारकृता दूती। तस्याः सङ्घट्टनविरहनिवेदनादीनि कर्माणि। सङ्घट्टनं यथा।

अस्यति रजनिरुदस्यति तिमिरमिदं प्रादुर्भवति मनोभूः।
भक्तं न त्यज युक्तं विरचय रक्तं मनस्तस्मिन् ॥९३॥

विरहनिवेदनं यथा।

चक्रे चन्द्रमुखी प्रदीपकलिका धात्रा धरामण्डले
तस्या दैववशाद्दशापि चरमा प्रायः समुन्मीलति।
तद्ब्रूमः सहसा न तेन शिरसा श्रीकृष्ण निक्षिप्यतां
स्वे हस्तेव तथा यथा न भवति त्रैलोक्यमन्धन्तमः ॥९४॥

इति नायिकाप्रकरणम्।

विस्तरभिया प्रत्येकमेतासामुत्तममध्यमाधमभेदा नोहृता इति। विश्वासविश्रामकारिणी पार्श्वचारिणी सखी। तस्या मण्डनोपालम्भशिक्षापरिहासप्रभृतीनि कर्म्माणि। मण्डनं यथा।

स्तनकलशकमहीधरोपकण्ठे
प्रियकरपल्लवमुक्तसम्प्रमोदम्।
रहसि मकरिकामिषात्लिखन्तीं
कमलमुखी कमलैः सखीं जघान ॥८७॥

उपालम्भो यथा।

अभ्रध्वानैर्मुखरितदिशः श्रेणयस्तोयदानां
धारासारैर्धरणिवलयं सर्वतः प्लावयन्ति।
तेन स्नेहं वहति विपुलं मन्मथो कुन्तमेतत्
त्वं निःस्नेहो यदसि तदिदं नाथ मे विस्मयाय ॥८८॥

शिक्षा यथा।

सानन्दमालि वनमालिविलोकनाय
निर्गच्छ कुञ्जमिति किन्तु विचारयेथाः।
झङ्कारिणो मधुलिहो दिवसे भ्रमन्ति
रात्रौ पुनश्चपलचञ्चुपुटाश्चकोराः ॥८९॥

परिहासो यथा।

आगारभित्तिलिखितासु निवेदयस्व
कः सप्तमो दशसु मूर्त्तिषु लोकभर्त्तुः।

Digitized by Google

इत्थं निगद्य विगलन्नयनाम्बुधारा
वाराङ्गना प्रियतमं करयोर्बभार ॥८४॥

अहितकारिण्यपि प्रिये हितकारिणी या सा उत्तमा। अस्या उत्तमैव चेष्टा। यथा

पतिः शयनमागतः कुचविचित्रितोरस्थलः
प्रसन्नवचनामृतैरयमतर्पि वामभ्रुवा।
अचर्चि सुभगस्मितद्युतिपटीरपङ्कद्रवै-
रपूजि विलसद्विलोचनचमत्कृतैरम्बुजैः ॥८४॥

हिताहितकारिणि प्रिये हिताहितकारिणी या सा मध्यमा। व्यवहारानुसारिणी चेष्टा। यथा

कान्ते सागसि कञ्चुकस्पृशितया साचीकृतग्रीवया
मुक्ताः कोपकषायमन्मथशरक्रूराः कटाक्षाङ्कुराः।
साकूते दरहासपेशलवचोमाध्वीकधारालसा-
प्रीतिः कल्पलता च का चन महादानीकृत सुभ्रुवा ॥८५॥

हिताहितकारिण्यपि प्रियतमे अहितकारिणी या सा अधमा। एषव निर्निमित्तकोपशा चण्डीत्युच्यते। अस्या निर्निमित्तकोपत्वादधमैव चेष्टा। यथा

प्रस्थाने तव यः करोति कमलच्छायां मुखाम्भोरुहे
श्रीखण्डद्रवधारया शिशिरया मार्गं पुरः सिञ्चति।
तस्मिन् प्रेयसि विद्रुमद्रवनदीरिङ्गत्तरङ्गभ्रमि-
भ्रान्ताक्रान्तसरोजपत्रसदृशा भूयोदृशा क्रुध्यति ॥८६॥

प्रायेऽम्बरे किमपि जल्पति निर्गमाय
श्यामोदरी वदनमानमवाप्तकार।
आली पुनर्निभृतमेत्य लतानिकुञ्ज-
मुन्मत्तकोकिलकलध्वनिमाततान ॥८०॥

मध्या प्रोष्यत्पतिका यथा।

गन्तुं प्रिये वदति निश्वसितं न दीर्घ-
मासीन्न वा नयनयोर्जलमाविरासीत्।
आयुर्लिपिं पठितुमेनदृशः परन्तु
भालस्थलीं किमु करः समुपाजगाम ॥८१॥

प्रौढा प्रोष्यत्पतिका यथा।

नायं मुञ्चति सुभ्रु वामपि तनुत्यागे वियोगज्वरः
तेनाहं विहिताञ्जलिर्यदुपते। पृच्छामि सत्यं वद।
ताम्बूलं कुसुमं पटीरमुदकं यद्बन्धुभिर्दीयते
स्यात्तेव परत्र तत्किमु विषज्वालावलीदुःसहम् ॥८२॥

परकीया प्रोष्यत्पतिका यथा।

न्यस्तं पन्नगमूर्ध्नि पादयुगलं भक्तिर्विमुक्ता गुरौ
त्यक्ता नीतिरकारि किं न भवतो हेतोर्मया दुष्कृतम्।
अङ्गानां शतयातना नयनयोः कोपक्रमो रौरवः
कुम्भीपाकपराभवश्च मनसो मुक्तं त्वयि प्रस्थिते ॥८३॥

सामान्यवनिता प्रोषितपतिका यथा।

मुद्रां प्रदेहि वलयाय भवद्वियोगम्
आसाद्य यास्यति बहिः सहसा यदेतत्।

Digitized by Google

इत्यादि प्राचीनग्रन्थकारलिखनात्;

अग्रिमक्षणे देशान्तरनिश्चितगमने प्रेयसि प्रोष्यत्पतिकापि नवमी नायिका भवितुमर्हति। तथाहि

एतस्याः प्रोषितपतिकाविप्रलब्धोत्कण्ठितासु नान्तर्भावः, भर्त्तुः सन्निधिवर्त्तित्वात्। नापि कलहान्तरितामेवान्तर्भावः, कलहाभावात् अनवमानितपतित्वाच्च। नापि खण्डितायामन्तर्भावः प्रियस्यान्योपभोगचिह्नितस्यागमनाभावात् प्रियायाः कोपाभावात्। काकुवचनकातरप्रेक्षणादिसूचितान्तःपक्षपातदर्शनाच्च। न वासकसज्जान्तर्भावः। वासकसज्जाया वासरनियमाभावात्। सुरतसामग्री सज्जीकरणाद्यभावत् निर्वेददर्शनाच्च। न स्वाधीनपतिकान्तर्भावः अग्रिमक्षण एव सङ्गस्य विच्छेददर्शनात्। नहि स्वाधीनपतिकाया कदाचिदपि सङ्गस्य विच्छेद इति सम्प्रदायकाः। अजन्नपि पतिः स्वाधीनपतिकया निरुध्यते। अन्यथा भर्त्तरि स्वाधीनत्वमेव न स्यात्, नेह तथा सर्वथा अग्रिमक्षणे विच्छेददर्शनात्। किञ्च निर्वेदाश्रुपातनिश्वासवनविहारादिमदनमहोत्सवाभावदर्शनाच्च। नाप्यभिसारिकान्तर्भावः अभिसारोत्सवाभावात् अन्तस्तापदर्शनाच्चेति युक्तमुपपश्यामः लक्षणन्तु यस्याः पतिरग्रिमक्षणे देशान्तरं यास्यति एव सा प्रोष्यत्पतिका। अस्याश्चेष्टा। काकुवचनकातरप्रेक्षणगमनविघ्नोपदर्शनर्निर्वेदसन्तापसम्मोहनिश्वास बाष्पादयः। मुग्धाप्रोष्यत्पतिका यथा।

ज्योत्स्नाभिसारिका यथा ।

चन्द्रोदये चन्दनमङ्कलेषु विहस्य विन्यस्य विनिर्गतायाः ।
मनोनिहन्तुं मदनोऽपि बाणान् करेण कोपादिभराम्बभूव ॥७६

दिवसाभिसारिका यथा ।

पत्नीनामधिपस्य पङ्कजदृशां पर्वोत्सवामन्त्रणे
जाते सप्तजना मिथःस्तनमहोत्साहं पुरः प्रस्थिताः ।
सव्याजं स्थितयोर्विहस्य गतयोः शुद्धान्तमत्तान्तरे
यूनोः स्विन्नकपोलयोर्विजयते कोऽप्येष कण्ठग्रहः ॥७७॥

सामान्यवनिताभिसारिका यथा ।

लोलल्लोलचमत्कृति प्रविचलत्काञ्चीलता भङ्कृति
न्यञ्चत्कञ्चुकबन्धबन्धुरचलद्वक्षोजकुम्भोन्नति ।
स्फुर्ज्जद्दीधितिविस्फुरत्कृतिचलत् चामीकरालङ्कृति
क्रीड़ाकुञ्जगृहं प्रयाति हतिनः कस्यापि वाराङ्गना ॥७८

मुग्धाया लज्जाप्राधान्येन, मध्याया लज्जामदनप्राधान्येन, प्रगल्भायाः कोपप्रकाशप्राधान्येन, धीराया धैर्य्यप्राधान्येन, अधीराया अधैर्य्यप्राधान्येन, नवोढ़ायाः संगुप्तिप्राधान्येन, मुग्धाया इव कन्यायाः। सामान्य वनिताया धनप्राप्तिप्राधान्येन, अष्टविधनायिकावर्णनमिति शेषः ।

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित ! प्रियसुहृत्सार्थं किमु त्यज्यताम् ॥७९

वासं माङ्गलिकीं तनोति तिमिरस्तोमोऽपि भिल्लीवरै-
र्गीतोऽयं दयिताभिसारसमयो मुग्धे! विमुञ्च त्रपाम् ॥७१

मध्याभिसारिका यथा ।

भीतासि नैव भुजगात् पथि मञ्जुलस्य
सङ्गात् पुनः किमपि भीतिमुरीकरोषि ।
अम्भोधरध्वनिभिरुज्जृम्भिताक्षि तन्वि ।
मदाचि साचिवदनासि किमाचरामि ॥७२॥

प्रौढाभिसारिका यथा ।

स्फुरदुरसिजभारभङ्गुराङ्गी
किसलयकोमलकान्तिना पदेन ।
अथ कथय कथं सहेत गन्तुं
यदि न निशासु मनोरथो रथः स्यात् ॥७३॥

परकीयाभिसारिका यथा ।

रभसादभिसर्तुमुद्यतानां
वनितानां सखि वारिदो विवस्वान् ।
रजनी दिवसोऽन्धकारमब्धिः
विपिनं वेश्म विमार्ग एव मार्गः ॥७४॥

सामान्याभिसारिका यथा ।

नाम्बुजे न कुमुदे समेयं स्वैरिणीजनविलोचनयुग्मम् ।
नोदये दिनकरस्य न चेन्दोः केवले तमसि यस्य विकासः ॥७५

प्रौढ़ा स्वाधीनपतिका यथा ।

रागस्याधरपल्लवस्य वचसो हास्यस्य लास्यस्य वा
धन्यानामरविन्दसुन्दरदृशां कान्तस्तनोति स्तुतिम् ।
स्वप्नेनापि न गच्छति स्मृतिपथं चेतः कथं दृक्पथं
काप्यन्या दयितस्य मे सखि ! कथं तस्यास्तु भेदग्रहः ॥६८

परकीया स्वाधीनपतिका यथा ।

स्वीयाः सन्ति गृहे सरोरुहदृशो, यासां विलासक्वणत्-
काञ्चीकुण्डलहेमकङ्कणझणत्कारो न विश्राम्यति ।
को हेतुः सखि ! कानने पुरपथे सौधे सखीसन्निधौ
भ्राम्यन्तीमपि वल्लभस्य परितो दृष्टिर्न मां मुञ्चति ॥६९॥

सामान्यवनिता स्वाधीनपतिका यथा ।

सन्त्येवं प्रतिमन्दिरं मृगदृशो यासां सुधासागर-
स्रोतःसूतसरोजसुन्दरचमत्कारा दृशो विभ्रमाः ।
चित्तं किन्तु विचित्रमन्मथकलाकौशल्यहेतोः पुन-
र्वित्तं चित्तहरं प्रयच्छति युवा मय्येव किं कारणम् ॥७०॥

स्वयमभिसरति प्रियमभिसारयति साभिसारिका । अस्या-
श्चेष्टा समयानुरूपमितभूषणग्रहणप्रस्थाने पुष्पकपटहासादयः ।
इति परकीयायाः, स्वीयायास्तु प्रकृतएव विभ्रमः ।

मुग्धाभिसारिका यथा ।

दूती त्रिचतुरुपागता सहचरी रात्रिश्चिरस्थायिनी
दैवज्ञो जलदः स्वनेन दिशति प्रस्थानवेलां शुभाम् ।

परकीया वासकसज्जा यथा ।

श्वश्रूं स्वापयति च्छलेन च तिरोधत्ते प्रदीपाङ्कुरम्
धत्ते सौधकपोतपोतनिनदैः साङ्केतिकं चेष्टितम् ।
शश्वत्पार्श्वविवर्त्तिताङ्गलतिकं लोलत्कपोलद्युति
क्वापि क्वापि कराम्बुजं प्रियधिया तल्पान्तिके न्यस्यति ॥६४

सामान्यवनिता वासकसज्जा यथा ।

चोलं नीविनिचोलकम्पविधौ चूडामणिं चुम्बने
यच्छिन्ने कुचयोः करार्पणविधौ काञ्चीं पुनः काञ्चनीम् ।
इत्थं चन्दनचर्चितैर्मृगमदैरङ्गानि संस्कुर्वती
तत् किं यन्न मनोरथं वितनुते वारेषु वाराङ्गना ॥६५॥

सदा कृताज्ञापरा प्रियतमा स्वाधीनपतिका । अस्या-
श्चेष्टा वनविहारादिमदनमहोत्सवमदाहङ्कारमनोरथाव्या-
प्तिप्रभृतयः ।

मुग्धा स्वाधीनपतिका यथा ।

मध्ये नो कृशिमा स्तने न गरिमा देहे न वा कान्तिमा
श्रोणौ न प्रथिमा गतौ न जड़िमा नेत्रे न वारक्रिया ।
लास्ये न द्रढ़िमा न वाचि पटिमा हास्ये न वा स्फीतिमा ।
प्राणेशस्य तथापि मज्जति मनो मय्येव किं कारणम् ॥६६॥

मध्या स्वाधीनपतिका यथा ।

यदपि रतिमहोत्सवे नकारो
यदपि करेण च नीविधारणानि ।
प्रियसखि ! पतिरेष पार्श्वदेशं
तदपि न मुञ्चति चेत् किमाचरामि ॥६७ ॥

Digitized by Google

अस्याश्चेष्टा मनोरथसखीपरीहासदूतीप्रश्नवासमग्रीसम्पा-
दनमार्गविलोकनादयः।

मुग्धा वासकसज्जा यथा।

हारं गुम्फति तारकास्तवचिरं ग्रथ्नाति काञ्चीलतां
दीपं न्यस्यति किन्तु तत्र बकुलं खेदं न दत्ते पुनः।
आलीनामिति वासकस्य रजनौ कामानुरूपां क्रियां
साचिस्मेर नवोढनीरजमुखी दूरात् समुद्वीक्षते ॥६०॥

मध्या वासकसज्जा यथा।

शिल्पं दर्शयितुं करोति कुतुकात् कह्लारहारस्रजं
चित्रप्रेक्षणकैतवेन किमपि द्वारं समुद्घाट्यते।
गृह्णात्याभरणं नवं सहचरीभूषाजिगीषामिषा-
दित्थं पद्मदृशः प्रतीक्ष्य चरितं स्मेराननोऽभूत् स्मरः ॥६१

प्रगल्भा वासकसज्जा यथा।

कृतं वपुषि भूषणं चिकुरधोरणी धूपिता
कृताशयनसन्निधौ क्रमुकवीटिकासम्भृतिः।
अकारि हरिणीदृशा भवनमेत्य देहश्रिया
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दुर्दिनम् ॥६२॥

मनोरथो यथा।

आवयोरङ्गयोर्द्वित्वे भूयो विरहविक्लवः।
अद्वैते च स्मितं स्फीतं नस्यादन्योन्यवीक्षणम् ॥६२॥

क्रोधो मा प्रतिषेधवाचि किमसौ प्राणेश्वरो मन्यते ।
इत्थं कर्णसुवर्णकेतकरजःपातोपघातच्छलात्
अक्ष्णोः कापि नवोढ़नीरजमुखी बाष्पोदकं मुञ्चति ॥५६॥

प्रोढ़ा उत्कण्ठिता यथा ।

आतर्निकुञ्ज सखि यूथि रसाल बन्धो
मातस्तमस्विनि पितस्तिमिर प्रमोद ।
पृच्छामि किञ्चिदिह नीरधराभिरामो
दामोदरः कथय किन्न समाजगाम ॥५७॥

परकीया उत्कण्ठिता यथा ।

स्नातं वारिदवारिभिर्विरचितो वासो घने कानने
प्रीतैश्चन्दनवारिभिर्मनसिजो देवः समाराधितः ।
नीता जागरणव्रतेन रजनी व्रीड़ा कृता दक्षिणा
तप्तं किन्न तपस्तथापि स कथं नाद्यापि नेत्रातिथिः ॥५८॥

सामान्यवनिता उत्कण्ठिता यथा ।

कथं न कान्तः समुपैति कुञ्जम्
इत्थं चिरं चेतसि चिन्तयन्ती ।
अक्षालयन्निष्पतिताश्रुधारां
वाराङ्गना कापि धनाभिलाषात् ॥५९॥

अद्य मे प्रियवासक इति अभिप्रेत्य या सुरतसामग्रीं सज्जीकरोति, सा वासकसज्जा । वासको वासरः ।

Digitized by Google

सन्तापाकुलया तया च परितः पाथोधरे गर्जति
क्रोधभ्रान्तजनातिमत्तमहिषभ्रान्त्या हतो योषिते ॥५५॥

सामान्यवनिता विप्रलब्धा यथा।

कपटवचनभाजा केनचिद्दारयोषा
सकलरसिकगोष्ठीरञ्जिका वञ्चितासौ।
इति विहसति रिक्तद्रुम्भ्रविच्छिन्नवल्ली-
विकचकुसुमकान्तिच्छद्मना केलिकुञ्जः ॥५६॥

सङ्केतस्थलं प्रति भर्त्तुरनागमनकारणं या चिन्तयति सा उत्कण्ठिता। अवधिदिवसानागतप्रेयसि प्रोषितपतिकायां नातिव्याप्तिः। तस्या भर्त्तुरवधिदिवसे भवनागमनानियम इति सङ्केतपदेन व्यावर्त्तनात्।

अस्याश्चेष्टा।

अरतिसन्ताप-जृम्भनाङ्गास्फोटकम्पनरुदितस्वावस्थाकथनादयः।

मुग्धा उत्कण्ठिता यथा।

यन्नाद्यापि समागतः पतिरिति प्रायः प्रपेदे पराम्
इत्थं चेतसि चिन्तयन्त्यपि सखीं न व्रीड़िता पृच्छति।
दीर्घं न श्वसितं दधाति चकितं न प्रेक्षते केवलं
किञ्चित्पक्वपलाण्डुपाण्डुरुचिं धत्ते कपोलस्थलीम् ॥५५

मध्या उत्कण्ठिता यथा।

आनेतुं नगता किमु प्रियसखी भीता भुजङ्गात् किमु

मुग्धा विप्रलब्धा यथा।

आलीभिः शपथैरनेककपटैः कुञ्जोदरं नीतया
शून्यं तच्च निरीक्ष्य विस्मितया न प्रस्थितं न स्थितम्।
न्यस्ता किन्तु नवोढनीरजदृशा कुञ्जोपकण्ठे दृशा
भ्राम्यद्भृङ्गकदम्बडम्बरचमत्कारस्पृशो दृग्द्वयः॥५१॥
किमुत्तीर्णः पन्थाः कुपितभुजगीभोगविषमो
विषोढा भूयस्यः किमपि कुलपालीकटुगिरः।
इति स्मारं स्मारं दरदलितशीतद्युतिरुचौ
सरोजाक्षी शोणं दिशि नयनकोणं विकिरति॥५२॥

मध्यमा विप्रलब्धा यथा।

सङ्केतकेलिगृहमेत्य निरीक्ष्य शून्यम्
एणीदृशो निभृतनिःश्वसिताधरायाः।
अर्धोत्तरं वचनमद्य विकाशिनेत्रं
ताम्बूलमर्धकवलीकृतमेव तस्थौ॥५३॥

प्रौढा विप्रलब्धा यथा।

शून्यं केलिगृहं निरीक्ष्य कुटिलं विज्ञाय चेतोभवं
दूती नापि निवेदिता सहचरी दृष्टापि नो वा तया।
शम्भो! शङ्कर! चन्द्रशेखर! हर! श्रीकण्ठ! शूलिन्! शिव!
त्रायस्वेति परन्तु पङ्कजदृशा भर्गस्य चक्रे स्तुतिः॥५४॥

परकीया विप्रलब्धा यथा।

दत्त्वा धैर्यभुजङ्गमूर्ध्नि चरणावुल्लङ्घ्य लज्जानदी-
रुल्लङ्घ्यात्य घनान्धकारपटलं तन्व्या न दृष्टः प्रियः।

Digitized by Google

इति कलहमधोमुखी सखीभ्यो
लपितु मनालपितुं समाचकांक्षे ॥४६॥

प्रौढाकलहान्तरिता यथा ।

अकरोः किं नु नेत्रशोणिमानं
किमकार्षीः करपल्लवावरोधम् ।
कलहं किमधाः क्रुधा रसज्ञे
हितमर्थं न विदन्ति दैवदष्टाः ॥४७॥

परकीया कलहान्तरिता यथा ।

भर्त्तुर्वश्य कृते गुरुर्लघुरभूद् गोष्ठी कनिष्ठीकृता
धैर्य्यं कोषधनं गतं सहचरी नीतिः कृता दूरतः ।
निर्मुक्ता त्रपवत् त्रपा परिचिता स्रोतस्वती विन्दुवत्
स क्रोधादवधीरितो हतधिया मातर्बलीयान् विधिः ॥४८

सामान्यवनिता कलहान्तरिता यथा ।

यत्पङ्केरुहलच्छ्यपाशिकमले भाग्यालये यद्गुरु
न्यस्तं काममयं ललाटफलके भाग्याक्षरं वेधसा ।
तत् सर्व्वं सखि यो यथार्थमकरोत् तस्मिन् प्रकोपः कृतो
धिङ् मां धिङ् मम जीवितं धिगतनुं धिक् चेष्टितं दिव्ययः॥४९

सङ्केतनिकेतने प्रियतममनवलोक्य समाकुलहृदया
विप्रलब्धा ।

अस्याश्चेष्टा निर्वेदनिःश्वाससखीजनोपालम्भ-
सन्तापालापभयचिन्ताश्रुपातमूर्च्छादयः ॥५०॥

संप्रति रजनिरहस्यं नयनालस्यं निवेदयति ॥

ग्रन्थान्तरम्।

परकीया खण्डिता यथा।

कान्तं निरीक्ष्य वलयाङ्कितकण्ठदेशम्
उक्ता तया परभिया परुषा न वाचः।
दूतीमुखे मृगदृशा स्खलदश्रुपूरा
दूरात् परं निदधिरे नयनान्तपाताः ॥४४॥

सामान्यवनिता खण्डिता यथा।

उरस्तव पयोधराङ्कितमिदं कुतो मे क्षमा
ततो मयि निधीयतां वसु पुरा यदङ्गीकृतम्।
इति प्रचलचेतसः प्रियतमस्य वारस्त्रिया
क्वणत्कणककङ्कणं करतलात् समाकृष्यते ॥४५॥

अग्रे अवमत्य पतिं पश्चात् परितप्ता कलहान्तरिता॥
अस्याश्चेष्टा भ्रान्तिसंमोहसन्तापसन्ततिश्वासज्वरप्रलापादयः।

मुग्धा कलहान्तरिता यथा।

अनुनयति पतिं न लज्जमाना
कथयति नापि सखीजनाय किञ्चित्।
प्रसरति मलयानिलेन वोढा
वहति परन्तु चिराय क्षुभ्यमन्तः॥

मध्या कलहान्तरिता यथा।

विरमति कथनं विना न खेदः
सति कथने समपैति कापि लज्जा।

Digitized by Google

अन्योपभोगचिह्नितः प्रातरागच्छति पतिर्यस्या सा खण्डिता। प्रातरित्युपलक्षणम्, अस्याश्चेष्टा, अस्फुटालाप-चित्त-सन्ताप-निश्वास-तूष्णीम्भावाश्रुपातादयः।

मुग्धा खण्डिता यथा।

वच: किमु कलसाङ्कितमिति किमपि द्रष्टुमिच्छन्त्याः।
नयनं नवोढसुदृशः प्राणेशः पाणिना पिधत्ते ॥

मध्या खण्डिता यथा।

वक्षोऽर्धचिह्नितमुरो दयितस्य वीक्ष्य
दीर्घं न निःश्वसिति जल्पति नैव किञ्चित्।
प्रातर्जलेन वदनं परिमार्जयन्ती
बाला विलोचनजलानि तिरोदधाति ॥४२॥

प्रौढ़ा खण्डिता यथा।

कान्तं वीक्ष्य विपक्षपक्ष्मलदृशः पादाम्बुजालक्तकै-
रालिप्ताननमाननीकृतमुखी चित्रार्पितेवाभवत्।
व्यक्तं नोक्तवती न वा स्तुतवती निश्वासकोष्णा दृशः
प्रातर्मङ्गलमङ्गनाकरतलादादर्शमादर्शयत् ॥४७॥

नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम्।
प्रतिदिशमपरस्त्रीसङ्गसंसी विसर्पन्
नवपरिमलगन्धः केन शक्यो वरीतुम् ॥

सखे दशनक्षतमधरं किमिति गोपयसे प्रयत्नेन।

कण्ठे गद्गदवाचमस्यति हुशा धत्ते न बाष्पोदकं
सन्तापं सहते यदम्बुजमुखी तद्वेद चेतोभवः ॥३८॥

मध्या प्रोषितभर्त्तृका यथा।

बाहुस्तदेव वपुषो वलयस्तदेव
हस्तस्य सैव जघनस्य च रत्नकाञ्ची।
वाचालभृङ्गसुभगे सुरभौ समस्त-
मभ्यधिकं भवति तत् सखि किं निदानम् ॥३९॥

प्रौढप्रोषितभर्त्तृका यथा।

माला बालाम्बुजदलमयी मौक्तिकी हारयष्टिः
काञ्ची किञ्च त्वयि यदुपते प्रस्थिते प्रस्थितैव।
अन्यद्ब्रूमः किमिह धमनी वर्त्तते वा नवेति
ज्ञातुं बाह्रोरहह वलयं पाणिमूलं प्रयाति ॥४०॥

परकीया प्रोषितभर्त्तृका यथा।

श्वश्रूः पद्मदलं ददाति तदपि भ्रूसंज्ञया गृह्यते
सद्योमर्म्मरशङ्कया न च तथा संस्पृश्यते पाणिना।
यातुर्वाचि सुहृद्गणस्य वचसि प्रत्युत्तरं दीयते
श्वासः किन्तु न मुच्यते कृतवहन्क्रूरः कुरङ्गीदृशा ॥४१॥

सामान्यवनिता प्रोषितभर्त्तृका यथा।

विरहविदितमन्तः प्रेम विज्ञाय कान्तः
पुनरपि वसु तस्मादेत्य मे दास्यतीति।
मरिचनिचयमध्योर्ब्बस्य बाष्पोदबिन्दून्
विसृजति गुरयोमिदूहारदेशोपविष्टा ॥

एताः षोडशापि अष्टाभिरवस्थाभिः प्रत्येकमष्टविधाः । प्रोषितभर्तृका खण्डिता कलहान्तरिता विप्रलब्धा उत्कण्ठिता वासकसज्जा स्वाधीनपतिका अभिसारिका चेति गणनया अष्टाविंशत्यधिकशतं भेदा भवन्ति ॥१२८॥ तासामप्युत्तमाधममध्यमागणनया चतुरशीतियुतं शतत्रयं भेदा भवन्ति ॥ ३८४॥ यत्तु तासां दिव्या अदिव्या दिव्यादिव्यादित्रयगणनया द्विपञ्चाशदधिकशतयुतसहस्रभेदा भवन्ति ॥११५२॥ तत्र दिव्या शच्यादयः । अदिव्या मालत्यादयः । दिव्यादिव्या द्रौपद्यादयः इति । तत्र अवस्थायां भेदेनैव नायिकानामपि भेदात् । जातिभेदेन भेदस्वीकारे नायकानामप्येवमानन्त्यं स्यात् ।

तथाहि दिव्यादिभेदाः नायकानामपि सन्ति यथा । दिव्या इन्द्रादयः, अदिव्या माधवादयः, दिव्यादिव्या अर्जुनादयः । यद्यपि मुग्धायां यथा धीरादिभेदाभावस्तथाविधप्रज्ञासामग्र्यभावात् तथा अष्टविधत्वाभावो भवितुमर्हति । तथापि प्राचीनलिखनानुरोधेन नवोढामप्यवलम्ब्य ते भेदा अवगन्तव्याः । देशान्तरगते प्रेयसि सन्तापव्याकुला प्रोषितभर्तृका । उत्कण्ठिता कलहान्तरिता विप्रलब्धासां पतिर्देशान्तरगतो न भवतीति तत्रातिव्याप्तिः । अस्याश्चेष्टा दशावस्था ।

मुग्धा प्रोषितभर्तृका यथा ।

दुःखं दीर्घतमं वहन्त्यपि सखी वर्गाय नो भाषते
शैवालैः शयनं सृजन्त्यपि पुनः शेते न वा लज्जया ।

Digitized by Google

सखि कथय किमाचरामि कान्ते
मम जनि तव सहिष्णुतैव दोषः ॥२५॥

मानवती यथा । प्रियापराधसूचको मानः । स च लघुर्मध्यमो गुरुः । अल्पापनेयो लघुः । कष्टतयापनेयो मध्यमः, कष्टतरापनेयो गुरुः ॥ असाध्यस्तु रसाभासः । अन्यस्त्रीदर्शनादिजन्मा लघुः । गोत्रस्खलनादिजन्मा मध्यमः । अपरस्त्रीसम्भोगादिजन्मा गुरुः । अन्यथा सिद्धकुतूहलाद्यपनेयो लघुः । अन्यथानादरापथाद्यपनेयो मध्यमः अन्यस्त्रीदर्शनादिजन्मा । चरणपातभूषणदानाद्यपनेयो गुरुः ।

परस्त्रीदर्शनादिजन्मा यथा ।

स्वेदाम्बुभिः क्व च न पिच्छलमङ्गभूमौ
मातोहरि क्व च न कण्टकितं विभाति ।
अन्यां विलोकयति भाषयति प्रियेऽपि
मानः क्व दास्यति पदं तव तन्न विद्मः ॥२६॥

गोत्रस्खलनादिजन्मा यथा ।

यद्गोत्रस्खलनं तव भ्रमो यदि न मन्यसे ।
रोमालिव्यालसंस्पर्शं शपथं तर्हि कारय ॥

अपराङ्गनासङ्गादिजन्मा यथा ।

दयितस्य निरीक्ष्य भालदेशं
चरणालक्तकपिञ्जरं सपत्नाः ।
सुदृशो नयनस्य कोणभासः
श्रुतिमुक्ताशिखरोपमा बभूवुः ॥२७॥

Digitized by Google

वित्तमात्रोपाधिकसकलपुरुषाभिमता सामान्यवनितेति । मन्मग्निमित्ते क्षितिपतावनुरक्तायामेरावत्यामप्राप्तिः । तत्र वित्तमात्रोपाधेरभावादिति चेत् नैवम् । सापि काश्मीरहीरकादिदातरि महाराजेऽनुरक्ता न तु महाहर्षितेवावगम्यते । तत्र वित्तमात्रोपाधिरिति सामान्यवनिता यथा ।

दृष्ट्वा प्राङ्गणसन्निधौ बहुधनं दातारमभ्यागतं
वक्षोजौ तनुतः परस्परमिवाश्लेषं कुरङ्गीदृशः ।
आनन्दाम्बुपयांसि मुञ्चति मुक्तमौलामिषात् कुन्तलो
दृष्टिः किञ्च धनागमं कथयितुं कर्णान्तिकं गच्छति ॥ ३२

अन्यसम्भोगदुःखिता यथा ।

त्वं दूति निरगाः कुञ्जं न तु पापीयसो गृहम् ।
किंशुकाभरणो देहो दृश्यते कथमन्यथा ॥ ३३ ॥

वक्रोक्तिगर्विता द्विविधा । प्रेमगर्विता सौन्दर्यगर्विता चेति ।

प्रेमगर्विता यथा ।

वपुषि तव तनोति रत्नभूषां
प्रभुरिति धन्यतमासि ब्रवीमि ।
सखि तनुनयनान्तरालभीरुः
कलयति मे न भूषणानि कान्तः ॥ ७४ ॥

सौन्दर्यगर्विता यथा ।

कलयति कमलोपमानमक्ष्णो
प्रथयति वाचि सुधारसस्य साम्यम् ।

Digitized by Google

अन्यान्तरे अनुशयाना यथा । सङ्केतस्थानविघटनेन भाविस्थानाभावशङ्कया स्थानधिष्ठितशङ्केतस्थाने भर्तुर्गमनानुमानेन चानुशयाना भवति । प्रत्येकमुदाहरणानि । प्रथमं यथा ।—

समुपागतवति चैत्रे निपतति पत्रे लवङ्गलतिकायाः ।
सुदृशः कपोलपाली शिव शिव तालीद्युतिं धत्ते ॥२८॥

निद्रालुकेकिमिथुनानि कपोतपीत-
व्याधूतनूतनमहीरुहपल्लवानि ।
तत्रापि तन्वि न वनानि कियन्ति सन्ति
खेद्यत्यनप्रियतमस्य गृहं प्रयाति ॥२९॥

कर्णकल्पितरसालमञ्जरी पिञ्जरीकृतकपोलमण्डलः ।
निष्पतन्नयनवारिधारया राधया मधुरिपुर्निरीक्ष्यते ॥

मुदिता यथा ।

गोष्ठेषु तिष्ठति पतिर्बधिरो न नन्दो
नेत्रद्वयस्य न च पाटवमस्ति यातुः ।
इत्थं निगद्य तरुणी कुचकुम्भसीम्नि
रोमाञ्चकञ्चुकमुदञ्चितमाततान ॥७०॥

कन्यका यथा ।

किञ्चित् कुञ्चितहारयष्टिसरलभ्रूवल्लिसाचिस्मितं
प्रान्तभ्रान्तविलोचनद्युति-भुजा पर्य्यन्तकर्णोत्पलम् ।
अङ्गुल्याङ्कुरदङ्गुलीयकरुचा गण्डस्य कण्डूयनं
कुर्व्वाणा नृपकन्यका सुहृतिनं सव्याजमालोकते ॥७१॥

पथिक समुचितवाद्यतीव्रे
सवितरि तत्रसरित्तटे निवासः ॥२४॥

विदग्धा द्विविधा। वाग्विदग्धा, क्रियाविदग्धा।

क्रियाविदग्धा यथा।

त्रासाय भवननाथे वदरीमपनेतुमादिशति।
हेमन्ते हरिणाक्षी पयसि कुठारं विनिःक्षिपति ॥२५॥

लक्षिता यथा।

यद्भूतं तद्भूतं यद्भवात्तदपि वा भूयात्।
यद्भवति तद्भवतु वा विफलस्तव कोपगोपनोपायः ॥२६॥

कुलटा यथा।

एते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधराः
शैलाः शाद्वलमुद्वहन्ति न सृजन्त्येते पुनर्नायकान्।
त्रैलोक्ये तरवः फलानि सुवते नैवारभन्ते जनान्
धातः कातरमालयामि कुलटाहेतोस्त्वया किं कृतम् ॥२७

ब्रह्मैव सर्व्वमितरं न हि वस्तु किञ्चित्
जारे यथा गृहपतौ च रतिस्तथा मे।
तस्मादहो न हि परापरभेदबुद्धिः
मूढाः किमर्थमसतीति कदर्थयन्ति ॥

श्वश्रो तावत्त्रिकोणा विपुलनदनदीग्रामवद्धं तदर्द्धं
तत्राप्यर्द्धं युवत्यः शिशुगतवयसो रोगिणो योगिनश्च।
त्यज्यास्तत्रापि मान्याः श्वशुरपितृमुखाः सन्ति शेषाः कियन्तो
मिथ्यावादो ममायं सुखरमुखरवः पुंश्चली पुंश्चलीति ॥

Digitized by Google

एकस्याः कलयन् करे प्रथमतो रत्नं परस्याः प्रियो
हस्तात्हस्तिमिषात् स्पृशन् कुचतटीमानन्दमाविन्दति ॥२२

अप्रकटितपरपुरुषानुरागा परकीया । सा च द्विविधा परोढ़ा कन्यका चेति । कन्यायाः पित्राद्यधीनत्वात् परकीया अस्या गुप्ता एव सर्व्वा चेष्टा ।

परोढ़ा यथा ।

अयं रेवाकुञ्जः कुसुमशरसेवासमुचितः
समीरोऽयं वेलादरविदलदेलापरिमलः ।
इयं प्रावृट् धन्या नवजलदविन्यासरुचिरा
पराधीनं चेतः सखि किमपि कर्त्तुं मृगयते ।२३॥

गुप्ताविदग्धालक्षिताकुलटानुशयानामुदिताप्रभृतीनां परकीयायामेवान्तर्भावः ।

गुप्ता त्रिविधा वृत्तसुरतगोपना वर्त्तिष्यमाणसुरतगोपना वर्त्तमानसुरतगोपना च इति ।

त्रितयमपि यथा ।

श्वश्रूः क्रुध्यतु निर्दिशन्तु सुहृदो निन्दन्तु वा यातर-
स्तस्मिन्नद्य न मन्दिरे सखि पुनः स्वापो विधेयो मया ।
आखोराक्रमणाय कोणकुहरादुत्फालमातन्वती
मार्जारीनखरैः खरैः कृतवती कां कां न मे दुर्दशाम् ॥२४॥

वाग्विदग्धा यथा ।

निविड़तमतमालमल्लिवल्ली-
विचकिलराजिविराजितोपकण्ठे ।

Digitized by Google

हस्तन्यस्तकरे पुनर्दृगहमा साकारसञ्चालित-
प्रोडोष्टमधूकमांसलवचो विस्फारिता दृष्टयः ॥१९॥

धीरादि त्रय एते द्विधा। ज्येष्ठा कनिष्ठा च। अधीरा ज्येष्ठा कनिष्ठा च। धीराधीरा ज्येष्ठा कनिष्ठा च। परिणीतात्वे सति भर्त्तुरधिकस्नेहा ज्येष्ठा। परिणीतात्वे सति भर्त्तुर्न्यूनस्नेहा कनिष्ठा। अधिकस्नेहासु न्यूनस्नेहासु सामान्यवनितासु नातिव्याप्तिः। परिणीतपादेन व्यावर्त्तनात् नापि परकीयायां भर्तृपदव्यावृत्तेः।

धीरा ज्येष्ठाकनिष्ठा यथा।

एकस्मिन् शयने सरोरुहदृशोर्विज्ञाय निद्रान्तयो-
रेकां पल्लविताबगुण्ठनवतीमुत्कन्धरो दृष्टवान्।
अन्यस्याः सविधं समेत्य निभृतं व्यालोलहस्ताङ्गुलि-
व्यापारैर्वसनाञ्चलं चपलयन् स्वापच्युतिं कृतवान् ॥२०॥

अधीरा ज्येष्ठाकनिष्ठा यथा।

अन्तःकोपकषायिते प्रियतमे पश्यन् घने कानने
पुष्पस्यावचयाय नम्रवदनामेकां समायोजयन्।
अर्द्धोन्मीलितलोचनाञ्चलचमत्काराभिरामाननां
स्मेराभाधरपल्लवां नवबधूमन्यां समालिङ्गति ॥२१॥

धीराधीरा ज्येष्ठाकनिष्ठा यथा।

धैर्य्याधैर्य्यपरिग्रहग्रहिलयोरेनोदृशः प्रीतये
रत्नद्वन्द्वमनन्तकान्तिरुचिरं सुष्टिद्वये न्यस्तवान्।

Digitized by Google

निष्पीतं भवता मधु प्रवितं व्याघूर्णितं मे मनः ।
भ्राम्यद्भृङ्गगणे निकुञ्जभवने लब्धं त्वया श्रीफलं
पञ्चेषुः पुनरेव मां कृतवकैः शरैः हन्ति ॥१५॥

मध्याधीराधीरा यथा ॥

कान्तानुरागचतुरोऽसि मनोहरोऽसि
नाथोऽसि किञ्च नवयौवनभूषितोऽसि ।
इत्थं निगद्य सुदृशा वदने प्रियस्य
निश्वस्य बाष्पकलिता निहिता दृगन्ताः ॥१६॥

प्रगल्भाधीरा यथा ॥

नो तल्पं भजसे न जल्पसि सुधाधारानुकारा गिरो
दृक्पातं कुरुषे नवा परिजनक्रोधप्रकाशच्छलात् ।
इत्थं केतकगर्भगौरि दयिते कोपस्य सङ्गोपनं
ते स्यादेव न चेत् पुनः सहचरी कुर्वीत साचिस्मितम् ॥१७

प्रगल्भाधीरा यथा ।

प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्यावासमाशङ्कमाना ।
गिरिशमचलकन्या तर्जयामास कम्प-
प्रचलवलयवल्गत्कान्तिभाजा करेण ॥१८॥

प्रगल्भाधीराधीरा यथा ।

तल्पोपान्तमुपेयुषि प्रियतमे वक्रीकृतग्रीवया
काकुव्याकुलवाचि साचिहसितस्फूर्जत्कपोलश्रिया ।

मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे धीरा अधी-रा धीराधीरा च।

व्यङ्गकोपप्रकाशिका धीरा। अव्यङ्गकोपप्रकाशिका अधीरा। व्यङ्गाव्यङ्गकोपप्रकाशिका धीराधीरा। इयन्त विशेषः।

मध्याधीरायाः कोपस्य गोव्यञ्जिका। अधीरायाः परुष-वाक्। धीराधीरायास्तु वचनरुदिते कोपप्रकाशके।

प्रौढ़ाधीरायास्तु रत्यौदास्यम्। अधीरायास्तु तर्जनता-ड़नादिः। धीराधीरायास्तु रत्यौदास्यं तर्जनताड़नादि च कोपस्य प्रकाशकमिति।

यत्तु धीराभेदः स्वीयायामेव न तु परकीयायामिति प्राचीनलिखनम् तदाज्ञामात्रं धीरत्वमधीरत्वं तदुभयं वा माननियतं, परकीयाया अपि मानश्चेत्तासामप्यावश्यक-त्वम्। मानश्च स्वीयायामेव न तु परकीयाया इति वक्तुं न शक्यते।

मध्याधीरा यथा।

लीलालिपुञ्जव्रजतोनिकुञ्जे
स्फारा बभूवुः श्रमवारिधाराः।
देहे समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥१४॥

मध्यमा अधीरा यथा।

जातस्ते निशिजागरो मम पुनर्नेत्राम्बुजे शोणिमा

अतिविश्रब्धनवोढा यथा ।

प्रेङ्खयप्रेङ्खयालापान् कुर्व्वन्त्यः सस्मितत्रपम् ।
नवीनायाः प्रवीणायाः स्वप्नं सम्मारञ्जनम् ॥१०॥

अस्याश्चेष्टा सागसि प्रेयसि धैर्य्ये वक्रोक्तिः; अधैर्य्ये परुषवाक् । यथा

स्वापे प्रियाननविलोकनहानिरेव
स्वापच्युतौ प्रियकरग्रहणप्रसङ्गः ।
इत्थं सरोरुहमुखी परिचिन्तयन्ती
स्वापं विधातुमपि हातुमपि प्रपेदे ॥११॥

पतिमात्रविषयकेलिकलापकोविदा प्रगल्भा ।
वेश्यायाश्च पतिमात्रविषयकत्वाभावान्नातिव्याप्तिः
अस्याश्चेष्टा रतिप्रीतिः आनन्दात् सम्मोहः ।

प्रथमं यथा ।

संस्पृश्य स्तनमाकलय्य वदनं संश्लिष्य कण्ठस्थलं
निष्पीड्याधरबिम्बमम्बरमपाकृष्य व्युदस्यालकम् ।
देवस्याम्बुजिनीपतेः समुदयं जिज्ञासमाने प्रिये
बामाक्षीवसनाञ्चलैः श्रवणयोर्नीलोत्पलं निह्नुते ॥१२॥

द्वितीयं यथा ।

नखक्षतमुरस्थलेऽधरदले रदस्य क्षतं
च्युता वकुलमालिका विगलिता च मुक्तावली ।
रतान्तसमये मया सकलमेतदालोकितं
स्मृतिः क्व च रतिः क्व च क्व तवालि मिथ्याविधिः ॥१३

ज्ञातयौवना यथा ।

स्वयम्भूः शम्भुरम्भोजलोचने त्वत्पयोधरः ।
नखेन कस्य धन्यस्य चन्द्रचूड़ो भविष्यति ॥६॥
तन्वी बाला मृदुतनुरियं त्यज्यतामत्र शङ्का
काचिद्दृष्टा भ्रमरभरतो मञ्जरी भिद्यमाना ।
तस्मादेषा रहसि भवता निर्दयं पीड़नीया
मन्दाक्रान्ता वितरति रसं नेक्षुयष्टिः समग्रम् ॥१॥

नवोढ़ा यथा ।

हस्ते धृतापि शयने विनिवेशितापि
क्रोड़े कृतापि यतते वहिरेव गन्तुम् ।
जानीमहे नववधूरथ तस्य वश्या
यः पारदं स्थिरयितुं क्षमते करेण ॥७॥
बलान्नीता पार्श्वं मुखमभिमुखं नैव कुरुते
धुनानामूर्द्धानं रहसि बहुशश्चुम्बनविधौ ।
हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना
नवोढ़ा वोढ़ारं रमयति च सन्तापयति च ॥८॥

विस्रब्धनवोढ़ा यथा ।

ररमुकुलितनेत्रपालिनो सा नियमित बाहुलतोरुयुग्मबन्धम् ।
करकलितपयोधरं नवोढ़ा स्वपिति समीपमुपेत्य कस्य यूनः ॥९
समानलज्जामदनामध्या ॥
एषैव चातिप्रश्रयादतिविस्रब्धनवोढ़ा ।

क्रमश्रया विस्रब्धनवोढा । तस्याश्चेष्टा क्रिया मनोहरा कोपे मार्दवं नवभूषणे समीहा चेति ।

मुग्धा यथा ।

भ्रातर्न किल कामदेवधरणीपालेन काले शुभे
वस्तुं वास्तुविधिं विधास्यति तनौ तारुण्यमेनीदृशः ।
दृष्टा खञ्जनचातुरी मुखरुचा सौधाकरी माधुरी
वाचा किञ्च सुधासमुद्रलहरीलावण्यमामन्त्र्यते ॥४॥
उरो भवि न तुङ्गिमा न च गतागते भङ्गिमा
तथा वचसि रङ्गिमा कुटिलता न तावद्भ्रुवोः ।
तथापि हरिणीदृशां वपुषि कापि कान्तिच्छटा
पटावृतमहामणिद्युतिरिवान्तरा लक्ष्यते ॥
बाल्ययौवनयोर्मध्ये द्वैराज्ये कुसुमायुधः ।
वारं वारं धनुर्धत्ते वारं वारं विमुञ्चति ।
चलदचलदपाङ्गं स्मेरमस्मेरमास्यं
गतिरहह किमस्या मन्थरामन्थरा च ।
इति मनसि नितान्तं चिन्तयन् पञ्चबाणः
करविनिहितबाणः संभ्रमादुद्भ्रमीति ॥

अज्ञातयौवना यथा ।

नीरात्तीरमुपागता श्रवणयोः सीम्नि स्फुरन्नेत्रयोः
श्रोत्रे लग्नमिदं किमुत्पलमिति ज्ञातुं करं न्यस्यति ।
शैवालाङ्कुरशङ्कया प्रविमुखी रोमावलीं प्रोञ्छति
भ्रान्ताऽलीति मुहुः सखीमविदितश्रोणीभरा पृच्छति ॥५

रसमञ्जरी।

आत्मीयं चरणं दधाति पुरतो निम्नोन्नतायां भुवि
स्वीयेनैव करेण कर्षति तरोः पुष्पं श्रमाशङ्कया।
तल्पे किञ्च करित्वचा विरचिते निद्रातिभागैर्निजै-
रन्तःप्रेमभरालसां प्रियतमामङ्के दधानो हरः॥१॥

विद्वज्जनमनोभृङ्ग-रसव्यासङ्गहेतवे।
एषा प्रकाश्यते श्रीमद्भानुना रसमञ्जरी॥२॥

तत्र रसेषु शृङ्गारस्याभ्यर्हितत्वेन तदालम्बनविभावत्वेन नायिका तावन्निरूप्यते। सा च त्रिधा स्वीया परकीया सामान्यवनिता चेति। यत्र स्वामिन्येवानुरक्ता स्वीया न च परिणीतायां परगामिन्यामतिव्याप्तिस्तत्र पतिव्रताया एव लक्ष्यत्वात्। तस्याः परगामितया परकीयात्वमपि सम्भवति। अस्याश्चेष्टा भर्त्तुः शुश्रूषा शीलसंरक्षणम् आर्जवं क्षमा च। यथा

गतागतकुतूहलं नयनयोरपाङ्गावधि
स्मितं कुलनतभ्रुवामधर एव विश्राम्यति।
वचः प्रियतमश्रुतेरतिथिरेव कोपक्रमः
कदाचिदपि चेत्तदा मनसि केवलं मज्जति॥३॥

स्वीया त्रिविधा मुग्धा मध्यमा प्रगल्भा च। तत्राङ्कुरितयौवना मुग्धा। सा चाज्ञातयौवना ज्ञातयौवना च। सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढा। सैव क्रमशः

वालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं
पश्चाद्रावणकुम्भकर्णहननम् एतद्धि रामायणम् ॥

इति एकश्लोकी रामायणम् ।

एकश्लोकी भारतम् ।

आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनं
द्यूतश्रीहरणं वने व्यतरणं मत्स्यासुयेवर्द्धनम् ।
लीलागोग्रहणं रणे व्यतरणं संध्यक्रियावर्द्धनं
पश्चाद्भीष्मककौरवादिहननश्चैतन्महाभारतम् ॥

इति एकश्लोकी भारतम् ।

विष्णुस्तवः ।

श्रीकृष्ण विष्णो मधुकैटभारे भक्तानुकम्पिन् भगवन्मुरारे ।
त्रायस्व मां केशव लोकनाथ गोविन्द दामोदर माधवेति ॥१॥
संसारकूपे पतितो ह्यगाधे मोहान्धपूर्णे विषयातितप्ते ।
करावलम्बं मम देहि विष्णो गोविन्द दामोदर माधवेति ॥२॥
जिह्वे सदैवं भज सुन्दराणि नामानि कृष्णस्य मनोहराणि ।
समस्तभक्तार्तिविनाशनानि गोविन्द दामोदर माधवेति ॥३॥

इति श्रीकृष्णानन्द व्यासदेवरागसागरोद्भव-
स्तोत्रादि परमार्थस्तोत्रादि
संग्रहकृतं समाप्तम् ।

Digitized by Google

तद्विद्यादात्मनो मायां यथाभासो यथातमः ॥४॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथातेषु नतेष्वहम् ॥५॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात्सर्वत्र सर्वदा ॥६॥
एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥७॥

इति श्रीश्लोकसप्तकं श्रीभागवतं समाप्तम् ।

एकश्लोकी भागवतम् ।

आदौ देवकिदेवगर्भजननं गोपीगृहे वर्द्धनं
मायापूतनजीवितापहरणं गोवर्द्धनोद्धारणम् ।
कंसच्छेदनकौरवादिहननं कुन्तीसुतापालनं
एतद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ।

इति एकश्लोकी भागवतम् ।

एकश्लोकी रामायणम् ।

आदौ रामतपोवनादिगमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायमरणं सुग्रीवसम्भाषणम् ।

Digitized by Google

वार्य्यात्मनामप्रतिबिम्बितनुः सुपर्णो
योषिद्रुतः समदनः प्रतिरौरवीति ॥१९॥
विस्फारिताम्बुजरवेण दिरेफरेण
संत्रासितोहरिरनोकहनिष्कुटस्थः ।
संलीयते तड़िदमप्यभिवीक्ष्य विद्युः
स्वात् संमहत्तरमसौ स्वमनुप्रविष्टः ॥२०॥
एतावदुक्तमवचः सुमनाः स उक्त्वा
रत्यादिनं सह तया प्रियया ह्यदीनः ।
युक्तं चतुर्भिरनडुद्भिरदीनवाड्भि-
राख्ययानमथनाप्रययौ स्वगेहम् ॥२१॥

इति राक्षसकाव्यं सम्पूर्णम् ।

सप्तश्लोकी भागवतम् ।

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गञ्च गृहाण गदितं मया ॥१॥
यावानहं यथाभावो यद्रूपगुणकर्म्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥२॥
अहमेवासमेवाग्रे नान्यद्यत् सदसत्परम् ।
पश्चादहं तदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥३॥
ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि ।

Digitized by Google

एषोंग्निपाय न रिपुध्वसुतारिषाङ्क
मारुह्य तिष्ठति सुगालि भुजङ्गमारिः।
यस्य स्वरैः प्रमुदितस्य ममाद्य बाले
तालध्वजावरजसन्तुमरा: पतन्ति ॥१४॥
उष्णा विषं स्थलमतोऽस्तितथैव वार्ध्यौ
वार्जौ द्विजो हरिहगेष दयार्द्रगूढः।
वाताशनः स्वशयनः स्मरति स्थलस्य
चक्षुःश्रवा वनभयात् सुरमनुनामा ॥१५॥
पत्यश्वमेधतुरगप्रतिमोष्ठवर्ण्यौ
वार्दं नवर्षतिसमाक्रयतेऽद्यच्छिन्नः।
भेकस्तथैव पवनाशनवंशशाखिः
शब्दं करोत्यपि भृशं त्रिषराभिमग्नः ॥१६॥
नाविष्किरावणमुपेत्य कुमारवाङ्क-
माक्रीडते मधुकलोङ्गनया समेतः।
अन्यस्त्वयं मणिवराभमुपेत्य गोजं
नारामया महपयःपतिजां वृणीते ॥१७॥
स्थूलं महत् घातजवर्णनिभं नरोऽसौ
बिभ्रत्यमूनि च भिनत्ति सरोरुहाणि।
तज्जेन चापि रजसा वनितां दयस्थो
अभ्य चरत्यवकिरत्यभिषिच्यमानः ॥१८॥
पङ्के निमग्नमिभवृन्दमदः सवारि
गर्जन्तिमिन्द्रयदवृन्दमिवावभाति।

एनं पयोद्भवतिचक्रजिनः पयोदं
स्वच्छं महीतलगतप्रतिमं जतीव ।
भित्त्वावनीं वनवराहशिरोरुहाभ्यां
संप्रस्थितोऽम्बुधरैरभिषिच्यमानः ॥८॥
स्रोतोजविद्रुतजभूधरधातुकल्पाः
स्वस्थाः पयोजलमहत्कपिशाङ्गमासे ।
मासोर्न भस्य नभसो रतिसंचरन्तः
तीव्रं विषं विषधराः परिनिर्वमन्ति ॥९॥
पयोनिभध्वजसमभवानां श्रुत्वा निनादं गिरिगह्वरस्थः ।
तमोरिबिम्बप्रतिबिम्बधारी विरौति कान्तो घनकामकामः ॥१०॥
गोष्ठश्च कुङ्कुमवपुः प्रतिराजतेऽसौ
सप्ताद्रिदैत्यभुजकोत्तमयत्नगोपः ।
उर्वीधराभवनिपीडितमध्वरं खे
दृष्ट्वाहिहाप्रमुदितोऽपि महाकृयानः ॥११॥
लक्ष्यावधरः चरति तोयमयावज-
मत्स्याविभौ रसगताविव चेभसंज्ञौ ।
अन्ये तु ते द्विरदकुञ्जनिभाः चरन्तः
प्रच्छादयन्त्यमरवृन्दविमानमार्गम् ॥१२॥
वार्द्रीः खगाः क्षितिधरागमनप्रकाशाः
नेमीभरासभतुरङ्गमतुल्यघोषाः ।
वायूरिताः समवस्य वनं चरन्तो
वाभिः क्षितिं घृतधराः परिनिर्वपन्ति ॥१३॥

Digitized by Google

पश्चाज्जहग् गिरितटेष कुमारघाकान्
भूदेवराजरिपुमल्लसमावधूतान् ।
वैश्वानरारिजरिपुप्रवराभिभूतैः
हक्श्रीवयवभिषपासितपुष्पशोभान् ॥२॥
पश्चाद्विसारसदृशीभिरमूभिरद्रि-
राज्ञावयत्यमरगुपूर्धरिपी महेशः ।
अब्दः सिताभिरसितः सबलः खगाभि
र्वाजैः सितैरिव विभाति वनं प्रबुद्धैः ॥३॥
गोष्ठं घृतं सुघृतवाङ्भिरमूभिरम्बं
गोभिः समुद्धरति यद्वद्धाहिमन्नः ।
तद्वव्यमम्बरगतं शिखिजात्मसंस्थं
विस्पन्दमानमभिवद्दयतीह्यशोजान् ॥४॥
अम्बुदप्लावनिभहग् घनजात्मवक्रात्वा
वार्यस्वरेभनिभगागजदोःसमोरुः ।
सौरिध्वजप्रसवतुल्यविभाङ्गदाशौ
चाग्रं गताप्रमुदिताप्रसमोत्त्व वादम् ॥५॥
गोमध्यमध्ये मृगगोधरेहे सद्धस्वगोभूषणकिङ्कराणाम् ।
मादेन गोभृत्शिखरे प्रमत्ता नृत्यन्ति गोकर्णशरीरभक्षाः ॥६॥
सूर्यांशुनामपतिरुन्नतदन्तगामी
वागनामभिः परिवृतो विषनामदाभिः ।
उष्णां वरप्रमुदितः प्रतिनानदीति
गजेन्द्रमीत्वशिहितोचयतुल्यरूपम् ॥७॥

Digitized by Google

दृगन्तकान्तभङ्गिनं सदासबालसङ्गिनं
दिने दिने नवं नवं नमामि नन्दसम्भवम् ॥५॥
गुणाकरं सुखाकरं कृपाकरं कृपानरं
सुरासुरैककारणं नमामि गोपनायकम् ।
समस्तदोषशोषणं समस्तलोकतोषणं
समस्तदासमानसं नमामि कृष्णबालकम् ॥६॥
समस्तगोपनागरीनिकामकामदायकं
दृगन्तचारुसायकं नमामि वेणुनायकम् ।
भवोभवावतारकं भवाब्धिकर्णधारकं
यशोमतेः किशोरकं नमामि दुग्धचोरकम् ॥७॥
विदग्धमुग्धगोपिकामनोमनोजदायकं
नमामि कुञ्जकानने प्रवृद्धवह्निपायिनम् ।
यदा तदा यथा तथा तथैव कृष्णसत्कथा
मया सदैव गीयतां तथा कृपा विधीयताम् ॥८॥

इति श्रीकृष्णाष्टकस्तोत्रं सम्पूर्णम् ।

राक्षसकाव्यम् ।

कश्चिद्वनं बहुवनं विचरन् वयस्यो
वश्यां वनात्मवदनां वनितां वनाद्रीम् ।
तवैयरि प्रदमुदीक्ष्य समुत्थितं खे
नागामिमां मदकलः सकलां बभाषे ॥१॥

कृष्णताण्डवस्तोत्रम्।

भजे व्रजैकमण्डनं समस्तपापखण्डनं
स्वभक्तचित्तरञ्जनं सदैव नन्दनन्दनम्।
सुपिच्छगुच्छमस्तकं सुनादवेणुहस्तकं
अनङ्गरङ्गसागरं नमामि कृष्णनागरम्॥१॥
मनोजगर्वमोचनं विशाललोललोचनं
विधूतगोपशोचनं नमामि पद्मलोचनम्।
करारविन्दभूधरं स्मितावलोकसुन्दरं
महेन्द्रमानदारणं नमामि कृष्णवारणम्॥२॥
कदम्बसूनकुण्डलं सुचारुगण्डमण्डलं
व्रजाङ्गनैकवल्लभं नमामि कृष्णदुर्लभम्।
यशोदया समोदया सकोपया दयानिधिः
उलूखले सुदुःसहं नमामि नन्दबालकम्॥३॥
नवीनगोपनागरं नवीनकेलिमन्दिरं
नवीनमेघसुन्दरं भजे व्रजैकमन्दिरम्।
सदैव पादपङ्कजं मदीयमानसे निजं
दधाति नन्दबालकः समस्तभक्तपालकः॥४॥
समस्तगोपनागरीहृदं व्रजैकमोहनं
नमामि कुञ्जमध्यगं प्रसूनभालशोभिनम्।

Digitized by Google

ममप्रवृत्तिकः कदासदाशिवं भजाम्यहम् ॥११॥
कदानिलिम्पनिर्झरीनिकुञ्जकोटरेवसन्
विमुक्तदुर्मतिः सदाशिरस्थमञ्जलिं वहन् ।
विलोललोललोचनाललामभाललग्नकं
शिवेतिमन्त्रमुच्चरन्सदासुखीभवाम्यहम् ॥१२॥
निलिम्पनाथनागरीकदम्बमौलिमल्लिका
निगुम्फनिर्भरक्षरन्मधूष्णिकामनोहरम् ।
तनोतु नोमनोमुदंविनोदनीमहर्निशं
परश्रियः परंपदन्तदङ्गजत्विषांचयः ॥१३॥
प्रचण्डवाड़वानलप्रभाशुभप्रचारणी
महाष्टसिद्धिकामिनीजनावहूतजल्पना ।
विभक्तवामलोचनाविवाहकालिकध्वनिः
शिवेतिमन्त्रभूषणाजगज्जयायजायताम् ॥१४॥
नमामि पार्वतीपतिं नमामि जाह्नवीपतिं
नमामि भक्तवत्सलं नमामि रक्तलोचनम् ।
नमामि चन्द्रशेखरं नमामि दुःखमोचनं
त्वदीयपादपङ्कजं स्मराम्यहं महेश्वरम् ॥१५॥
रावणेन कृतं स्तोत्रं यः पठेत् शिवसन्निधौ ।
पुत्रपौत्रादिकं सौख्यं लभते मोक्षमेवच ॥१६॥

इति दशवदनकृतः शिवताण्डवः
सम्पूर्णः ।

करालभालपट्टिकाधगद्धगद्धगज्ज्वल
द्धनञ्जयाहुतीकृतप्रचण्डपञ्चसायके ।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ॥६॥

नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुरत्
कुहूनिशीथिनीतमप्रबन्धबन्धकन्धरः ।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः ॥७॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा
विलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥८॥

अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरी
रसप्रवाहमाधुरीविजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥९॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वसद्विनि-
र्गमत्क्रमस्फुरत्करालभालहव्यवाट्ज्वलन् ।
धिमिं धिमिं धिमिं ध्वनन्मृदङ्गतुङ्गमङ्गल-
ध्वनिक्रमप्रवर्त्तितप्रचण्डताण्डवः शिवः ॥१०॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो-
र्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः

Digitized by Google

रावणकृतशिवताण्डवः।

जटाकटाहसंभ्रमभ्रमन्निलिम्पनिर्झरी
विलोलवीचिवल्लरीविराजमानमूर्द्धनि।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥१॥

धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुर-
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे।
कृपाकटाक्षधोरणीनिरुद्धदुर्द्धरापदि
क्वचिद्दिगम्बरे मनो विनोदमस्तु वस्तुनि ॥२॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे।
मदान्धसिन्धुरासुरत्वगुत्तरीयमेदुरे
मनोविनोदमद्भुतं बिभर्तु भूतभर्तरि ॥३॥

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गया
निपीतपञ्चसायकं नमन्निलिम्पनायकम्।
सुधामयूखरेखया विराजमानशेखरं
महाकपालिसम्पदे सरिज्जटालमस्तु नः ॥४॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर
प्रसूनधूलिधोरणी विधूसराङ्घ्रिपीठभूः।
भुजङ्गराजमालया निबद्धजाटजूटकः
श्रिये चिराय जायतां चकोरबन्धुशेखरः ॥५॥

तवैवतोयमूर्त्तितो जगत्त्रयस्य जीवनं
तवैववायुमूर्त्तितो जगत्त्रयस्य चालनम्।
तवैववह्निमूर्त्तितो जगत्त्रयस्य जाड्यता
विलीयते गिरीश ते नमो नमो नमोऽस्तु ते ॥४३॥
त्वयैवयज्ञकारिणाम्बुदोऽपि जीवनप्रदः
सृजन्यतेभिवर्षतिक्षमांतुषारविन्दुभिः।
ततो हि जीवजातयः समुद्भवन्ति चाजस्रत्
चकासतेशरन्नमोऽस्तुशम्भवे दयालवे ॥४४॥
वियत्तु मूर्त्तिरीशतेचवश्य ते न केनचित्
चराचरं जगच्च यत्र कल्प्यते स्वयम्भुवा।
समुल्लसन्ति यद्गुणा मुखेमुखे शरीरिणां
श्रुतिप्रमाणतो मया विकल्प्यतेनकल्पना ॥४५॥
प्रभासते क्वचिच्च यः क्वचिच्च न प्रभासते
सुचक्षुषामपि प्रभाति कस्यचिद्विशेषतः।
सहीश्वरश्चराचरे जगत्यजस्रमेकधा-
प्यनेकधान्तरंवहिःप्रमोदतां हरस्तु जे ॥४६॥
किमीहसेकिमीहसेनुजल्पतीवशङ्करो
दरिद्रताभियां भयं समीहसे समीहसे।
कृपालुतार्द्रपार्वतीवशम्वदोनुगम्यते
पराधिभिः पराधिभिः प्रसीदतान्नमोऽस्तु ते ॥४७॥

इति श्रीशाकद्वीपीय-नियमधरमिश्रविरचितं
भक्तचामरस्तोत्रं सम्पूर्णम्।

Digitized by Google

विधीयतां निजोचितं महेश्वरोऽसि सर्वदो
दयानिधे क्षमस्व मेऽपराधमान्तरं बहिः ॥२७॥
निषेव्यभक्तपामरैर्नियम्य कीर्तयन्ति ये
हृदाभिमानविप्रवन्दनीयपादपङ्कजम् ।
गच्छप्रकाशिकेयमात्मलम्भं तु मानसीं
व्यथां न जातु जानते नमस्तुतेऽस्तु शम्भवे ॥२८॥
स्वकीयविम्बिताकृतिं स्वकीयभालभूषणे
विलोक्य विभ्रमद्भुवौ विशङ्किनौ शुचिस्मितौ ।
प्रसीदतां शुचिस्मितास्वकीयकौ महेश्वरौ
नटाविवातिसुन्दरौ सुपर्वणां मनोहरौ ॥२९॥
सुखप्रकाशतो मयानुमीयते न मत्कृतौ
नदीश्वरौ न मुत्सवं गतौ नमस्कृतेऽमितौ ।
अभिन्नचित्तदम्पतीवपुर्भवेन कर्हिचित्
न मेघकच्छमस्तु मेऽपराधमीशभामिनम् ॥४०॥
अविघ्नतादिकारणैकदन्तविघ्नमूर्त्तिना
सुतेन तारकारिणा विनीतभार्ययाम्बया ।
गृहाश्रमीवयोगतारतम्यमुत्य जिक्रमो
गुकम्पतो प्रसीदतामहोऽस्तु मङ्गलायते ॥४१॥
क्षमासुमूर्त्तिरीयते भवश्चेद्दिवौकसो
नहि स्थिरत्वमाप्नुयुस्तदेन्नरस्य का कथा ।
मरीचिमञ्जरीसृताय चन्द्रमूर्त्तये नमः
प्रभाकराय ते नमो निशादिवातमोनुदे ॥६२॥

Digitized by Google

सुरासुरातितापिभिःप्रमथ्यमन्दराद्रिणा
हृतेधनेऽम्बुधेःप्रकोपकालकूटजाड्यधात् ।
सपातुगोपयांचकार नीलकण्ठभूषणः
सुरासुराद्रिसुद्धृतान्निपीयकालकूटकम् ॥२२॥
विचित्रभोगिरत्नवज्जटाविलम्बिजाह्नवी-
तरङ्गमौलिवेष्टनोपरीन्दुसुन्दराकृतिः ।
सपातुभूधरात्मजाहृतार्द्धवामभागवान्
सदुच्चकैःककुद्मपेन्द्रवाहनोदयानिधिः ॥२३॥
सखड्गचापशङ्खवह्निलोललोचनप्रभा
वलिप्तपाण्डुरोल्लसत्कपोललोलकुण्डली ।
सपातुपार्वतीपतिर्महोत्सवे प्रमोदको
गजाननस्य जन्मनिप्रकामपूरकोहरः ॥२४॥
भवायतेभवायतेऽगुणाय सद्गुणायते
सकर्मणेऽप्यकर्मणे परोच्चनीचगायते ।
नमोस्तुशम्भवे शिवप्रकामपूरणायते
प्रसीदतामहेश्वरी तपोत्रयीभवन्भवः ॥२५॥
समक्रमैकपंक्तिकोत्र्यप्रकल्पकद्रुमे
फलप्रसूनगन्धवाहचुम्बिमञ्जरीवृते ।
नमो वनेविहारिणो हराथहर्म्यवासिने
मरुत्वदादिदेववृन्दगीतकीर्त्तये नमः ॥२६॥
मदुत्तमोनपातकी त्वदुत्तमो नपापहा
भुवःस्खलज्जनस्यवैचमेवसम्यगाश्रयः ।

सपातुकौतुकेगृहेप्यजयंसकृतेणुभिः
शुचिस्मितैः शुचिस्मितः शुचिस्मितेश्वरीश्वरः ॥२६॥
विघट्टनं सरावकस्यकोमलैकमुष्टिना
व्यकारिपार्वतीपतिः सखीजनैः कुतूहलात् ।
सपातुकौतुकेगृहेगृहीतवामभागवान्
सुमेनकाद्रिराट्प्रभूतभूतिभूषिताम्बिया ॥२७॥
सदात्मनोपिनिन्दथो कुलत्वलोप्यपर्णया
विभावितो विभावरीशमौलरूपोन्नतेः ।
सपातुथोगिरम्बनोनवर्तितेमहीयते
प्रवर्ततेचसर्वतः समः सदस्तदः शिवः ॥२८॥
प्रियांप्रियः प्रियांप्रियो विभावितोविभावितो
विभावितायदम्बतोस्वभावकौतुकीभवः ।
सपातुकाश्यपोन्नतामपत्यकन्यथाहृतः
प्रभोः प्रभूततारकारिभाविपुत्रलिप्सया ॥२९॥
गजास्यपुष्करामृतं पिबंच पञ्चभिर्मुखै-
रतुष्टिमाप्नुवन्हरः शुचिस्मिताश्वयीचयः ।
सपातुभूषणेन्दुगाढतिं प्रमातुमीप्सया
विलोलवक्त्रपुष्करं गजाननं जहासयः ॥३०॥
सहस्रवारिवासिनींहविभंजांचमध्यगां
शुचौप्रवर्षदृश्वरांवभारभूमिभृत्सुताम् ।
सपातुभाविभव्यभूतभूतिसत्यताष्टधा
समस्तिरम्बरीश्वरोऽ‍िद्धारकौतुकीभवः ॥३१॥

यद्दीश्वरःशिवाययोऽपरेद्विसर्गसम्भवा
स युज्यते च भुज्यते भवैर्वियुज्यते पुनः ।
स पातु सत्प्रमोदमञ्जमूर्तिरीश्वरो हरः
ददातियद्यशोऽक्षयं सुमन्त्रिभोजनं विभु ।।२१।।

सुधांशुबिम्बनामकैककपालसञ्चलोज्ज्वलैः
चयेनलास्यलब्धविक्रमञ्जयन्नमत्यकम् ।
सपातुभातकौतुकोकरोति यत्प्रमेक्षक-
गुणैर्निजैश्चकीर्त्तितैश्चकाव्यकोविदैरर्थितः ।।२२।।

सुपार्वतीतपःफलेनसम्भ्रमात्प्रभूयते
प्रपद्यतेचपार्वतीनितम्बं तपोमहत् फलम् ।
स पातु लोकमातरं जयत्यिनापुरातनौ
पुरातनो बिभर्त्ति वै कृपावतीं कृपाकरः ।।२३।।

नवोदयारुणेन्दुबिम्बवद्विभासिताननां
प्रभाकरप्रभातभाप्रवरिच्छदाङ्गनाङ्गिनीम् ।
सपातु पार्वतीं वहन्निवाङ्कमण्डपे भवन्
प्रदक्षिणेनसर्वतोऽपरो गिरीन्द्रसद्मनि ।।२४।।

सुमृत्युजित्पतिव्रतासुपुत्रिणी सुमङ्गली
भवेतिसत्प्रसाद्यमालयवर्गकाम्भिराद्यनाम् ।
सपातु केकसद्मनिस्थितोऽगिरीन्द्रजामुवा
दमेनकोऽर्वभीतिभञ्जनामासवीजनैश्चतास्तु ।।२५।।

अकर्मकोऽपिकर्मभिः प्रयोज्यते सदाजनैः
प्रहेलिकापरैरसं विलम्बितोद्धरैः चरैः ।

Digitized by Google

सपातुपार्वतीपितुः पितॄन् पिपर्ति नप्तृः
सुपात्रपौत्रसम्पदाजगद्बिभर्ति यश्च सः ॥१५॥
बभुक्षते पिपासते चलुब्धकायविल्वको
परिश्रुपावसज्जनाय वैमृगेन्द्रभीतितः ।
सपातु ग्रम्भरंभिशालटत् सुविल्वपत्रतो-
ऽर्चनान्निजास्पदं ददौ निशामुमूत्रसेचनात् ॥१६॥
मुनिःस्वनन्मृदङ्गमेघसंभ्रमित्ववाहने
निरूढनन्दनं निरीक्ष्यमोदसुस्मिताननाम् ।
सपातुपार्वतीश्वरोगजास्यपुष्करंभुज-
स्वखेन्दुसम्पदाकरेणपातिनन्दनेश्वराम् ॥२७॥
सुरासुरैर्धरामरैर्धराधिपैःसुपार्श्वगैः
ध्वनन् मृदङ्गडिण्डिमादिघण्टयानिवेद्यते ।
सपातु पार्वतीश्वरोतिदीनमीनकाकुवाक्
प्रपञ्चमञ्जतिप्रभुः शृणोतिसत्वरं चसः ॥१८॥
सितेन्दुबिम्बिताकृतिं निजांनिरीक्ष्य पार्वतीं
विशङ्कमानभामिनीं परस्त्रियं चकासतीम् ।
सपातु मञ्जवाक्शतप्रयासहासवीक्षितैः
शुचिस्मिताचकारयोविशुद्धबोधदानतः ॥१९॥
शिवस्य निन्दकोऽपि सन् शिवोभवन् पुरःसरन्
करे गृहीतुमुद्यतस्तपोवने च पार्वतीम् ।
स पातु रुक्षया गिरा तिरस्कृतोऽप्यधोमुखीं
ह्रिया नकिञ्चनोत्तरां प्रमोदपूरितान्तराम् ॥२०॥

Digitized by Google

मुनीन्द्रनारदादिवन्द्यमानकीर्त्तिमान्
गिरीन्द्रजापुरस्सरोऽप्सरोभिरीडितः शिवः ।
सपातु भूतभव्यकालिकालकालनापरः
परारिरूढनामवान् पुनाति यै पुनः पुनः ॥१०॥
स्फुरत्सवप्रदासुखेविरिञ्चचन्द्रतारके
मणिप्रदीपमन्दिरे नटन्मनोगतं नयन् ।
सपातुपालनापरो महेश्वरश्च कीर्त्यते
विशेषतश्च निस्पृहः परार्थभूतिमूर्त्तिमान् ॥११॥
कृपालुतादिदिस्थिताक्षमाविताश्वसुरिभि-
र्यदक्षिकोणकेशरेशमाभसेऽरुणप्रभाम् ।
सपातुवैविभर्ति यः प्रमोददां महेश्वरः
कुटुम्बिनीञ्च पार्वतीं गणेशनन्दनानुमाम् ॥१२॥
यदङ्घ्रिमस्मरेणुनाविधेऽस्तविघ्नहट्कथा
चतुर्मुखाच्चतुर्भुजाद्विजार्चनं विभावयन् ।
सपातुपञ्चवक्त्रवान् सहस्रनेत्रपूजितः
पिपर्त्ति यो जगत्त्रयं गुणत्रयातिगो हरः ॥१३॥
सचन्दनाम्बुसीकरप्रकीर्णभक्तचामरैः
सुवीजितोऽर्चिताम्बुमाल्यविल्वपत्रकाञ्चनैः ।
सपातु योऽर्चितो हरो हरत्यनल्पसंज्वर
यदर्चनाम्बुलोचने निषिक्तमप्यतामपि ॥१४॥
असद्गुहाश्ववीक्षितुं नशक्नुवन्ति किम्पुनः
विभेति वै परेतराड् यदङ्गभस्मधारणात् ।

Digitized by Google

सपातु भक्तपालकः प्रभाकरोनिशाकरः
प्रतिक्षणं विभावरीदिवासुखप्रदोहरः ॥४॥
स्वभक्तभीभयङ्करः कुतश्चिदप्रमेयतः
शिवेतिमन्त्रमन्त्रणात् सतां विनिर्गतं भवम् ।
सपातुलोचनत्रयोविभासितो हरो विभुः ।
सपातुभक्तचामरैः सुवीजितश्चचामरैः ॥५॥
समुद्रिताग्निलोचनत्रिलोचनप्रदृष्टये
वनाय वामरार्चितोगिरीन्द्रकन्यकासजूः ।
सपातुभोगिकङ्कणः सरीसृपाङ्गदः शिवो
विमुक्तकञ्चुकादिसूत्रसत्कृतोपवीतवान् ॥६॥
कपोलन्यापितप्रियो नमःशिवाय जल्पतेऽ-
प्यनल्पकामदायकोऽप्यकिञ्चनो निरञ्जनः ।
सपातुभुक्तिमुक्तिदोजगद्विलक्षकीर्तनो
वसद्गिरीन्द्रकन्यया परार्थसाधने रतः ॥७॥
गणेशकार्त्तिकेयसद्गुपार्वतीप्रियस्वरो
गृहाश्रमं विडम्बयन्दिनेदिने सुयोगिराट् ।
सपातुशम्भुरार्ययावसद्विनीतभार्यया
निवेद्यमानमर्चनं क्षणं क्षणं नवं नवम् ॥८॥
कृपांकुरात्रवालहृक्कटाक्षमार्गभासतो
विभातिभारतीश्वरः श्रियामपीश्वरः परः ।
सपातु पार्वतीपतिर्हि रूढिरिष्यते बुधै-
र्द्विधाहरिर्हरः सदाप्रतीतिमात्रभेदतः ॥९॥

Digitized by Google

यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्ववित्सर्वगतोऽमृतो भवेत् ॥६८॥

इति श्रीमत् परमहंसपरिव्राजकाचार्य्य श्रीमत्
शङ्कराचार्य्यविरचितमात्मबोधप्रकरणं
सम्पूर्णम् ।

भक्तचामरस्तोत्रम् ।

कपर्दगौरजाह्नवीतरङ्गफेनचन्द्रिका
सरत्नभोगिकुण्डलोल्लसत्कपोलमण्डली ।
सपातु पण्डितारितुण्डमण्डिताजिमण्डलः
सुरासुरेन्द्रवृन्दभाललोलमालभारिपात् ॥१॥
समस्तभावभावनाफलप्रदोक्षध्वजः
करीन्द्रचर्मचेलभृत् सदष्टभूतिमूर्त्तिमान् ।
सपातु चित्रभोगिमुण्डमालनीलकण्ठवान्
दिगम्बरोगिरीन्द्रजातपःफलप्रदोहरः ॥२॥
मुकुन्दवह्निभासिदन्तमन्दिरारविन्दहा
सनन्दितामरेन्द्रवृन्दवन्दितोमहेश्वरः ।
सपातु सेवके कृपां करोतु पार्वतीपतिः
वृषेन्द्रवाहनोविनीतमेघवाहनः प्रभुः ॥३॥
सदासनन्दनादिभिर्विभाव्यमानधामवान्
प्रदोषताण्डवेनटनृमृदङ्गमङ्गलं ध्वनन् ।

अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः ।
ब्रह्माद्यास्तारतम्येन भवन्त्यानन्दिनो लवाः ॥५७॥
तद्युक्तमखिलं वस्तु व्यवहारस्तदन्वितः ।
तस्मात् सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥५८॥
अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम् ।
अरूपगुणवर्णाख्यं तत् ब्रह्मेत्यवधारयेत् ॥५९॥
यद्भासा भास्यतेऽर्कादिः भास्यैर्यत्तु न भास्यते ।
येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ॥६०॥
स्वयमन्तर्वहिर्व्याप्य भासयेन्निखिलं जगत् ।
ब्रह्म प्रकाशते वह्निप्रतप्तायसपिण्डवत् ॥६१॥
जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन् न किञ्चन ।
ब्रह्मान्यद्भासते मिथ्या यथा मरुमरीचिका ॥६२॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न विद्यते ।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम् ॥६३॥
सर्व्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते ।
अज्ञानचक्षुर्नेक्षेत भास्वतम्भानुमन्धवत् ॥६४॥
श्रवणादिभिरुद्दीप्तो ज्ञानाग्निपरितापितः ।
जीवः सर्व्वमलान् मुक्तः स्वर्णवद्द्योतते स्वयम् ॥६५॥
हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोपहृत् ।
सर्व्वव्यापी सर्व्वधारी भाति सर्व्वं प्रकाशते ॥६६॥

दिग्देशकालाद्यनपेक्ष्य सर्व्वगं
शीतादिहृन्नित्यसुखं निरञ्जनम् ।

सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलञ्जगत् ।
एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा ॥४६॥

आत्मैवेदं जगत् सर्वमात्मनोऽन्यन् न किञ्चन ।
मृदो यद्वत् घटादीनि स्वात्मानं सर्वमीक्षते ॥४७॥

जीवन्मुक्तिस्तु तद्विद्वान् पूर्वोपाधिगुणांस्त्यजेत् ।
सच्चिदानन्दरूपत्वाद्भजेद्भ्रमरकीटवत् ॥४८॥

तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान् ।
योगी सर्वसमायुक्त आत्मारामो विराजते ॥४९॥

बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः ।
घटस्थदीपवत् स्वच्छमन्तरेव प्रकाशते ॥५०॥

उपाधिस्थोऽपि तद्धर्मैर्निर्लिप्तो व्योमवन्मुनिः ।
सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत् ॥५१॥

उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः ।
जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा ॥५२॥

यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् ।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥५३॥

यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः ।
तज्ज्ञात्वा ना परं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥५४॥

तिर्यगूर्द्ध्वमधःपूर्णं सच्चिदानन्दमद्वयम् ।
अनन्तं नित्यमेकं यत् तत् ब्रह्मेत्यवधारयेत् ॥५५॥

अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽद्वयम् ।
अखण्डानन्दमेकं यत् तद्ब्रह्मेत्यवधारयेत् ।५६॥

Digitized by Google

नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयम् ।
सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत् ॥ २५ ॥
एवं निरन्तरं कृत्वा ब्रह्मैवास्मीति वासना ।
हरत्यविद्याविक्षेपान् रोगानिव रसायनम् ॥ २६ ॥
विविक्तदेशे आसीनो विरागो विजितेन्द्रियः ।
भावयेदेतमात्मानं तमनन्तमनन्यधीः ॥ २७ ॥
आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः ।
भावयेदेकमात्मानं निर्मलाकाशवत्सदा ॥ २८ ॥
रूपवर्णादिकं सर्वं विहाय परमार्थवित् ।
परिपूर्णचिदानन्दस्वरूपेणावतिष्ठति ॥ २९ ॥
ज्ञातृज्ञानज्ञेयभेदः परात्मनि न विद्यते ।
चिदानन्दैकरूपत्वाद्दीप्यते स्वयमेव हि ॥ ४० ॥
एवमात्मारणौ ध्यानमथने सततं कृते ।
उदितावगतिर्ज्वाला सर्वाज्ञानेन्धनं दहेत् ॥ ४१ ॥
अरुणेनैव बोधेन पूर्वं सतमसे हृते ।
तत आविर्भवेदात्मा स्वयमेवांशुमानिव ॥ ४२ ॥
आत्मा तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया ।
तन्नाशे प्राप्तवद्भाति स्वकण्ठाभरणं यथा ॥ ४३ ॥
स्थाणौ पुरुषवद्भ्रान्त्या कृता ब्रह्मणि जीवता ।
जीवस्य तात्त्विके रूपे तस्मिन् दृष्टे निवर्त्तते ॥ ४४ ॥
तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमञ्जसा ।
अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ॥ ४५ ॥

Digitized by Google

आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम्।
संयोज्य वा विवेकेन जानामीति प्रवर्तते॥२४॥
आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति।
जीवः सर्वमलं ज्ञात्वा ज्ञाता द्रष्टेति मुह्यति॥२५॥
रज्जुसर्पवदात्मानं जीवो ज्ञात्वा भयं वहेत्।
नाहञ्जीवः परात्मेतिज्ञानश्चेन्निर्भयो भवेत्॥२६॥
आत्मावभासयत्येको बुद्ध्यादीनीन्द्रियाणि हि।
दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते॥२७॥
स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः।
न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने॥२८॥
निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः।
विद्यादैक्यं महावाक्यैः जीवात्मपरमात्मनोः॥२९॥
आविद्यकं शरीरादि दृश्यं बुद्बुदवत् क्षरम्।
एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलम्॥३०॥
देहान्यत्वान्न मे जन्मजराकार्श्यलयादयः।
शब्दादिविषयैः सङ्गो निरिन्द्रियतया न च॥३१॥
अमनस्त्वान्न मे दुःखरागद्वेषभयादयः।
अप्राणो ह्यमनाः शुभ्र इत्यादि श्रुतिशासनात्॥३२॥
निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः।
निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः॥३३॥
अहमाकाशवत्सर्वं बहिरन्तर्गतोऽच्युतः।
सदा सर्वसमः शुद्धो निःसङ्गो निर्मलोऽचलः॥३४॥

Digitized by Google

अनाद्यविद्या निर्वाच्या कारणोपाधिरुच्यते ।
उपाधित्रितयादन्यमात्मानमवधारयेत् ॥ १ ३ ॥
पञ्चकोशादियोगेन तत्तन्मयइव स्थितः ।
शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा ॥ १ ४ ॥
वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यावघाततः ।
आत्मानमान्तरं शुद्धं विविच्यात्तण्डुलं यथा ॥ १ ५ ॥
सदा सर्वगतोऽप्यात्मा न सर्वत्रावभासते ।
बुद्धावेवावभासेत स्वच्छेषु प्रतिविम्बवत् ॥ १ ६ ॥
देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम् ।
तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥ १ ७ ॥
व्यापृतेष्विन्द्रियेष्वात्मा व्यापारी वाविवेकिनाम् ।
दृश्यतेऽभ्रेष धावत्सु धावन्निव यथा शशी ॥ १ ८ ॥
आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः ।
स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः ॥ १ ९ ॥
देहेन्द्रियगुणान् कर्माण्यमले सच्चिदात्मनि ।
अध्यस्यतेऽविवेकेन गगने नीलतादिवत् ॥ २ ० ॥
अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि ।
कल्प्यन्तेऽम्बुगते चन्द्रे चलनादिर्यथाम्भसः ॥ २ १ ॥
रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते ।
सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः ॥ २ २ ॥
प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता ।
स्वभावः सच्चिदानन्दनित्यनिर्मलतात्मनः ॥ २ ३ ॥

Digitized by Google

बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् ।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥२॥
अविरोधितया कर्म नाविद्यां विनिवर्तयेत् ।
विद्याविद्यां निहन्त्येव तेजस्तिमिरसङ्घवत् ॥३॥
परिच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः ।
स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव ॥४॥
अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम् ।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥५॥
संसारः स्वप्नतुल्यो हि रागद्वेषादिसङ्कुलः ।
स्वप्नकाले सत्यवद्भाति प्रबोधेऽसत्यवद्भवेत् ॥६॥
तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा ।
यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयम् ॥७॥
सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पितः ।
व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥८॥
यथाकाशो हृषीकेशो नानोपाधिगतो विभुः ।
तद्भेदाद्भिन्नवद्भाति तन्नाशादेकवद्भवेत् ॥९॥
नानोपाधिवशादेव जातिनामाश्रयादयः ।
आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥१०॥
पञ्चीकृतमहाभूतसम्भवं कर्मसञ्चितम् ।
शरीरं सुखदुःखानां भोगायतनमुच्यते ॥११॥
पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥१२॥

Digitized by Google

विश्वेश्वराच्चतुर्दिक्षु धनुःशतयुगोन्मितम् ।
अविमुक्तमिति प्रोक्तमन्तर्गृहमथो शृणु ॥५२॥

गोकर्णेशः पश्चिमे पूर्वतश्च
गङ्गामध्ये चोत्तरे भूरिभूतः ।
ब्रह्मेशानो दक्षिणे संप्रदिष्टः
तत्तु प्रोक्तं चत्वरं विश्वभर्त्तुः ॥ ५३ ॥

इत्थं चतुर्विधं क्षेत्रं प्रशस्तञ्चोत्तरोत्तरम् ।
पञ्चक्रोशात्मकं लिङ्गं यो वेद स परः शिवः ॥५४॥
य इदं काशिकास्तोत्रं भक्त्या सङ्कीर्त्तयेत्सदा ।
स सर्व्वपापनिर्मुक्तः सद्योमोक्षमवाप्नुयात् ॥५५॥
गुणानामेकदेशोऽयं काशिकायाः प्रकीर्तितः ।
तेन प्रीयातु भगवान् विश्वेशः काशिकाप्रियः ॥५६॥

इति श्रीपरमहंसपरिव्राजकाचार्य्य-श्रीरामकृष्णतीर्थपाद-
किङ्करशिष्य-श्रीसत्यज्ञानानन्दतीर्थयति-
विरचितं काशीस्तोत्रं
सम्पूर्णम् ।

आत्मबोधः ।

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥१॥

कलौ विश्वेश्वरो देवः कलौ वाराणसी पुरी।
कलौ भागीरथी गङ्गा दानञ्चैव कलौ युगे महत् ॥४१॥
गङ्गा विश्वेश्वरः काशी जागर्ति त्रितयं यतः।
तत्र नैश्रेयसी लक्ष्मीर्लभ्यते चित्रमत्र किम् ॥४२॥
न विश्वेशसमं लिङ्गं न काशी सदृशी पुरी।
मणिकर्णिसमं तीर्थं नास्ति ब्रह्माण्डगोलके ॥४३॥
काश्यां लिङ्गान्यनेकानि काश्यां तीर्थान्यनेकशः।
तथापि सेव्यो विश्वेशः स्नातव्या मणिकर्णिका ॥४४॥
यथाभूमितले विप्रपूज्यः सन्ति सहस्रशः।
तथा काशि न मन्तव्या कापि लोकोत्तरास्थितम् ॥४५॥
अन्यानि मुक्तिक्षेत्राणि काशीप्राप्तिकराणि हि।
काशीं प्राप्य विमुच्येत नान्यथातीर्थकोटिभिः ४६॥
तीर्थार्थं न वहिर्गच्छेद्देवार्थं वा कदाचन।
सर्वतीर्थानि देवाश्च वसन्त्यत्राविमुक्तके ॥४७॥
अक्लेशैरनयकैः काश्यां यत्पदं हेलयाप्यते।
तत्पदं नाप्यतेऽन्यत्र योगयुक्तैरपि योगिभिः ॥४८॥
मध्यमेश्वरमारभ्य यावद्देहलिविघ्नपम्।
सूत्रं संस्थाप्य तद्विष्णु भ्रामयेन्मण्डलाकृति ॥४९॥
तत्र या जायते रेखा तन्मध्ये क्षेत्रमुत्तमम्।
काशीति यद्विदुर्वेदास्तत्र मुक्तिः प्रतिष्ठिता ॥५०॥
पूर्वतो जाह्नवी पश्चात्पाशपाणिर्गणेश्वरः।
असीवरणयोर्मध्ये शुभा वाराणसी मता ॥५१॥

Digitized by Google

पुण्ये प्रीतिः स्वेच्छया लाभसौख्यं
दानं भक्त्या न प्रतिग्राह्यमन्नम् ॥२१॥
अष्टावेते यस्य सन्त्येव योगा
योगाभ्यासैस्तस्य किं काशिकायाम् ।
एवं ज्ञात्वा यो वसेत् काशिकायां
सद्यो मुक्तोऽसौ भवेन्नैव पापः ॥२२

काश्यां कृतातिपापस्य दारुणा रुद्रयातना ।
यतो रुद्रपिशाचत्वं नरकेभ्योऽपि दुःसहम् ॥२३॥
तस्मात्पापं न कर्त्तव्यं मनागपि विभोः पुरे ।
जातं यत्तत्प्रमादेन प्रायश्चित्तेन नश्यति ॥२४॥
स्थापनं शिवलिङ्गादेः पञ्चक्रोशप्रदक्षिणा ।
स्नानं दानं दया [illegible]: प्रायश्चित्तं मतं सताम् ॥२५॥
पापमेव हि कर्तव्यं मतिरस्ति यदीदृशी ।
सुखेनान्यत्र कर्तव्यं मही ह्यस्ति महीयसी ॥२६॥
यथा कामातुरो जन्तुरेकां रक्षति मातरम् ।
तथा पापकृता काशी रक्षितव्या मुमुक्षुणा ॥२७॥
काश्यां मृतानां मुक्तिः स्यान्नवेति विवदन्ति ये ।
नरकं यान्ति ते पापाः काका गृध्रा भवन्त्यथ ॥२८॥
तस्मात्सर्वं परित्यज्य श्रोतव्याः काशिकाकथाः ।
न विना श्रवणात्पुण्यं पापं वा वेत्ति कोऽपि हि ॥२९॥
काश्यां वासः सतां सङ्गो गङ्गाम्भः शिवपूजनम् ।
ध्यानं नारायणस्यैतत्सारात्सारं विदुर्बुधाः ॥४०॥

Digitized by Google

विरक्तियोगादिभवा हि विद्या
सुदुर्लभा नास्ति कलौ विमुक्तिः।
यस्यां मृतस्तां समुपैति जन्तुः
शिवप्रसादादिति निश्चितं हि ॥२६॥
अतः सदा सैव निषेवितव्या
मुमुक्षुभिः शङ्कर राजधानी।
स्वधर्मनिष्ठैः कलिकाल एका
ध्येया च वन्द्या परिकीर्तनीया ॥२७॥
ये पुण्यशीलाः परिकीर्त्तयन्ति
काशीं सदैव प्रणमन्ति भक्त्या।
तेषामहम्पादरजो बिभर्मि
शोचामि नित्यं दयया तदन्यान् ॥२८॥
वसन्ति पापा नहि काशिकायां
वसन्ति चेदत्र मृतिर्न जायते।
मृतिर्भवेच्चेन्महि यातनाचयः
तथापि चान्ते परिमुच्यतेऽसौ ॥२९॥
आदौ काश्यां धर्ममार्गेण वासः
पापत्यागः काशिमाहात्म्यदृष्टिः।
देहश्चेहं पुत्रमित्रादि यस्य
सर्वं तुच्छं सोऽधिकारी महात्मा ॥३०॥
वासः काश्यां सज्जनानां प्रसङ्गो
गङ्गास्नानं पापकर्माण्यचिन्त्य।

Digitized by Google

कोटिजन्मसहस्रेषु तपोध्यानसमाधिभिः।
प्रसादितो शिवो येन स एवं वेत्ति काशिकाम् ॥२०॥

यस्याः प्रसादादहमेव शम्भुः
जानामि शम्भुं सकलात्मभूतम्।
स्मरामि शम्भुं प्रणवं शिवञ्च
शिवप्रियां तां प्रणमामि काशीम् ॥२१॥
प्रकाशयेत् याशु परात्मतत्त्वं
प्रकाशतेऽस्यामिति वाथ काशी।
चिन्मात्ररूपापि च गीयते या
तां ब्रह्मविद्यां प्रणमामि काशीम् ॥२२॥
यस्यां वसन् जन्तुरुपैति धर्मं
भुक्तिं च विश्वेश्वरमाशु सङ्गम्।
गङ्गां सुविद्यां परमाङ्गतिं च
सा काशिका मेऽस्तु गतिर्मुमुक्षोः ॥२३॥
सर्वाणि तीर्थानि वसन्ति यस्यां
वेदाः सदेवाः मुनयश्च मुक्तौ।
विभूषिता या परया द्युनद्या
सा काशिका मेऽस्तु गतिर्मुमुक्षोः ॥२४॥
शवः शिवः स्यादशिवोऽपि यस्याम्
अभद्रमुक्तं मरणञ्च भद्रम्।
दरिद्रयपि श्रीपतितुल्य आस्ते
तां काशिकां को न भजेत्सुबुद्धिः ॥२५॥

वरणाशीपुरीवासो नाशोपवनमादिभिः।
चिंचित्रमुपमुञ्जानं राज्यं नाप्यत्र कामये ॥ ११ ॥

काशीवासी च त्वम: पुरुषोऽपि
श्रेष्ठो राजन् मुक्तिकन्याहतो यत्।
अन्यत्रस्थ: सार्वभौम: स्वधर्मै-
न स्याच्छ्रेयान् गर्भवासैकयोग्य: ॥ १२ ॥

अङ्गेषु सर्वेष्वपि मज्जमाने
ष्वियं चिदानन्दमयी न मज्जति।
स्वयं निमग्ना कथमुद्धरेत्परान्
लोके च वेदे च विचार्यमेतत् ॥ १३ ॥

सर्ववाङ्मनसातीतं भावाभावविवर्जितम्।
चिन्मात्रं यत्परं ब्रह्म पञ्चक्रोशात्मकं हि तत् ॥ १४ ॥
तदेतत्क्षेत्रमापूर्य स्थितं सर्वगमप्यहो।
अनुग्रहार्थं लोकानामिति वेदविदो विदुः ॥ १५ ॥
शम्भोः शक्तिरियं काशी तदभिन्ना परा चितिः।
शिवएव हि जानाति काशिकायाः परं सुखम् ॥ १६ ॥
शिवस्यापि परं सौख्यं काशिका वेत्ति तत्परा।
निर्विशेषा च शुद्धा च जड़ा चेति त्रिधा मता ॥ १७ ॥
चेतरूपा जड़ा काशी मोक्षयेत्सर्वदेहिनः
मूर्त्तिरूपा तु या काशी शुद्धा सा चिन्मयी सती ॥ १८ ॥
पूर्णरूपा स्वमाहात्म्यं स्वयमेव विचारयेत्।
निर्विशेषा तु मुक्तानां शिवस्य च परा गतिः ॥ १९ ॥

अखण्डः सच्चिदानन्दः शिवो देवो महेश्वरः।
तस्य तां परमां शक्तिं काशीं स्तौमि सदुक्तिभिः॥३॥
श्यामां षोडशवार्षिकीं सकरुणां मर्त्तिं दधानां वरां
हस्ताभ्यामभयञ्च विश्वजननीं विद्येति या गीयते।
या दृष्टा स्मरणं गतापि सततं या कीर्त्तिता संस्तुता
या स्पृष्टा प्रणता नुता प्रकुरुते नृणां परं मङ्गलम्॥४॥
भूमिष्ठापि न यात्र भूस्त्रिदिवतोऽप्युच्चैरधस्थापि या
या बद्धा भुवि मुक्तिदा स्युरमृतं यस्यां मृता जन्तवः।
या नित्यं त्रिजगत्पवित्रतटिनीतीरे सुरैः सेव्यते
सा काशी त्रिपुरारिराजनगरी पायादपायाज्जगत्॥५॥

पूर्व्वजन्मशतकोटिसञ्चितं
पापराशिमतुलं विनाशयेत्।
काशिका परपदप्रकाशिका
दर्शनश्रवणकीर्त्तनादिभिः॥ ६ ॥

यः काशीं स्तौति मेधावी यः काशीं हृदि धारयेत्।
तेन तप्तं तपस्तीव्रं तेनेष्टं क्रतुकोटिभिः॥७॥
वाराणसीति काशीति महामन्त्रमिमं जपन्।
यावज्जीवन् त्रिसंध्यं तु जन्तुर्जातु न जायते॥८॥
यस्तु काशीति काशीति द्विस्त्रिर्जपति पुण्यवान्।
अपि सर्वपवित्रेभ्यः स पवित्रतरो महान्॥९॥
मुने न मे प्रियस्तद्वद्दीक्षितो मम पूजकः।
यादृक् प्रियतरः सत्यं काशीस्तवनलालसः॥१०॥

तारके रिपुराप श्रीवचा रामसुतान्वितः ।
तन्वितासु सदाचार श्रीपरा पुरिके रता ॥ ३५ ॥
रु.क्लारक्लागाराश्वासं याने मेया काराव्याचे ।
चेव्या राका यामे नेया संध्या रागाकारं कालम् ॥ ३६ ॥
गोदावरी ब्रह्मगिरेः प्रकाशात्
संप्रापिता प्रागुदधिं प्रयत्नात् ।
येनर्षिणा सोऽपि पुनः प्रतीम
मानेतुमद्रिं प्रभवेत्किमेताम् ॥ ३७ ॥
एवं विलोमाक्षरकाव्यकर्त्तु-
र्भूयः सभायां समवेत्य तज्ज्ञाः ।
आनंत्विमां चित्रकवित्वसीमां
दैवज्ञसूर्याभिधसंप्रदिष्टाम् ॥ ३८ ॥

इति श्रीदैवज्ञपण्डितसूर्यकविविरचितं
विलोमाक्षररामकृष्णकाव्यं समाप्तम् ।

काशीस्तोत्रम् ।

सत्यज्ञानानन्दतीर्थं प्राप्तोऽहं यत्प्रसादतः ।
तं गुरुं परमं हंसं विश्वेश्वरमजं भजे ॥ १ ॥
विश्वेशं माधवं ढुंढिं दण्डपाणिञ्च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥ २ ॥

ते सभा प्रकपिवर्णमालिका
नाल्पकप्रसरमभ्रकल्पिता ।
तालिपकभ्रमरसप्रकल्पना
कालिमार्णवपिक प्रभासते ॥ २८ ॥
रावणोऽक्षिपत न त्वपानते
नाल्पकभ्रमणमक्रमातुरम् ।
रंतुमाक्रमणमभ्रकल्पना
ते न पात्र नतपक्षिणो वराः ॥ २९ ॥
दैवे योगे सेवादानं शङ्कानापे हक्कायाने
नेया कालं पेनाकाशं नंदावासे गेहो वेदैः ॥३०॥
शंकावक्षानुत्वनुक्षावकाशं
याने नद्यामुद्याननेयाः ।
याने नद्यामुद्याननेया
शंकावक्षानुत्वनुक्षावकाशम् ॥३१॥
वादिदेश द्विसीतापं पम्पाथोयनसेतवे
वेतसेन यथो पापं पन्तासीद्विशदे दिवा ॥३२॥
वायुजोनुमतो मेने संग्रामे रवितोऽक्षि वः ।
वक्षितो विरमे ग्रासं नेमेऽतोमनुजो यवा ॥३३॥
चतोयमा यत्र रघोरितायु
रंकानुगानल्पवयोऽयनानि ।
निनाय योऽत्वनगानुकारं
यतारिघोर त्वयमायताच्चः ॥ ३४ ।

तपातितारः स्वनयागतं मा
लोकापवादव्रितयं पिनाके।
केनापि यं तद्विरवाप कालो
मातंगयान स्वरतातिपातः॥ २१ ॥
यवेऽविद्रा चित्रकुरङ्गमाला
पञ्चावटीनर्म न रोचते वा।
वाते चरो नर्म नटीव चापं
लामागरं कुत्रचिदाविवेश॥ २२ ॥
नेह वा चिपसि पक्षिकन्धरा
मालिनी स्वमतमत्त हूयते।
ते यदूत्तम तमस्वनीलिमा
राधकं चिपसि पचिवाहने॥ २३ ॥
वनान्तयान स्वणुवेदनासु
योषाम्हते रत्नापगआविरोधी।
धीरो विजागवरा रते म्हषा यो
सुनादवेणुस्वनया तर्मा वः॥ २४ ॥
किंतु तोयरम्रापम्पा न सेवा नियतेन मैः।
वैनतेयनिवासेन पापं मारयतो नु किम्॥२५॥
स न तातपक्षा तेने स्वं श्येनाविशिष्टितागमम्।
संगताद्धि विनाशे स्वं नेतेक्षापततान सः॥२६॥
कपितालविभागेन योषादो नुनयेन सः।
सनयेन नु योषादो नगेभा विलतापिकः॥२७॥

वेद या पद्मसदनं साधारावततार मा ।
मारता तव राधा सा नन्दसद्मप यादवे ॥१४॥
हैवतो हननेऽरोधी यो देवेषु कृपोत्सवः ।
वत्सपो कृषु वेदे यो धीरो नेन हतो वर्हैः ॥१५॥
न गोपगोषि चर मे पिनाके
नापो जने धर्मधनेन दानं ।
नं दानने धर्मधने जपो ना
के नापि मे रचषि गोपगोनः ॥ १६ ॥
ततान दाम प्रमदा पदाय
नेमे स्थामस्वन सुन्दराक्षी ।
क्षीरादसुं न स्वमथाम मेने
यदापदामु प्रमदा न तातः ॥ १७ ॥
तामितो मत्तसावामा शापादेष विगानताम् ।
तां नगाविषदे पाशा मावा सत्तमतो मिता ॥१८॥
नासावधापत्रपाशाविनोदी
धीरो गुत्या सस्मितोऽद्याविगीत्या ।
त्यागी विद्यातोऽस्मि सत्यागुरोधी
दीनो विशापात्रपधावसाना ॥ १९ ॥
सम्भावितं भिक्षुरगादगारं
याताधिराप स्वनघाजवंशः ।
शवं जघान स्वपराधिता या
रंगादगारक्षुभितं विभासम् ॥ २० ॥

लंबाधरोस्तुबलंबनासे
त्वं याहि याहि स्वरमागताशा ।
शातागमा रस्व हि याहि या त्वं
सेना बलं बस्तु रोध बालम् ॥ ७ ॥

लंकायना नित्यगमा धवाशा
साकं तयानुन्नयमानुकारा ।
राकानुमा यन्ननु यातकंसा
शावाधमागत्य निनाय कालम् ॥ ८ ॥

गाधिजाध्वरवैरा ये तेऽतीता रक्षसा मताः ।
तामसाक्षरतातीते ये रावैरध्वजाधिगाः ॥९॥

तावदेव दया देवे यागे यावदवासना ।
नासवादवया गेया वेदे यादवदेवता ॥१०॥

सभास्वये भग्नमनेन चापं
कीनाशतानद्रुषा शिलाशैः ।
शैलाशिषाद्रुनताशनाकी
पञ्चानने मग्नभयेस्वभासः ॥ ११ ॥

न वेद यामक्षरभामसीतां
का तारका विष्णुजिते विवादे ।
देवाविते जिष्णुविकारता का
तां सीमभारक्षम यादवेन ॥ १२ ॥

तीव्रगोरन्वयत्वार्यो वैदेह्योमनसो मतः ।
तमसो न मह्योदेवैर्योत्वायन्वरगो व्रती ॥१३॥

श्रीयादवं भव्यभतोयदेवं
संहारदा मुक्तिमुतासुभूतम् ॥ १ ॥
चिरं विरिञ्चि नं चिरं त्रिरिञ्चिः
साकारता सत्यसतारका सा ।
साकारता सत्यसतारका सा
चिरं विरिञ्चिर्न चिरं विरिञ्चिः ॥ २ ॥
तामसीत्यसति सत्यसीमता
मायया क्षमसमक्षयायमा ।
मायया क्षमसमक्षयायमा
तामसीत्यसति सत्यसीमता ॥ ३ ॥
का तापघ्नी तारकाद्या विपापा
वेधा विद्या नोष्णकृत्यं निवासे ।
सेवा नित्यं कृष्णनोद्या विधात्वे
पापाविद्याकारताघ्नी पताका ॥४॥
श्रीरामतो मध्यमतोदि येन
धीरोऽनिशं वश्यवतीवरादा ।
दारावती वश्यवशं निरोधी
नयेदितो मध्यमतोऽमरा श्रीः ॥ ५ ॥
कौशिके व्रितपसि च रव्रती
याऽददाद्धितनयस्वमातुरम् ।
रन्तुमाखयन तद्विदादयो
तीव्ररक्षसि पतत्रिकेशिकौ ॥ ६ ॥

Digitized by Google

भूयः कुर्वन् कुवलयदृशां तत्र चित्तानुकूलं
कालं कश्चित् त्वमतुलमते गोकुलाभ्यन्तरे स्थाः॥ १२८॥
गोपेन्द्रस्य व्रजभुवि सखे केवलं यात्रया ते
नार्थः सिद्धेन्मम बहुमतः किन्तु वाढं तवैव।
प्रेमोल्लासं परिकलयतां गोपसीमन्तिनीनां
स्मर्तव्या मे सपदि भवता भारतोभारतेयम्॥ १२९॥
गोष्ठक्रीड़ोल्लसितमनसो निर्व्यलीकानुरागात्
कुर्वीथास्य प्रथितमथुरामण्डले ताण्डवानि।
भूयोरूपाश्रयपदसरोजन्मनः स्वामिनोऽयं
तस्योद्दामं वहतु हृदयानन्दपूरं प्रबन्धः॥१३०॥
श्रीदामाद्यैः शिशुसहचरैर्यो व्यधेलामकार्षीत्
गोपालीभिः सह युवतिभीरासकेलिं चकार।
दुष्टान् दैत्यानपि बहुतरान् हेलया यो जघान
स श्रीकृष्णस्तव यदुकवयस्तारयेद्वो भवाब्धिम्॥१३१॥

इत्युद्धवसन्देशाख्यप्रबन्धः समाप्तः।

रामकृष्णविलोमकाव्यम्।

तं भूसुतामुक्तिमुदारहासं
वन्दे यतो भव्यभवं दयाश्रीः।

Digitized by Google

नीते शोषं विरहरविणा सर्वतो हृत्तड़ागे
जाने कण्ठस्थलविलुठितप्राणमीनाधि तन्वि ।
दूरे संप्रत्यविरलसुहृन्मारुतैर्वारितोऽहं
कृष्णाम्भोधौ विलसदमृतालङ्कृतः किं करिष्ये ॥ १२३ ॥
नायं स्वप्नो निशि निशि भवेद्यत्तया सङ्गतिर्मे
पद्मामोदं विधुमुखि निराबाधमास्वादयामि ।
किन्तु ज्ञातं त्वयि विजयते काचिदाकृष्टिविद्या
यां संसक्ती हरसि तरसा मामदूराद्यदूनाम् ॥ १२४ ॥
लब्धान्दोलः प्रणयरभसादेष ताम्रोष्ठि नम्रः
प्रध्यायन्तीं किमपि भवतीं याचते नन्दसूनुः ।
प्रेमोद्दामप्रमदपदवी साक्षिणी शैलकच्छे
द्रष्टव्या ते कथमपि न सा माधवी कुञ्जवीथी ॥ १२५ ॥
विन्दन् वंशीस्फुरितवदनो नेत्रवीथीमकस्मात्
अन्तर्बाधाकवलितधियो धातुभिर्धूसरोऽहम् ।
क्रीड़ाकुञ्जे लुठितवपुषः श्रान्तमानन्दधारा-
कल्लोलैस्ते रहसि सहसोत्फुल्लमुल्लासयिष्ये ॥ १२६ ॥
प्रेमोन्मादादहमधिवहन् बाष्पधारामकाण्डे
गण्डोत्सङ्गे स्मरपरिभवैः पाण्डुरे दत्तचुम्बः ।
कुर्वन् कण्ठग्रहविलसितं नन्दयिष्यामि सत्यं
सान्द्रेण त्वां सहचरि परिष्वङ्गरङ्गोत्सवेन ॥ १२७ ॥
इत्थं तीव्रव्यसनजलधेः पारसीमामिवासां
संदेशैर्मे धृतगरिमभिर्दर्शयन् दूरदर्शी ।

Digitized by Google

दृष्ट्वा ते कृत्रिमकलिकाकण्टनालोपकण्ठ-
स्पन्देनान्तर्वपुरनुमितप्राणसङ्गा वराङ्गी ॥११७॥
मालां मैत्रीविदुरमदुरःसङ्गसौरभ्यसभ्यां
वासन्तीभिर्विरचितमुखीं पञ्चवर्णां गृहाण।
आच्छादायाः परिणतिदशां तादृशीं सारसाक्ष्याः
साक्षादेतत्परिमलभृते कः प्रबोधे समर्थः ॥११८॥
माल्यामोदव्यतिकरबहिर्बोधितायाः सबाष्पं
नेत्रद्वन्द्वं दिशि दिशि मुहुर्विक्षिपन्त्या विलक्षम्।
तस्याः प्रोद्यत्पलककलिकादन्तुरायाः पुरस्तात्
मन्दं मन्दं विनयमसृणस्त्वं विनम्रो जिह्वीयाः ॥११९॥
धृत्वा मालां किसलयततेरञ्चले न्यञ्चदङ्गी
भ्रूसंज्ञाभिः सपदि सचिवीकृत्य तस्याः वयस्याः।
दूत्यं स्वस्य प्रणयहृदयस्त्वं निवेद्यानवद्यं
धीमन् सद्यो मम कथयितुं वाचिकं प्रक्रमेथाः ॥१२०॥
यः सर्वस्मात्तव किल गुरुस्त्वस्य यस्मासि धीरे
प्रागल्भ्यस्त्वं प्रणयवसतिर्यस्य यः स्यात्तवापि।
स त्वां धृत्वा मनसि विधुरे हन्त सन्धुक्षमाणः
कृष्णस्तृष्णाचटुलचटुलं देवि सन्देदिशीति ॥१२१॥
सख्यु लक्ष्मीमुखि मतसुरीकृत्य दूरीभविष्णोः
धत्ते प्राणाननुपदविपद्दिङ्क्षुचित्तापि साध्वी।
सुरूपच्छाया मुकुरसुमनाः चौणिपृष्ठे लुठन्ती
बद्धापेक्षं विलसति गते माधवे माधवीयम् ॥१२२॥

Digitized by Google

पश्चे पश्चस्तुतमुकुलितासद्मनि स्वप्ननिद्रां
लब्धे लुब्धा मयि मुरलिकां हर्तुकामा त्वमासीः।
धृत्वा पाणौ मुकुरय मया कञ्चकं मुञ्चता ते
यत्प्रारब्धं किमपि तदिदं स्वान्तमन्तः पिनष्टि ॥ ११२॥
न्यस्ताङ्गी मे सुरभिनि भुजस्तम्भयोरन्तराले
भूयोभिस्त्वं रहसि ललिते केलिभिर्लालितासि।
अन्तश्चिन्ताविधुरमधुना पांशुपुञ्जे लुठन्ती
हन्त म्लाना रचयसि कथं प्राणसन्धारणानि ॥ ११३॥
यः सेवाभिर्मुदमुदयिनीं तव भद्राङ्गि भद्रे
नीतस्ताभिर्निशि निशि मनःकर्षिणीभिस्त्वयासीत्।
स प्रेष्ठस्ते नवपरिचयादिङ्गितज्ञानभिज्ञैः
कृष्णस्तूष्णीं पुरपरिजनैः सेव्यमानो दुनोति ॥११४॥
सोढव्यं ते कथमपि बलाच्चक्षुषी मुद्रयित्वा
तीव्रोत्तापं हतमनसिजोद्दामविक्रान्तचक्रम्।
द्वित्रैरेव प्रियसखि दिनैः सेव्यतां देवि शैव्ये
यास्यामि त्वत्प्रणयचटुलभ्रूयुगाडम्बराणाम् ॥११५॥
इत्थं तासामनुनयकलापेशलः क्लेशहारी
सन्देशं मे कुवलयदृशां कर्णपूरं विधाय।
त्वं मच्चेतोभवनवडभीप्रौढपारावती तां
राधामन्तः क्लमकवलितां संभ्रमेणाजिहीथाः ॥११६॥
सा पल्यङ्के किशलयदलैः कल्पिते तत्र सुप्ता
गुप्तानीरस्तवकितदृशां चक्रवालैः सखीनाम्।

चक्रुर्वक्रं मयि किल तथा प्रेमपूरं भवत्यो
येनोद्भ्रान्तत्रुटिमपि बलादुत्सहे नाद्य नेतुम् ॥१०६॥
राधोल्लासाम्बिनि निशि चिरं स्वप्नदृन्दापदेशात्
वृन्दारण्ये सुरभिणि मया सार्द्धमास्वादयन्ते।
भूयोभूयस्तदपि च परित्यागिता दूषणं मे
शंसन्त्यः किं कुटिलहृदया न त्रपन्ते भवत्यः॥१०७॥
ते ते चन्द्रावलि रसभरभ्रान्तनेत्रान्तमैत्री
वैचित्रीभिस्त्रिभुवनजये दत्तहस्तावलम्बाः
उत्सर्पन्तः स्मरणसरणीं हन्त ते भ्रूविलासाः
निःशङ्कं मे हृदयमधुना प्रांशवः शंसयन्ति॥१०८॥
तत्तत्तन्वि स्मरसि विपिने फुल्लशाखे विशाखे
कर्षन्नीवीं तव मुकुरदं वीक्ष्य हृष्टां मिलन्तीम्।
कल्याणीं मे वितर कितवे हन्त चेलान्तराले
गुप्तां गुञ्जावलिमिति वदन् यद्विलक्षस्तदासम्॥१०९॥
तां वैदग्धीपरिमलकथामुद्गिरन्ती सखीषु
क्लान्तिं दूरे चपयसि निजां हन्त धन्यासि धन्ये।
ध्यायन्नाहं तमिह नगरे देवि लोकं विलोके
प्रीत्या यत्र व्यसनविधुरं वक्त्रमुन्मुद्रयामि॥११०॥
गम्भीराणि प्रमदगुरुभिर्गूढनर्मप्रबन्धैः
माध्वीकानां मधुरिममहाकीर्तिविध्वंसनानि।
सोत्कण्ठं मे स्मरति हृदयं श्यामले कोमलानि
प्रेमोत्तुङ्गस्मितपरिचितान्यद्य ते जल्पितानि॥१११॥

Digitized by Google

तुङ्गातङ्कोत्तरलितमनःकल्पनाजल्पभाजाम् ।
तिष्ठन्नासां पथि नयनयोर्निःशलाकं गतानां
सन्देशं मे लघु लघु सखे हारिणं व्याहरेथाः ॥१०१॥

त्रिभिः कुलकम् ।

यः कालिन्दीवनविहरणोद्दामकामः कलावान्
वृन्दारण्यान्नरपतिपुरं गान्दिनीयेन नीतः ।
कुर्वन् दूत्यं प्रणयसचिवस्तस्य गोपेन्द्रसूनोः
देवीनां वः सपदि सविधं लब्धवानुद्धवोऽस्मि ॥१०२॥
तापोन्मज्जच्छ्वसितपटलीदूयमानाधरश्रीः
मुक्तक्रीडो धवलिमधुराहिण्डिरक्षामगण्डः ।
स्मारं स्मारं गुणपरिमलं हन्त वः क्लान्तचेताः
सोऽयं कान्तः किमपि सरलाः सुन्दरं संदिदेश ॥१०३॥
कच्चिद्गीतं न भजत मुकुन्दो नवेभ्यः पुरावत्
कल्याणं वः सरलहृदयाः कच्चिदुल्लालसीति ।
कच्चिद्यूयं स्मरथ सरसं तत्र चित्तानुकूलं
कुञ्जे कुञ्जे कृतमथ मया तच्च सेवाप्रपञ्चम् ॥१०४॥
नीतो यत्नाद्विविधविनयैर्बन्धनं बन्धुताभिः
कर्त्तुं भूयः किमपि कुशलं पत्तने वर्तमानः ।
ध्यायं ध्यायं नवनवमहं सौहृदं वः सुकण्ठ्यो
गाढोत्कण्ठाक्रमपरवशं वासराणि क्षिपामि ॥१०५॥
ज्ञातं ज्ञातं विरमत चिरं त्वादृशीनां चरित्रं
याभ्यस्तीव्रा समजनि मनोभेदिनी वेदनेयम् ।

पौनःपुन्यान्निपुण भवता तुङ्गमालिङ्गनीयाः ॥९५॥
हत्वा रङ्गस्थलभुवि मया धीर कंसं नृशंसं
काकूक्तिभिः सपद्यजनकैर्गोकुलं प्रेषितस्य ।
आनमस्त्वं चरणयुगलं वल्लवेन्द्रस्य कामं
नामग्राहं मम गुणनिधे वन्दमानो दधीथाः ॥९६॥
तां वन्देथा मम सविनयं नामतः क्षामगात्रीम्
आक्रोशन्तीं खलनरपतिं शाङ्गलीभङ्गमुख्यैः ।
अन्तश्चिन्ताविलुलितमुखीं हा मदेकप्रसूतिं
सर्वाङ्गैस्त्वं कलितवसुधालम्बमम्बां यशोदाम् ॥९७॥
या निश्वासोद्गमवलयिनं हारवं मुञ्चमाना
खेदोदग्रं मम गुणकथामन्तरेणान्तरेण
क्षामीभूता क्षितिपतिपुरीवर्त्म विन्यस्तनेत्रा
बास्पोद्गारस्नपितवसना वासराणि क्षिपन्ती ॥९८॥
अक्रूराख्ये हृतवति हठाज्जीवनं मां निदाघे
विन्दन्तीनां मुहुरविरलाकारमन्तर्विदाहम् ।
सद्यः शुष्यन्मुखजनरुचां वल्लवीदीर्घिकाणां
यासामासाद्दमनुसृताः प्राणकूर्मा वसन्ति ॥९९॥
तासां बद्धाञ्जलिरनुसरैरन्तिकं यन्त्रितात्मा
शङ्काभिस्त्वं क्रमपरिणमद्धिक्क्रियाणां प्रियाणाम् ।
दूत्यं कुर्वन्नसि गुणनिधे सापराधस्य यन्मे
भर्तुर्दोषादपि हि कुशला हन्त दुष्यन्ति भृत्याः ॥१००॥
मल्लीपर्य्यस्तवकितभरद्दोचणेनाकुलानां

उद्यद्बाष्पा त्यजति परितो हस्तकम्बी कराभ्यां
दूरात् पान्थावलिरपि सखे यस्य सीमोपकण्ठम् ॥९०॥

चतुर्दशभिः कुलकम् ।

युक्तं शुक्लीकनकनिकरालिङ्गिताङ्गैस्तुरङ्गैः
दृष्ट्वा नन्दीश्वरतटभुवि स्यन्दनं ते मिलन्तम् ।
मामाशङ्क्य स्फुटमुपगतं सन्निधातव्यमारात्
धावन्तीभिस्तरलतरलं राधिकायाः सखीभिः ॥९१॥
गोपालीनामपि वपुरलङ्कारलीलां दधाना
येषां नव्यः किसलयगणो रागिणं मामकार ।
भ्राम्यद्भृङ्गावलिषु भवता तेषु सस्ताग्रिषां मे
वृन्दं वृन्दावनविटपिषु प्राज्ञ विज्ञापनीयम् ॥९२॥
मत्ता वंशीनिनदमधुभिस्तूर्णगा सायकानां
ता मुञ्चन्त्यः प्रणयमभितः सल्लरल्लताल्लः ।
तासामुच्चैर्मम परिपठन् कामतो नामधेयं
क्षेमं पृच्छेस्त्वमथ निचये नीपकैर्नैपकीनाम् ॥९३॥
डिम्भव्यूहं क्षतवति विधौ तत्तदाभस्तदाह्वं
स्तन्यं यासां मधुरमधयं वत्सरं वत्सलानाम् ।
वारंवारं मम नतिगणान् विज्ञ विज्ञापयेथा
नम्रस्तासां जठरपाण्डुरोमण्डलीनां पदेषु ॥९४॥
आमोदं मे मधुर दधिरे मामहंपूर्विकाभिः
दूरे यान्तं कुसुमितवनालोकनाय स्पृशन्तः ।
श्रीदामाद्याः प्रियसहचरा हन्त मन्नामतस्ते

कामं दूरे सहचरि वरीवर्त्ति यत् कंसवैरी
नेदं लोकोत्तरमपि विपद्दुर्दिनं मे दुनोति।
आभीरोऽसौ हृदि किल धृतः प्रायरोधी तु यो मे
सोऽयं पीड़ां निविड़बड़वावह्नितीव्रस्तनोति॥ ८५॥
तत्र स्फीताधरमधुभरे शीतलोत्सङ्गसङ्गे
सौन्दर्य्योल्लासितवपुषि स्फारसौरभ्यपूरे।
नर्मारम्भस्फुटितवचःकन्दले नन्दसूनौ
मोदिष्यन्ते मम सखि कदा हन्त पञ्चेन्द्रियाणि॥ ८६॥
भिन्दन् चक्षोः किल कलुषतां श्यामलः श्यामलाभिः
लिम्पन्तीभिर्गिरिपरिसरं माधुरीणां छटाभिः।
आविर्भावी गुरुतरचमत्कारभाजः कदा मे
खेलन्नग्रे निखिलकरुणानन्दनो नन्दसूनुः॥ ८७॥
आनयायां मयि निजमुखालोकलक्ष्मीप्रसादं
खेदश्रेणीविरचितमनो लाघवायां विधेहि।
सेवाभाग्ये यदपि न विभो योग्यता मे तथापि
स्मारं स्मारं तव करुणतापूरमेवं ब्रवीमि॥ ८८॥
क्रीड़ातल्पे निहितवपुषः कल्पिते पुष्पजालैः
स्मित्वा स्मित्वा प्रणयरभसात् कुर्वतो नर्मभङ्गीः।
विन्यस्यन्ती तव किल मुखे पूगफालीं विधास्ये
कुञ्जद्रोण्यामहमिह कदा देव सेवाविनोदम्॥ ८९॥
इत्थ बद्धः पशुपरमणीमण्डलीनां विलापैः
भूयोभूयः करुणकरणैरद्य कीर्णान्तरस्य।

ध्यानस्तोत्रो विरहदहनाद्यापजन्मा बलान्मे
मर्म्मोन्माथी लघुतरमिमां पातयन्दन्दहीति ॥७९॥

कारण्याब्धौ क्षिपसि जगतीं हा किमेभिर्विलापैः
धेहि स्वैरं मनसि यदभूरध्वगे बद्धरागा।
स्मृत्वा वाणीमपि यदि निजां रूढजं नाजिहीते
धर्त्ताऽस्माकं त्रिजगति ततस्त्वं निर्दोषताभूत् ॥ ८० ॥

क्वायं गन्ता मधुरिपुरितो गोकुलादस्मदीयः
काले वंश्ये सुखमिति मया हन्त मानो व्यधायि।
का जानीते यदिह खलताचातुरीदीक्षितेन
प्रक्षेप्तव्यं शिरसि कुलिशं गान्दिनीनन्दनेन ॥८१॥

न क्षोदीयानपि सखि मम प्रेमगन्धो मुकुन्दे
क्रन्दन्तीं मां निजसुभगताख्यापनाय प्रतीहि।
खेलद्वंशीवलयिनमनालोक्य तं वक्त्रबिम्बं
ध्वस्तालम्बा यदहमहह प्राणकीटं बिभर्मि ॥८२॥

आशापाशैः सखि नवनवैः कुर्वतो प्राणबन्धं
जात्या भीरुः कति पुनरहं वासराणि क्षयिष्ये।
एते वृन्दावनविटपिनः स्मारयन्तो विलासान्
उत्फुल्लास्तान्मम किल बलान्मर्म निर्मूलयन्ति ॥ ८३ ॥

सा विश्राम्यन्मनसिजधनुर्विभ्रमोद्बोधविद्या
चिल्लीवल्लिभ्रमिमधुरिमोद्दामसम्पद्भिरिष्टा।
एतामार्त्तिं मम शमयिता स्मेरता सङ्गराङ्गी
प्रेमोत्तुङ्गाः किमु मुरभिदो भङ्गुरापाङ्गभङ्गी ॥८४॥

Digitized by Google

पश्य श्यामोदरि तव मुखालोकजन्मा हि शोको
वारं वारं हरिनयनयोर्बाष्पमन्तस्तनोति ।
धावद्वाजित्सुरदुरखुरोत्तानितानां वितानो
धूलीनान्तु स्थयति विसरन्नेष मिथ्याकलङ्कः ॥७४॥
कृष्णं मुष्णन्नकरुणबलाद्गोपनारीवधार्थी
मा मर्यादां यदुकुलभुवां भिन्धिरे गान्दिनेयः ।
इत्युक्त्वा मम मधुपुरे यात्रया तत्र तासां
विन्यस्तानां परिववलिरे वल्लवीनां विलापाः ॥७५॥

दशभिः कुलकम् ।

अस्वच्छीराहरणकपटप्राप्तगोपालनारी
गूढक्रीडावसतिनिविडच्छायकुञ्जोपगूढः ।
यत्रादूरे विलसति महान् बद्धरोलम्बसङ्घा
पद्मामोदस्नपितपवनः पावनाख्यस्तडागः ॥७६॥
लीलाक्रान्तैर्मुरविजयिनः सर्वतः पादपातैः
वैलक्षण्यं किमपि जगतामन्तराकर्षि नीताः ।
एते नन्दीश्वरपरिसरा नेत्रवीथीं भजन्तः
तीव्रं मातः किमपि दहनं चेतसि ज्वालयन्ती ॥७७॥
अस्ति प्रेष्ठां त्वयि परिमली मांसलः कंसशत्रोः
अद्य श्वो वा स तव भविता हारिहारानुकारी ।
दम्भोलीनामपि सुवदने गर्भनिर्भेददक्षैः
एभिः कामं किमु विलपितैर्बान्धवान् दन्दहीषि ॥७८॥
मा कार्पण्यादिह रचय वृथा बाष्पमोक्षं कृताग्रे
कृष्णाश्लिष्टां तनुमनुपमां स्वेच्छया न त्यजामि ।

Digitized by Google

पश्य क्षिप्रं प्रथितलघिमा पापिनीयं प्रभाता
जायन्ते हि प्रचुरतमसो नानुकूलाः परेषु ॥६८॥
यावद्व्यक्तिं न किल भजते गान्दिनेयानुबन्धः
तावन्नत्वा सुमुखि भवतीं किञ्चिदभ्यर्थयिष्ये ।
पुष्पैर्यस्या मुहुरकरवं कर्णपूरान् मुरारेः
सेऽयं फुल्ला गृहपरिसरे मालती पालनीया ॥६९॥
नावैषि त्वं पतितमशनिं मूर्ध्नि निर्मीयमाणा-
मेनां कस्ते सखि शिखरिणीं हन्त पाता हृतासि ।
तूर्णं मुग्धे वहिरनुसर प्राङ्गणं गेहमध्यात्
अध्यारूढो जिगमिषुरसौ स्यन्दनं नन्दसूनुः ॥७०॥
आसीदार्ये पशुपपटलीमन्तरा नान्तरायः
प्रापुः पापा न च विकलतां पादभङ्गैस्तुरङ्गाः ।
ध्वस्तो नाभूदयमपि मनाक् स्यन्दने चक्रबन्धः
सत्यं गन्ता मधुपुरमसौ हन्त किं केशिहन्ता ॥७१॥
आरादग्रे, कलय नृपतेर्दूत निर्धूतलज्जा
सज्जा तन्वी किमपि विषमं साहसं कर्तुमिच्छुः ।
यानाद्यावद्विसृजसि पुरश्चन्द्रहासं न कृष्णं
हस्तात्तावद्विसृजति सखी चन्द्रहासं न कृष्णाम् ॥७२॥
मुग्धे पश्य क्षणमपि हरिं नेत्रमुन्मीलयन्ती
मोहेन त्वं विरचय मुहुर्नात्मनो वञ्चनानि ।
शृण्वन् काकूत्करमपि पुरो हन्त सीमन्तिनीनां
क्रूरस्तूर्णं विनुदति रथं दूरमक्रूरनामा ॥७३॥

Digitized by Google

इत्थंभूता बहुविधपदारम्भगम्भीरगर्भा
कर्णीनां मे स्फुटतरतया कोटिभिः पातुमिष्टा ।
आसीत्तासां प्रियसख पुरा यत्र कल्याणवाचां
प्रेमोल्लासप्रकटनकला कर्मठा नर्म्मगोष्ठी ॥६३॥

चतुर्दशभिः कुलकम् ।

केयं श्यामा स्फुरति सरले गोपकन्या किमर्थं
प्राप्ता सख्यं तव मृगयते निर्मितासौ वयस्या ।
आलिङ्गामुं मुहुरिति तथा कुर्वती मां विदित्वा
नारीवेशं ह्रियमुपययौ मानिनी यत्र राधा ॥६४॥
यत्रोत्तुङ्गाः करपरिचयं सस्पृहासेदिवांसो
भूयांसो मे विमलहृषदां कल्पिता मण्डलीभिः ।
बन्धायोद्यत्तरलतरसां तर्णकानां निखाताः
कीलाः कूलस्थलवलयिनो भान्ति पद्माकराणाम् ॥६५॥
नो जानीमः कठिनविधिना मद्विधानां कपाले
गोपालीनां किल विलिखिता कीदृशी वर्णलेखा ।
यः सन्ध्यायां सुमुखि मिलितो गोकुले राजदूतः
सोऽयं कर्णे निभृतनिभृतं माधवं वावदीति ॥६६॥
एष क्षत्ता व्रजनरपतेराज्ञया गोकुलेऽस्मिन्
बाले प्रातर्नगरगतये घोषणामातनोति ।
दृष्टं भूयः स्फुरति च बलादीक्षणं दक्षिणं मे
तेन स्वान्तं स्फुटति चटुलं हन्त भाव्यं न जाने ॥६७॥
प्रातर्यात्रां नरपतिपुरे तथ्यमाकर्ण्य पौरैः
आयामाय प्रियसखि मया यामिनी प्रार्थिताभूत् ।

Digitized by Google

गङ्गामन्तर्न रचय मुधा तस्मि गीतं तनोमि
स्फीतं वृन्दावनभुवि मुहुः कृष्णसारो भवाय ॥५७॥
वारं वारं भजसि सलिलच्छद्मना पद्मबन्धोः
पुत्रीं ज्ञातस्तव सखि रसः पुण्डरीकेक्षणोऽसौ।
चेतः काम्या भवति विशदासारशाली न वामे
तेन स्मेरं मुहुरभिलषाम्यच्युतं रक्तपद्मम् ॥५८॥
पश्याम्यन्तर्विहितवसतिं त्वामराजाङ्गनानां
अत्र चौरे स्पृहयसि कथं कृष्णकण्ठग्रहाय।
साधु ब्रूषे सखि मदकलो मां शिखण्डोज्ज्वलोऽयं
कुञ्जे दृष्ट्वा भुजगदमनोद्दामदर्पोऽभ्युपैति ॥५९॥
बाले चन्द्रावलि नहि वह्निर्भूय भूयः प्रदोषे
गेहात् तृष्णावति कुरु पुरः कृष्णवर्त्मावलोकम्।
सर्वस्यान्तर्जड़िमदमने पावके नाद्य लब्धे
मुग्धे सिद्धिर्मम रसवती प्रक्रिया न प्रयाति ॥६०॥
हस्ते नाद्य प्रियसखि लसत्पुष्कराभेन दूरात्
कृष्णेनाहं मदकलदृशा कम्पिताङ्गी विकृष्टा।
नीचैर्जल्प भ्रमति पुरतो भ्रान्तचित्ते गुरुस्ते
कृष्णकालिन्दीपुलिनविपिने द्वीपदन्तीश्वरेण ॥६१॥
वृन्दारण्ये मम विदधिरे निर्भरोत्कण्ठितानि
क्रीड़ोल्लासैः सपदि हरिणा हा मया किं विधेयम्।
ज्ञातं धूर्त्ते स्पृहयसि मुहुर्नन्दपुत्राय तस्मै
मा शङ्किष्ठाः सखि मम रसो दिव्यसारङ्गतोऽभूत् ॥६२॥

Digitized by Google

मा भूयस्त्वं वद रविसुतातीरधूर्तस्य वार्तां
गन्तव्या मे न खलु तरले दूति सीमापि तस्य ।
विख्याताहं जगति कठिना यत् पिधत्ते मदङ्गं
रोमाञ्चोऽयं सपदि पवनो हैमनस्तत्र हेतुः ॥५२॥
कामं दूरे वसतु पटिमा चाटुवृन्दे तवायं
राज्यं स्वामिन् विरचय मम प्राङ्गणं मा प्रयासीः ।
हन्त क्रान्ता मम सहचरी रात्रिमेकाकिनीयं
नीता कुञ्जे निखिलपशुपीमानचौरोऽमरेश ॥५३॥
मेदिन्यां ते लुठति रचिता मालती म्लानपुष्पा
तिष्ठन् द्वारे रमणिविमनाः खिद्यते पद्मनाभः ।
त्वं चोन्निद्रा क्षपयसि निशां रोदयन्ती वयस्या
माने कस्ते नवमधुरिमातन्मुधारोदयामि ॥५४॥
मद्वक्त्राम्भोरुहपरिमलैर्मत्तवेवानुबन्धे
पत्युः कृष्णभ्रमर कुरुषे किन्त्वयामन्तरायम् ।
कृष्णाभिख्यं यदि कलयतव्यापिभिस्तदाग्रे
पुष्पैः पाण्डुच्छविमविरलैर्याहि पुन्नागकुञ्जम् ॥५५॥
अत्रायान्तं चलमपि हरिं लोकयन्ती वलिष्ठां
त्वामालम्ब्य प्रियसखि घने नास्मि कुञ्जे निलीना ।
अस्मान्मध्ये हृदयनिहितादस्य पीताम्बरास्ते
भक्तो नान्यः कुचपरिचये मत्पुरो मा व्यथिष्ठाः ॥५६॥
मां पुष्पाणामवचयमिषाद्दूरमानीय कुञ्जं
स्मित्वा धूर्ते किमिति रभसादुच्चकैर्गायसि त्वम् ।

इत्थं साचिस्मितशबलितां यत्र सन्ध्यानुबन्ध
मामुद्दिश्य स्मरपरिमलं बिभ्रतीनामदभ्रम् ।
पौनःपुन्याद्द्विविधपदयोर्गुम्फनावानुसङ्गी
लीलाजल्पः कुवलयदृशां प्रेमपूर्णः पुरासीत् ॥४७॥

द्वादशभिः कुलकम् ।

दामाकृष्टिद्विगुणितकरारण्यविद्योतितानां
घर्माम्भोभिर्दरवलयितस्मेरगण्डस्थलानाम् ।
भालोपान्तप्रचलदलकश्रेणिभाजां मदीयैः
कीर्त्तिस्तोमैर्मुखरितमुखाम्भोजलक्ष्मीभराणाम् ॥४८॥
हेलाचञ्चद्वलयरणितग्रन्थितैर्मन्थनीनां
ध्वानोन्मिश्रैर्मसृणमसृणं मन्थतीनां दधीनि ।
गीतैस्तासां कुवलयदृशां यत्र रात्रेर्विरामे
प्रेमोत्तानैर्मम समजनि स्वप्नलीलासमाप्तिः ॥४९॥

युग्मकम् ।

निर्मीय त्वं चित्रफलकं हारि कंसारिमूर्त्ती
वारं वारं दिशसि यदि मां माननिर्वाहणाय ।
यत् पश्यन्ती भवनकुहरे सद्मकर्णान्तराहं
साहङ्कारा प्रियसखि सुखं यापयिष्यामि यामम् ॥५०॥
सन्ति स्फीता व्रजयुवतयस्त्वद्विनोदानुकूला
रागिण्यग्रे मम सहचरी न त्वया घट्टनीया ।
दृष्ट्वाभ्यर्णे शठकुलगुरुं त्वां कटाक्षार्द्धचन्द्रान्
भ्रूकोदण्डे घटयति जवात् पश्य संरम्भिणीयम् ॥५१॥

Digitized by Google

आरान्नीतैः कलपरिमिलन्माधुरीकैः कुरङ्गे
लब्धे सद्यः सखि विषमतां वागुरां कस्तनोति ॥४१॥
यान्त्या लीलोद्भटकलतुलाकोटि सद्यस्त्वयासौ
लब्धा चन्द्रावलि सखि कुतः शब्दभेदाख्यविद्या ।
पश्योपेन्द्रः सदनपदवीं वल्लवेन्द्रस्य मुञ्चन्
अन्तर्भिन्नो मुहुरिह यया सम्भ्रमाद्भ्रमीति ॥४२॥
सा सोत्कण्ठं वसति वसतेर्वत्सला द्वारि देवी
वत्सीस्तोमैः क्षणमिह मुखाम्भोजलक्ष्मीं विधेहि ।
दूराच्चेतोमथिमपहरन्नेष भव्याक्षि दिव्यो
विव्वोकस्ते मुरविजयिनो वर्त्म पाती बभूव ॥४३॥
यष्टिर्भूमौ लुठति तरसा स्रंसते पश्य वंशी
कंसारातेः स्खलनममलं स्पष्टमङ्गीकरोति ।
दूरानन्दः कलयति पुरो ह्रेपयामुं न राधे
बन्धे देवि स्थगय चपलापाङ्गभङ्गीवितानम् ॥४४॥
तिष्ठन् गोष्ठाङ्गणभवि मुहुर्लोचनान्तं विधत्ते
जातोत्कण्ठस्तव सखि हरिर्देहलीवेदिकायाम् ।
मिथ्यामानोन्नतिकवलिते किं गवाक्षार्पिताक्षी
स्वान्तं हन्त क्षपयसि बहिः प्रीणय प्राणनाथम् ॥४५॥
पश्य व्रीडां सकपटममौ तन्वती नः पुरस्तात्
द्वारे गौरी न सरति मुहुः शौरिणाकारितापि ।
आकृष्टाया गहनकुहरे वेणुविद्याविनोदैः
जानात्यस्याः पुनरनुपमं विक्रमं कुञ्जवीथी ॥४६॥

Digitized by Google

रेणुनीयं प्रसरति गवां धूमधारा श्मशानोः
वेणुनीयौ गहनकुहरे कीचको रोरवीति ।
पश्चोन्मत्ते रविरभिययौ नाधुनापि प्रतीचीं
मा चाञ्चल्यं कलय कुचयोः पलवल्लीं तनोमि ॥३६॥
दूरे वंशीध्वनिरुदयते हन्त मा धाव तावत्
धूर्ते दानीमपि नहि गवां लक्ष्यते धूलिलेखा ।
अस्ति द्वारे गुरुरपि ततो लम्बितां लम्बयन्ती
चीरे नीवीं त्वमिह तरसा याहि गेहान्तरालम् ॥३७॥
आप्रत्यषादपि सुमनसां वीथिभिर्ग्रथ्यमाना
धत्ते नासौ सखि कथमहो वैजयन्ती समाप्तिम् ।
धिग्वन् गोपीनयनशिखिनो व्योमकक्षां जगाहे
सोऽयं मुग्धे निविडधवलोधूलिचक्राम्बुवाहः ॥३८॥
अस्मिन् भूयो विरहमरवपुः सौरभे सौरभेयी
धूलेर्जालैः सवलितशिरो मालतीचक्रवाले ।
अन्तर्गोष्ठं प्रविशति हरौ हन्त कस्या न चेतः
तृष्णां धत्ते जरति मुखरे किं तृथा रारटीषि ॥३९॥
मा मन्दाक्ष्यं कुरु गुरुजनाद्देहलीं गेहमध्यात्
एहि क्लान्ता दिवसमखिलं हन्त विश्लेषतोऽसि ।
एष स्मेरो मिलति मृदुले वल्लवीचित्तहारी
हारी गुञ्जावलिभिरलिभिर्लीढ़िगन्धो मुकुन्दः ॥४०॥
सौरिर्गोष्ठाङ्गणमनुसरन् शिञ्जितैरेवमुग्धः
किङ्किण्यास्ते परिहर दृशोस्ताण्डवं मण्डिताङ्गि ।

Digitized by Google

आखिन्नातः स खलु वलितः प्रीतमाराभिधस्ते
देशः क्षेमं पथिषु रथिनो हारयिष्यत्युदारम् ॥ २० ॥
लोलं रङ्गानटनपटुभिः सेव्यमानो महद्भिः
कन्दाम्भोजोत्तमसुमनसां निर्भरामोदधारी ।
पीयूषेण स्फुरितवसतिस्तामुदन्वद्गुरुश्रीः
लोकातीतः किल मदयिता वल्लवेन्द्रस्य लोकः ॥ २१ ॥
पश्यन्तीनां चकितचकितं लब्धलक्षं गताक्षे
मामुत्तुङ्गव्यसनविसरैः काममुन्मादितानाम् ।
तासां विद्युत्तरलवपुषां वल्लवीनां प्रपातात्
विद्युत्कारीं कथयति जनो रक्षिणां यस्य कक्षाम् ॥ २२ ॥
यत्राक्रूरः प्रणयनिविडोत्कण्ठया गुम्फितात्मा
रङ्गाद्गोष्ठादुपसमनुसरन् मामलोकिष्ट बन्धुम् ।
तद्दास्याभः कुलपरिचयारब्धजृम्भैः करम्भैः
सा सख्यीता विलसति तटी यत्र सौधाधिकाख्या ॥ २३ ॥
धावद्बालावलिकरतलप्रोच्छलद्वालधीनां
यत्रोत्तुङ्गस्फटिकपटलस्पर्द्धि देहद्युतीनाम् ।
घ्रायं घ्रायं नवतृणशिखां मुञ्चतीनां वलन्ते
वत्सालीनां चटुलपटुलं प्रस्फुटाटीकनानि ॥ २४ ॥
आभीरीणां नवनसरणीसङ्गमादेव तासां
सद्यो मोहायितमधुरिमोल्लासभङ्गीविधाता ।
पीठीभूतो मम परिमलोद्गारगोष्ठी गरीयान्
यत्रास्थानीमनुविजयते पाण्डरो गण्डशैलः ॥ २५ ॥

Digitized by Google

[illegible] मम [illegible]ते [illegible] नागेन्द्रभोगे
[illegible]असंपादनस्य ।
मम [illegible] वद्वस्ते
[illegible] ॥२५॥
[illegible] दृष्टां [illegible]
[illegible] ।
[illegible] [illegible] नर्पयन्ती
[illegible] मम दृष्टिः ॥२६॥
[illegible] परीतां
[illegible] ।
[illegible]
[illegible] मे [illegible] ॥२७॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥२८॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥२९॥
[illegible]
[illegible] ।

Digitized by Google

श्रीदामानं सुभग सवडीरुत्य यत्राधिरूढः
क्रीड़ाकारी दृधदुरुभुजां द्वादशाडं वयांसि ॥१९॥
मुग्धे श्यामः कलयति युवा पश्य मामेव नत्वाम्
इत्युल्लासैरहमहमिकां सर्वतः कुर्वतीभिः।
यानालम्बी सरलनयनालोकनैर्लोभराणां
ग्रामीणाभिर्युवतिभिरहं यत्र पात्रीकृतोऽस्मि ॥२०॥
मुञ्चन् सव्ये वहलवकुलं काननस्योपशल्यं
तन्वी तुङ्गं हृदपरिसरं दक्षिणे कालियस्य।
फुल्लाभिस्त्वं पिहितमिहिरद्योतमल्लीलताभिः
धीराध्वानं विमलसरसीराजिभाजं भजेथाः ॥२१॥
वल्लीचित्रं व्रजभुवगह्वरं तं व्रजस्योपशल्ये
कल्ये क्रीड़ावनविहरणोत्कण्ठया गच्छतो मे।
यत्रोदश्चत् कलवलयितैर्वेणुगीतैर्मृगाणां
तूर्णं राजीरजनिविरहव्याकुलानामहारि ॥२२॥
आननाणां हसितमुकुलैः फुल्लगण्डस्थलानां
दूराद्दृष्टिस्फुटसुमनसां स्यन्दने मुञ्चतीनाम्।
ते वैदग्धीपरिमलकिरो हन्त सीमन्तिनीनां
सद्धुवीणावलिविलसिता दुर्लक्षाः कटाक्षाः ॥२३॥
एष श्रीमान् प्रसवति रथी माधवो राधिकायाः
प्रेम स्थूलं करणकुटिलालोकभङ्गीविलासैः।
इत्यौत्सुक्याद्दरयुवतिभिः स्मारितोद्दामनर्मा
धर्माश्रोभिस्ततनुरहं यत्र चित्रायितोऽस्मि ॥२४॥

तस्मादन्तर्विरचितपरानन्दपूराददूरां
याहि प्रीत्या सपदि पदवीमम्बिकाकाननस्य।
यत्रानन्दोत्सवमकरवं सर्पतः सर्पतायां
नन्दं विद्याधरमपि पुरामोचयन् वल्लवीनाम् ॥२४॥
भूयोऽभिख्यं किल कुवलयापीडदन्ताभिघातैः
एता निर्व्वीभ्रतपरिसरां स्यन्दने वर्त्तमानः।
मुञ्चोत्तुङ्गां मिहिरदुहितुर्धीरतीरान्तभूमिं
मन्दाक्रान्तां न खलु पदवीं साधवः शीलयन्ति ॥२५॥
मुक्तासव्ये त्रिदशगवचिरं किञ्चिदस्मादुदञ्चं
राजत्तीरं नवसुमनसां राजिभिस्तीर्थराजम्।
यत्रापूर्वं किमपि कलयाञ्चक्रतुर्मत्प्रभावाद्
आभीराणां कुलमपि तथा गान्दिनीनन्दनोऽपि ॥२६॥
यज्वानस्ते यदपि भवतो विप्रिया हेलनान् मे
नम्रस्तेषां तदपि भवनद्वाररथ्यां जिहीथाः।
गायन्तीनां मदगुरचितं तत्र विप्राङ्गनानाम्
आलोकाय स्पृहयसि न चेदब्भभावैर्जितोऽसि ॥२७॥
तद्विख्यातं स्फटविटपिनां मण्डलेनाभिपूर्णां
दूर्णां गच्छेरुपपुरिपुरः कोटिकाख्यं प्रदेशम्।
यत्र प्राप्ते मयि विकिरती नेत्रमुद्यानपाली
शालीनापि प्रकटितभुजा मूलमल्पं जहास ॥२८॥
इत्यं क्रान्त्वा पुरपरिसरान् याहि सङ्केताख्यं
षड्भीभूतं भ्रमरपतेः पुष्पितारण्यमारात्।

Digitized by Google

भूयोभूयः प्रियसख मया तुभ्यमव्याजतोऽहम्
भूरन्या मे हृदि सुखकरी गोष्ठतः क्वापि नास्ति ॥ ८ ॥
मद्विश्लेषज्वलनपटलीज्वालया जर्जराङ्गीः
सर्वे तस्मिन्निधनपदवीं प्राणिनोऽप्यारुरुक्षन् ।
गोपीनेत्रावलिविगलितैर्भूरिभिर्वाष्पवारां
पूरैस्तेषां यदि निरवधिर्नाभिषेकोऽभविष्यत् ॥ ९ ॥
आत्मक्लेशैरपि नहि तथा मेदुरैर्व्यथन्ते
बल्लव्यस्ताः प्रियसख यथा मद्व्यथाक्लेशतोऽपि ।
दुर्वारां मे विरहविहितां निह्नुवानस्तदार्ति
प्रेमग्रन्थिं त्वमतिपृथुलं तासु विस्रापयेथाः ॥ १० ॥
भ्रातर्नन्दीश्वरगिरिमितो यास्यतस्ते विदूरं
पन्थाः श्रीमानयमकुटिलः कथ्यते पथ्यरूपी ।
प्रीये सद्यस्त्वयि निपतिते गोकुलानन्दसिन्धौ
सन्तस्तुष्टे सुहृदि हि निजां तुष्टिमेवामनन्ति ॥ ११ ॥
अग्रे गौरीपतिमनुसरेः पत्तनान्तर्वसन्तं
गोकर्णाख्यं व्यसनजलधौ कर्णधारं नराणाम् ।
यस्याभ्यर्णे सह रविजया सङ्गमो जङ्गमानाम्
आविष्कुर्वन्नभिमतधुरां धीर सारस्वतोऽस्ति ॥ १२ ॥
आरूढस्ते नयनपदवीं तन्निधन्यासि सोऽयं
गोपीनाथः करणमुरलीकाकलीकः कलावान्
इत्यालापस्फुरितवदनैर्यत्र नारीकदम्बैः
दृग्भङ्गीभिः प्रथममथुरासङ्गमे चुम्बितोऽस्मि ॥ १३ ॥

अन्तःस्वान्ते चयमथ यराम्हष्य पाराभिलाषी
कष्टाम्भोधेर्मगनशिखरे कुट्टिमान्तर्निविष्टः ।
सोत्कण्ठोऽभूदभिमतकथां शंसितुं कं समेदी
नेदिष्टाय प्रणयलहरी बद्धवागुद्धवाय ॥ ३ ॥
त्वं सर्वेषां मम गुणनिधे बान्धवानां प्रधानम्
त्वत्तो मन्त्रैः श्रियमविषमां यादवाः साधयन्ति ।
तस्मात्तस्मादभिमतविधौ कामये त्वां नियोक्तुम्
न्यस्तः साधीयसि सफलतामर्थभारो हि धत्ते ॥ ४ ॥
संरम्भेण चितिपतिगिरां लङ्घिते गर्विताना
वृन्दारण्यान्यपि मधपुरीं गान्दिनीनन्दनेन ।
वल्लव्यस्ता विरहदहनज्वालिकामण्डलीनाम्
अन्तर्लीनाः कथमपि सखे जीवितं धारयन्ति ॥ ५ ॥
प्राणेभ्यो मे प्रणयवसतिर्भिन्न तत्रापि राधा
धातुः सृष्टौ मधुरिमधराधारणादद्वितीया ।
वाचोयुक्तिस्खलितपदैरत्र सेयं सखीनां
गाढाश्वासैर्विधुरविधरं प्राणभारं बिभर्ति ॥ ६ ॥
गत्वा नन्दीश्वरशिखरिणो मेखलां रत्नभूताम्
त्वं वल्लीभिर्वलयितनगां वल्लवाधीशपल्लीम् ।
तां दृष्टाङ्गीं विरहफणिना प्राणयन् प्रोष्यार्त्तां
वार्तामन्त्रध्वनिभिरथ मे मन्त्रिचूडामणीन्द्र ॥ ७ ॥
तिष्ठन्त्येते जगति बहवस्त्वद्विधानां विधातुं
चेतः मूर्तिं ननु जनपदामूर्तिभिर्मे समाधाः ।

जलच्युतच्युतांगरागलम्पटालिशालिनी
विलोलराधिकाकचान्तचम्पकालिमालिनी ।
सदावगाहनावतीर्णभर्तृभृत्यनारदा
धुनोतु नो० ॥७॥

सदैवनन्दिनन्दकेलिशालिकुञ्जमञ्जुला
तटोत्थफुल्लमल्लिकाकदम्बरेणुसुज्ज्वला
जलावगाहिनां नृणां भवाब्धिसिन्धुपारदा
धुनोतु नो मनोमलं कलिन्दनन्दिनी सदा ॥८॥

इति श्रीशङ्कराचार्यविरचितं यमुनाष्टकं
सम्पूर्णम् ।

उद्धवसन्देशः ।

सान्द्रीभूतैर्नवविटपिनां पुष्पितानां वितानैः
लक्ष्मीवत्तां दधति मथुरापत्तने दत्तनेत्रः ।
कृष्णः क्रीड़ाभवनवड़भीभूम्नि विद्योतमानो
दध्यौ सद्यस्तरलहृदयो गोकुलारण्यमैत्रीम् ॥ १ ॥
श्वासोच्छ्वासैरथ तरलितस्थूलनालीकमालः
कुर्वन् पूर्णां नयनपयसां चक्रवालैः प्रणालीः ।
स्मारं स्मारं प्रणयनिविड़ां वल्लवीकेलिलक्ष्मीम्
दीर्घोत्कण्ठाजटिलहृदयस्तत्र चिन्तायितोऽभूत् ॥ २॥

Digitized by Google

मनोऽनुकूलकूलकुञ्जपुञ्जधूतदुर्मदा
धुनोतु नो मनोमलङ्कलिन्दनन्दिनी सदा ॥१॥

मलापहारिवारिपूरिभूरिमण्डितामृता
भृशंप्रपातकः प्रपञ्चनाति पण्डितानिशा ।
सुनन्दनन्दिनाङ्गरागरागरञ्जिताहिता
धुनो तु० ॥२॥

लसत्तरङ्गसङ्गधूतभूतजातपातका
नवीनमाधुरीधुरीनभक्तिजातचातका ।
तटान्तवासदासहंस स 'सृताह्निकामदा
धनोतु नो० ॥३॥

विहाररासखेदभेदधीरतीरमारुता
गतागिरामगोचरे यदीयनीरचारुता ।
प्रवाहसाहचर्यपूतमेदिनीनदीनदा
धुनोतु नो० ॥४॥

तरङ्गसङ्गसैकतान्तरान्तितं सदासिता
शरन्निशाकरांशुमंजमंजरीसभाजिता ।
भवार्चनाप्रचारुणाम्बुनाधुनाविशारदा
धनोतु नो० ॥५॥

जलान्तकेलिकारिचारुराधिकांगरागिणी
स्वभर्तुरन्यदुर्लभांगतागतांशभागिनी ।
स्वदत्तसुप्तसप्तसिंधुभेदिनातिकोविदा
धुनोतु नो० ॥६॥

Digitized by Google

रथारूढो गच्छन् पथि मिलितभूदेवपटलैः
स्तुतिप्रादुर्भावं प्रतिपदमुपाकर्ण्य सदयः।
दयासिन्धोर्बन्धुः सकलजगतां सिन्धुसदयो
जगन्नाथ० ॥६॥

नचेद्राज्यं राज्यं न च कनकमाणिक्यविभवो
न याचेऽहं रम्यां सकलजनकाम्यावरविधे।
सदा काले काम: प्रथमपठिनोद्गीतचरितो
जगन्नाथ० ॥७॥

हरत्वं सं सारं द्रुततरमसारं सुरपते
वरत्वं भोगीशं सततमपरं नीरजपते।
अहो दीनानाथो निहितमचलं निश्चितमिदं
जगन्नाथस्वामी नयनपथगामी भवतु मे ॥८॥
जगन्नाथाष्टकं पुण्यं यः पठेत् प्रयतः शुचिः।
सर्वपापविशुद्धात्मा विष्णुलोकं स गच्छति ॥९॥

इति जगन्नाथाष्टकं सम्पूर्णम्।

यमुनाष्टकम्।

मुरारिकायकालिमाललामवारिधारिणी
तृणीकृतत्रिविष्टपात्रलोकशोकहारिणी।

जगन्नाथाष्टकम् ।

कदाचित्कालिन्दीतटविपिनसङ्गीतकवरो
मुदाभिरीनारीवदनकमलास्वादमधुप ।
रमाशम्भुब्रह्मामरपतिगणेशार्चितपदो
जगन्नाथस्वामी नयनपथगामी भवतु मे ॥ १ ॥

भुजे सव्ये वेणुं शिरसि शिखिपुच्छं कटितटे
दुकूलं नेत्रान्ते सहचरिकटाक्षं विदधत् ।
सदा श्रीमद्वृन्दावनवसतिलीलापरिचयो
जगन्नाथस्वामी० ॥ २ ॥

महाम्भोधेस्तीरे कनकरुचिरे नीलशिखरे
वसन् प्रासादान्ते सहजबलभद्रेण बलिना ।
सुभद्रामध्यस्थः सकलसुरसेवावसरदो
जगन्नाथस्वामी० ॥३॥

कृपापारावारः सजलजलदश्रेणिरुचिरो
रमावाणीरामस्फुरदमलपद्मेक्षणमुखः ।
सुरेन्द्रैराराध्यः श्रुतिमुखगणोद्गीतचरितो
जगन्नाथ० ॥४॥

परं ब्रह्मापीडः कुवलयदलोत्फुल्लनयनो
निवासी नीलाद्रौ निहितचरणोऽनन्तशिरसि ।
रसानन्दीराधासरसवपुरानन्दनसुखी
जगन्नाथ० ॥५॥

Digitized by Google

धनुरवनामायासि द्युतायालं क चेतनामायासि ॥ ३८ ॥
त्युक्तो देवननतःसोऽयं भवत्पुष्करःप्रमादेवनतः ।
थे नषविभिदेवनतः पुरावनैः श्रममपि प्रपेदेवनतः ॥ ३९ ॥
मचराजाद्यततेनद्यतेऽसुपयेजितोव्यजायततेन ।
मव्यीजांयततेन त्यक्तवागस्मुगतरजायततेन ॥ ४० ॥
प्रथिभवनेनायखस्वभुवं पुष्करमुदञ्जनेनायस्व ।
गबलनेनायस्वस्त्रेहायपुरेत्र विमलनेनायस्वः ॥ ४१ ॥
हरिपवनयमानस्य स्वबलादिति तुलयतोऽनुनयमानस्य ।
हानयमानस्य प्रणतिमधात् पुष्करः सुनयमानस्य ॥ ४२ ॥
प्ररिसेनानायस्य श्रितवत्सलतेऽस्तुचेतनानायस्या ।
दुरितनानायस्यारूोकयशोभिः कदापिनानायःस्याः ॥ ४३ ॥
तिषननामनलस्य प्रणतोंघ्रीफलवक्रनामनलस्य ।
प्रह्वितानामनलस्य प्रययौ सार्द्धं तेननामनलस्य ॥ ४४ ॥
मुदममुनामुक्तेन प्राप्य सुराज्यं महात्मनामुक्तेन ।
तनानामुक्तेन राज्यश्चिरं प्राप्याधिविघट्टनामुक्तेन ॥ ४५ ॥
प्ररिसंहतिरस्य वनेष प्रचाम्पदमापदमापदमापदमा ।
तुखदश्च मथैव जनायहरिं यतमाद्यतमायतमायतमा ॥ ४६ ॥
लेन पुष्पता यता यता यता पुरेशा ।
दायमुन्महा महा महा महास्तसम्पदम् । ४७ ॥

इति श्रीकालिदासकृतौ नलोदये सत्काव्ये
चतुर्थः सर्गः ।

समाप्तः ।

Digitized by Google

कर्त्तुम्मानन्तेनश्रमइतिनीतोभुवोऽयमानन्तेन: ।
स्वन्धामानन्तेनप्रेम्णा भीमेन जितविमानन्तेन ॥ २७ ॥
सज्जनतामहितस्यव्यग्रेतरलोकसूचितामहितस्य ।
सद्विषतामहितस्य द्रुतं पुरस्येयुषान्ततामहितस्य ॥ २८ ॥
प्रथिततमायामायांभुविरथवसतावनुत्तमायामायाम् ।
सादृतमायामास्नलः स्मरन्वासमससमायामायाम् ॥२९॥
तं स्वनयानन्तरसान्निध्यगतमवेच्यनुनयानन्तरसा ।
अभ्युदयानन्तरसावधितमुदानैषधप्रियानन्तरसा ॥३०॥
तस्यस्वालोकेन स्थीयतइत्यत्र सुखमुखनालोकेन ।
किंहीनालोकेनस्वकमित्राहत्तरिपुजनालोकेन ॥३१॥
तंसाम्नामानयत: परीच्यबहुधागुणाभिरामानयत: ।
स्वजनगिरामानयत: स्ववयस्यावसतिमपिपरामानयत ॥३२॥
तरसैवासावासस्त्वांविकृतिमहैर्वहन् सुवासावास ।
स्थिरभावासावासस्निग्धस्यारंस्तनृपतिवासावास: ॥ ३३ ॥
नृपधामनिशान्तेनव्यतीत्यभैमीसमागमनिशान्तेत ।
द्विषतामनिशान्तेन श्वश्रुरोदृष्ट: श्रितोत्तमनिशान्तेन ॥३४॥
हृतजड़िमानेहासीदृतुपर्णोऽपिप्रहृष्यमानेहासी ।
आत्मसमानेहासीदभिपूज्यैनं नलोरिमानेहासी ॥ ३५ ॥
सासुममासामासस्वयमत्र पुरे नलोऽयमासामास ।
स्त्रीणामासामासश्रममनुनानायिसुमुखमासामास: ॥३६
अथमहद्दाराजितयास्वपुरञ्चम्वानलस्तद्दाराजितया ।
सामिगद्दाराजितया पुष्करमभ्यधादुद्दाराजितया ॥३७॥
मयिगच्छनामायासि त्वयामनोनाद्यमानिनामायासि ।

Digitized by Google

तत्वरयामायामः प्रश्रयेर्थदिमानितत्रियामायामः ।
नलजायामायामस्त्वेत्यूचे क कुधियामायामः ॥१६
मां भजमानाम्बःस्थाम् नमसौ तत्प्रसोद्यमानाम्बःस्थाम् ।
इतिमतिमानाम्बस्थान्यायमनार्यंक्यविकृतिमानाम्बस्थाम् ॥१७॥
अथरथमावर्त्तयत्ताविमलःशुमाम्बमारावन्तम् ।
सजगामारावन्तंनृपतिमारोप्यचगुरुतमारावन्तम् ॥ १८ ॥
स्वांसकृतावसनस्य स्वच्छदूरत्वेनसङ्गतावसनस्य ।
भूभर्त्तात्रसनस्यव्यस्मयतरथद्रुतेर्धुतावसनस्य ॥ १९ ।
फलगणनादरस्यव्यधित तदासोऽश्वनोदनादरस्य ।
तर्पासि च नादरस्य प्रहर्षणं हृदयबोधनादरस्य ॥ २० ॥
बलजितदेवार्च्याभ्यां विद्याविनिमयोयुगपदेवार्च्याभ्याम् ।
संमर्देवार्च्याभ्यां व्यधायि संस्पृश्य सम्पदेवार्च्याभ्याम् ॥ २१ ॥
तदनु द्रुतमत्तमतः स्वीकृत्यास्वदहनेधिकतमत्तमतः ।
कलिरत्नतमत्तमतः स्फुटमेवगतोनलस्तु नतमत्तमत ॥ २२ ॥
पतितमलसमेतस्याभैम्यावर्षिविद्धमानलसमेतस्याः ।
आर्त्तंरनलमेतस्याश्रितस्यमरणप्रदोनलसमेतस्याः ॥ २३ ॥
कलिमितिनानामायंनमन्तममुष्यमहामनानामायम् ।
कीर्त्तिधनानामायंमदधातिहरन्तिरिपुजनानामायम् ॥ २४ ॥
अथनुन्नाम्बस्तेन प्रास्थित राजामहात्मनाम्बस्तेन ।
सा ललनाम्बस्तेनस्यादितिहसताविरोधिनाम्बस्तेन ॥ २५ ॥
सोऽयमनेनायततामिष्ट इति नलः समंत्वनेनायतताम् ।
वहतिदिनेनायततामपुरीम्प्रियेणाश्रिताञ्जनेनायतताम् ॥२६

Digitized by Google

वसनांशुकसक्तेन कासि ममायं विधिर्वसक्तेन ।
क्व गतिर्गुरुसक्तेन स्वजनेन भृतेन भवसि मसक्तेन ॥५॥
स जनस्तेनागादि क्रामीति नमेन तव्रतेनागादि ।
भर्तृहृतेनागारिस्वर्गेन भुवि वस्तु परिहृतेनागादि ॥६॥
कोऽप्युचेतनयाया: पदमेत्य स्वपक्षतेऽसुचेतनयाया: ।
भीर्मुखेतनयायादन्तिस्तादुःसहाच चेतनयाया ॥७॥
निजधामेतं समया मृतुपर्णं भावितोऽयमेतं समया ।
सचिवसमेतं समया गिरोत्तरं नाजनिष्टमेतं समया ॥८॥
दीनानायतनस्थो नानायतमन्वमोऽस्य सौत्येऽधिकृत: ।
नानायतनकरो लीनानायतन: पथ्युवाचाय रह: ॥९॥
दीनाया नायतया विवासवेऽस्मै विहीनया नायतया ।
न खलु धियानायतयाक्रोधव्यन्धर्म्मनिस्वयानायतया ॥१०॥
कृतकर्म्मा न नत्वागतोऽस्मि वचसेति तस्य मानेनत्वा ।
वेदयमानेनत्वा विप्रे च धनेषु दीयमानेनत्वा ॥११॥
तत्रापर्णायतनस्तनयाक्लैमी तपस्युपर्णायतत ।
तुलितसुपर्णायततस्तस्यागमनाय सत्तुपर्णायततः ॥१२॥
साकृतधामान्येनश्रावितवत्युमनन्यसामान्येन ।
स्वं रहसामान्येनस्वयंवरं स्मरति नाश्रुसामान्येन ॥१३॥
रहसि तदासन्नाहस्थित: समसलं युतो महासन्नाह ।
श्रोस्त मदासन्नाहस्फुटं प्रयामो व्रजेदिति व्युदासन्नाहः ॥१४॥
सा वनितावध्वान:स्वगुणै:कर्षति केहताश्वसध्वान ।
समहस्तावद्धान:स्वदूति योजनशतं मितावध्वान: ॥१५॥

व्याकुलयेवारितयाविधेर्गतिरनेनसियेवारितया ।
अपिचयये वारितया यथामफाश्रीजलोचयेवारितया ॥५१॥
प्रतिषिद्धान्यायस्य प्रापि सुवाहोय राजधान्यायस्य ॥
बहुधनधान्यायस्य प्रबभुर्न्दानि बहुविधान्यायस्य ॥५२॥
सञ्ज्ञामामालाषानन्दं राज्ञोभ्रताच नामालासा ।
शोकेनामाला सावबद्ध तदेहयापनामालासा ॥५३॥
पदापदापरिभ्रमणयेनयापदा पदा ।
वना वना वनाथत्रजीवना वनाभजत् ॥ ५४ ॥

इति श्रीकालिदासकृते नलोदये सत्काव्ये
तृतीयः सर्गः ।

चतुर्थः सर्गः ।

अथतुङ्गोपायस्य अवणेन नलस्य सानुगोपायस्य ।
वत्रगा गोपायस्य स्वमनोभीमचिरं जुगोपायस्य ॥१॥
निशिचदिवाचाव्यंस्यच्चतस्यमलविचिन्तयेथवाचाव्यंस्य ।
धन्नमेवाचाव्यंस्य द्विजोत्तमैः शिष्यकैरिवाप्यव्यंस्य ॥ २ ॥
अथनयनेलासादिप्रणुरापुः केनचिज्जनेलासादि ।
यत्नसुनेलासादिग्भ्रमेण दुःखकृतावनेलासादि ॥३॥
सहदीनायततेनस्वगृहस्वभैमीययेसुनायततेन ।
स्वनयेनायततेन प्राप्य स्वासोच शोभनायततेन ॥ ४ ॥

Digitized by Google

सुमुखनिशापेतेनः स्मर दाशानिति प्रोच्य वशापेतेन ।
दत्ते शापेतेन स्थितया सान्त्वेन न चलद्दशापेतेन ॥४०॥
दग्धमरागाहितया दमयन्त्या विपिनभूः परागाहितया ।
उच्चतरागाहितया दृष्टा धीराच कन्दरागाहितया ॥४१॥
पदवी पदवी पदवी पदवीरथतोऽद्रिवनं विललाप च सा ।
तरसान्तरसान्तरसान्तरसान्यदुःखहतोष्ण मम मरणम् ॥४२
वृककोपपुरः सरमा सरमा सरमा सरमा भवतानगुणा ।
किन्तु तेदयितादयतोदयतोदयतोदयतोऽस्मिममेह सुखम् ॥४३
अथिराज्ञसमक्षयमांशुधितो नवसानवसानवसानवसाः ।
रुजभुजङ्गजनेऽवचयेकरुणान्तरदान्तरदान्तरदान्तरदाम् ॥४४
करमाकरमाकरमाकरमाकलयव्यसनं मम पाहि हरे ।
दरतोदरतोदरतोदरतोऽजितमैनवतां सुकरत्वमपि ॥४५॥
त्वदरिर्निषधेश हम्यहिमना रमयारमयारमयारमयाः ।
व्यसनन्त्वमुपैमि कदानुरुभीभ्रमनाभ्रमनाभ्रमनाभ्रमनाः ॥४६॥
यमनायमनायमनायमनामभितोऽङ्ग्रहरतन्द्रवतीह परः ।
सरूपोनिषधक्षितिनाथगलन्नवमानवमानवमानवमाः ॥४७॥
नयमानयमानयमानयमानवसत्यनिवाममुमुक्षक्ता ।
भजनोयमपायमरोनुदयान्वतानयतानयतानयता ॥४८॥
सनयासनयासनयासनयासुसुहृद्दृष्ट्याविपदं स्वपदम् ।
हितदे हितदे हितदे हितदेत्यलपद्वदुधामरदेवसुता ॥४९॥
सा विधुराधावन्तं रत्नौघं क्वापि निरपराधावन्तम् ।
सार्थं राधावन्तं प्रविविष्टापच सुतनुराधावन्तम् ॥५०॥

Digitized by Google

परकृतमेतस्त्वेन स्मरामि यत्र स्मृतोऽसिमेतस्त्वेन।
दोषसमेतत्वेन प्रदूषये नात्र संभ्रमेतत्वेन ॥ २९

इद्‌थाकायस्तेन स्रोयेत यथैव पावकायस्तेन।
यावत्कायस्तेनत्यजेत स्वहृदि चाधिकायस्तेन॥ ३०॥

यस्य पदे प्रक्रमितः स्वजनोऽयं प्राप्य जनपदेप्रक्रमित।
अरिदृन्दे प्रक्रमितस्मित सत्वमुपागतोऽसिदेप्रक्रमितः ॥३१

यद्यप्रसानुवरोदः कुहरं दोइष्टुरं जवानुवरोदः।
अद्रेः सानुवरोदः किमापदयितो ममेति सानुवरोद ॥३२॥

अयकलनामानन्तत्वयश्चनो ददाति चाङ्गनामानन्ते।
हार्दे नामानन्ते अनमेनमभोकवुहमनामानन्ते ॥३३॥

उच्चशिरोदारावालप्यति वने सुवन्ध रोदारावा।
द्रुतिमकरोदारावावचं मवतलमथो सरोदारावा ॥३४॥

मृगकुलमारव्याधिप्रचुरं बिभ्रदनं समारव्याधि।
वीक्ष्या मारव्याधिष्ठितभुजगभीमजेयमारव्याधि ॥३५॥

सासवनासारासा वेगमना भीमनन्दनासारासा।
सुनयननासारासावजगरमग्रासि चामुनासारासा ॥३६॥

अथ प्रवरोहास्यन्तं स्वासंसूदसूंच रिपुतरोहास्यन्तम्।
समधिवरोहास्यन्तं व्यस्य तदास्येऽकरोत्वरोहास्यन्तम् ॥३७॥

ताम्पुनरेकामयतः कृशां किरातः स्मरातिरेकामयतः।
कान्तारेकामयत स्त्रियं न कांचेदुपकरेकामयतः ॥३८॥

धृतजनमह्यन्तेन त्राताषि मया ननु त्वमह्यन्तेन।
मानिनिमह्यन्तेन प्रसीद शरणागताः क्रमह्यन्तेन ॥३९॥

Digitized by Google

स च धृतनागस्तेन स्वविषेण विरूपितो मनागस्तेन ।
सहितो नागस्तेन प्रोक्तश्चात्मास्तु वेदनागस्तेन ॥१८॥
स्वान्तरसाकल्यन्ते वपुरमुनास्तेन वाससाकल्यन्ते ।
ये यत्रसाकल्यन्ते गुणोदयैर्दधति भूतिसाकल्यन्ते ॥१९॥
अपि च विनामानेन श्रयणीयः सर्त्तुपर्णनामानेन ।
स्वांगेमानेन स्युर्विपदो न हि नृणां क्व नामानेन ॥२०
अजसुखमायाहीनश्रीरित्यन्तर्हितः समायाहीनः ।
स्निग्धो मायाहीनः स्वाञ्जनतायाः क्वनोत्तमायाहीनः ॥२१
प्रीतिवशादनवनतः कृत्वा तद्वसनमात्मसादनवनतः ।
बहुमांसादनवनतः सोऽस्मादृतुपर्णमाससादनवनतः ॥२२॥
अक्षतमुदायन्तारन्तममनुतमोऽध्वनीयदायन्तारम् ।
ध्वनिसमुदायन्तारन्दधतोऽस्यहयाश्वतन्तदायन्तारम् ॥२३
अथ सहसा दमयन्त्या सादमयन्त्यात्मशर्म निद्रामुमुचे ।
जीवितसादमयन्त्या सादमयन्त्यागमक्षतसचयद्दातस्याः ॥२४॥
सात्र सभादारामा सीतेव त्रासमाससादारामा ।
याप्रासादारामानुपत्य भर्त्रा रतिं रसादारामा ॥२५॥
तत्र पदे व्यालीनामथ विभ्रान्तं वने च देव्यालीनाम् ।
तद्वृन्दे व्यालीनान्ततिन्दधाने तयास्पदेव्यालीनाम् ॥२६॥
वेगवलापाशितया वेण्या भैमीयुता ललापाशितया ।
नृपसकलापाशितया हत्वारीन् बान्धवान् किलापाशितया ॥२७
सकथं मानवनानान्यायविदाचरसि सेव्यमानवनानाम् ।
धृतसीमानवनानान्दाराणां त्यागमनुपमानवनानाम् ॥२८॥

सोऽथसदारोदरतः पुष्करविजितोनलः सदारोदरतः ।
व्याजाहारोदरतः स्वपुरान्निर्यातवाननुहारोदरतः ॥ ७ ॥
अघमानानाहारिः सैनं मन्त्रांश्च किममुनानाहारि ।
अपितेनानाहारि भ्रान्तभूपयमपास्य नानाहारि ॥ ८ ॥
ग्लपमकरोदन्यस्य श्रमबलः पथिपदं सरोदन्यस्य ।
नच पुनरोदन्यस्य बाधायाभूत्परम्परोदन्यस्य ॥ ९ ॥
नास्य रमानावासस्तच्च स्वमाजह्रुर्म्यमानावासः ।
अपिमदमानावासस्वरोपजलधिन्तरन् घमानावासः ॥ १० ॥
तापयतेनवमानौद्रवेदितीमौमगात्तेनवसानौ ।
चेलान्तेनवसानौ चेरतुरैकेन पर्वतेनवसानौ ॥ ११ ॥
तद्दासः स्वापायकीतिरिवं चेति विपदि सस्वापायाम् ।
निजवासः स्वापायाभिकात्यतामनुश्वरिद्दसस्वापायाम् ॥१२॥
बभ्रामानस्तेन श्रमेण कलिना विधूयमानस्तेन ।
सद्दिरिपुमानस्तेनः स्वभाग्यदोषाः क्वसमद्दिमानस्तेन ॥१३॥
मृगकुलमारसदाविभ्रममभितापातुरो ममारसदाभिः ।
स्फुरिततमारसदाविस्तृतानगा यत्र विपिनमारसदावि ॥१४॥
शोकभरोदस्तेन स्तुतः स च नलाद्रवेतिरोदस्तेन ।
द्रुतिमकरोदस्तेन स्वयमित्यूचे भयं पुरोदस्तेन ॥ १५ ॥
क भवान् शंसत्वस्य त्वापजमित्याश्रयो नृशंसत्वस्य ।
तन्द्रेशं सत्वस्य प्राप नलः सत्वरो भृशं सत्वस्य ॥ १६ ॥
अथ पवनागमयन्तं क्वापि दवाग्नौ ददर्श नागमयन्तम् ।
स्वबले नागमयन्तं रुजमधिजिष्टच्च पुनरनागमयन्तम् ॥१७

इतिनानामायानानांनलः कलिभुवांबलेननानामायानाम्।
व्यसनानामानाग्निधिररमद्राज्यमस्मनानामायानाम्॥ ६१॥
स्वयंवरादनन्तरं मही मही महीनयोः।
ररक्ष नैषधस्तदाररराजरा जरा जराः॥ ६२॥

इति श्रीकालिदासकृते नलोदये महाकाव्ये
द्वितीयः सर्गः।

तृतीयः सर्गः।

अथ सुरवृषभाः स्वरतः प्रेक्ष्यकलिंप्रस्थितामहाह्नास्वरतः।
यः कृतिषुशुभा स्वरतः पप्रच्छसद्गतिहंसननिभाः स्वरतः॥ १॥
यस्सामायामितयाहृतः श्रियाभीमहिहमदायामितया।
तदधिगमायामितया स्पृहयाघमनुष्यमायामितया॥ २॥
इतिविकलोमायायास्तदुक्तजपेजनोऽमलोमायाया।
शुभयोलोमायायाः स्थितोनलोऽस्यावरोऽनुलोमायायाः॥३॥
वचइतिवस्वादिभ्यः श्रुत्वाकलिरत्सवासवस्वादिभ्यः।
महसस्वार्वदिभ्यश्चुकोपदोषात् समदभुवः स्वादिभ्यः॥ ४॥
प्रबलतमानबलतयासंयोज्यनलेपुरोत्तमानवलतया।
तेनानामानवलतयातरुणवतयास्वतांनमानवलतया॥५॥
इति बलवानन्तरतः कलिः किलैतज्जगादवानन्तरतः।
अवस्थितवानन्तरतः समृद्धिषुनलस्यविविधिवानन्तरतः॥ ६॥

Digitized by Google

छादितरविवितानेन प्रापि च कालेन सत्वरवितानेन ।
जितरुधिरवितानेन व्योम्नाचरुचिरितमुडुभिरविवितानेन ॥ ५० ॥
अथोद्यतोम्बुराजतःश्रियं समाप राजतः ।
यथा यतो व्यराजतस्मरागमःसराजतः ॥ ५१ ॥
दधतं कालं कालं कालं कालं वियोगिनी मत्तिनन्तम् ।
अध्वगकालं कालं कालं कालंप्रसमीक्षितुप्रोयन्तम् ॥ ५२ ॥
चरन्तुषारशीकराः प्रबद्धकैरवाकराः ।
ततोऽजृम्भिरे करा जगत्सु शार्वरीकराः ॥ ५३ ॥
वधूस्तदानुनिन्यिरे नये नये नये नये ।
वयं नरोऽनयन्नसुन्नते नते नते नते ॥ ५४ ॥
सहासहावमादरैः सदा सदाः स्मरस्य ते ।
सुरा सुरा यथामृते मरा सुरागमादधुः ॥ ५५ ॥
मधु प्रपीय चाभवन्नता नता नता नताः ।
रमा रमा रमा रमाकुले जनेऽत्र हालया ॥ ५६ ॥
भ्रमरैर्द्रोगतानि प्रपीय च मधूनि सानुरागतानि ।
दृष्टानिरागतानि प्रापच्छयनञ्जनस्तरागतानि ॥ ५७ ॥
ससमुद्गमहेलाभिस्स्फुरितगुणाभिस्ततस्मरमहेलाभि ।
श्रीः प्रवरमहेलाभिस्तथैव युवपंक्तिभिः परमहेलाभिः ॥ ५८ ॥
तयार्द्रधीरमायया मुदामनारमायया ।
नलो विहारमाययावधःकृतारमायया ॥ ५९ ॥
साग्रंकामायासीत्कृतिनी भैमी नलस्य कामायासीत् ।
कामनिकामायासीद्यतिन्तदिष्टांसदाधिकामायासीत् ॥ ६० ॥

Digitized by Google

किमपः सरसीमाया धाम गुणाम्भत प्रसरसीमायाः।
इतमिति सरसीमायात्यक्षोभैम्या नलस्य सरसीमायात् ॥३९॥
गतपङ्काः सारस्यश्रियोऽस्यजह्रुर्मनोऽधिकाः सारस्याः।
अपिकोकाः सारस्यस्थिताः कुर्व्वंश्चहंसिकाः सारस्याः॥४०॥
काचतिरस्तिमिताभिः स्फुटमद्भि विंहतिरस्तिमिताभिः।
अनतितरस्तिमिताभिः कमेत्यथदम्भद्भिरतिभिरस्तिमिताभिः ४१
अलिर्मिलत्परागतः सरोरुहात्परागतः।
मुखंमुदापरगतस्तदीयमापरागतः ॥ ४२ ॥
अथकामानलिनीनांस्त्रीणां संघैर्मनोरमानलिनीनाम्।
विधुरतमानलिनीनाम्पंक्तिर्विततान संभ्रमानलिनीनाम् ॥४३
सरःश्रियोऽन्तरङ्गतः सरोजहृत्तरङ्गतः।
भयंमहृत्तरङ्गतस्तनूजनस्तरङ्गतः ॥ ४४ ॥
अथ नीरात्सारसतः फेनपरीताद्यथाम्बरात्सारसतः।
अतिमुखरात्सारसत स्तीरमितास्तीरतिश्चिरात्सारसतः ॥४५॥
सचोदयावलीनतः समुत्प्रभावलीनतः।
नयन्ययावलीनतः पदंजनोवलीनतः ॥ ४६ ॥
द्विषः कामानङ्गेहं मन्यो मदनेषुविकृतिमानङ्गेहम्।
इति परमानङ्गेहं नलः प्रियामनयदतिविमानङ्गेहम् ॥ ४७ ॥
अरुणमहस्तेनेन प्रापि च सोऽङ्गैर्गुणाग्रहस्तेनेन।
भाव्यमिहस्तेनेन स्फुटमस्यहि तद्गतेऽग्रहस्तेनेन ॥ ४८ ॥
यतो यतो यतो यतो रवेर्मरीचिसञ्चयः।
महान्धकारसञ्चयस्तत स्तत स्तत स्ततः ॥ ४९ ॥

Digitized by Google

दयितं समया समयाद्परा
व्यहरत्समया मसयाचतया॥ २८ ॥
अतिरुचिमानस्तवकः सरस्तटोऽयं विचीयमानस्तवकः।
इह खलु मानस्तवकः प्रियामिति परोऽनयत्प्रमानस्तवकः॥२९
अरुणतरपरागस्य प्रसवमप्रेक्षिष्ट न पुनरपरागस्य।
हसितैरपरागस्य स्वैस्तिष्ठन्त्यपि लवेष्वपरपरागस्य॥ ३० ॥
अवेक्ष्य पल्लवालयानगान् श्रितालवालया।
लतातयेवबालयाबभेऽन्यथावबालया॥ ३१ ॥
प्रततीनामालीनां मध्येन्योऽव्यचिनुताङ्गनामालीनाम्।
अध्येनामालीनां स्मिताव जानन् मदाप्यनामालीनाम्॥३२॥
कमितुः करुणाचिसुखार्थनभागपरागपरागरागपरा।
स्थितिमाप तथैव इतः सपुमाननयाननयाननयाननया॥३३
स्वमनेन समायतयाव्यधितागः स्वेदकणैनसमायतया।
ऋजुमानसमारतथातस्मैनाक्रोधिजीवनसमायतया॥३४॥
अभवदनेनानाविस्मयदोन्योमानिनीजनेनानावि।
अतिसुजने नानाविस्वलनं यदुपवनमनेनानावि॥ ३५ ॥
जनाद्सोः समानतः पदाहृतिं समानतः।
परोदधौ समानतः स्वमूर्द्धि भासमानतः॥ ३६ ॥
तनुच्छटीत्तमालया तथाभुवोत्तमालया।
अहारिशीतमालयानिलावधूतमालया॥ ३७ ॥
श्रितलसदारामाभिः प्राप्येति जनोविहृतिमुदारामाभिः।
आरादारामाभिस्फुरितसरोजं सरस्तदारामाभिः॥ ३८ ॥

Digitized by Google

क्रुधिकान्तजमन्त्रजदामसमापनयापनयापनयापनया।
तम्हतेऽनुग्रयेन च तामग्रनैरवता रवता रवता रवता॥ १८॥
नभसो विवरं कुसुमेच्चयभागतरो गतरो गतरो गतरो।
वद कान्तमवेच्य यथाद्य मधावरमे वरमे वरमे वरमे॥ १९॥
श्रितेतिगामनागतस्तबन्धुकामनागतः।
परापनामनागतस्ततामकामनागतः॥ २०॥
कालनादिवसन्तं कुसुमशरमसोढ़च्यनादिवसन्तम्।
अलिभिरनादिवसन्तं दृष्ट्वा यत्नात्मनोऽर्थनादिवसन्तम्॥ २१॥
स्वयमथ मन्दारितया युक्तो यत्कान्तः स मन्दारितया।
आरामन्दारितया मदनेन धियापदुत्तमन्दारितया॥ २२॥
अनुव्रता समाननं समाननन्द भीमजा।
तमिन्दुना समाननं समाननन्दने वने॥ २३॥
इह रुचिरामावलयस्वहृग्रमिति पृथक् प्रियस्य रामावलयः।
प्राप्तारामावलयस्फुरो गिरा यदुदरेभिरामावलयः॥ २४
नवकुसुमानमनागा गन्तुं नैच्छत्परा समानमनागाः।
अजनिपुमानमनागाश्रित्य ससत्कुसुमदानमानमनागाः॥२५॥
रुषितं सखिसादममुष्यलसत्तनुते तनुते तनुते तनुते।
ननवाननवाननवाननवागिच्छते चरणस्मृतिमेष्यति सः॥ २६॥
अपि चैत्यनगानवतानवतानवतानवतास्ततरामधना।
इह सौख्यमगोचरमाचरमाचरमाचरमाचरमास्त्वनरम्यतरा २७

इति लालिकयालिकयातकचै-
रतिकयालिकयालिकया कथिता।

Digitized by Google

विरलोचपलाशस्य प्रभुरमुष्यं बभूव चपलाशस्य।
सरनोचपलाशस्य प्राप्याध्वगपिशितचावचपलाशस्य ॥ ७ ॥
स्वतो बभुर्निशाकया विभा विभा विभा विभाः।
कलाश्च तेषु सत्पतेरदा रदा रदा रदाः ॥ ८ ॥
इह ललनाशोकालिप्रदेन येनात्ममदविनाशोकालि।
कामनाशोकालिस्वनकृतिभिः सदिश्वनाशोकालि ॥ ९ ॥
स्मरस्य युद्धरङ्गतां रसा रसा रसा रसा।
जिता वियोगिनः समुन्नते नते नते नते ॥ १० ॥
नुन्नमनामधुनानाश्रयतिम्यतिह्नोविनाङ्गनामधनाना।
इति ललनामधुनानाविधमधयत्किलतदर्थनामधनाना ॥ ११ ॥
पिको पिको पिको पिको वियोगिनीरभर्त्सयत्।
वचांसि भङ्गमालपन्निता निता निता निताः ॥ १२ ॥
श्रीरापिकलापेन प्रवृद्धमाधावलिषु धिकलापेन।
न कलापिकलापेन प्रवर्त्तनमकारि वागपिकलापेन ॥ १३ ॥
सहकारवृते समये सहकारहसस्य के न सस्मार पदम्।
सहकारमुपरिकान्तैः सहकारमणीपुरः सकलवर्णमपि ॥ १४
अधिगतकामधरागात् अगमेत्यभ्रमरपटलिकामधुरागात्।
पीत्वोत्कामधरागात्द्रुतमकृततनः श्रियोधिकामधरागात् ॥ १५
नसमा नसमा नसमा नसमा गममाप समीक्ष्य वसन्तनभः।
भ्रमद भ्रमद भ्रमद भ्रमद भ्रमरच्छलतः खलु कामिजनः ॥ १६
गतमत्र चयेन गृहादसमुत्तरतान्तरतान्तरतान्तरताम्।
परएव विकार इयाय वृहत्तमसन्तमसन्तमसन्तमसन् ॥ १६ ॥

Digitized by Google

गुरुमहिमापरमायास्तस्मी नलएषसमतिमापरमायाः।
प्रियया मा परमायाः स पुरमगुर्यैव तं क्षमापरमायाः ॥५३॥
विनाम समहासमहानगरे जनतासमहासमहास्तमुदम्।
अतिभासुरयासुरयाव्यहरद्रतनोत्सुरयासुरयागमपि ॥५४॥

इति श्रीकालिदासकृते नलोदये सत्काव्ये
प्रथमः सर्गः।

द्वितीयः सर्गः।

अथ रतिरेकान्तेन प्रापि नलेनाथ मन्दिरेकान्तेन।
ताम्पुनरेकान्तेन प्राप्तवता रिपुमदातिरेकान्तेन ॥ १ ॥
बभौ ससारसागरचकाससारसार्द्रधीः।
मधः ससारसारवस्तदा ससारसार्णवः ॥ २ ॥
समुद्धिताश्रालीनां करेण कर्णाग्रकचिजिताश्रालीनाम्।
दिनभर्त्राश्रालीनामिव नलिनीमथ समुत्थिताश्रालीनाम् ॥३॥
कुरवापचसारसकाकुरवान् कुरवाख्यनगोपितदांकुरवान्।
कमलं कृतवद्गतपङ्कमलं कमलं नविलोभयितुङ्कमलम् ॥४॥
अगुरतिमहिमानीतस्ततो रविमहांसिगुरुतमहिमानीतः।
भवनं महिमानीतः स्मरेण परितः शराख्यमहिमानीतः ॥५॥
स्मरसूचितयाजगतः चितिसूचितयाभवद्धि चम्पकमुकुलम्।
तदसूचितया व्यथया निरसूचितया यथा द्वियुग्दम्पतिकौ॥ ५

सावित्रिराजायतया वीच्य द्दशा तं स्मरातुराजायतया ।
क्षितिरत्राजायतया दमदाम्बाभाषिनिषधराजायतया ॥ ४२ ॥
तस्या देवाद्यस्य प्रणम्य च नलेन धीः पदेवाद्यस्य ।
सति निनदेवाद्यस्य स्वयं प्रियायाः पदं मुदेवाद्यस्य ॥ ४३ ॥
अथ तरसारं गेयन्नृपतिगणोऽस्थित पदेषु सारंगेयं ।
चञ्चलसारंगेयन्दमयन्ती चाञ्चितुलितसारंगेयं ॥ ४४ ॥
व्यधुरवनामान्येषु प्रजा नृपेष्वथनिवेद्य नामान्येषु ।
सूतैर्नामान्येषु प्रकीर्त्त्यमानेषु शोभनामान्येषु ॥ ४५ ॥
सांगेननलसमानानननलसमानानमुत्र कतिचित्पुरुषान् ।
प्रैचत ननलसमानानननलसमानानभून्न तेषाम्भेदः ॥ ४६ ॥
रुचिरतनासत्यागाः स्फुरतु नलोयदिचवह्निनासत्यागाः ।
अपि दीनासत्यागाद्गाद्युतेनैव वर्त्मनासत्यागा ॥ ४७ ॥
यदि वाभावन्नरस्य स्थितास्मि नल एव नरविभावन्यस्य ।
देवसभावन्यस्य द्विपस्य वपुषो भवेद्विभावन्यस्य ॥ ४८ ॥
कृतभावासावनितानितिभुवमैच्चत्सुरान्सुत्रासावनिता ।
स्वपतिं वासावनिताचिह्नं धार्म्मिकजने भुवासावनिता ॥४९॥
स्वरिरंसादेवाल्याकुलया दृश्यार्थितापि सादेवाल्या ।
वपुषि ससादेवाल्यादृत्तनलमुपस्थितं रसादेवाल्या ॥ ५०
सत्सदसोमाननया रुद्रसमोदः स्वतेजसोमाननया ।
प्रहृतः सोमाननया नलोबभौ भत्रिगुणेन सोमाननया ॥ ५१
मदद्म्भावरमस्यज्ञात्वाथमनोगुरुप्रभावरमस्य ।
सुरवृषभावरमस्य प्रदिश्य जग्मुर्गतप्रभावरमस्य ॥५२ ॥

Digitized by Google

तं ह्यासेनापालिः स्वयंवरं क्षितिभुजां ससेनापालिः ।
न बभासेनापालिः स्वर्गेषु यैः शिरसि या रसेनापालि ॥२१

तां गां सेनाराजिः स्वर्गसदां यैः सदारसेनाराजि ।
आयासेनाराजिज्जयितरिपौ चलति विबुधसेनाराजि ॥२२

सो.थ परमहस्तेन प्रापि नलेनोत्सवः परमहस्तेनः ।
स्फुरितपरमहस्तेन प्रबभौरविशोषतत्पुरं परमहस्तेन ॥२

क्षिप्तलसन्नालीकानह्नितेषु मुखेन्दुतुलितसन्नालीकान् ।
राज्ञः सन्नालीकान् कान्तिर्विबुधांश्चनाहरन्नालीकान् ॥ ३४

अजनिकलापास्यन्तं स्वयशोऽनिजकं महः कलापास्यन्तम् ।
अनुकलापास्यन्तम्प्रेक्ष्य नलं सुरततिः कलापास्यन्तम् ॥ २५

स्वर्निलयानामनलंकृतमपि जेतुन्ततिः श्रियानामनलम् ।
यमजेयानामनलम्प्रोचे शक्रस्तमरिचयानामनलम् ॥२६॥

वद कामायामस्त्वल्लभैम्यै यद्गुणाः श्रमायासन्नः ।
श्रेष्ठतमायासन्नस्त्वान्द्रष्टा ननु जनः स्वमायासन्नः ॥ २७ ॥

इति सरवकेह्वास्तस्य समुकुलं सुरप्रवेकेह्वास्त ।
तामविवेकेह्वास्तः श्रयति स्वीतत्र पार्थिवेकेह्वास्त ॥२८॥

हरिपवमानयमानान्दूतीऽस्मिनलोमहारमानयमानान् ।
भवतीं मानयमानान्भैमिसुरान्विद्धि मह्यमिमानयमानान् ॥

तुभ्योऽपरमादेहिप्रभवो मग्नाः स्मर प्रसरसादेहि ।
तानभिसरसादेहि स्वजघनाकात्सुखस्त्वमरसादेहि ॥ ४० ॥

इति कृतसामारवतः सुरलोकात्तन्मुखेन सामारवतः ।
नरिरंसामारवतस्थलादिव नलोत्कमानसामारवतः ॥ ४१ ॥

ार्त्तिनोंद्यानेन प्रभाविशेनेन ग्रेमनोद्यानेन।
ारजानोद्यानेन स्फुटमितिगमिष्वनोतनोद्यानेन ॥२०॥
ोछचितचन्तापततः कांश्चिदपद्यच्छिताय चन्तापततः।
ाचेचन्तापततस्तान्यदमी तोषमावचन्तापततः ॥ २१ ॥
ान्तरमारसमानः सविचंगगणोऽब्रवीत्ससारसमानः।
ातच्छिंसारसमानसुदलभ्योनिष्कयः स्वसारसमानः॥ २२॥
ं रूषकेलबलादधिको भैम्यास्तुमोन्तिकेलवल्ला।
ातेऽकेत्वबल्लासत्ता लल तत्सकामकेत्वबल्ला ॥ २३ ॥
ति हंसारामाया निकटंयामयतेव सारामाया।
ाम्रुः सारामाया जगदुच्चालीभिरभिससारामाया ॥ २४ ॥
ोसंकाशास्यस्य त्वं भैमि नलस्य शशिनिकाशास्यस्य।
ारिलोकाशास्यस्य यदि भार्यास्याः कुमारिकाशास्यस्य ॥२५॥
ति हांसेनोदितया गणेन भैम्या मुदारसेनोदितया।
वभासेनोदितया स्मरेण सपुननलौकसेनोदितया ॥ २६ ॥
ा बद्धधावायस्य श्रेयः पुनरस्य सन्निधावायस्य।
ास्वनिधावायस्य व्यनुवंस्तुलनाय न विबुधाशायस्य ॥२७॥
ति सविनामानितया जह्रे भैम्यानलोऽपि नामानितया।
ाख्य नामानितया शिश्ये च विचिन्त्यतस्यनामानितया ॥२८
ाय ससमुद्रागस्य स्वान्तस्यालङ्कृतेः समुद्रागस्य।
ावनमुद्रागस्य स्वसुतारत्नस्य मादसुद्रागस्य ॥ २९ ॥
ाङ्का राजातनुत स्वयंवरं विधिवदिन्दिराजातनुतः।
ास्य जराजातनुतः पृथग्व्यथासौजनाद्राराजातनुतः ॥ ३० ॥

स्निग्धजनानावेद्य प्रयतेऽस्य सुकाव्यविरचनानावेद्य ॥ ९ ॥
अथ निजराज्यन्तेन प्राशासि नलेन मचुराज्यन्तेन ।
येनाराज्यन्तेनश्रिया दिशो यस्य विहृतिराज्यन्तेन ॥ १० ॥
मूर्त्तिं मारसमानां योऽदधदायुः सहस्रमारसमानाम् ।
यद्रकुमारसमानामजयद् द्विषताम्मंक्तिमारसमानाम् ॥ ११ ॥
साम्बनियामानयतः श्रेष्ठाविद्यास्तदाश्रयामानयतः ।
अधिकायामानयतः श्वावपि यस्य धीदयामानयतः ॥१२॥
अहितानामायस्य भाता यः शरणगामिनामायस्य ।
गतनानामायस्य सुतः पिता वीरसेननामायस्य ॥ १३ ॥
भुव्यतनोदन्तेन द्विषतां सयशांसि शोभनोदन्तेन ।
नीतानोदन्तेन क्षितिभभजन्नहितदन्तिनोदन्तेन ॥ १४ ॥
सचिवगिरागोपायन्नलः सपृथिवीं निरस्तरागोपायम् ।
अस्तोरागोपायं नीत्वा नेमुर्महत्तरागोपायम् ॥ १५ ॥
योऽदम्भीमान्यायादधिकोऽथ रिपुर्यमेत्य भीमान्यायात् ।
वैदर्भीमान्यायास्त्रिजगति कन्या बभूव भीमान्यायात् ॥१६॥
महिततमारम्भाभिर्दमयन्ती सहगुमारमारम्भाभिः ।
दधती मारम्भाभिर्ववधे सा वक्ष्ये समारम्भाभिः ॥ १७ ॥
सारसंनारीणां नलः श्रियामजनि निलयनंनारीणाम् ।
यस्यानस्तारीणां सरभुवमापह्नुटा वनं नारीणाम् ॥ १८ ॥
चक्रमे साराजन्यश्रेष्ठन्तन्तां स तेजसाराजन्यः ।
आत्तविसाराजन्यश्रियोऽधितययाजिताः ससाराजन्यः ॥१९॥

नलोदयः ।

प्रथमोच्छ्वासः ।

हृदय सदायादवतः पापाटव्या दुरासदायादवतः ।
अरिसमुदायादवतस्त्रिजगन्मा गाः स्मरेसादायादवतः ॥१॥

योऽजनि नागोपीतस्तपार यो वत्साबांगनामोपीतः ।
मूर्द्धनागोपीतः कंसाद्यो देवमेव नागोपीतः ॥ २ ॥

यदरिषु सन्नामानस्थितयो यन्नुन्नमुदलसन्नामानः ।
यत्र ससन्नामानः स्युर्भवभाजस्स पठितसन्नामानः ॥ ३ ॥

समनिन्दानवनाशञ्जनतालिकुलं यथैवदानवनाशम् ।
द्विरदाद्दानवनाशं जगच्च लभते यतः स दानवनाशम् ॥ ४ ॥

अस्ति सराजा नीते रामाख्यो यो गतीः परा जानीते ।
यस्य रराजानीते रत्नानि जनः कुले धराजानीते ॥ ५ ॥

यः सेनानावारिप्रकरनदीः शरमयं धुनानावारि ।
अतरन्नानावारि व्यसनैर्यद्भुवि वनस्य नानावारि ॥ ६

अपि यो दायादाय चयप्रदोऽहसि सतां यदायादायः ।
करमादायादाय श्रियोऽब्धिरधिराजमसितगदायादायः ॥७॥

अविदूरराजादित्या कृतात्मभेदैव भूः सराजादित्या ।
येन सराजादित्यात् चिदिवात्मसंयुक्तमनुराजादित्या ॥ ८ ॥

खलसेना नावेद्यः स्वांहोब्धौ भुवि च यस्य नानावेद्यः ।

Digitized by Google

पादौ संपीड्य योनौ च हठाल्लिङ्गप्रवेशनम्।
हस्तयो वेष्टनं गाढं बन्धो नृसिंहसंज्ञकः॥ ५० ॥
पादमेकमुरौ कृत्वा द्वितीयं कटिसंस्थितम्।
नारीष्ठ सुरमेत्कामी विपरीतस्तु बन्धकः॥ ५१ ॥
पार्श्वोपरि पदौ कृत्वा योनौ लिङ्गेन ताड़येत्।
बाहुभ्यां तायेद्गाढ़ं मुद्गारो बन्ध एव सः॥ ५२ ॥
सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुनः।
यल्लिङ्गं चालयेद् योनौ बन्धोऽयं धेनुकः स्मृतः॥५३॥
नारीपादौ च हस्तेन धारयेद् गलके पुनः।
स्तनार्पितकरो कामी बन्धश्चोत्कण्ठसंज्ञकः॥ ५४ ॥
स्वयं जङ्घाद्वयं बाह्वौ कृत्वा योषित्पदद्वयम्।
स्तनौ धृत्वा रमेत् कामी बन्धः सिंहासनो मतः॥५५॥
पीड़येदूरुयुग्मेन कामुकः कामिनीं यदि।
रति नागः समाख्यातः कामिनीनां मनोहरः॥५६॥
नार्याश्चोरुयुगं धृत्वा कराभ्यां ताडयेत्पुनः।
रमयेन्निर्भरं कामी बन्धो विद्याधरो मतः॥ ५७ ॥
स्त्रीयमानीय यत्नेन विधृत्य चरणद्वयम्।
वशं नयति यः कामी रतिशास्त्रविचक्षणः॥ ५८ ॥
रतिशास्त्रं समाकर्ण्य बन्ध्यान् पद्मादिषोड़श।
नानाविधरतिं कुर्य्यात् कामिनीं कामुको जनः॥ ५९ ॥
सर्वशास्त्रार्थवक्त्रेण जयदेवेन धीमता।
मञ्जरी रतिशास्त्रस्य कृता नीता समाप्तताम्॥ ६० ॥
इति श्रीजयदेवेन विरचिता रतिमञ्जरी समाप्ता।

Digitized by Google

नानाबन्धां स्तथा बन्धे रन्तव्या कामिभिः स्त्रियः ॥३८॥
पद्मासनो नागपादो लतावेष्टोऽर्द्धसंपुटः ।
कुलिशः सुन्दरश्चैव तथा केशर एव च ॥ ४० ॥
हिल्लोलो नरसिंहोऽपि विपरीतस्तथापरः ।
चुम्बारो धेनुकश्चैव उत्कण्ठश्च ततः परः ।
सिंहासनो रतिर्नागो विद्याधरस्तु षोडशः ॥ ४१ ॥
हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि ।
रमेद्गाढं समाकृष्य बन्धोऽयं पद्मसंज्ञकः ॥ ४२ ॥
पादौ स्कन्धयुगे हस्तौ क्षिपेल्लिङ्गं भगे लघु ।
प्ररमेत्कामुको नारीं बन्धो नागपदो मतः ॥ ४३ ॥
बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा रमेत् स्त्रियम् ।
लघु लिङ्गं ताडयेद्योनौ लतावेष्टोऽयमुच्यते ॥ ४४ ॥
स्त्रीपादावन्तरोर्द्धे तु किञ्चिन्नमौ च जानुनि ।
स्तनयोर्मर्दनं पीड़ा बन्धोमम‍र्द्धसंपुटः ॥ ४५ ॥
स्त्रीपादद्वयमास्फाल्य हठाल्लिङ्गस्य ताडनं ।
योनिमापीड़येत्कामी बन्धः कुलिशसंज्ञकः ॥ ४६ ॥
नारीपादद्वयं स्वामी धारयेदूर्द्ध्वदेशतः ।
कुचौ धृत्वा पीवेद्वक्त्रं बन्धोऽयं रतिसुन्दरः ॥ ४७ ॥
स्त्रीयो जङ्घे समापीड्य दोर्भ्यां गात्रस्य मर्दनं
पुनः प्रपीड़येद्योनिं बन्धः केशरसंज्ञकः ।
हृदि कृत्वा स्त्रियः पादौ कराभ्यां धारयेत् करौ
यथेष्टं ताड़येद् योनिं बन्धो हिल्लोलसंज्ञकः ॥ ४८ ॥

Digitized by Google

रमणं पद्मबन्धेन पद्मिनीरतिमादिशेत् ॥ २८ ॥
शीत्कारं चुम्बनं पीडा गले हस्ते च चुम्बनम् ।
चर्णे चर्णे स्तने हस्तं चित्रिणीरतिमादिशेत् ॥ २९ ॥
स्त्रीपुंसयो स्तथान्योन्यं भगे लिङ्गे च चुम्बनम् ।
रमणन्तु तथा गाढ़ं शङ्खिणीरतिमादिशेतम् ॥ ३० ॥
केशं करेण संगृह्य सुदृढ़ं गजबन्धनम् ।
भगं करेण संताड्य हस्तिनीरतिमादिशेत् ॥ ३१ ॥
कूर्मपृष्ठं गजस्कन्धं पद्मगन्धं सुगन्धि यत् ।
अलोमकं सुविस्तीर्णं पञ्चैतद् भगमुत्तमम् ॥ ३२ ॥
शीतलं निम्नमत्युच्चं गोजिह्वासदृशं परम् ।
इत्युक्तं कामशास्त्रज्ञै र्भगदोषचतुष्टयम् ॥ ३३ ॥
मुसलं वंशकं वीरं द्विविधं लिङ्गलक्षणम् ।
स्थूलं मुसलमित्युक्तं दीर्घं वंशकवीरकम् ॥ ३४ ॥
स्त्रीजितो गायकश्चैव नारीसत्यपरः सुखी ।
षडङ्गुलशरीरश्च स श्रीमान् शशको मतः ॥ ३५ ॥
श्रेष्ठस्तु धार्मिकः श्रीमान् सत्यवादी प्रियम्वदः ।
अष्टाङ्गुलशरीरश्च रूपयुक्तो मृगो मतः ॥ ३६ ॥
उपकारपरो नित्यं स्त्रीजितः श्लेष्मणः सुखी ।
दशाङ्गुलशरीरश्च मनस्वी वृषभो मतः ॥ ३७ ॥
काष्ठतुल्यवपुर्धृष्टो मिथ्यावाक्यश्च निर्भयः ।
द्वादशाङ्गुललिङ्गश्च नरिद्रश्च हयो मतः ॥ ३८ ॥
न रमन्ते यदा नार्य्यस्तृषा वा रमते च या ।

Digitized by Google

एतानि कामस्थानानि ज्ञेयानि नागरैः सदा ॥ १७ ॥
बलयुक्ता यदा नारी विपरीतरतिर्भवेत् ।
सम्प्राप्य तु कलास्थानं रन्तव्या कामिनी तदा ॥ १८ ॥
नेत्रे कण्ठे कपोले च हृदि पार्श्वद्वयेऽपि च ।
ग्रीवायां नाभिदेशे च कामी चुम्बति कामिनीम् ॥ १९ ॥
मुखे जङ्घे नितम्बे च जघने मदनालये ।
स्तनयुग्मे सदाप्रीतिः कामी चुम्बति कामिनीम् ॥ २० ॥
प्रेम्णा स्त्रियं समालिङ्ग्य शीत्कारं मुखचुम्बनम् ।
कण्ठासक्तां पुनः कृत्वा गाढ़ालिङ्गनमाचरेत् ॥ २१ ॥
विधृत्य हस्तौ जघनोपपिष्टः शीत्कृत्य वक्त्रे च मुदा प्रचुम्ब्य।
भगे च लिङ्गं स्तनमर्द्दनञ्च दत्त्वापि कृत्वा प्ररमेच्च कामी ॥२२॥
केतक्यग्रनखं कृत्वा नखांस्त्रीन् पञ्चचैव वा ।
पृष्ठे च जघने योनौ दत्त्वा कामी रमेत् स्त्रियम् ॥ २३ ॥
नखरोमाञ्चितं कृत्वा दन्तेनाधरपीड़नम् ।
ग्रीवामाकृष्य यत्नेन योनौ लिङ्गेन ताड़नम् ॥ २४ ॥
लिङ्गप्रवेशनं कृत्वा धृत्वा गाढ़प्रयोगतः ।
पार्श्वद्वयेन सम्पीड्य निस्पृहं ताड़येद्भगम् ॥ २५ ॥
समालिंग्य स्त्रियं गाढ़ं स्तनयुग्मे च मर्द्दनम् ।
योनौ नाभौ च संमर्द्य निष्ठुरं लिङ्गताडनम् ॥ २६ ॥
केशं करेण संगृह्य दृढ़ं सन्ताडयेद्भगम् ।
वदने चुम्बनं कृत्वा भगं हस्तेन मर्द्दयेत् ॥ २७ ॥
कुचं करेण संमर्द्य पीडयेदधरं दृढम् ।

Digitized by Google

वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम् ॥ ८ ॥
पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी ।
शङ्खिनी चारगन्धा च मदगन्धा च हस्तिनी ॥ ९ ॥
बाला च तरुणी प्रौढ़ा वृद्धा भवति नायिका ।
गुणयोगेन रन्तव्या नारी वश्या भवेत्तदा ॥ १० ॥
आ षोड़शाद् भवेद्बाला तरुणी त्रिंशका मता ।
पञ्चपञ्चाशका प्रौढ़ा भवेद्वृद्धा ततः परम् ॥ ११ ॥
फलमूलादिभिर्बाला तरुणी रतियोगतः ।
प्रेमदानादिभिः प्रौढ़ा वृद्धा च दृढ़ताड़नात् ॥ १२ ॥
बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणादिशेत् ॥ १३ ॥

अङ्गुष्ठे चरणे च गुल्फनिलये जानुद्वये वस्तिके
नाभौ वक्षसि जङ्घयोर्निगदिता कण्ठे कपोलेऽधरे ।
नेत्रे कर्णयुगे ललाटफलके मौलौ च वामभ्रुवा
मूर्द्धाधश्चलनक्रमेण कथिता चान्द्री कला पक्षयोः ॥ १४ ॥
सीमन्ते नयनेऽधरे च गलके कक्षस्तटे चूचुके
नाभौ श्रोणितटे मनोभवगृहे जङ्घातटे गण्डके ।
गुल्फे पादतले तदङ्गुलितटेऽङ्गुष्ठे च तिष्ठत्यसौ
वृद्धिक्षीणतया समं शशिकला पक्षद्वयोर्योषिताम् ॥ १५ ॥
शुक्लपक्षे वसेद्वामे पादाङ्गुलिकनिष्ठके ।
शुक्लप्रतिपदादौ च कृष्णे चाधः प्रलम्बते ॥ १६ ॥
पुंसः सव्ये स्त्रियो वामे शुक्ले कृष्णे विपर्य्ययः ।

रतिमञ्जरी ।

नत्वा सदाशिवं देवं नागराणां मनोहरम् ।
रचिता जयदेवेन सुबोधा रतिमञ्जरी ॥ १ ॥
रतिशास्त्रं कामशास्त्रं तस्य सारं समाहृतम् ।
सुप्रबन्धं सुसंक्षिप्तं जयदेवेन भण्यते ॥ २ ॥
पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
शशो मृगो वृषोऽश्वश्च स्त्रीपुंसोर्जातिलक्षणम् ॥ ३ ॥

भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा
अविरलकुचयुग्मा चारुकेशी कृशाङ्गी ।
मृदुवचनसुशीला गीतवाद्यानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा ॥ ४ ॥
भवति रतिरसज्ञा नातिखर्वा न दीर्घा
तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी ।
घनकठिनकुचाढ्या सुन्दरी बद्धशीला
सकलगुणसमेता चित्रिणी चित्रवक्त्रा ॥ ५ ॥

दीर्घातिदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता ।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा ॥ ६ ॥

स्थूलाधरा स्थूलनितम्बभागा स्थूलाङ्गुली स्थूलकुचा सुशीला ।
कामोत्सुका गाढरतिप्रियाया नितान्तभोक्त्री करिणी मता सा ॥ ७ ॥

शशके पद्मिनीतुष्टा चित्रिणी रमते मृगम् ।

अक्षरच्युतकजातिः ।

तनोतु ते यस्य फणी गरुत्मान् पाणौ मुरारिर्दयिता च यस्याः ।
नाभ्यां स्फुरन् भद्रदमशुभ्रदेहः पद्मा गतिश्चक्रमसौ विरिञ्चिः ॥६५॥
हरः क्षयी तापकरः सुरेशःशान्तो हरिर्गोत्ररिपुर्विवस्वान् ।
चन्द्रोहिजिह्माश्रित इत्युपेक्ष्य लक्ष्म्या वृतः पातु विधिर्जगन्ति ॥६६॥

स्थानच्युतकजातिः ।

भिक्षवो रुचिराः सर्वे सुरसाश्च जनप्रियाः ।
क्षमायामतिसम्पन्ना दृश्यन्ते मगधे परम् ॥ ६७ ॥
सत्यशीलो दयोपेतो दाता शुचिरमत्सरः ।
जिनः सर्वात्मना सेव्यः पदमुच्चैरभीप्सिता ॥ ६८ ॥

व्यञ्जनच्युतजातिः ।

स्फोटयित्वाक्षरं किञ्चित् पुनरन्यस्य दानतः ।
यत्रापरो भवेदर्थश्च्युतदत्ताक्षरं हि तत् ॥ ६९ ॥
सदागतिहतोच्छायस्तमसो वशताम् गतः ।
अस्तमेष्यति दीनोऽयं विधुरेकः शिवंस्थितः ॥ ७० ॥
पूर्णचन्द्रमुखी रम्या कामिनी निर्मलाम्बरा ।
करोति कस्य न स्वान्तमेकान्तमदनोत्तरम् ॥ ७१ ॥

इति च्युतदत्ताक्षरजातिः ।

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने
चतुर्थः परिच्छेदः ।

समाप्तः ।

Digitized by Google

लिङ्गवचनगुप्तम् । वचनगुप्तजातिः ।

अन्योऽप्यर्थः स्फुटो यत्र मात्रादिच्युतकेष्वपि ।
प्रतीयते विदुस्तज्ज्ञास्तन्मात्राच्युतकादिकम् ॥ ५६ ॥
महाशयमतिस्वच्छं नीरं सन्तापशान्तये ।
खलावासादतिश्रान्ताः समाश्रयत हे जनाः ॥ ५७ ॥
तुषारधवल स्फूर्जन्महामणिधरोऽनघः ।
नागराजो जयत्येकः पृथिवीवरधक्षमा ॥ ५८ ॥

मात्राच्युतजातिः ।

सुश्यामा चन्दनवती कान्ता तिलकभूषिता ।
कस्यैषा नगभूः प्रीतिं भुजङ्गस्य करोति न ॥ ५९ ॥
यथा सत्प्रसवः स्निग्धः सन्मार्गविहितस्थितः ।
तथा सर्वाश्रयः सत्यमयमेव कुलद्रुमः ॥ ६० ॥

बिन्दुच्युतकजातिः ।

महीरुहो विहङ्गानामेते ह्यघैः कलापिनाम् ।
विरुतैः स्वागतानीव नीरवाहाय कुर्व्वते ॥ ६१ ।
अगस्त्यमुनेः शापाद्भ्रष्टस्यन्दनमाश्रितः ।
महासुखात् परिभ्रष्टो नहुषः सर्पतां गतः ॥ ६२ ॥

विसर्गच्युतकजातिः ।

महानपि सुधीरोऽपि बहुरत्नयुतोऽपि सन् ।
विरसः कुपरीवारः मदीनः केन सेव्यते ॥ ६३ ॥
सुशीलः स्वर्णगौराभः पूर्णचन्द्रनिभाननः ।
सुगतः कस्य न प्रीतिं तनोति हृदि संस्थितः ॥ ६४ ॥

Digitized by Google

अस्तीयं संनिहिता या हृतशीला सखी नियतम् ॥४७॥

सम्बन्धगुप्तजातिः ।

सर्वज्ञेन त्वया किञ्चिन्नास्त्यविज्ञातमीदृशम् ।
मिथ्या वचस्तथा हि त्वमसत्यं वेत्सि न क्वचित् ॥ ४८ ॥

कमले कमले नित्यं मधूनि पिबतस्तव ।
भविष्यति न सन्देहः कष्टं दोषाकरोदये ॥ ४९ ॥

आमन्त्रितगुप्तजातिः ।

विषादी भैक्ष्यमश्नाति सदारोगं न मुञ्चति ।
दृष्टेनापि त्वया वीर ! शम्भुनारिः समः कृतः ॥ ५० ॥

नित्यमाराधिता देवैः कंसस्य द्विषतस्तनुः ।
मण्डलाग्रं गदां शङ्खं चक्रं जयति बिभ्रती ॥ ५१ ॥

समासगुप्तजातिः ।

नितान्तस्वच्छहृदयं सखि ! प्रेयान् समागतः ।
त्वां चिरादर्शनप्रीत्या यः समालिङ्ग्य रंस्यते ॥ ५२ ॥

कलिकालमियन्तावदगस्त्यस्य मुनेरपि ।
मानसं खण्डयत्यत्र शशिखण्डानुकारिणी ॥ ५३ ॥

लिङ्गगुप्तजातिः ।

प्रमोदं जनयन्त्येव सदाराः गृहमेधिनः ।
यदि धर्मस्य कामस्य भवेतां सङ्गतावुभौ ॥ ५४ ॥

सुव्वचनगुप्तम् ।

कथास्वं दुर्बलासीति सख्यस्तां परिपृच्छति ।
त्वयि सन्निहिते तासु दद्यात् किं कथयोत्तरम् ॥ ५५ ॥

Digitized by Google

अहं महानसायातः कल्पितो नरकस्तव।
मया मांसादिकं भुक्तं भीमं जानीहि मां वक ॥३९॥

करणगुम्फम्।

अम्भोरुहमये स्नात्वा वापीपयसि कामिनी।
ददाति भक्तिसम्पन्ना पुष्पं सौभाग्यकामया ॥ ४० ॥
प्रशस्त्यायुक्तमार्गस्य तव सम्मानिताश्रिताः।
स्पृहयन्ति न के नाम गुणरत्नालय प्रभो! ॥ ४१ ॥

सम्प्रदानगुम्फम्।

शिलीमुखैस्त्वया वीर! दुर्वारैर्निर्जितो रिपुः।
बिभेत्यत्यन्तमलिनोः वनेऽपि कुसुमाकुले ॥ ४२ ॥
सरसीतोयमुद्धृत्य जनः कन्दर्पकारकम्।
पिबत्यम्भोजसुरभिस्वच्छमेकान्तशीतलम् ॥ ४३ ॥

अपादानगुम्फम्।

या कटाक्षच्छटापातैः पवित्रयति मानवम्।
एकान्तरोषितप्रीतिरस्ति सा कमलालया ॥ ४४ ॥
विपद्यमानता सिद्धा सर्वस्यैव निरत्ययः।
तथाहि भवपादाभ्यां निर्वाणं हन्त्ययं जनः ॥ ४५ ॥

अधिकरणगुम्फम्। कारकगुम्फजातिः।

तूणीव मधुमासेऽस्मिन् रसालद्रुममञ्जरी।
इयमुन्निद्रमुकुलैः भाति न्यस्तशिलीमुखा ॥ ४६ ॥
प्राप्तमदो मधुमासः प्रबलारुक् प्रियतमो विदूरस्थः।

अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
अयमुदयति घुसृणाम्बरमणीवद्नोपमश्चन्द्रः ॥ ३० ॥

इति बिन्दुमज्जातिः ।

क्रियादिकं पदे यत्र पदसाधनकौशलात् ।
स्फुटं न लक्ष्यते तत्स्यात् क्रियागुप्तादिकं यथा ॥ ३१ ॥
राजन् ! नव घनश्याम निस्त्रिंशाकर्षदुर्जय ।
आकल्पं वसुधामेतां विद्विषोऽद्य रणे बहन् ॥ ३२ ॥
पुंस्कोकिलकुलस्यैते नितान्तं मधुरारवैः ।
सहकारद्रुमारम्यां वसन्ते काममपि श्रियम् ॥ ३३ ॥

इति क्रियागुप्तजातिः ।

न करोतु नाम रोषं न वदतु परुषं न हन्तु वा शत्रून् ।
रञ्जयति महीमखिलां तथापि धीरस्य वीरस्य ॥ ३४ ॥
शरदिन्दुकुन्दधवलं नगनिलयरतं मनोहरन्देवम् ।
यैः सुकृतं कृतमनिशन्तेषामेव प्रसादयति ॥ ३५ ॥

कर्तृगुप्तम् ।

शीत्कारासारसंवाही सरोजवनमारुतः ।
प्रक्षोभयति पान्थस्त्री निश्वासैरिव मांसलः ॥ ३६ ॥
सुभग ! तवाननपङ्कजदर्शनसञ्जातनिर्भरप्रीतेः ।
शमयति कुर्वन् दिवसः पुण्यवतः कस्य रमणीयः ॥ ३७ ॥

कर्मगुप्तम् ।

पूतिपङ्कमयेऽत्यर्थं कासारे दुःखिता अमी ।
दुर्वारा मानसं हंसाः गमिष्यन्ति घनागमे ॥ ३८ ॥

Digitized by Google

बहुदोषो गुणध्वंसी मोहमत्ता जनपीड़कः।
करोतु विरथो लोकमसमासमकोदयम् ॥ २२ ॥

विष्णोःस्तुतिनिन्दे।

सततमहितजनवत्सलबहुभयपापक्रियापरिभ्रष्टः।
इह कलिकाले कुपतिर्जगतस्त्वं परमदुःखकरः ॥ २३ ॥

राज्ञः स्तुतिनिन्दे। इति स्तुतिनिन्दाजातिः।

प्रसन्नवदनः श्रीमानयं लब्धगुणोदयः।
करप्रचारसुभगो राजा नन्दयति प्रजाः ॥ २४ ॥

चन्द्रभूपतौ।

विनायकाहितप्रीतिर्देवो गङ्गां बभार यः।
सर्वदो माधवः स त्वामव्यादव्यर्थविक्रमः ॥ २५ ॥

शङ्करवासुदेवौ। द्व्यर्थजातिः।

शीत्कारं जनयति व्रणयत्यधरं तनोति रोमाञ्चम्।
नागरिकः किमु मिलितो नहि नहि सखि हैमनः पवनः॥२६॥

रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति।
तत्किं तरुणी नहि नहि वाणी बाणस्य मधुरशीलस्य ॥२७॥

अपह्नुतिजातिः।

स्वरेषु विन्दुयुक्तेषु हलां यदवबोधनम्।
तद्विन्दुमदिति प्राहुः केचिद्विन्दुमतीमिति ॥ २८ ॥

मनसी नाभसीत्याद्याः बुधाद्यो न्यासतो हि याः।
बाहुल्येनाप्रयोगात्तु नेह तासां प्रदर्शनम् ॥ २९ ॥

त्रिनयनचूडारत्नं मित्रं सिन्धोः कुमुद्वतीदयितः।

Digitized by Google

हंसिअकमाइ सोसे कतोद्दोजाइ कुसुमाइ ॥ १३ ॥

इतिकालसारादिद्रव्यजातिः ।

रविसुतकृतगोकर्णः श्रुतिविषयगुणांवरो वनात्मधरः ।
नरकाग्निरो जगदखिलश्चिरमव्यादसमरुक्पाणिः ॥ १४ ॥

कुम्भेन सुग्रीनयनाश्रयास दग्धोऽमदाददुर्रहर्षकाले ।
स्वजन्मभक्षप्रियभोजनाशा नृत्यन्ति भौमागुजगोजभाजः॥१५॥

इत्यजमारादिगूढ़जातिः ।

वाताच्छीतिररिभीरं बोऽहरताम्महासुरीदयितः ।
वीङ्ग्राह्यानीकावार्वाहाभोसमस्ताना: ॥ १६ ॥

इति पदगूढ़जातिः ।

दयावान् प्रयतः शुद्धः प्रबुद्धकमलेक्षणः ।
पापापहस्त्रिभुवनं बुद्धः पायादपायतः ॥ १७ ॥
न सज्जति क्वचिद्दोषे प्रीणाति जगतां मनः ।
य एकः स परं श्रीमांश्चिरं जयति सज्जनः ॥ १८ ॥

इति पादगूढ़जातिः ।

दृष्टो मया सखि ब्रूहि रोदयित्वा गतोद्य माम् ।
भद्रे कल्याणिनी भूयाः प्राचीं पश्चातिनिर्मलाम् ॥ १९ ॥
डाहिणपवण विग्गासं मोलइ लोअणाइ पहि अवहू ।
णिउण सही उणतीएकस्से विवरे ठक्के इठ ॥ २० ॥

अर्थगूढ़जातिः ।

स्तुतिनिन्दा तदर्थत्त्वाद्यर्थमर्थद्वयोदयात् ।
निक्षवात्कथितस्यापि शब्दव्याजादपकृतिः ॥ २१ ॥

Digitized by Google

यथोक्तवादिन्यपि नैव दूतिका का नाम कान्तेति निवेदयाशु ॥६॥

सारिका। अष्टोजातिः।

नीरस आउष सो बहुगुणवन्तउ भमइ

निरन्तर णीअलहोन्तउ।

तरुगिव्भइ णउण फलुपत्तु सत्तु

णोपरि आणइ पावइ सोविजसु ॥ ७ ॥ गुणकवेवा।

घर घर चल्लइ सअलपि णारी

जीवन्ति होइ वैरिणोः णारी।

खाबन्धइ खन मुच्चइ खण एकल्ली

तह जाणह जह जाइ णपेल्ली ॥ ८ ॥

पाशासारी। इति प्रहेलिकाजातिः।

कालसारादिकं च्युतमजमरादिगूढकम्।

विदग्धा दुर्विदग्धानां कुर्वते दर्पशान्तये ॥ ९ ॥

अनुनेतुं मानिन्या दयितश्चरणे सरागचरणायाः।

यावत् पतितः स तया तत्क्षणमवधीरितः कस्मात् ॥१०॥

रजस्वला यतः।

अवलोक्य स्तनौ वध्वा गुञ्जाफलविभूषितौ।

निःश्वस्य रोदितुं लग्ना कुतो व्याधकुटुम्बिनी ॥ ११ ॥

असारस्तनयो यतः। कालसार जातिः।

दरदिवुचू अमडलं पिच्छि असहि आरा विरहिणीं सहियम्।

णमिओकं केलितरु चूओचलणाह ओकतो ॥ १२ ॥

पिच्छन्तसणिमिसच्छ पिच्छि अवहुआए भत्तिभिरुक् वअंरम्।

एतावतापि दिङ्मात्रं प्रश्नानां दर्शितं मया ।
येन येन हि भाषन्ति तद्विधस्तत्तदूह्यताम् ॥ ७२ ॥

इति श्रीधर्म्मदासविरचिते विदग्धमुखमण्डने
तृतीयः परिच्छेदः ।

व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका ॥ १ ॥
सा द्विधार्थी च शाब्दी च विख्याता प्रश्नशासने ।
आर्थी स्यादर्थविज्ञानाच्छाब्दी शब्दविभागतः ॥ २ ॥
तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः ।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः ॥ ३ ॥

पानीयकुम्भः ।

आपाण्डु पीनकठिनं वर्तुलं सुमनोहरम् ।
करैराकृष्यतेऽत्यर्थं किं वृद्धैरपि सस्पृहम् ॥ ४ ॥

पक्वबिल्वफलम् । इत्यार्थीजाति ।

दुर्वारवीर्य सकृषि त्वयि का प्रसन्ना
श्यामा सपत्नहृदये सुपयोधरा च ।
तुष्टे पुनः प्रणतशत्रुसरोजसूर्ये
सैवाद्य वर्णरहिता वद नाम का स्यात् ॥ ५ ॥ शस्त्री ।
सदारिमध्यापि न वैरियुक्ता नितान्तरक्तापि सितैव नित्यम् ।

एहु पहु मम भुअबे गिम्भद ॥ ६७ ॥

सौरसराइण। शुद्धापभ्रंशम्।

सुअलो मेहं पुच्छइ पुच्छइमेहोवि तत्तहा सुअलम्।
केणहु आसअलसुआ केण जणो विसइ पाआलम् ॥ ६८ ॥

बलाहकविलेन।

धवलुज्जलेहिं केहि सौहइ धलणी मसाण देसस्स।
खिलअस्सरकवणाला केहिं पलिवेटि आहोन्ति ॥ ६९ ॥

यालकलकेहिम्। शुद्धमागधिकम्।

वैरी पृच्छइ ककवे रोचइ कसणो घणो केहिम्।
सव्वाइणकेहिं समत्थन्ति सव्वंणि हितं कता दम्पि ॥ ७० ॥

अहितपकवेहिम्।

पत्तूण किं भड़ अणो णिधणे हताणं
अहासणं फचति चम्फणि सूअणस्स भोत्तूण।
खोरतर तुक्खस आइ पावामोहं
धआकरणं लप किं लहन्ति ॥ ७१ ॥

विसमरणम्। शुद्धपैशाचिकम्।

जाणी आणइ णिं भेदे भलि
साकिस वुच्चइ वोल्लरे सभरि।
जोतिलसरीस वपीड़यि जाणी
कीस भणीज्जइ सोविस्साणी ॥ ७२ ॥

सुतेल्लीशुद्धलौकिकम्। इति संशुद्धजातिः।

Digitized by Google

को वर्णाद्यः क्व च जलधिसुता कश्च दोर्वीदिसंग्र
प्राड्बुद्धाः कमजयदसौ तार्किकैः के क्रियन्ते ।
आमन्त्रो विः कथय विदितं किं पदं हेतुवाचि
जाणश्चेडं मह्ह महिला साविवोल्लेह कोसे ॥ ६२ ॥

अपोचम्मारं वादावेहि ।

शब्दः कः स्यात्पुरुषवचनं कुण्डली को स्मरारेः
कामभ्भोधेर्हरिदहरद्धीवधः पृच्छतीदम् ।
हण्डी कुण्डी अणसिणधरे कोस अम्हार अत्थं
ये पुच्छिल्ला सउण परिहारुत्तरं कोसदेह ॥ ६३ ॥

णाहीकुम्भार। संस्कृतलौकिकं इति चित्रजातिः ।

को निवसइ स्वच्छन्दं सुन्दरि गिरिगहकुञ्जमज्झम्मि ।
सह अज्जुणेण योद्धुं सिहि ममणो केरिसो होइ ॥ ६४ ॥

सरहससवाराहवम्गो ।

काहरइ मणं पइणो गुणगणजीवण सलाहणिगास्स ।
कअ चड़चड़ेति सद्दाडुआ सना केरिसाहोन्ति ॥ ६५ ॥

सरिसवहुआ । इति शुद्धप्राकृतम् ।

पाणिगाहणणि अंसच्छसोहइ केहि मण्डिअम् ।
साहसु बहुवीर पइणो रिउबलं केहिं खण्डिअम् ॥ ६६ ॥

समरङ्गणेहिम् ।

रसिअइ केण उच्चाड़णु किज्जइ
जुअइ भावसु केण उविज्जइ ।
तिसि अलीअ खणु केण सुहिगाइ

प्रायो बिभ्यति कीदृशा दरिगजाद्दन्तप्रहीणा गजाः
पृथ्वी सम्प्रति कीदृशी नृपतिना राजन्वती राजते।
प्रायः प्रावृषि कीदृशी गिरितटी धत्ते च कः कज्जले
मज्जवेवलिये घणच्चयदिषे जादं सरी केरिसम्॥ ५६॥

सरदादवताविद्वाहिरम्।

छत्तं कीदृशमङ्ग दन्तभवं कं वदन्ति विद्वांसः।
अतिलघुवाचि पदं किं केरिसुः सुअणेसु होइ जणो॥ ५७॥

विसन्तमण। इति संस्कृतापभ्रंशजातिः।

किं सुखमाहुः प्रायः केशविकारश्च का हरेर्दयिता।
कथमाभा कश्चिन्निषि को लुब्ध इवोरपुलिसाणम्॥ ५८॥

शमलकम्बालम्बे।

कस्तम्बेरमसुत इति विख्यातः पृच्छति स्फुटं हरिणः।
अहिणवणअलीरणो असाहुणो केण उज्जलइ॥ ५९॥

कलभएण। संस्कृतमागधिकम्।

कीपारणं किमरुणाग्रसरस्य पूर्वं
काष्ठाग्रनिष्ठिततनोरुपमानपात्रम्।
पत्तं खणेण मरणं सअरः सरणं
पुत्तेहि किं पविसिऊण तुरङ्गमत्थम्॥ ६०॥

कपिलपणम्।

कं प्रीणयन्ति जलदाः सैन्यं कीदृक् पलायते समरात्।
धत्ते शिरोधरा किं रुद्दसिरं केरिसभोदि॥ ६१॥

चातकं कातरं कम्। संस्कृतपैशाचिकम्।

दुर्वारदर्पदलितामरनायकापि
कीदृक्प्रकारि सुरशत्रुचमूरहेन ॥ ५१ ॥

तारकविरहिता ।

	क	
वि	र	हि
	ता	

कीदृक् परैरपहतो भवति क्षितीशः
पृच्छत्यनुश्च इह किं विदितं पवित्रम् ।
विच्छिन्नपाणिचरणो जनको यदीयः
कीदृक् परैरभिहितः स पुमान् पुनः स्यात् ॥ ५२ ॥

व्यङ्गतनयः । नागपाशजातिः ।

भाषाभिश्लिष्टितं यत् स्यात्संस्कृतप्राकृतादिभिः ।
सन्तश्चित्रन्तदिच्छन्ति संश्लिष्टंत्वेकभाषया ॥ ५३ ॥

किं न स्यात्कीदृगच्छं महतोपि च तादृशस्य जलराशेः ।
दिनअरकिरणप्फंसण पड़िउद्धं होइ किं गोसे ॥ ५४ ॥

कमलवणम् ।

मत्स्यहितमम्बु कीदृक् पृच्छति रोगी निशासु किं भाति ।
कोऽनङ्गो वदति मृगः खे गम्मइ केरिसा रइणा ॥ ५५ ॥

अविसामभमिरेण । संस्कृतप्राकृतजातिः ।

पवित्रमतिदुर्लभं किमिह किं भटा मन्वते
ब्रवीति धरणीधरस्तु किमजीवसम्बोधनम् ।
हरिर्वदति को जितो मदनवैरिणा संयुगे
तनोति ननु कः शिखण्डिकुलताण्डवाडम्बरम् ॥ ४७ ॥

पयोधरसमयः ।

भवति जयिनी काञ्ची सेनाह्वयाधरभूषणं
वहति किमहिः पुष्पं कीदृक् कुसुम्भसमुद्भवम् ।
महति समरे वैरी वीर त्वया वद किं कृतः
कमलमुकुले भृङ्गः कीदृक् पिबन्मधु राजते ॥ ४८ ॥

परागरञ्जितः । शृङ्खलाजातिः ।

आलानं किं भवति हि तरोः कस्यचित् प्रश्नविज्ञाः
प्रायः कार्य्यं किमपि न कलौ कुर्वते के परेषाम् ।
पूर्वं चन्द्रं वहति ननु का पृच्छति म्लानचक्षुः
केनोदन्या जनितमसमं कष्टमाप्नोति लोकः ॥ ४९ ॥

नीरापकारिणा ।

का संबुद्धिः सुभट भवतो ब्रूहि पृच्छामि सम्यक्
प्रातः कीदृग् भवति विपिनं संप्रहृष्टैर्विहङ्गैः ।
लोकः कस्मिन् प्रथयति मुदं का त्वदीया च जैत्री
प्रायो लोके स्थितमिह सुखं जन्तुना कीदृशेन ॥ ५० ॥

विहारसेविना । एकान्तरितशृङ्खलाजातिः ।

गोष्ठी विदग्धजनवत्यपि शोचनीया
कीदृग् भवेत्तरणिरश्मिषु का सदास्ति ।

Digitized by Google

[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] तम् ॥ ४० ॥

[illegible] [illegible] मध्ये
[illegible] किं [illegible] [illegible] ।
[illegible] [illegible] [illegible]
[illegible] [illegible] वद ॥ ४१ ॥ किं शुकम् ।

[illegible] कुरु क याति [illegible]
[illegible] कुरु [illegible] [illegible] ।
[illegible] कुरु [illegible]
[illegible] किं [illegible] ॥ ४२ ॥ हिमकरे ।

[illegible]
[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] मे:
[illegible] [illegible] कुरु च [illegible] ॥ ४३ ॥ तपसे ।

पुष्प: कोदृशो वेत्ति प्रायेण [illegible] कथा: ।
[illegible] [illegible] ब्रूहि क: [illegible] ॥ ४४ ॥

कातरिक: ।

[illegible] क: सर्वहेतु: [illegible]विचार्यते ।
[illegible]र्यो मोक्षं कुवसितं वद ॥ ४५ ॥

यावविधि: । हीयमानाक्षरजाति: ।

[illegible]वर्ति वा चैकान्तरितयाऽथवा ।
[illegible] इत्युक्तो [illegible]मपाश्रक: ॥ ४६ ॥

Digitized by Google

यथोक्तवादिन्यपि नैव दूतिका का नाम कान्तेति निवेदयाशु ॥६॥

सारिका। षष्ठीजातिः।

नीरस आउण सो बहुगुणवन्तउ भमइ
निरन्तर षीखलहोन्तउ।
तरुगिल्लइ षउण फलुपत्तु सत्तु
योपरि आवइ पावइ सोविजत्तु ॥ ७ ॥ गुवकेवा।

घर घर चल्लइ सअलपि आरी
जीवन्ति होइ वेरिणीः षारी।
खावन्धइ खन मुष्वइ खण एकल्ली
तह जाणह जह जाइ षपेल्ली ॥ ८ ॥

पाशासारी। इति प्रहेलिकाजातिः।

कालसारादिकं छ्यमजमरादिगूढ़कम्।
विदग्धा दुर्विदग्धानां कुर्वते दर्पशान्तये ॥ ९ ॥
अनुनेतुं मानिन्या दयितश्चरणे सरागचरणायाः।
यावत् पतितः स तया तत्क्षणमवधीरितः कस्मात् ॥१०॥

रजस्वला यतः।

अवलोक्य स्तनौ वध्वा गुञ्जाफलविभूषितौ।
निःश्वस्य रोदितुं लग्ना कुतो व्याधकुटुम्बिनी ॥ ११ ॥

असारस्तनयो यतः। कालसार जातिः।

दरदिवुचू अमडलं पिच्छि असहि आरा विरहिणीं सहियम्।
षमिओकं केल्लितरु चूओचलणाह ओकतौ ॥ १२ ॥
पिच्छन्तसणिमिसच्छ पिच्छि अबहुआए भल्लिभिवक् वओरम्।

Digitized by Google

एतावतापि दिङ्मात्रं प्रश्नानां दर्शितं मया ।
येन येन हि मायन्ति तद्विधस्तत्तदूह्यताम् ॥ ७३ ॥

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने
तृतीयः परिच्छेदः ।

व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका ॥ १ ॥
सा द्विधार्थी च शाब्दी च विख्याता प्रश्नशासने ।
आर्थी स्यादर्थविज्ञानाच्छाब्दी शब्दविभागतः ॥ २ ॥
तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः ।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः ॥ ३ ॥

पानीयकुम्भः ।

आपाण्डु पीनकठिनं वर्तुलं सुमनोहरम् ।
करैराकृष्यतेऽत्यर्थं किं वृद्धैरपि सस्पृहम् ॥ ४ ॥

पक्वविल्वफलम् । इत्यार्थीजाति ।

दुर्वारवीर्यं सरुषि त्वयि का प्रसन्ना
श्यामा सपत्नहृदये सुपयोधरा च ।
तुष्टे पुनः प्रणतशत्रुसरोजसूर्ये
सेवाय वर्णरहिता वद नाम का स्यात् ॥ ५ ॥ शस्त्री ।
सदारिमध्यापि न वैरियुक्ता नितान्तरक्तापि सितैव नित्यम् ।

Digitized by Google

एहु पहु मम भुअवे गिन्धद ॥ ६७ ॥

शौरसराइण । शुद्धापभ्रंशम् ।

सुअलो मेहं पुच्छइ पुच्छइमेहोवि तन्तहा सुअलम् ।

केणह आसअलसुआ वेव जणो विसइ पाआलम् ॥ ६८ ॥

बलाहकविलेन ।

धवलुज्जलेहिं केहि सोहइ धलणो मसाण देसस्स ।

खिलअस्सरकवणाला केहिं पलिवेटि आहोन्ति ॥ ६९ ॥

चलकलकेहिम् । शुद्धमागधिकम् ।

वेरी पुच्छइ ककवे रोचइ कसणो घणो केहिम् ।

सव्वाइणकेहिं समत्यन्ति सव्वंपि हितं कता दम्पि ॥ ७० ॥

अहितपकवेहिम् ।

पत्तूण किं भड़ अणो खिधणे हताणं

अट्टासणं फचति चम्फणि सूअणस्स भोत्तूण ।

खोरतर तुक्खस आइ पावामोहं

धआकरणं लप किं लहन्ति ॥ ७१ ॥

विसमरणम् । शुद्धपैशाचिकम् ।

जाणो आणइ णिं भेदे भलि

साकिस वुव्वइ वोल्लरे सभरि ।

जोतिलसरोस वपोड़यि जाणो

कोस भणोज्जइ सोविस्साणो ॥ ७२ ॥

सुतेल्लोशुद्धलौकिकम् । इति संशुद्धजातिः ।

Digitized by Google

को वर्णाद्यः क्व च जलधिसुता कश्च दोर्वादिसंज्ञ
प्राहुर्बुद्धाः कमजयदसौ तार्किकैः के क्रियन्ते।
आमन्त्र्यो विः कथय विदितं किं पदं हेतुवाचि
जाणसेडं महइ महिला साविवोज्झेइ कोसे॥ ६२॥

अतोचम्मारं वादाविहि।

शब्दः कः स्यात्परुषवचनं कुण्डली को स्मरारेः
कामम्भोधेर्हरिरदहरद्दीवधः पृच्छतीदम्।
कण्डो कुण्डो अणसिणधरे कोस अम्हार अत्थं
ये पुच्छिज्जा सउण परिहारुत्तरं कोसदेइ॥ ६३॥

नाहीकुम्भार। संस्कृतलौकिकं इति चित्रजातिः।

को निवसइ स्वच्छन्दं सुन्दरि गिरिगहकुञ्जमज्झम्मि।
सह अज्जुणेण योद्धुं सिहि ममणो केरिसो होइ॥ ६४॥

सरहससवाराहवम्गो।

काहरइ मणं पइणो गुणगणजीवण सलाहणिगास्स।
कअ चड़चड़ेति सद्दाहुआ सना केरिसाहोन्ति॥ ६५॥

सरिसवल्लआ। इति शुद्धप्राकृतम्।

पाणिगाहणाणि अंसच्चसोहइ केहिं मण्डिअम्।
साहसु बहुवीर पइणो रिउबलं केहिं खण्डिअम्॥ ६६॥

समरङ्गणेहिम्।

रसिअहु केण उच्चाडणु किज्जइ
जुअइ भाणसु केण उविज्जइ।
तिसि अलोअ खणु केण सुहिगाइ

प्रायो बिभ्यति कीदृशा हरिगजाहन्तप्रहीणा गजाः
पृथ्वी सम्प्रति कीदृशी नृपतिना राजन्वती राजते।
प्रायः प्रावृषि कीदृशी गिरितटी धत्ते च कः कज्जले
मज्झेवलिये घणच्चयदिवे जादं सरो केरिसम्॥ ५६॥

सरदादवताविद्वाहिरम्।

उक्तं कीदृशमङ्गं दन्तभवं कं वदन्ति विद्वांसः।
अतिलघुवाचि पदं किं केरिसुः सुम्रणेसु होइ जणो॥ ५७॥

विस्रम्भमणु। इति संस्कृतापभ्रंशजातिः।

किं सुखमाहुः प्रायः केशविकारश्च का हरेर्दयिता।
कथमाभा कम्निमिग्नि को लुब्ध इवोरपुलिसाणम्॥ ५८॥

शमलकम्मालम्भे।

कस्तम्बेरमसुत इति विख्यातः पृच्छति स्फुटं हरिणः।
अहिणवणअलीरणो असाहुणो केण उज्जलइ॥ ५९॥

कलभएण। संस्कृतमागधिकम्।

कीपाकणं किमकणाग्रसरस्य पूर्वं
काष्ठाग्रनिष्ठिततनोरुपमानपात्रम्।
पत्तं खणेण मरणं सम्भरः सरन्तं
पुत्तेहि किं पविसिउण तुरङ्गमत्थम्॥ ६०॥

कपिलपणम्।

कं प्रीणयन्ति जलदाः सैन्यं कीदृक् पलायते समरात्।
धत्ते गिरोधरा किं कहसिरं केरिसम्भोदि॥ ६१॥

चातकं कातरं कम्। संस्कृतपैशाचिकम्।

Digitized by Google

दुर्वारदर्पदलितामरनायकापि
कीदृक्प्रकारि सुरशत्रुचमूरहेन ॥ ५१ ॥

तारकविरहिता ।

	क	
वि	र	हि
	ता	

कीदृक् परैरपहृतो भवति क्षितीशः
पृच्छत्यनुच इह किं विदितं पवित्रम् ।
विच्छिन्नपाणिचरणो जनको यदीयः
कीदृक् परैरभिहितः स पुमान् पुनः स्यात् ॥ ५२ ॥

व्यङ्गतनयः । नागपाशजातिः ।

भाषाभिश्चित्रितं यत् स्यात्संस्कृतप्राकृतादिभिः ।
सन्तश्चित्रन्तदिच्छन्ति संशुद्धंत्वेकभाषया ॥ ५३ ॥

किं न स्यात्कीदृगच्चं महतोपि च तादृशस्य जलराशेः ।
दिनअरकिरणफंसण घड़िउद्धं होइ किं गोसे ॥ ५४ ॥

कमलवणम् ।

मत्स्यहितमम्बु कीदृक् पृच्छति रोगी निशासु किं भाति ।
कोऽनङ्गो वदति मृगः खे गम्मइ केरिसा रइणा ॥ ५५ ॥

अविसामभमिरेण । संस्कृतप्राकृतजातिः ।

Digitized by Google

पवित्रमतिदुर्लभं किमिह किं भटा मन्वते
ब्रवीति धरणीधरस्तु किमजीवसम्बोधनम् ।
हरिर्वदति को जितो मदनवैरिणा संयुगे
तनोति ननु कः शिखण्डिकुलताण्डवाडम्बरम् ॥ ४७ ॥

पयोधरसमयः ।

भवति जयिनी काञ्ची सेनाङ्कयाधरभूषणं
वहति किमहिः पुष्पं कीदृक् कुसुम्भसमुद्भवम् ।
महति समरे वैरी वीर त्वया वद किं कृतः
कमलमुकुले भृङ्गः कीदृक् पिबन्मधु राजते ॥ ४८ ॥

परागरञ्जितः । शृङ्खलाजातिः ।

आह्वानं किं भवति हि तरोः कस्यचित् प्रश्नविज्ञाः
प्रायः कार्य्यं किमपि न कली कुर्वते के परेषाम् ।
पूर्णं चन्द्रं वहति ननु का पृच्छति म्लानचक्षुः
केनोदन्या जनितमसमं कष्टमाप्नोति लोकः ॥ ४९ ॥

नीरापकारिणा ।

का संबुद्धिः सुभट भवतो ब्रूहि पृच्छामि सम्यक्
प्रातः कीदृग् भवति विपिनं संप्रहृष्टैर्विहङ्गैः ।
लोकः कस्मिन् प्रथयति मुदं का त्वदीया च जेत्री
प्रायो लोके स्थितमिह सुखं जन्तुना कीदृशेन ॥ ५० ॥

विहारसेविना । एकाक्षरितशृङ्खलाजातिः ।

गोष्ठी विदग्धजनवत्यपि शोचनीया
कीदृग् भवेत्तरणिरश्मिषु का सदास्ति ।

Digitized by Google

आदितो मध्यतोऽन्ताद्वा हीयन्ते वर्णजातयः ।
एकद्वित्र्यादयो यत्र हीयमानाक्षरं हि तत् ॥ ४० ॥

वसन्तमासाद्य विकासि राजते
वनेषु किं वल्लभ पुष्पमुच्यताम् ।
विहङ्गमं कञ्च परिस्फुटाक्षरं
वदन्ति कम्पङ्कजसम्भवं विदुः ॥ ४१ ॥ किं शुकम् ।

समुच्यते कुत्र न याति पांशुलाः
समुच्यते कुत्र भवं भवेज्जलात् ।
समुच्यते कुत्र तवापयात्यरिः
प्रहीनसम्बोधनवाचि किं पदम् ॥ ४२ ॥ हिमकरे ।

तपस्विनोऽत्यन्तमहासुखाशया
वनेषु कस्मै स्पृहयन्ति सत्तमाः ।
इहाद्यवर्णद्वितयं निरस्य भोः
सदा स्थितं कुत्र च सत्त्वमुच्यताम् ॥ ४३ ॥ तपसे ।

पुरुषः कीदृशो वेत्ति प्रायेण सकलाः कलाः ।
मध्यवर्णद्वयं त्यक्त्वा ब्रूहि कः स्यात्सुरालयः ॥ ४४ ॥

नागरिकः ।

यजमानेन कः स्वर्गहेतुः सम्यग्विचार्य्यते ।
विहायाद्यन्तयोर्वर्णौ गोत्वं कुत्रस्थितं वद ॥ ४५ ॥

यागविधिः । हीयमानाक्षरजातिः ।

अन्योन्याक्षरवर्त्तिन्या चैकान्तरितयाऽथवा ।
शृङ्खलाबन्धः इत्युक्तो ग्रन्थिमान्नागपाशकः ॥ ४६ ॥

वसन्तमासाद्य वनेषु कीदृशाः
पिकेन राजन्ति रसालभूरुहाः।
निरस्य वर्णद्वयमत्र मध्यमं
तव द्विषां कान्ततमा तिथिश्च का॥ ३२॥

कान्तगिरा। गतप्रत्यागतजातिः।

आदौ मध्ये तथान्ते वा वर्द्धन्ते वर्णजातयः।
एकद्वित्र्यादयो यत्र वर्द्धमानाक्षरं हि तत्॥ ३३॥

किमनन्ततया ख्यातं पादेन व्यञ्जमाञ्जय।
जनानां लोचनानन्दं के तन्वन्ति घनात्यये॥३४॥ खञ्जनाः।

उरःस्थलं कोऽत्र विना पयोधरं
बिभर्त्ति सम्बोधय मारुताशनम्।
वदन्ति कं पत्तनसम्भवं जनाः
फलञ्च किं गौडवधूकुचोपमम्॥ ३५॥ नागरङ्गम्।

प्रायेण नीचलोकस्य कः करोतीह गर्वताम्।
आदौ वर्णद्वयं दत्त्वा ब्रूहि के वनवासिनः॥ ३६॥ शबराः।
सानुजः काननङ्गत्वा नैकषेयान् जघान कः।
मध्ये वर्णत्रयं दत्त्वा रावणः कीदृशो वद॥३७॥ राक्षसोत्तमः।
धत्ते वियोगिनी गण्डस्थलपाण्डुफलानि का।
वद वर्णौ विधायान्ते सीता दृष्टा कयाभवत्॥ ३८॥
विष्णोः का वल्लभा देवी लोकत्रितयपावनी। लवलीलया
वर्णमाद्यं तयोर्दत्त्वा कः शब्दसुखवाग्वद॥ ३९॥

समानः। इति वर्द्धमानाक्षरजातिः।

Digitized by Google

हारावी । इति सर्वतोभद्रजातिः ।

प्रतिलोमानुलोमाभ्यामुत्तरेण गतागतम् ।
मध्यवर्णविलोपेन तच्चानेकप्रकारकम् ॥ २७ ॥
वद वल्लभ सर्वत्र साधुर्भवति कीदृशः भोविन्द्रे ।
नानासिद्धिर्मे नन्दवेश्मनि काभवत् ॥ २८ ॥ दीनरक्ष ।
यत्नादन्विष्य का ग्राह्या लेखकैर्मसिमल्लिका ।
घनान्धकारनिःशङ्कं मोदते केन बन्धकी ॥ २९ ॥ नारिकेरज ।

असुरसुरनरेन्द्रैरुह्यते का शिरोभिः
तनुरपि शुचिवस्त्रे कोऽतिविस्तारमेति ।
वदति कमलयोनिः सेव्यते केन पुष्पं
मधुरमसृणमृद्वी का भवेदुत्पलस्य ॥ ३० ॥

	ना	
मा	लि	का
	का	

हिमांशुखण्डं कुटिलोज्ज्वलप्रभं
भवेद्वराहप्रवरस्य कीदृशम् ।
विहाय वर्णं पदमध्यसंस्थितं
न किं करोत्येव जिनः करोति किम् ॥ ३१ ॥ दंष्ट्राभम् ।

Digitized by Google

कीदृग्वाल्मीकिवेश्म कोस्तनमुरोधत्ते सुरैरच्यते
गौः कीदृङ्न कदापि कम्बुरहितं वाञ्छन्ति कां योषितः ॥२१॥
कीदृक् पान्थकुलन्तमोहरति का किञ्चक्रसम्बोधनं
रम्या चम्पकशाखिनां कथय का कपाटजर्थं भवेत् ।
किं चित्रं वलिवैरिणा मुररिपोः कान्ता श्मशानेस्ति का
क्ष्मा कीदृग् भवति स्म पूर्वमधुना कीदृक् पुनर्वर्त्तते ॥ २२ ॥

अजरामशुभाचारवलिशीलविनोदिता ।
भुजङ्गमनिभासारकलिकालजनोषिता ॥ २३ ॥

गोमूत्रजातिः ।

अ ज रा म शु भा चा र व लि शी ल वि नो दि ता
भु ज ङ्ग म नि भा सा र क लि का ल ज नो षि ता

इति गोमूत्रिकाबन्धः ।

वर्णैरेकेन वा द्वाभ्यां सर्वैर्वा सर्वदिग्गतैः ।
उत्तरैः सर्वतोभद्रं दुष्करं तदिदं यथा ॥ २४ ॥

कस्त्यागी धातुरन्तास्तव रिपुहृदि का भूषणं के स्तनानां
को दुःखी कस्य शब्दो वदति वद शुचन्नौरिपू ख्यातवीर्य्यौ ।
शृङ्गारी कीदृशः का रणशिरसि भयाङ्गमाप्नोति सेना
को दानार्थाभिधायी शिर सिशिरसि कौ युध्यतः संप्रहृत्य॥२५॥
कीदृक्तोयार्थिनी स्त्री भवति मदकरः प्रायशः को दुराध्ये
कस्मिन्मन्दायतेऽसौ नियतमुडुपतिः प्रेयसी का मुरारेः ।
विख्यातौ वाहनौ कौ द्रुहिणमुरभिदोः कीदृगाखेटकस्त्री
कीदृक्सैवाचिराभा समिति गतभयाः के गतौकस्य धातुः॥२६॥

काकस्येव पदं यस्य यत्तत्काकपदं मतम्।
तिर्य्यगन्योन्यरेखाभिर्गोमूत्री द्विपदीद्वये ॥ १९ ॥

कुतः कः सम्प्राप्तीदृक् कथय विषवैद्य स्फुटमिदं
रिपोः कः कीदृक्षो भवति वशगः कस्य करभः।
प्रवीणः सम्बोध्यः सुभग ! वद को रत्नवचनो
सुरूपे विख्यातिं जगति महती का गतवती ॥ २० ॥

नागदरतः। नागतनयः। नागरमणी। इति काकपदजातिः।



कामाद्युवतीममङ्गलवती कीदृग्ग्रहाणां गतिः
सम्बोध्या वत मत्स्यविधनपरः कीदृग्भवेत्पामरः।

Digitized by Google

वर्णद्वयद्वयैकैकदलभूतदलाष्टकम् ।
सर्वोत्तराद्यवर्णेन पद्मं स्यात् क्षतकर्णिकं ॥ १६ ॥

पुष्पाम्भा वद कीदृशः सरसिजैः के मोदिताः कीदृशः
तद्वैरीगतचक्षुषः कुलमभूत् कीदृक् त्वया के जिताः ।
बद्धालिः सलिलाशयः कथय भोः कीदृक् च आक्षेपवाक्
शब्दः कुत्र न तस्करादिकभयं दत्ते भवेत्प्रायशः ॥ १७ ॥

अप्पित्तं गवि कीदृशं निगदितो मुक्तः पुमान् कीदृशः
कस्माद्बिभ्यति कौशिका भुवि क्षतः कीदृक् त्वया तस्करः ।
हस्ती स्यान्ननु कीदृशो बहुमतः श्रोष्योरवः कीदृशः
कीदृक्षः पुरुषः पराप्रतिहतः कीदृक् भवेद्वासुकिः ॥१८॥

अलयः अपश्यत् अबन्धः अहस्तः अगजः अहीनः

इति पद्मोत्तरजातिः ।

बभार हरिरम्बुधेरुपरि काञ्च केन स्तुते
हतः कथय कस्त्वया नगपते भयं कीदृशात् ॥ १० ॥

विषमपादनिकुञ्जगताह्वितः।

हरिर्वहति कान्यवास्त्वरिषु का गता कश्वकम्
कमर्चयति रोगवान् धनवती पुरी कीदृशी।
हरिः कमधरद्बलिप्रभृतयो धरां किं व्यधुः
कया सदसि कस्त्वया वद जितोऽम्बुधिः कीदृशः ॥ ११ ॥
कुम्भीरमीनमकरागमदुर्गवारिः। इति पादोत्तरजातिः।

चत्वार्य्यराणि पादाभ्यां नेमिं पादद्वयेन च।
लिखित्वा दक्षिणावर्त्तं चक्रं प्रश्नमवेहि मे ॥ १२ ॥

कंचौरस्य च्छिनत्ति क्षितिपतिरनघः किं पदं वक्ति कुक्षौ
क्षोणीसम्बोधनं किं वदति कमलभूः काच विश्वं बिभर्त्ति।
चक्राङ्गामन्त्रणं किं कथमपि सुजनः किं न कुर्यादनार्य्यं
कीदृग्भीतुः पुरं स्यात्पयसि वद कुतो मीनपंक्तिर्बिभेति ॥१३॥
किं स्वच्छं शारदं स्याद्वदति वृषगतिः कोऽशुमालीपवित्रः
कोऽस्मिन् किं जीवनं कां विरचयति कविर्वह्निसम्बोधनं किम्।
गाकांक्षन्ति स्त्रियः कन्तनुरसुररिपोः कीदृशी कश्च मूकः
सम्यक्प्रीतिस्तडागः प्रियतम! तनुते कीदृशः कीदृशस्ते ॥१४॥

कारंकुकोककुररकलहंसकरम्बितः।
सरोजकोमलोद्गारनीरसंसक्तमारुतः ॥ १५ ॥

इति चक्रजातिः।

Digitized by Google

वर्षोपाख्यद्दुम्भू‍ष्वुः किमसुररिपुणा नन्दगोपालयेऽस्तं
कः प्रालेयाद्रिपुत्रीकुचकलशयुगलुठत्पाविरेवाह्नमौलिः ॥ ५ ॥
कीदृक् कस्येह बन्धुः सुतमपहरत् प्रेयसी का लयान्ते
कीदृग् भीतिं विधत्ते धनुरवनिरुहां कश्चिदामन्त्रयस्व ।
दैत्यः कंसद्विषा कः कथय विनिहतो गद्गदः कः प्रतीतः
कीदृक्कीदृग्वसन्तः प्रियतम ! भवतः प्रीतये नित्यमस्तु ॥ ६ ॥

कोकिलालापवाचालसहकारमनोहरः ।
अशोकस्तवकालीनमत्तालिमधुरस्वनः ॥ ७ ॥

इति श्लोकोत्तरजातिः ।

का चक्रे हरिणा धने क्षपणधीः कीदृग् भुजङ्गेऽस्ति किं
कीदृक् कुम्भसमुद्भवस्य जठरं कीदृग् वियासुर्वधूः ।
श्लोकः कीदृगभीप्सितः सुकृतिनां कीदृङ् नभो निर्मलं
चौर्णीमाश्रय सर्वगं किमुदितं रात्रौ सरः कीदृशम् ॥ ८ ॥
कुमुदवनपरागरञ्जिताम्भो विहितगमागमकोकमुग्धरेखम् ।
वध्वः पृच्छति किं मुरारिशयनं का हन्ति रूपं नृणां
कीदृग्वीरजनश्च कोऽतिगहनः सम्बोधयावञ्चितम् ।
का धात्री जगतो बृहस्पतिवधूः कीदृक् कविः क्वादृतः
कोऽर्थः किं भवता कृतं रिपुकुलं कीदृक् सरो वासरे ॥ ९ ॥
विकचवारिजराजिसमुद्भवोच्छलितभूरिपरागविराजितम् ।

इति खण्डोत्तरजातिः ।

विभर्ति वदनेन किं क इह सत्वपीडाकरं
कुलं भवति कीदृशं गलितयौवनं योषिताम् ।

Digitized by Google

अकारि किं ब्रूहि नरेश सम्यक्
पितृत्वमारोपयितुं स्वकीयम् ॥ ६८ ॥

समजनितनयः । इति वाक्योत्तरजातिः ।

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने
द्वितीयः परिच्छेदः ।

श्लोक एवोत्तरं यत्र तत् श्लोकोत्तरमुच्यते ।
खण्डोत्तरं भवेदर्धं श्लोकात् पादात्तदुत्तरम् ॥ १ ॥

चन्द्रवह्नेऽर्चयन्ति स्फुटरुचि निशि किं कीदृशी दुःखिनी स्त्री
कीदृक् चक्रं सदास्ते क्व च तव विजयी प्रादृषं कीदृशं खम् ।
कामाहुः प्रेतयोग्यां कथय सुकृतिनः कीदृशाः स्युः पुमांसः
कं धत्ते कश्च धत्ते गगनतलमलं प्रेक्षणीयं जनानाम् ॥ २ ॥

प्रश्नः कीदृक् चकास्ति स्फुटनवकुसुमाशोकमासाद्य कान्तं
किं मुञ्चन्त्यम्बुवाहा भवदरिनिवहे संज्वरः किं भवश्च ।
किं नेत्रप्रावृतिःस्यादतिशयलघवः के च को व्रीहिभेदः
प्रायेण प्रावृषेण्याः प्रियतमदिवसाः कीदृशाः कीदृशास्युः॥३॥

अञ्जनाभमहावारिवाहौघनिचिताम्बराः ।
कदम्बकन्दलीकन्दरजः पल्लवायवः ॥ ४ ॥

कुर्यादुद्वेगवन्तं कमपि निशि सरः कीदृशं कास्ति वक्रे
वक्त्रानिन्द्यःकयास्यात् परिषदिनियतं मन्दसम्बोधनं किम् ।

वसन्तमासाद्य वनेषु कीदृशाः
पिकेन राजन्ति रसालभूरुहाः ।
निरस्य वर्णद्वयमत्र मध्यमं
तव द्विषां कान्त्यतमा तिथिश्च का ॥ ३२ ॥
कान्तगिरा । गतप्रत्यागतजातिः ।

आदौ मध्ये तथान्ते वा वर्द्धन्ते वर्णजातयः ।
एकद्वित्र्यादयो यत्र वर्द्धमानाक्षरं हि तत् ॥ ३३ ॥

किमनन्ततया ख्यातं पादेन व्यङ्गमाश्रय ।
जनानां लोचनानन्दं तन्वन्ति घनात्यये ॥३४॥ खञ्जनाः ।

उरःस्थलं कोऽत्र विना पयोधरं
बिभर्त्ति सम्बोधय मारुताशनम् ।
वदन्ति कं पत्तनसम्भवं जनाः
फलञ्च किं गौडवधूकुचोपमम् ॥ ३५ ॥ नागरङ्गम् ।

प्रायेण नीचलोकस्य कः करोतीह गर्वताम् ।
आदौ वर्णद्वयं दत्त्वा ब्रूहि के वनवासिनः ॥ ३६ ॥ शबराः ।
सानुजः काननङ्गत्वा नैकषेयान् जघान कः ।
मध्ये वर्णत्रयं दत्त्वा रावणः कीदृशो वद ॥३७॥ राक्षसोत्तमः ।
धत्ते वियोगिनी गण्डस्थलपाण्डुफलानि का ।
वद वर्णौ विधायान्ते सीता दृष्टा कयाभवत् ॥ ३८ ॥
विष्णोः का वल्लभा देवी लोकत्रितयपावनी । लवलीलया
वर्णमाद्यं तयोर्दत्त्वा कः शब्दसुखवान्वद ॥ ३९ ॥
समानः । इति वर्द्धमानाक्षरजातिः ।

Digitized by Google

हारावी। इति सर्वतोभद्रजातिः।

प्रतिलोमानुलोमाभ्यामुत्तरेण गतागतम्।
मध्यवर्णविलोपेन तच्चानेकप्रकारकम्॥ २७॥
वद वल्लभ सर्वत्र साधुर्भवति कीदृशः भोविन्दे।
नानासिद्धिमि नन्दवेश्मनि काभवत्॥२८॥ दीनरच।
यत्नादन्विष्य का ग्राह्या लेखकैर्मसिमल्लिका।
घनान्धकारनिःशङ्कं मोदते केन बन्धकी॥२९॥ नारिकेरज।

असुरसुरनरेन्द्रैरुह्यते का शिरोभिः
तनुरपि शुचिवस्त्रे कोऽतिविस्तारमेति।
वदति कमलयोनिः सेव्यते केन पुष्पं
मधुरमसृणमृद्वी का भवेदुत्पलस्य॥ ३०॥

	ना	
मा	लि	का
	का	

हिमांशुखण्डं कुटिलोज्ज्वलप्रभं
भवेद्वराहप्रवरस्य कीदृशम्।
विहाय वर्णं पदमध्यसंस्थितं
न किं करोत्येव जिनः करोति किम्॥३१॥ दंष्ट्राभम्।

Digitized by Google

कीदृग्वाल्मीकिवेश्म कोऽस्तनमुरोधत्ते मुरैरुच्यते
गौः कीदृङ् न कदापि कम्बु रहितं वाञ्छन्ति कां योषितः ॥२१॥
कीदृक् पान्थकुलम्तमोहरति का किश्चक्रसम्बोधनं
रम्या चम्पकशाखिनां कथय का कपाटजर्थं भवेत् ।
किं चिह्नं वलिवैरिणा मुररिपोः काह्वा श्मशानेऽस्ति का
क्ष्मा कीदृग् भवति स्म पूर्वमधुना कीदृक् पुनर्वर्त्तते ॥ २२ ॥

अजरामशुभाचारवलिशीलविनोदिता ।
भुजङ्गमनिभासारकलिकालजनोचिता ॥ २३ ॥

गोमूत्रजातिः ।

अ ज रा म शु भा चा र व लि शी ल वि नो दि ता
भु ज ङ्ग म नि भा सा र क लि का ल ज नो चि ता

इति गोमूत्रिकाबन्धः ।

वर्णैरेकेन वा द्वाभ्यां सर्वैर्वा सर्वदिग्गतैः ।
उत्तरैः सर्वतोभद्रं दुष्करं तदिदं यथा ॥ २४ ॥

कस्त्यागे धातुरत्तास्तव रिपुहृदि का भूषणं के स्तनानां
को दुःखी कश्च शब्दो वदति वद शुचक्रौ रिपू ख्यातवीर्य्यौ ।
शृङ्गारी कीदृशः का रणशिरसि भयाद्भङ्गमाप्नोति सेना
को दानार्थाभिधायी शिर सिशिरसि कौ युध्यतः संप्रहृत्य॥२५॥
कीदृक्तोयार्थिनी स्त्री भवति मदकरः प्रायशः को दुराख्ये
कस्मिन्मन्दायतेऽसौ नियतमुडुपतिः प्रेयसी का मुरारेः ।
विख्यातौ वाहनौ कौ द्रुहिणमुरभिदोः कीदृगाखेटकस्त्री
कीदृग्नैवाचिराभा समिति गतभयाः के गतौ कश्च धातुः ॥२६॥

Digitized by Google

काकस्येव पदं यत्र यत्तत्काकपदं मतम् ।
तिर्यगन्योन्यरेखाभिर्गोमूत्री द्विपदीद्वये ॥ १९ ॥

कुतः कः सम्रात्नीदृक् कथय विषवैद्य स्फुटमिदं
रिपोः कः कीदृशो भवति वशगः कश्च करभः ।
प्रवीणः सम्बोध्यः सुभग ! वद कौ रत्नवचनौ
सुरूपे विख्यातिं जगति महती का गतवती ॥ २० ॥

नागदरतः। नागतनयः। नागरमणी। इति काकपदजातिः।



कामाद्युवतीममङ्गलवती कीदृग्ग्रहाणां गतिः
सम्बोध्या वत मत्स्यवेधनपरः कीदृग्भवेत्पामरः ।

Digitized by Google

वर्णद्वयद्वयैकैकदलभूतदलाष्टकम् ।
सर्वोत्तराद्यवर्णेन पद्मं स्यात् क्षतकर्णिकं ॥ १६ ॥

पुष्यामा वद कीदृशः सरसिजैः के मोदिताः कीदृशः
तद्वैरीगतचक्षुषः कुलमभूत् कीदृक् त्वया के जिताः ।
वद्धालिः सलिलाशयः कथय भोः कीदृक् च आक्षेपवाक्
शब्दः कुत्र न तस्करादिकभयं दत्ते भवेत्प्रायशः ॥ १७ ॥

अप्यित्तं गवि कीदृशं निगदितो मुक्तः पुमान् कीदृशः
कस्माद्बिभ्यति कौशिका भुवि क्षतः कीदृक् त्वया तस्करः ।
हस्ती स्यान्ननु कीदृशो वहुमतः शोच्योरणः कीदृशः
कीदृक्षः पुरुषः पराप्रतिहतः कीदृक् भवेद्वासुकिः ॥१८॥

अलयः अपश्यत् अबन्धः अहस्तः अगजः अहीनः

इति पद्मोत्तरजातिः ।

बभार हरिरम्बुधेरुपरि कास्य केन स्तुते

हतः कथय कस्त्वया नगपते भयं कीदृशात् ॥ १० ॥

विषमपादनिकुञ्जगताश्रितः।

हरिर्वहति कान्यवास्त्वरिपु का गता कश्चका

कमर्चयति रोगवान् धनवती पुरी कीदृशी।

हरिः कमधरद्वलिप्रभृतयो धरां किं व्यधुः

कया सदसि कस्त्वया वद जितोऽम्बुधिः कीदृशः ॥ ११ ॥

कुम्भीरमीनमकरागमदुर्गवारिः। इति पादोत्तरजातिः।

चत्वार्यराणि पादाभ्यां नेमिं पादद्वयेन च।

लिखित्वा दक्षिणावर्त्तं चक्रं प्रश्नमवेहि मे ॥ १२ ॥

कंचौरस्य च्छिनत्ति क्षितिपतिरनघः किं पदं वक्ति कुक्षां

क्षोणीसम्बोधनं किं वदति कमलभूः काच विश्वं बिभर्त्ति।

चक्राङ्गामन्त्रणं किं कथमपि सुजनः किं न कुर्यादनार्यं

कीदृग्भीतुः पुरं स्यात्पयसि वद कुतो मीनपंक्तिर्बिभेति ॥१३॥

किं स्वच्छं शारदं स्याद्वदति वृषगतिः कोऽक्षमालोपविष्टः

कोऽस्मिन् किं जीवनं कां विरचयति कविर्वक्तिसम्बोधनं किम्।

गाङ्गांचन्ति स्त्रियः कम्तनुरसुररिपोः कीदृशी कश्च मूकः

सम्यक्प्रीतिस्तडागः प्रियतम! तनुते कीदृशः कीदृशस्ते ॥१४॥

करंकुकोककुररकलहंसकरम्बितः।

सरोजकोमलोद्गारनीरसंसक्तमारुतः ॥ १५ ॥

इति चक्रजातिः।

Digitized by Google

वर्षीपाल्यहन्मूषु: किमसुररिपुणा नन्दगोपालवेऽस्तं
कः प्रालेयाद्रिपुत्रीकुचकलशलुठत्पार्श्वरेखाङ्कमौलिः ॥ ५ ॥
कीदृक् कस्येह बन्धुः सुजातमपहरत् प्रेयसी का स्याद्ये
कीदृग् भीतिं विधत्ते धनुरवनिरुहां कश्चिदामन्त्रयस्व ।
दैत्यः कंसद्विषा कः कथय विनिहतो गद्गदः कः प्रतीतः
कीदृक्कीदृग्वसन्तः प्रियतम ! भवतः प्रीतये नित्यमस्तु ॥ ६ ॥

कोकिलालापवाचालसहकारमनोहरः ।
मग्नोकास्तवकालीनमत्तालिमधुरस्वनः ॥ ७ ॥

इति श्लोकोत्तरजातिः ।

का चक्रे हरिणा धने कृपणधीः कीदृग् भुजङ्गोऽस्ति किं
कीदृक् कुम्भसमुद्भवस्य जठरं कीदृग् यियासुर्वधूः ।
श्लोकः कीदृगभीप्सितः सुकृतिनां कीदृङ् नभो निर्मलं
चीचीमाश्रय सर्वगं किमुदितं रात्रौ सरः कीदृशम् ॥ ८ ॥
कुमुदवनपरागरञ्जिताम्भो विहितगमागमकोकमुग्धरेखम् ।
वध्वः पृच्छति किं मुरारिशयनं का हन्ति रूपं नृणां
कीदृग्वीरजनस्य कोऽतिगहनः सम्बोधयावञ्चितम् ।
का धात्री जगतो बृहस्पतिवधूः कीदृक् कविः क्वादृतः
कोऽर्थः किं भवता कृतं रिपुकुलं कीदृक् सरो वासरे ॥ ९ ॥
विकचवारिजराजिसमुद्भवोच्छलितभूरिपरागविराजितम् ।

इति खण्डोत्तरजातिः ।

बिभर्ति वदनेन किं क इह सत्वपीडाकरं
कुलं भवति कीदृशं गलितयौवनं योषिताम् ।

अकारि किं ब्रूहि नरेश सम्यक्
पिष्टत्वमारोपयितुं स्वकीयम् ॥ ६८ ॥
समजनितनयः। इति वाक्योत्तरजातिः।

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने
द्वितीयः परिच्छेदः।

श्लोक एवोत्तरं यत्र तत् श्लोकोत्तरमुच्यते।
खण्डोत्तरं भवेदर्धं श्लोकात् पादात्तदुत्तरम् ॥ १ ॥
कान्दवह्नेऽर्चयन्ति स्फुटरुचि निशि किं कीदृशी दुःखिनी स्त्री
कीदृक् चक्रं सदास्ते क्व च तव विजयी प्रावृषं कीदृशं स्वम्।
कामाहुः प्रेतयोग्यां कथय सुकृतिनः कीदृशाःस्युः पुमांसः
कं धत्ते कश्च धत्ते गगनतलमलं प्रेक्षणीयं जनानाम् ॥ २ ॥
अन्यः कीदृक् चकास्ति स्फुटनवकुसुमाशोकमासाद्य कान्तं
किं मुञ्चन्त्यम्बुवाहा भवदरिनिवहे संज्वरः किं भवश्च।
किं नेत्रप्रावृतिःस्यादतिशयलघवः के च को शौष्टिभेदः
प्रायेण प्रावृषेण्याः प्रियतमदिवसाः कीदृशाः कीदृशास्युः॥३॥
अञ्जनाभमहावारिवाहौघनिचिताम्बराः।
कदम्बकन्दलीकान्दरजः पक्ष्मलवायवः ॥ ४ ॥
कुर्यादुद्वेगवन्तं कमपि निशि सरः कीदृशं कास्ति वक्त्रे
ग्लानिन्यःकयास्यात् परिषदिनियतं मन्दसम्बोधनं किम्।

कटुतैलमिश्रितोगुड़ो नियतं
विनिहन्ति कं त्रिगुणसप्तदिनैः ॥६४॥ श्वासरोगम्।
कीदृक् प्रातर्दीपवर्त्तेः शिखा स्यात्
उष्ट्रः पृच्छत्याभजन्ते मृगाः किम्।
देवामात्ये किं गते प्रायशोऽस्मिन्
लोकः कुर्य्यान्नो विवाहं विवित्तः॥ ६५ ॥

विभाकरभवनम्।

वर्णएवोत्तरं यत्र तद्वर्णोत्तरमुच्यते
वाक्यं यत्रोत्तरं तत्तु वाक्योत्तरमिति स्मृतम्॥ ६६ ॥
को ग्रहू भुवि विख्यातो शोकं वदति किं पदम्।
कोऽभीष्टोऽत्र दरिद्रस्य सेवन्ते के च भिक्षुभिः॥६७॥

विहासः।

किं कुर्व्वन्ति पयोवाहाः कीदृशी हरिवल्लभा।
पूजायां किं पदं कोऽग्निः कः कृष्णेन हतो रिपुः॥६८॥

कंसासुरः। इति वर्णोत्तरजातिः।

दधौ हरिः कं शुचि कीदृगम्भ
पृच्छत्यकः किं कुरुते सशोकः।
शोकं विधायापि किमित्युदारः
कविर्न तोषं समुपैति भूयः॥ ६९ ॥

आगमकमकरोदिति।

सम्भोधरः पृच्छति कीदृशः स्यात्
नृपः समस्तैरपि दुर्निवारः।

कः पूज्यः कः प्रमाणेभ्यो न प्रभाकरसम्मतः ॥ ५७ ॥

अभावः ।

के प्रवीणाः कुतो क्षीनं जीर्णं वासोऽग्रमांश्च कः ।

निराकरिष्णवो वाह्यं योगाचाराश्च कीदृशाः ॥ ५८ ॥

विज्ञानवादिनः । तार्क्वजातिः ।

को नयति जगदशेषं क्षयमथ बिभराम्बभूव कं विष्णुः ।

नीचः कुत्र सगर्वः पाणिनिसूत्रञ्च कीदृक्षम् ॥ ५९ ॥

यमोगम्धने ।

किं स्याद्विशेष्यनिष्ठं का संख्या वदत पूरणी भवति ।

नीचः केन सगर्वः सूत्रं चन्द्रस्य कीदृक्षम् ॥ ६० ॥

विशेषणमेकार्थेन । इति सौत्रजातिः ।

न श्लाघते खलः कस्मै सुप्तिङन्तं किमुच्यते ।

लादेशानां नवानाञ्च तिङां किं नाम कथ्यताम् ॥ ६१ ॥

परस्मैपदम् ।

सततं श्लाघते कस्मै नीचोभुवि किमुत्तमम् ।

कर्त्तर्य्यपि रुचादीनां धातूनां किं पदं भवेत् ॥ ६२ ॥

आत्मनेपदम् ।

किमव्ययतया ख्यातं कस्य लोपो विधीयते ।

ब्रूत शब्दविदो श्लात्वा समाहारः क उच्यते ॥ ६३ ॥

स्वरितः । इति शाब्दीयजातिः ।

जलदात्यये भवति कः समदः

शुभगश्च किं कामधरसुरजित् ।

Digitized by Google

कथय किमकरोरिमां धरित्रीं
नृपतिगुणैर्नृपते ! स्वयं त्वमेकः ॥ ५१ ॥

समरञ्जयम् । लङ् ।

कीदृक् सेना भवति रणे दुर्वारा
वीरः कस्मै स्पृहयति लक्ष्मीमिच्छन् ।
का सम्बुद्धिर्भवति भुवः संग्रामे
किं कुर्व्वीध्वं सुभटजना भ्राढ्यान् ॥ ५२ ॥

पराजयेमहि ।

कंसारातेर्वद गमनं केन स्यात्
कस्मिन् दृष्टिं लभते स्वल्पेच्छुः ।
कं सर्वेषां शुभकरमूचुर्धीराः
किं कुर्य्यास्त्वं सुजन ! सशोकं लोकम् ॥ ५३ ॥

विनोदयेयम् । लिङ् ।

वारणेन्द्रो भवेत् कीदृक् प्रीतये भृङ्गसंहतेः ।
यद्यवक्ष्यं तदास्मै किमकरिष्यमहं धनम् ॥ ५४ ॥

समदास्यः ।

काले देशे यथा युक्तं नरः कुर्व्वन्नुपैति काम् ।
भुक्तवन्तावलसैतां किमवमकरिष्यताम् ॥ ५५ ॥

अशयिष्यताम् । लृङ् । इति नामाख्यातजातिः ।

प्रियन्तात्वर्दृशा ताक्ष्यं सीतं सूनोत्तरैस्तथा ।
शाब्दीयं शब्दसंज्ञाभिः शास्त्रजं शास्त्रभाषया ॥५६॥

हिमानीक्षगिरी स्यातां कीदृशी शशिभास्करौ ।

प्रयास्यति । ऌट् ।

विद्यन्त इति समानार्थः शब्दः कोऽचिरयति मुद्रां किम् ।
कथमपि यदि कोपः स्यात्त्वां सुजनः किं करोतु वद ॥ ४६ ॥

सन्त्यजतु ।

मेघात्यये भवति का सुभगावगाह्या
वृत्तं वसन्ततिलकं कियदक्षराणाम् ।
भो भोः कदर्थपुरुषा विषुवद्दिने च
विस्तश्च नः सुबहु तत् क्रियतां किमेतत् ॥ ४७ ॥

मद्दीयतां । लोट् ।

का माद्यति मकरन्दैः तनयं कमसूत जनकराजसुता ।
कथय कृषीवल ! सस्यं पक्वं किमचीकरस्त्वमपि ॥ ४८ ॥

अलीलवम् ।

पृच्छति पुरुषः केऽस्यां समभूवन्व्यक्तसप्ततयः ।
बहुभयदेशं जिगमिषुरे काकी वार्य्यते च कथम् ॥ ४९ ॥

मानवनगाः कथम् । लुङ् ।

किमकरवमहं हरिमैक्षीधं
स्वभुजबलेन गवां हितं विधित्सुः ।
प्रियतम वदने न पीयते कः
परिणतबिम्बफलोपमः प्रियायाः ॥ ५० ॥ अधरः ।
परिहरति भयात्तवाहितः किं
कमम कदापि न विन्दतीह भीतः ।

Digitized by Google

वदति राममसुं अवन्ध्यओ
वसति कुत्र सदाखसमानसः।
अपि च मक्रमुतेन तिरस्कृतो
रविसुतः किमसौ विदधे त्वया ॥ ४० ॥ मनुजम्महे।
भवति ममनयोस्त्वा कीदृशी भूरवाणां
किमतिमधुरमन्नभोजनान्ते प्रदेयम्।
प्रियतम! वद नौषामन्त्रणे किं पदं स्यात्
कुमतिजनविवादाश्रक्रिरे किं समर्थैः ॥ ४१ ॥

समादधिरे। लिट्।

वदतानुत्तमवचनं ध्वनिवचैरुच्यते स कीदृक्षः।
तव सुहृदो गुणनिवहैरिपुनिवहं किं नु कर्त्तारः ॥ ४२ ॥

अवसन्तारः।

कीदृशोऽयं दुस्तरं स्यात्तितीर्षोः
का पूज्यास्मिन् खङ्गमामन्त्रयस्व।
दृष्ट्वा धूमं दूरतो मां कविज्ञाः
किं कर्त्तास्मि प्रातरेवाश्रयाश्रम् ॥ ४३ ॥

अनुमातासे। लुट्लकारः।

कामुकाःस्युः कया नौकाः सर्वः कस्मिन् प्रमोदते।
अर्थिनः प्राप्य पुण्याहं करिष्यध्वे वसूनि किम् ॥ ४४ ॥

दास्यामहे।

को दुःखी सर्वकार्येषु किं भयार्थस्य वाचकम्।
यो यत्र विरतो नित्यन्ततः किं स करिष्यति ॥ ४५ ॥

Digitized by Google

नाधा इति भवेच्छब्दो नौवाची वद कीदृशः ॥ ३४ ॥

सावधानाः। इति विषमजातिः।

गतक्लेशायासाः विमलमनसः कुत्र मुनयः
तपस्यन्ति स्वस्थाः मुररिपुरिपोः का च दयिता !
कविप्रेयः किं स्यान्नवलघुयुतैरष्टगुरुभिः
बुधावृत्तं वर्णैः स्फुटघटितबन्धं कथयत ॥ ३५ ॥

शिखरिणी।

उरसि मुरभिदः का गाढमालिङ्गितास्ते
सरसिजमकरन्दामोदिता नन्दने का।
गिरिसमलघुवर्णैरष्टवाख्यातिसंख्यैः
गुरुभिरपि लता का छन्दसां वृत्तिरम्या ॥ ३६ ॥

मालिनी। इति वृत्तनामजातिः।

एकमेवोत्तरं यत्र सुश्लिष्टत्वाद्द्विधा भवेत्।
सुप्तिङन्तप्रभेदेन नामाख्यातन्तदुच्यते ॥ ३७ ॥

समरशिरसि सैन्यं कीदृशं दुर्निवारं
विगतघननिशीथे कीदृशे व्योम्नि शोभा।
कमपि विधिवशेन प्राप्य योग्याभिमानं
जगदखिलमनिन्द्यन्दुर्जनः किं करोति ॥ ३८ ॥

अभिभवति।

पदमनन्तरवाचि किमिष्यते कपिपतिर्विजयी ननु कीदृशः।
परगुणं गदितुं गतमत्सराः कुरुत किं सततं भुवि सज्जनाः॥३८॥

अनुसरामः। लट्।

Digitized by Google

कस्मिन्वसन्ति वद मीनगणा विकल्पं
किं वा पदं वदति किं कुरुते विवस्वान्।
विद्युल्लतावलयवान् पथिकाङ्गनानाम्
उद्वेजको भवति कः खलु वारिवाहः॥ २७॥

शब्दः प्रभुगत इति प्रचुराभिधायी
कीदृग् भवेद्वदत शब्दविदो विचिन्त्य।
कीदृग् बृहस्पतिमते विदिताभियोगः
प्रायः पुमान् भवति नास्तिकवर्गमध्यः॥ २८॥

इत्यन्तोत्तरजातिः।

पदान्तरादिसम्बन्धात् प्रश्नवाक्येऽपि संस्थितम्।
कथितापह्नुतिः सा स्याल्लक्ष्यते यत्र नोत्तरम्॥ २९॥

पृथ्वीसम्बोधनं कीदृक् कविना परिकीर्त्तितम्।
केनेदं मोहितं विश्वं प्रायः केनाप्यते यशः॥ ३०॥

कस्य मरौ दुरधिगमः कमले कः कथय विरचितावासः।
कैस्तुष्यति चामुण्डा रिपवस्ते वद कुतो भ्रष्टाः॥ ३१॥

इति कथितापह्नुतिजातिः।

यत्र भङ्गस्य वैषम्यं विषमन्तन्निगद्यते।
वृत्तं नामोत्तरं यत्र प्रश्नं तद्वृत्तनामकम्॥ ३२॥

कीदृग्वनं स्यान्न भयाय पृष्टे यदुत्तरं तस्य च कीदृशस्य।
नाम्ना भवेदौषधजातमम्बु कां चाधिशेते गवि कोऽर्चनीयः॥३३॥

अहिंस्रमहिमः।

प्रायः कार्य्ये न मुह्यन्ति नराः सर्व्वत्र कीदृशाः।

Digitized by Google

कासारसहिता ।

चादय इति यत्र स्यादुत्तरमथ तत्र कीदृशः प्रश्नः ।
कथय त्वरितं के सुर्नौकाया वाहनोपायाः ॥ १८ ॥
केनिपाताः । इति पृष्टप्रश्नजातिः ।

कथयामुकमित्यादि भंक्ता यत्रोत्तरं भवेत् ।
भग्नोत्तरं तदिच्छन्ति काकुमात्रेण गोपितम् ॥ १९ ॥
भवत इवातिस्वच्छं कस्याभ्यन्तरमगाधमतिशिशिरम् ।
काव्यामृतरसमग्नस्त्वमिव सदा कः कथय सरसः ॥ २० ॥
वीरे सरुषि रिपूणां नियतं का हृदयशालिनी भवति ।
नभसि प्रस्थितजलदे का राजति देव ! वद तारा ॥ २१ ॥
इति भग्नोत्तरजातिः ।

यत् पृष्टं प्रश्नवाक्ये स्यादादिमध्यान्तसंस्थितम् ।
उत्तरं तत् त्रिधा प्रोक्तमादिमध्यान्तसंश्रितम् ॥ २२ ॥
भ्रमरहितः कीदृक्षो भवतितरां विकसितः पद्मः ।
ज्योतिषि कः कीदृक्षः प्रायो भुवि पूज्यते लोकैः ॥ २३ ॥
प्रभवः को गङ्गाया नगपतिरतिसुभगशृङ्गधरः ।
के सेव्यन्ते सेवकसार्थैरत्यर्थमर्थरतैः ॥२४॥ आद्युत्तरजाति।
अयमुदितो हिमरश्मिर्वनितावदनस्य कीदृशः सदृशः ।
नीलादिकोपलम्भः स्फुरति प्रत्यक्षतः कस्य ॥ २५ ॥
गैरिकमनःशिलादिः प्रायेणोत्पद्यते कुतो न गतः ।
यः खलु न चलति पुरुषः स्थानादुक्तः स कीदृक्षः ॥ २६ ॥
इति मध्योत्तरजातिः ।

Digitized by Google

पार्थस्य कीदृशमरिंदावहुताशनोऽभूत्
का मालतीकुसुमदाम हरस्य मूर्ध्नि ॥ ९ ॥
भागीरथी । रूपकं सालङ्कारजातिः ।

लघुवृत्तेन यत् पृष्टं प्रभूताक्षरमुत्तरम् ।
सकौतुकमितीच्छन्ति तद्विदस्तदिदं यथा ॥ १० ॥
के स्थिराः के प्रियाः स्त्रीणां कोऽप्रियोनक्षमाश्रय ।
वृत्यभूः कीदृशी रम्या नदी कीदृग्वनागमे ॥ ११ ॥
अगाधवारिपूरजनिततरङ्गाः ।
का कृता विष्णुना कीदृग्योषितां कः प्रशस्यते ।
असेव्यः कीदृशः स्वामी को निहन्ति निशातमः ॥ १२ ॥
कुमुदवनवान्धवोदयः । इति सकौतुकजातिः ।

प्रश्नवर्णश्रुतेस्तुल्यं यत्र स्यादुत्तरं वरम् ।
प्रश्नोत्तरसमन्तज्ज्ञास्तदाहुः श्रयतां यथा ॥ १३ ॥
कन्दर्पं मदजनकं प्राहुः काचघटी मदिताच्छतमेह ।
इत्यादि प्रश्ने युक्तं यद्ब्रूत तदुत्तरमाशु विचिन्त्य ॥ १४ ॥
पथिकस्तिष्ठति कष्टं विरही नाविक आस्ते तत्कृतरवः ।
इत्यादि प्रश्ने युक्तं यद्ब्रूहि तदुत्तरमुत्तमपूरुष ! ॥ १५ ॥
इति प्रश्नोत्तरसमजातिः ।

यस्मिन्नुत्तरमुच्चार्य्य प्रश्नस्तस्यैव पृच्छ्यते ।
पृष्टप्रश्नं तदिच्छन्ति प्रश्नोत्तरविदो यथा ॥ १६ ॥
लक्ष्मीत्युत्तरं यत्र प्रश्नः स्यात्तत्र कीदृशः ।
ग्रीष्मे द्विरदवृन्दाय वनाली कीदृशी हिता ॥ १७ ॥

त्वया वैरिकुलं वीर! समरे कीदृशं कृतम् ॥ ३ ॥

सकलङ्कम् । इति भेद्यभेदकजातिः ।

दीर्घवृत्तेन यत् पृष्टमुत्तरं कियदक्षरम् ।
तदोजस्वीति विख्यातमूर्जितं चेति केचन ॥ ४ ॥

कामिन्यास्तनभारमन्थरगतेर्लीलाचलच्चक्षुषः
कन्दर्पैकविलासनित्यवसतेः कीदृक् पुमान्वल्लभः ।
हेलाकृष्टकृपाणपाटितगजानीकात् कुतस्तेऽरयः
श्वासायासविशुष्ककण्ठकुहरा निर्यान्ति जीवार्थिनः ॥ ५ ॥

समरतः ।

दैत्यारातिरसौ वराहवपुषा कामुज्जहाराम्बुधेः
का रूपं विनिहन्ति को मधुवधूवैधव्यदीक्षागुरुः ।
स्वच्छन्दं नवशल्लकीकवलनैः पम्पासरोमज्जनैः ।
के विन्ध्याद्रिवने वसन्त्यभिमतक्रीडाभिरामस्थिताः ॥ ६ ॥

कुञ्जराः इत्योजस्विजातिः ।

उपमादिरलङ्कारो बहुधा परिकीर्त्तितः ।
यत्नेन कथ्यते सार्द्धं सालङ्कारं तदुच्यते ॥ ७ ॥

कल्याणवाक् त्वमिव किं पदमत्र कान्तं
सद्भूपतेस्त्वमिव कः परितोषकारी ।
कः सर्वदा वृषगतिस्त्वमिवातिमान्यं
भूत्याश्रितः कथय पालितसर्वभूतः ॥ ८ ॥ शङ्करः ।

सूर्यस्य का तिमिरकुञ्जरवृन्दसिंही
सत्यस्य का सुकृतवारिधिचन्द्रलेखा ।

प्रावृषि कस्य न गमनं मानसगमनाय कीदृशा हंसाः ॥५५॥

समुत्सुकमनसः।

इति शब्दार्थलिङ्गवचनभिन्नम्। इति प्रभिन्नकजातिः।

अर्थमात्रैकभेदेन भिन्नं वध्नन्ति केचन।
सुकुमाराधियस्तत्र विदग्धैर्नाहृतं यथा ॥ ५६ ॥

आनन्दयति कीत्यर्थं सज्जनानिव भूतले।
प्रबोधयति पद्मानि तमांसि च निहन्ति कः ॥ ५७ ॥

मित्रोदयः।

अटवी कीदृशी प्रायो दुर्गमा भवति प्रिये।
प्रियस्य कीदृशी कान्ता तनोति सुरतोत्सवम् ॥ ५८ ॥

मदनवती।

भिन्नाववश्यं कर्त्तव्यौ शब्दार्थौ प्रश्नकोविदैः।
लिङ्गादिषु यथा शक्तिभेदमाहुर्विपश्चितः ॥ ५९ ॥

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने
प्रथमः परिच्छेदः।

विशेषणं विशेष्यञ्च यत्र प्रश्ने विधीयते।
भेद्यभेदकमाहुस्तं प्रश्नं प्रश्नविदो यथा ॥ १ ॥

कीदृक् किं स्यात्र मत्स्यानां हितं स्वेच्छाविहारिणाम्।
गुणैःपरेषामत्यर्थं मोदते कीदृशः पुमान् ॥ २ ॥ विमत्सरः।

अगस्त्येन पयोराशेः कियत् किं पीतमुज्झितम्।

Digitized by Google

का वा विडम्बयति चारचमत्प्रवेशा:।
दुर्व्वारवीर्य्यविभवस्य रणे भवेत् कः
काः शेरवत्सुभगास्तरणिप्रभाभिः॥५०॥ सरोजराजयः।

पृच्छति शिरोरुहो मधुमथनं
मधुमथनस्तं शिरोरुहश्च।
कः खलु चपलतया भुवि विदितः
का ननु यामलतया गवि विदिताः॥ ५१॥

केशवनौकाः। इति शब्दार्थविभक्तिवचनभिन्नम्।

न भवति मलयस्य कीदृशी भूः
क इह कुचं न बिभर्त्ति कां गता स्त्रीः।
भवदरिनिवहेषु कास्ति नित्यं
बलमथनेन विपद् व्यधायि केषाम्॥५२॥ विपक्षगानाम्।

समयमिह वदन्ति कं निशीथं
शमयति कान् वद वारिवाहवृन्दम्।
वितरति जगतां मनःसु कीदृक्
मुदमतिमात्रमयं महातड़ागः॥ ५३॥ अरविन्दवान्।

इति शब्दार्थविभक्तिवचनभिन्नम्।

कीदृक्षं समिति बलं निहन्ति शत्रं
विष्णोः का मनसि मुदं सदा तनोति।
तुच्छं सच्छरभिसुखं निबध्यते किं
पल्लवैः सममपमान एव केषु॥ ५४॥ अभिमानिषु।

घनसमये शिखिषु स्वामृतं कीदृक्षु किं घनात् पतति।

वदति राममसुष्य अवन्वजो
वसति कुत्र सदासमानसः ।
अपि च मन्त्रसुतेन तिरस्कृतो
रविसुतः किमसौ विदधे त्वया ॥ ४० ॥ अनुजग्मड़े ।
भवति गमनयोग्या कीदृशी भूरथानां
किमतिमधुरमन्नंभोजनान्ते प्रदेयम् ।
प्रियतम ! वद नौचामन्त्वे किं परं स्यात्
कुमतिजनविवादाधिरि किं समर्थैः ॥ ४१ ॥
समादधिरे । लिट् ।
वदतामुत्तमवचनं ध्वनिश्चेवच्यते स कीदृक्षः ।
तव सुहृदो गुणनिवहैरिपुनिवहं किं नु कर्त्तारः ॥ ४२ ॥
अवमन्तारः ।
कीदृक्षोऽयं दुस्तरं स्यात्तितीर्षोः
का पूज्यास्मिन् खड्गमामन्त्रयस्व ।
दृष्ट्वा धूमं दूरतो मार्गविज्ञाः
किं कर्त्तास्मि प्रातरेवाश्रयाश्रम् ॥ ४३ ॥
अनुमातासे । लुट्लकारः ।
कामुकाःस्युः कया नौचाः सर्वः कस्मिन् प्रमोदते ।
अर्थिनः प्राप्य पुण्याहं करिष्यध्वे वसूनि किम् ॥ ४४ ॥
दास्यामहे ।
को दुःखी सर्वकार्येषु किं मृग्यार्थस्य वाचकम् ।
यो यत्र विरतो नित्यन्ततः किं स करिष्यति ॥ ४५ ॥

Digitized by Google

गाथा इति भवेच्छन्दो गीवाची वद कीदृशः ॥ ३४ ॥

सावधानाः । इति विषमजातिः ।

गतक्लेशायासाः विमलमनसः कुत्र मुनयः
तपस्यन्ति स्वस्थाः सुररिपुरिपोः का च दयिता ।
कविप्रेयः किं स्यान्नवलघुयुतैरष्टगुरुभिः
बुधावृत्तं वर्णैः स्फुटघटितबन्धं कथयत ॥ ३५ ॥

शिखरिणी ।

उरसि मुरभिदः का गाढमालिङ्गितास्ते
सरसिजमकरन्दामोदिता नन्दने का ।
गिरिसमलघुवर्णैरर्णवाख्यातिसंख्यैः
गुरुभिरपि कृता का छन्दसां वृत्तिरम्या ॥ ३६ ॥

मालिनी । इति वृत्तनामजातिः ।

एकमेवोत्तरं यत्र सुश्लिष्टत्वाद्द्विधा भवेत् ।
सुप्तिङन्तप्रभेदेन नामाख्यातन्तदुच्यते ॥ ३७ ॥

समरशिरसि सैन्यं कीदृशं दुर्निवारं
विगतघननिशीथे कीदृशे व्योम्नि शोभा ।
कमपि विधिवशेन प्राप्य योग्याभिमानं
जगदखिलमनिन्द्यन्दुर्जनः किं करोति ॥ ३८ ॥

अभिभवति ।

पदमनन्तरवाचि किमिष्यते कपिपतिर्विजयी ननु कीदृशः ।
परगुणं गदितुं गतमत्सराः कुरुत किं सततं भुवि सज्जनाः॥३८॥

अनुसरामः । लट् ।

Digitized by Google

कस्मिन्वसन्ति वद मीनगणा विकल्पं
किं वा पदं वदति किं कुरुते विवस्वान् ।
विद्युल्लतावलयवान् पथिकाङ्गनानाम्
उद्वेजको भवति कः खलु वारिवाहः ॥ २७ ॥
शब्दः प्रभूगत इति प्रचुराभिधायी
कीदृग् भवेद्वदत शब्दविदो विचिन्त्य ।
कीदृग् बृहस्पतिमते विहिताभियोगः
प्रायः पुमान् भवति नास्तिकवर्गमध्यः ॥ २८ ॥

इत्यन्तोत्तरजातिः ।

पदान्तरादिसम्बन्धात् प्रश्नवाक्येऽपि संस्थितम् ।
कथितापह्नुतिः सा स्याल्लक्ष्यते यत्र नोत्तरम् ॥ २९ ॥
पृथ्वीसम्बोधनं कीदृक् कविना परिकीर्त्तितम् ।
केनेदं मोहितं विश्वं प्रायः केनाप्यते यशः ॥ ३० ॥
कस्य मरौ दुरधिगमः कमले कः कथय विरचितावासः ।
केसुष्यति चामुण्डा रिपवस्ते वद कुतो भ्रष्टाः ॥ ३१ ॥

इति कथितापह्नुतिजातिः ।

यत्र भङ्गस्य वैषम्यं विषमन्तन्निगद्यते ।
वृत्तं नामोत्तरं यत्र प्रश्नं तद्वृत्तनामकम् ॥ ३२ ॥
कीदृग्वनं स्यान्न भयाय पृष्टे यदुत्तरं तस्य च कीदृशस्य ।
वाच्यं भवेदौषधजातमम्बु कं चाधिशेते गवि कोऽर्चनीयः॥३३॥

अहिंस्रमहिमः ।

प्रायः कार्य्ये न मुह्यन्ति नराः सर्वत्र कीदृशाः ।

Digitized by Google

कासारसहिता ।

वादय इति यत्र स्यादुत्तरमथ तत्र कीदृशः प्रश्नः ।
कथय त्वरितं के स्युर्नौकाया वाहनोपायाः ॥ १८ ॥
केनिपाताः । इति पृष्टप्रश्नजातिः ।

कथयामुकमित्यादि भंक्ता यत्रोत्तरं भवेत् ।
भग्नोत्तरं तदिच्छन्ति काकुमात्रेण गोपितम् ॥ १९ ॥
भवत इवातिस्वच्छं कस्याभ्यन्तरमगाधमतिशिशिरम् ।
काव्यामृतरसमग्नस्त्वमिव सदा कः कथय सरसः ॥ २० ॥
वीरे सरुषि रिपूणां नियतं का हृदयशालिनी भवति ।
नभसि प्रस्थितजलदे का राजति देव ! वद तारा ॥ २१ ॥
इति भग्नोत्तरजातिः ।

यत् पृष्टं प्रश्नवाक्ये स्यादादिमध्यान्तसंस्थितम् ।
उत्तरं तत् त्रिधा प्रोक्तमादिमध्यान्तसंश्रितम् ॥ २२ ॥
भ्रमरहितः कीदृक्षो भवतितरां विकसितः पद्मः ।
ज्योतिषि कः कीदृक्षः प्रायो भुवि पूज्यते लोकैः ॥ २३ ॥
प्रभवः को गङ्गाया नगपतिरतिसुभगशृङ्गधरः ।
के सेव्यन्ते सेवकसार्थैरत्यर्थमर्थैरतैः ॥२४॥ आद्युत्तरजाति ।
अयमुदितो हिमरश्मिर्वनितावदनस्य कीदृशः सदृशः ।
नीलादिकोपलम्भः स्फुरति प्रत्यक्षतः कस्य ॥ २५ ॥
गैरिकमनःशिलादिः प्रायेणोत्पद्यते कुतो न गतः ।
यः खलु न चलति पुरुषः स्थानादुक्तः स कीदृक्षः ॥ २६ ॥
इति मध्योत्तरजातिः ।

Digitized by Google

पार्थस्य कीदृग्मरिदावद्गतास्मनोऽभूत्
का मालतीकुसुमदाम हरस्य मूर्ध्नि ॥ ९ ॥
भागीरथी । रूपकं सालङ्कारजातिः ।
लघुवृत्तेन यत् पृष्टं प्रभूताचरमुत्तरम् ।
सकौतुकमितीच्छन्ति तद्विदस्तदिदं यथा ॥ १० ॥
के स्थिराः के प्रियाः स्त्रीणां कोऽप्रियोनक्तमाश्रय ।
नृत्यभूः कीदृशी रम्या नदी कीदृग्घनागमे ॥ ११ ॥
अगाधवारिपूरजनिततरङ्गाः ।
का हता विष्णुना कीदृग्योषितां कः प्रशस्यते ।
असेव्यः कीदृशः स्वामी को निहन्ति निशातमः ॥ १२ ॥
कुमुदवनवान्धवोदयः । इति सकौतुकजातिः ।
प्रश्नवर्णश्रुतेस्तुल्यं यत्र स्यादुत्तरं वरम् ।
प्रश्नोत्तरसमन्तज्ज्ञास्तदाहुः श्रूयतां यथा ॥ १३ ॥
कन्दर्पं मदजनकं प्राहुः काचघटी मदिताच्छतमेह ।
इत्यादि प्रश्ने युक्तं यद्भूत तदुत्तरमाशु विचिन्त्य ॥ १४ ॥
पथिकस्तिष्ठति कष्टं विरही नाविक आस्ते तत्क्षतरचः ।
इत्यादि प्रश्ने युक्तं यद्ब्रूहि तदुत्तरमुत्तमपूरुष ! ॥ १५ ॥
इति प्रश्नोत्तरसमजातिः ।
यस्मिन्नुत्तरमुच्चार्य्य प्रश्नस्तस्यैव पृच्छ्यते ।
पृष्टप्रश्नं तदिच्छन्ति प्रश्नोत्तरविदो यथा ॥ १६ ॥
लक्ष्मणेत्युत्तरं यत्र प्रश्नः स्यात्तत्र कीदृशः ।
ग्रीष्मे द्विरदवृन्दाय वनाली कीदृशी हिता ॥ १७ ॥

Digitized by Google

त्वया वैरिकुलं वीर! समरे कीदृशं कृतम् ॥ ३ ॥
सकलङ्कम् । इति भेद्यभेदकजातिः ।
दीर्घवृत्तेन यत् पृष्टमुत्तरं कियदक्षरम् ।
तदोजस्वीति विख्यातमूर्जितं चेति के चन ॥ ४ ॥
कामिन्यास्तनभारमन्थरगतेर्लीलाचलच्चक्षुषः
कन्दर्पैकविलासनित्यवसतेः कीदृक् पुमान्वल्लभः ।
हेलाकृष्टकृपाणपाटितगजानीकात् कुतस्तेऽरयः
श्वासायासविशुष्ककण्ठकुहरा निर्यान्ति जीवार्थिनः ॥ ५ ॥
समरतः ।
दैत्यारातिरसौ वराहवपुषा कामुज्जहाराम्बुधेः
का रूपं विनिहन्ति को मधुवधूवैधव्यदीक्षागुरुः ।
स्वच्छन्दं नवशल्लकीकवलनैः पम्पासरोमज्जनैः ।
के विन्ध्याद्रिवने वसन्त्यभिमतक्रीडाभिरामस्थिताः ॥ ६ ॥
कुञ्जराः इत्योजस्विजातिः ।
उपमादिरलङ्कारो बहुधा परिकीर्त्तितः ।
यत्र न कथ्यते सार्द्धं सालङ्कारं तदुच्यते ॥ ७ ॥
कल्याणवाक् त्वमिव किं पदमत्र कान्तं
सद्भूपतेस्त्वमिव कः परितोषकारी ।
कः सर्वदा हृषगतिस्त्वमिवातिमात्रं
भूत्यान्वितः कथय पालितसर्वभूत ॥ ८ ॥ शङ्करः ।
सूर्य्यस्य का तिमिरकुञ्जरवृन्दसिंही
सत्यस्य का सुकृतवारिधिचन्द्रलेखा ।

प्राहुषि कस्य न गमनं मानसगमनाय कीदृशा हंसाः ॥५५॥

समुत्सुकमनसः।

इति शब्दार्थलिङ्गवचनभिन्नम्। इति प्रभिन्नकजातिः।

अर्थमात्रैकभेदेन भिन्नं वध्नन्ति केचन।

सुकुमाराधियस्तत्र विदग्धैर्नोदृतं यथा ॥ ५६ ॥

आनन्दयति कीत्यर्थं सज्जनानिव भूतले।

प्रबोधयति पद्मानि तमांसि च निहन्ति कः ॥ ५७ ॥

मित्रोदयः।

अटवी कीदृशी प्रायो दुर्गमा भवति प्रिये।

प्रियस्य कीदृशी कान्ता तनोति सुरतोत्सवम् ॥ ५८ ॥

मदनवती।

भिन्नावत्रश्यं कर्त्तव्यौ शब्दार्थौ प्रश्नकोविदैः।

लिङ्गादिषु यथा शक्तिभेदमाहुर्विपश्चितः ॥ ५९ ॥

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने

प्रथमः परिच्छेदः।

विशेषणं विशेष्यञ्च यत्र प्रश्ने विधीयते।

भेद्यभेदकमाहुस्तं प्रश्नं प्रश्नविदो यथा ॥ १ ॥

कीदृक् किं स्यात्र मत्स्यानां हितं स्वेच्छाविहारिणाम्।

गुणैःपरेषामत्यर्थं मोदते कीदृशः पुमान् ॥ २ ॥ विमत्सरः।

अगस्त्येन पयोराशेः कियत् किं पीतमुज्झितम्।

Digitized by Google

का वा विडम्बयति चारुमनङ्गवेश्या: ।
दुर्व्वारवीर्य्यविभवस्य रवे भवेत् कः
काः मेरवस्य शुभगास्तरणिप्रभाभिः ॥५०॥ सरोजराजयः ।

पृच्छति शिरोरुहो मधुमथनं
मधुमथनस्तं शिरोरुहञ्च ।
कः खलु चपलतया भुवि विदितः
का ननु यानतया गवि विदिताः ॥ ५१ ॥

केशवनौकाः । इति शब्दार्थलिङ्गवचनभिन्नम् ।

न भवति मलयस्य कीदृशी भूः
क इह कुचं न बिभर्त्ति कां गता श्रीः ।
भवदरिनिवहेषु कास्ति नित्यं
बलमथनेन विपद्‌ व्यधायि केषाम् ॥५२॥ विपन्नगानाम् ।
समयमिह वदन्ति कं निशीथं
शमयति कान् वद वारिवाहवृन्दम् ।
वितरति जगतां मनःसु कीदृङ्
मुदमतिमात्रमयं महातडागः ॥ ५३ ॥ परविन्दवान् ।

इति शब्दार्थविभक्तिवचनभिन्नम् ।

कीदृक्षं स्मितमिति वक्त्रं निहन्ति शत्रं
विष्णोः का मनसि मुदं सदा तनोति ।
तुच्छं स्यच्छरभिमुखं निगद्यते किं
पक्षत्वैः सममपमान एव केषु ॥ ५४ ॥ अभिमानिषु ।
घनसमये शिखिषु स्वाभूत्यं कीदृक्षु किं चमात् पतति ।

कुम्भलवर्त्तितः।

कुसुमं पतदेत्यगात्कृतो वद कस्मै स्पृहयन्ति भोगिनः।
अधिगम्य रतं वराङ्गना क नु यत्नं कुरुते सुयिचिता ॥४५॥

सुरतरवे, इति शब्दार्थभिन्नम्।

कामुज्जहार हरिरम्बुधिमध्यमन्यां
कीदृक् श्रुतं भवति निर्मलमागमानाम्।
आमन्त्रयस्व वनमग्निशिखावलीढम्
तत्रापि को दहति के मदयन्ति भृङ्गान् ॥ ४६ ॥

कुन्दमकरन्दविन्दवः।

वसति कुत्र सरोरुहसन्ततिः
दिनकृतो ननु के तिमिरच्छिदः।
पवनभक्षसपक्षरणोत्सुकं
पुरुषमाह्वय को जगति प्रियः ॥ ४७ ॥

केकिरणोत्कराः। इति शब्दार्थवचनभिन्नम्।

कीदृग् गृहं याम्यगृहङ्गतस्य
कान्तारमभ्यन्तरगे जनानाम्।
भूषा कथं कण्ठ न ते नु पृष्टे
मुक्ताकलापैरिति चोत्तरं किम् ॥४८॥ हाराविनावः।

कवयो वद कुत्र कीदृशाः कठिनं किं विदितं समन्ततः।
अधुना तव वैरियोषितां हृदि तापः प्रबलो विहाय काः॥४९॥

गिरिसारसुधाः। इति शब्दार्थलिङ्गवचनविभक्तिभिन्नम्।

मेघात्यये भवति किं सुभगावगाहं

Digitized by Google

के दुःखं वत निरये नरस्य कुर्युः ।
कस्मिन् भवति कदापि नैव लोम
ख्याताः के जगति महालघुत्वभाजः ॥ ३७ ॥

नरकरोमलवः, इति द्विःसमस्तकव्यस्तजातिः ।

एकश्रुत्या वचो यत्र भिन्नार्थप्रतिपादकम् ।
प्रभेदं द्विःसमस्तस्य तमेकालापकं विदुः ॥ ३८ ॥

कीदृशी निरयभूरनेकधा सेव्यते परमपापकर्मभिः ।
प्रेतराक्षसपिशाचसेविता कीदृशीच पितृकाननस्थली ॥३९॥

नरकापालरचिता ।

केसरद्रुमतलेषु संस्थितः कीदृशो भवति मत्तकुञ्जरः ।
तत्वतः शिवमपेक्ष्य लक्षणैः अर्जुनः समिति कीदृशो भवेत् ।४०॥

दानवकुलभ्रमरहितः, इत्येकालापकजातिः ।

शब्दार्थलिङ्गवचनैर्व्यस्तैर्यद्वा समस्तकैः ।
विभक्त्या च प्रभिन्नं यत् तत् प्रभिन्नकमुच्यते ॥ ४१ ॥

निर्जितसकलारातिः पृच्छति को नैको मृत्योर्भयमृच्छति ।
मेघात्ययकृतरुचिराशायाः किं तिमिरक्षयकारि निशायाः॥४२॥

विधुतारातेजः ।

विहगपतिः कं हृतवानहितं कीदृक् भवति पुरं जनसहितम् ।
किं कठिनं विदितं वद धीभद्र ! यादःपतिरपि कीदृग् भयकृत्४३

अहिमकरमयः, इति शब्दार्थलिङ्गप्रभिन्नकम् ।

अनुकूलविधायिदैवतो विजयी स्यान्न तु कीदृशो नृपः ।
विरहिण्यपि जानकी वने निवसन्ती मुदमादधौ कुतः ॥४४॥

कीदृशं हृदयहारि कूजितं कः सखा यमसि भूपतेर्मतः ।
कस्तवास्ति विपिने भयाकुलः कीदृशश्च न भवेन्निशाकरः॥३१॥
कान्तविरहितः, इति व्यस्तसमस्तजातिः ।
द्विव्यस्तमेव यत् पृष्टं समुदायेन यद्भवेत् ।
त्रिधाभिन्नं तदेवोक्तं द्विर्व्यस्तकसमस्तकम् ॥ ३२ ॥
को धन्वरस्य बलवानपयोधरः कः
कीदृक् प्रदस्य नियतं वशमेति भूपः ।
संबोधयोरगपतिं विजयी च कीदृग्
दुर्योधनो न हि भवेदिह कीदृशश्च ॥३३॥ अद्रीनाथतनयः ।
को मोहाय दुरीश्वरस्य विहितः सम्बोधनीयो गुरुः
कोऽधात्सर्वां विरसः काली नवघनः किंवच कीदृग् द्विजः ।
किं लेखावचनं भवेदतिशयन्दुःखाय कीदृक् खलः
को विद्याधिपतिर्मनोभवसमो मूर्खो भवन् कीदृशः ॥३४॥
राजीवसन्निभवदनः, इति द्विर्व्यस्तसमस्तजातिः ।
द्विःसमस्तं यदा पृष्टं व्यस्तवेन पुनर्भवेत् ।
तद् द्विःसमस्तकव्यस्तं कथितं प्रश्नपण्डितैः ॥ ३५ ॥
कीदृचः सकलजनो भवेत्सुराज्ञः
कः कालो विदित इहान्धकारहेतुः ।
कः प्रेयान् कुमुदवनस्य की निहन्ति
श्लाघ्यं वद शिरसा जितस्त्वया कः ॥ ३६ ॥
विधुरविरहितः ।
संग्रामे स्फुरदसिना हतास्त्वया के

Digitized by Google

मधुसमय, इति समस्तजातिः ।

व्यस्तं समस्तमथवा समासपदभङ्गतः ।
द्विःपृष्टं यत्तदेव स्याद् द्विर्व्यस्तं द्विःसमस्तकम् ॥ २४ ॥

वर्षासु का भवति निर्मधु कीदृगब्जम्
ग्रीष्मं बिभर्त्ति वसुधासहितं क एकः ।
आमन्त्रयस्व धरणीधरनाथपुत्रीम्
कोवाऽस्ति भस्मनि चिताङ्गजनाश्रयः स्यात् ॥२५॥

कालिकापालिकमठः ।

कीदृशं वद मरुस्थलं मतं हारि कुत्र सति भूषणं भवेत् ।
ब्रूहि कांत ! सुभटः सकार्मुकः कीदृशो भवति कुत्र विद्विषाम्॥२६॥

अवारितो रणे, इति द्विर्व्यस्तजातिः ।

पक्षिश्रेष्ठसखीबभ्रू सुरावाच्याः कथं वद ।
ज्येष्ठे मासि गताः ग्रीष्मं कीदृशोऽल्पजला भुवः ॥ २७ ॥

विवरालीनकुलीराः ।

पिश्वम्भराप्रलम्बघ्नश्रीहिमानुषसंयतः ।
कथं वाच्याः भवन्तेता दिनादौ विकसन्ति का: ॥२८॥

कुवलयवनराजयः, इतिद्विःसमस्तजातिः ।

पृष्टं पदविभागेन समुदायेन यद्भवेत् ।
विदु र्व्यस्तसमस्तं तदुभयार्थप्रदर्शनात् ॥ २९ ॥

का प्रियेण रहिता वराङ्गना धाम्नि केन तनयेन नन्दिता ।
कीदृशेन पुरुषेण पक्षिणां बन्धनं समभिलष्यते सदा ॥ ३० ॥

शकुन्तला भरतेन

Digitized by Google

शृङ्खलां नागपाशं च चित्रं संश्लक्ष्णमेव च।
प्रहेलिकान्तथा द्वयं कालसारादि वर्णितम्॥ १५॥
अजमारादिकं गूढं पदपादार्थगूढकम्।
स्तुतिनिन्दान्तथा ह्यर्थं सद्यापद्भुति विन्दुमत्॥ १६॥
क्रियाकारकसंबन्धगुप्ताभ्यामन्वितस्य च।
गुप्तन्तथा समासस्य लिङ्गस्य वचनस्य च॥ १७॥
मात्राविन्दुविसर्गाणां च्युतकाव्यचरस्य च।
स्थानव्यञ्जनयोश्चापि च्युतदत्ताचरन्तथा॥ १८॥

इत्युद्देशकम्।

पृष्टम्पदविभागेन केवलेनैव यद्भवेत्।
विदुर्व्यस्तं समस्तं यत्समुदायेन पृच्छति॥ १९॥
पूजायां किं पदं प्रोक्तमस्तनं को बिभर्त्युरः।
क आयुधतयाख्यातः प्रलंबासुरविद्विषः॥ २०॥
सुनासीरः, इति व्यस्तसमस्तजातिः।
को दुराव्यस्य मोहाय का प्रिया सुरविद्विषः।
पदं प्रश्नवितर्कं किं को दन्तच्छदभूषणम्॥ २१।
रामानुरागः। इति व्यस्तजातिः।
अपिसेविता द्विजिह्वैः कदापि केन यान्ति विकारम्।
विच्छिद्यमानतनवः स्वगुणैरधिकं विराजन्ते॥ २२॥
मलयतरवः।
अनिभृतकोकिलनिःस्वनमुखरितसहकारकाननः पुंसाम्।
को भवति हृदयहारी मधुकरझङ्कारिकंवेलिः॥ २३॥

Digitized by Google

किन्मेऽथवा हतखलप्रणतावपि स्यात्
स स्वीकरोति सुजनो यदि मां गुणज्ञः ।
चन्द्रेण चारुचरितेन विकासितं सत्
सङ्कोचितं भवति किं कुमुदं तमोभिः ॥ ६ ॥
प्रीत्यै सतां तदनुभावगतावसादः
सन्त्यज्य गूढरचनां प्रतिभानुरूपम् ।
क्षिप्रावबोधकरणक्षममीप्सितार्थं
वक्ष्ये विदग्धमुखमण्डनमप्रपञ्चम् ॥ ७ ॥

यद्यस्ति सभामध्ये स्थातुं वक्तुं मनस्तदा सुधियः ।
ताम्बूलमिव गृहीत्वा विदग्धमुखमण्डनं विशत ॥ ८ ॥
प्राहुर्व्यस्तं समस्तं च द्विर्व्यस्तं द्विःसमस्तकम् ।
तथा व्यस्तसमस्तं च द्विर्व्यस्तं द्विःसमस्तकम् ॥ ९ ॥
सद्विःसमस्तकव्यस्तमेकालापं प्रभिन्नकम् ।
भेद्यभेदकमोजस्वि सालङ्कारं सकौतुकम् ॥ १० ॥
प्रश्नोत्तरसमं पृष्टं प्रश्नं भग्नोत्तरं तथा ।
आदिमध्योत्तराख्ये द्वे अन्त्योत्तरमतःपरम् ॥ ११ ॥
कथितापह्नुतिश्चैव विषमं वृत्तनामकम् ।
नामाख्यातं च तार्क्ष्यं च सौत्रं शाब्दीयशास्त्रजे ॥ १२ ॥
वर्णवाक्योत्तरे तद्वत् श्लोकोत्तरमतः परम् ।
खण्डपादोत्तरे चक्रं पद्मं काकपदं तथा ॥ १३ ॥
गोमूत्रीं सर्व्वतोभद्रं गतप्रत्यागतं बहु ।
वर्द्धमानाक्षरं तद्वद्धीयमानाक्षरं तथा ॥ १४ ॥

Digitized by Google

विदग्धमुखमण्डनम् ।

सिद्धौषधानि भवदुःखमहागदानां
पुण्यात्मनां परमकर्णरसायनानि ।
प्रक्षालनैकसलिलानि मनोमलानां
शौद्धोदनेः प्रवचनानि चिरं जयन्ति ॥ १ ॥

जयन्ति सन्तः सुकृतैकभाजनं परार्थसम्पादनसव्रतस्थिताः ।
करस्थनीरोपमविश्वदर्शिनो जयन्ति वैदग्ध्यभुवः कवेर्गिरः॥२॥

आक्रान्तेव महोपलेन मुनिना शप्तेव दुर्वाससा
सातत्यं वत मुद्रितेव जतुना नीतेव मूर्च्छां विषैः ।
बद्धेवातनुरज्जुभिः परगुणान्वक्तुं न शक्ता सती
जिह्वा लोहशलाकया खलमुखे विद्धेव संलक्ष्यते ॥ ३ ॥

दृष्टानेके सत्यं सततमुपकारिष्वुपकृतिं
कृतज्ञाः कुर्वन्तो जगति निवसन्त्येव सुधियः ।
कियन्तस्ते सन्तः सुकृतपरिपाकप्रणयिनो
विना स्वार्थं येषां भवति परकृत्यव्यसनिता ॥ ४ ॥

बध्वाञ्जलिं सममसज्जनसज्जनौ तौ
वन्दे नितान्तकुटिलप्रगुणस्वभावौ ।
एकं भियाऽभिनवसंहितवैरिभावं
प्रीत्या परं परमनिर्वृतिपात्रभूतम् ॥ ५ ॥

Digitized by Google

श्रान्तमपसारितो यत्त्वरत्वावुपधाय सुप्त एवासि ।
उद्घाटयसि किमूरू निश्वासैः पुलकयन्नूर्वोः ॥ ७२३

मुक्तोद्भवस्य कटुतां प्रकटयतो विदधतश्च मदमुच्चैः ।
मधुनोऽधमपुरुषस्य गरिमा लघिमा च भेदाय ॥ ७२४

पूर्वैर्विभिन्नवृत्तां गुणाढ्यभवभूतिबाणरघुकारैः ।
वाग्देवीं भजतो मम सन्तः पश्यन्तु को दोषः ॥ ७२५

सत्पात्रोपनयोचितसत्प्रतिबिम्बाभिनववस्तु ।
कस्य जनयति न हर्षं सत्काव्यं मधुरवचनञ्च ॥ ७२६

सत्सूत्रसंविधानं सदलङ्कारं सुवृत्तमच्छिद्रं ।
को धारयति न कण्ठे सत्काव्यं माल्यमनर्घञ्च ॥ ७२७

एका ध्वनिर्द्वितीया त्रिभुवनसारा स्फुटोक्तिचातुर्या ।
पञ्चेषुषट्पदहिता भूषा श्रवणस्य सप्तशती ॥ ७२८

कविसमरसिंहनादः स्वरानुवादः सुधैकसम्वादः ।
विद्वद्विनोदकन्दः सन्दर्भोऽयं मया विहितः ॥ ७२९

उदयनबलभद्राभ्यां सप्तशती शिष्यसोदराभ्यां नः ।
द्यौरिव रविचन्द्राभ्यां प्रकाशिता निर्म्मलीकृत्य ॥ ७३०

विरचन् वामनशीलां वामन इव कविपदं लिप्सुः ।
अकृतार्य्यासप्तशतीमितां गोवर्द्धनाचार्य्यः ॥ ७३१

श्रीगोवर्द्धनाचार्य्य-विरचिता आर्य्या-सप्तशती
समाप्ता ।

—:०:—

सायं कुसुमशरान्तमधुपालीनां विनिर्यतां मार्गः ।
मित्रव्यासननिपन्नैः कमलैराक्रन्द इव मुक्तः ॥ ७१२

सुमहति मन्युनिमित्ते मयैव विहितेऽपि वेपमानोरः ।
न सखीनामपि वदती ममैव वक्षःस्थले पतिता ॥ ७१३

सुभग व्यजनविधानव्यग्रविलसभुजाऽभूदियं वयस्यापि ।
उद्वर्त्तनं न सख्याः समाप्यते किञ्चिदवगच्छ ॥ ७१४

सव्रीडा नखरदनार्पणेषु कुपिता कुटुम्बिनी दयिता ।
कटुयाच्ञाकरग्रहसाध्या रोषेण जातेयं ॥ ७१५

सुगृहीतमलिनपक्षा लघवः परभेदिनः परं तीक्ष्णाः ।
पुरुषा अपि विशिखा अपि गुणच्युताः कस्य न भयाय ॥ ७१६

स्वकपोलेन प्रकटीकृतं प्रमत्तदुःखकारणं किमपि ।
द्विरदस्य दुर्जनस्य च मदं चकारैव दानमपि ॥ ७१७

सत्यं पतिरविदग्धः सा तु स्वधियैव निधुवने निपुणा ।
मार्त्तिकमादाय गुरुं धनुरधिगतमेकलव्येन ॥ ७१८

सौभाग्यमानवान् स त्वयाऽवधीर्य्यापमानतां नीतः
स्वविरहपाण्डिमानं भस्मस्नातोपमं तनुते ॥ ७१९

हृत्वा तटिनि तरङ्गैर्भ्रमितस्रक्पुष्पाग्रे निहितः ।
फलदलधनरहित स त्वयान्तरिते तरुस्तापसः ॥ ७२०

हतकाञ्चिप्रतिबन्धोत्तरजवनादपरभोगभुक्तायाः ।
उल्लसिता रोमाली गरलविलेखेव कामिन्याः ॥ ७२१

क्षीणस्य दयितदुर्नयतापप्रशान्त्योपचारमासाद्य ।
अङ्गान्यानमयति शनैः प्रेम्णः शेषो ज्वरस्येव ॥ ७२२

Digitized by Google

सा लज्जिता सपत्नी कुपिता भीतः प्रियः सखीः सुखिता ।
बालायाः पीड़ायां निद्रानिते जागरे वैद्ये ॥ ७०१

सुचिरागतस्य संवाहनच्छलेनाङ्गमङ्गमालिङ्ग्य ।
पुष्यति न मानचर्य्या गृहिणी सफलयति चोत्कलिकां ॥ ७०२

सा सर्व्वथैव रक्ता रागं गुञ्जेव नतु मुखे वहति ।
वचनपटो स्तव रागः केवलमास्ये शुकस्येव ॥ ७०३

सायं कान्तभुजान्तःपतिता रतिनीतनिखिलरजनी सा ।
उषसि ददती प्रदीपं सखीभिरुपहस्यते बाला ॥ ७०४

सा तीक्ष्णमानदहनो महतः स्नेहस्य दुर्लभः पाकः ।
त्वां दर्व्वीमिव दूति प्रयासयन्नाक्षि विश्वस्तः ॥ ७०५

स्नेहः च्यति जिगीषा समरः प्राणव्ययावधिः करिणां ।
न वितनुते कमनर्थं दन्तिनि तव यौवनोद्भेदः ॥ ७०६

सदनादपैति दयितो हसति सखी विशति बालमिव बाला ।
ज्वलति सपत्नी कीरे जल्पति मुग्धे प्रसीदेति ॥ ७०७

सङ्कुचिताक्षीं द्विगुणांशुकां मनोमात्रविस्फुरन्मदनां ।
दयितां भजामि बाला मिव तुहिन त्वत्प्रसादेन ॥ ७०८

सखी मानेव वसन्ती सदाश्रये महति रसमये तस्य ।
वाड़वग्निरिव सिन्धौ न मानप्यार्द्रतां भजसि ॥ ७०९

सखि मिहिरोद्गमनादिप्रमोदमपिधाय सोऽयमवसाने ।
वन्ध्यावधिवासर इव तुषारो दिवसं कदर्थयति ॥ ७१०

सुरभवने तरुणाभ्यां परस्पराकृष्टदृष्टिहृदयाभ्यां ।
देवार्च्चनार्थमुद्यतमन्योन्यस्यार्पितं कुसुमं ॥ ७११

सुचिरायाते गृहिणो निशि भक्त्या दिनमुखे विदग्धेयं ।
धवलनखाङ्कं निजवपुरकुङ्कुमाक्तं न दर्शयति ॥ ६८०
स्तनजघनोरुप्रणयी गात्रविलग्नो निवेशितस्नेहः ।
प्रिय कालपरिणतिरियं विरज्यसे यत्सखाङ्ग इव ॥ ६८१
सा विच्छाया शिशिर निशि सुतनु बहुतुहिनशीतले तल्पे ।
ज्वलति त्वदीयविरहादोषधिरिव हिमवतः पृष्ठे ॥ ६८२
सा नीरसे तव हृदि प्रविशति निर्यातिं न लभते स्थैर्यं ।
सुन्दर सरसा दिनकरबिम्बे तुहिनांशुरेखेव ॥ ६८३
सुकुमारत्वं कान्तिं नितान्तसरलत्वमान्तरांश्च गुणाः ।
किन्नाम नेन्दुलेखे शशग्रहेणैव ते कथितं ॥ ६८४
सौरभ्यमात्रमनसामास्तां मलयद्रुमेण हि विशेषः ।
धर्मार्थिनां तथापि स मृग्यः पूजार्थमश्वत्थः॥ ६८५
संवाहयति शयनं यथोपवीजयति गृहपतिं गृहिणी ।
गृहवृतिविवरनिवेशितदृशस्तथाश्वासनं यूनः ॥ ६८६
सत्यं स्वल्पगुणेषु स्तब्धा सदृशे पुनर्भुजङ्गे सा ।
अर्पितकोटिः प्रणमति सुन्दर हरचापयष्टिरिव ॥ ६८७
सर्वंसहां महीमिव विधाय तां वाष्पवारिपरिपूर्णां ।
भवनान्तरमयमधुना संक्रान्तस्ते गुरुः प्रेयान् ॥ ६८८
सम्भवति न खलु रक्षा सरसानां प्रकृतिचपलचरितानां ।
अनुभवति हरशिरस्यपि भुजङ्गपरिशीलनं गङ्गा ॥ ६८९
सुलभेषु कमलकेशरकेतकमाकन्दकुन्दकुसुमेषु ।
वाञ्छति मनोरथान्धा मधुपी स्मरधनुषि गुणभावं ॥ ७००

सा भवती भावनया समयविरुद्धं मनोमयं बाला ।
नूतनलतेव सुन्दर दोहदयुक्ता फलं वहति ॥ ६७९
स्पृशति न खरैर्न विलिखति सिचयं गृह्णाति न च विमोचयति ।
न च मुञ्चति न च रमयति नयति निशां सा च न निद्राति ॥ ६८०
स्तनजघनमुखमस्या लङ्घितमध्यं सखे मम कटाक्षः ।
नोज्झति रोधस्त्वास्तटद्वयं तीर्थकाक इव ॥ ६८१
सव्रीडस्मितमन्दश्वसितं मा मां स्पृशेति संसक्ता ।
आकोपमेत्य वातायनं पिधाय स्थितं प्रियया ॥ ६८२
सकचग्रहं सरुदितं साक्षेपं सनखमुष्टि संजिमीर्ष ।
तस्याः सुरतं सुरतं प्राजापत्यः क्रतुरतोऽन्यः ॥ ६८३
स्वल्पा इति राघवबलैर्ये न्यस्ता आशये पयोराशेः ।
शैला स्ते स्थितिमन्तो हन्त लघिम्नैव बहुमानः ॥ ६८४
सखि न खलु निर्मलानां विदधत्यभिधानमपि मुखे मलिनाः ।
केनाश्रावि पिकानां कुहु विहायेतरः शब्दः ॥ ६८५
सा श्यामा तन्वङ्गी दहता शीतोपचारतीव्रेण ।
विरहेण पाण्डिमानं नीता तुहिनेन दूर्वेव ॥ ६८६
सुनिरीक्षितनिश्चलकरवल्लभधाराजलोक्षिता न तथा ।
सोत्कम्पेन मया सखि सिक्ता सा माद्यति स्म यथा ॥ ६८७
सखि मौर्वीकृतमदने पतिव्रते क स्तवादरं तनुते ।
नाशीषी भगवानपि स कामविद्धो हरः पूज्यः ॥ ६८८
सा मयि न दासबुद्धिर्न रतिर्न त्रपा न वा विश्वासः ।
हन्त निरीक्ष्य नवोढां मन्ये वयमप्रिया जाताः ॥ ६८९

Digitized by Google

सरित इव यस्य गेहे शुष्यन्ति विशालनीलमा मार्ग्याः ।
चाराम्बेव स तृप्यति जलनिधिलहरीषु जलद इव ॥ ६६८
सकलकटकैकमणिमनि कठिनीभूताग्रग्रे शिखरिदन्ति ।
शिशुव इव तव मन्ये मनःशिला समभवच्चक्षि ॥ ६६९
सखि दुरवगाहगहनो विदधानो विप्रियं प्रियेऽपि जने ।
खल इव दुर्लङ्घ्य स्तव विनयमुखोपस्थितः कोपः ॥ ६७०
स्वेदसचेलस्नाता समपदीं समममण्डलीं याता ।
समदनदहनविकारा मनोहरा क्रीडिता नमति ॥ ६७१
सुरसप्रवर्त्तमानः सङ्घातोऽयं समानवृत्तानां ।
एत्यैव धर्मवृत्तैर्भङ्गुरितः काव्यसर्ग इव ॥ ६७२
सर्वासामेव सखे पयो गवामिव मनोहारि तस्याः ।
पुनः पुनराहृत्तोच दुग्धमिव सुरतमेव मधुरं ॥ ६७३
स्वप्नेऽपि यां न मुञ्चसि या तेऽनुग्राहिणी हृदि स्थिता च ।
दुष्टां न बुद्धिमिव तां गूढ्व्यभिचारिणीं वेत्सि ॥ ६७४
सपराहरि चलन्ती वात्येव तृणं मनोऽनवद्याङ्गि ।
हरसि तरलयसि वहसि भ्रमयसि लोलयसि पातयसि ॥ ६७५
सा बहुलक्षणभावा स्त्रीमात्रं वेति कितव तव तुल्यं ।
कोटि वैराटिका वा द्यूतविधेः सर्व एव पणः ॥ ६७६
सा विरहदहनदूना मृत्वा मृत्वापि जीवति वराकी ।
सारीव कितव भवता अनुकूलिता पातिताऽक्षेण ॥ ६७७
सर्यादेव खेदं जनयति नच मे ददाति निद्रातुम् ।
प्रिय इव जधगाम्यकमपि न निदाघः क्षणमपि समने ॥ ६७८

Digitized by Google

समवक्षपदमतिमोरं नाभीमूलं निरंशुकं कृत्वा ।
अनया संचितपौवन त्वं किं कृतमलयजगुणातः ॥ ६५

सर्वाङ्गमर्पयन्ती लीला सुप्तं श्रमेण शय्यायां ।
अलसमपि भाग्यवन्तं भजते पुरुषायितेव श्रीः ॥ ६५

सुभग स्वभवनभित्तौ भवता सम्भ्रान्ता पीड़िता सुतनुः ।
सा पोड़येव अवति दधती वेद्येषु विद्वेषं ॥ ६५८

सा गुणमयी स्वभावस्वच्छा सुतनुः करग्रहायत्ता ।
भ्रमिता बहुमन्त्रविदा भवता काश्मीरमालेव ॥ ६६०

सव्रीड़स्मितसुभगे स्पृष्टास्पृष्टेव किञ्चिदपयान्ती ।
अपसरसि सुन्दरि यथा तथातथा स्पृशसि मम हृदयं ॥ ६६१

सखि सुखयत्यवकाशप्राप्तः प्रेयान् यथा तथा न स्त्री ।
वातादवारितादपि भवति गवाक्षानिलः शीतः ॥ ६६२

सन्ततमकरणमुखी रुषि निगिरन्ती गरलमिव गिरां गुम्फं ।
अविगणितौषधिमन्त्रा भुजङ्गि रक्तं विरञ्जयसि ॥ ६६३

सुदिनं तदेव यत्र स्मारंस्मारं वियोगदुःखानि ।
आलिङ्गिता सा गाढ़ं पुनः पुन र्यामिनीप्रथमे ॥ ६६४

सान्तर्भयं भुजिष्या यथा यथा चरति समधिकां सेवां ।
साशङ्कसेर्ष्यसभया तथा तथा गेहिनी तस्याः ॥ ६६५

सुन्दरि दर्शयति यथा भवद्विपक्षस्य तत्सखी कान्तिं ।
पतति तथा मम दृष्टि स्त्वदेकदासस्य सासूया ॥ ६६६

स्वाधीनैरधरव्रणनखाङ्क एवाबली यदि न शयनैः ।
सुभगा सुभगेत्यमया सखि निखिला सुखयिता पत्नी ॥ ६६७

स्नेहमयान् पीड़यतः किं चक्रेणाऽपि तैलकारस्य।
चालयति पार्थिवानपि यः स कुलालः परं चक्री॥ ६४६

सरले न वेद भवती बहुभङ्गां बहुरसां बहुविवर्त्तां।
मतिमसतीनिम्नगाणां प्रेम्णां स्रोतस्वतीनाञ्च॥ ६४७

सखि मध्याह्नद्विगुणद्युमणिकरश्रेणीपीड़िता च्छाया।
मज्जितुमिवालवाले परितस्तरुमूलमाश्रयति॥ ६४८

सखि शृणु मम प्रियोऽयं गेहं येनैव वर्त्मनायाति।
तन्नगरग्रामनदीः पृच्छति स ममागतानन्यान्॥ ६४९

सायं रविरनलमतो मदनशरं स च वियोगिनीचेतः।
इदमपि तमःसमूहं सोऽपि नभो निर्भरं विशति॥ ६५०

श्वाससमरमयपूरितकम्बुनिभद्विगुणपीनगलगोलः।
शीर्षप्रासादोपरि जिगीषुरिव कलरवः क्वणति॥ ६५१

सुरदधरमविरताश्रु क्षणिरोधोत्कम्पिकुचमिदं रुदितं।
जानूपनिहितहस्तन्यस्तमुखं दक्षिणप्रकृतेः॥ ६५२

स्वयमुपनीतैरशनैः पुष्यन्ती नीड़निर्वृत्तं दयितं।
सहजप्रेमरसज्ञा सुभगा गर्वं वको वहतु॥ ६५३

स्वरसेन बध्नतां करमादाने कण्ठोत्करे स्फुटतां।
पिशुनानां पनसानां कोषीभोगोऽथ परिणामः॥ ६५४

सौभाग्यं दाक्षिण्यात् नैत्युपदिष्टं हरेण तरुणीनां।
वामार्द्धमेव देव्याः स्ववपुः शिल्पे निवेशयता॥ ६५५

स्खलदमललीलाधृता क्रोड़स्थितैकचरणेन सा।
विश्वासयति नलिन्याः कुले विकण्ठीका सफरं॥ ६५६

शिरसा वहसि कपर्दं वद्र रहितैव रत्नाकर्णविधि।
भस्मापुण्ड्रदर्शनात् भजतस्तव वेत्ति कश्चन॥ १३५

श्रोतव्यैव सुधेव श्वेतांशुकलेव दूरदृश्यासि।
दुष्टभुजङ्गपरीता त्वं केतकि न खलु नः स्पृश्या॥ १३६

श्रवणोपनीतगुणया समर्पयन्त्या प्रणम्य कुसुमानि।
मदनधनुर्लतयेव त्वया वयं दूति नीताःस्मि॥ १३७

शाकोटक शाखोटज वैखानसकरटपूज्य रट सुचिरं।
नादरपदमिह गणकः प्रमाणपुरुषो भवानेकः॥ १३८

शशिरेखोपमकान्ते स्तवान्यपाणिग्रहं प्रयातायाः।
मदनासिपुत्रिकाया इवाङ्गशोभां कदर्थयति॥ १३९

शैथिल्येन भृता अपि भर्त्तुः कार्य्यं त्यजन्ति न सुवृत्ताः।
वलिनाकृष्टे वाहौ वलयाः कूजन्ति धावन्ति॥ १४०

षट्चरणकीटजुष्टं परागपुणकीर्णमायुधं त्यक्त्वा।
त्वां मुष्टिमेयमध्यामधुना शक्तिं स्मरो वहति॥ १४१

सा दिवसकृत्ययोग्यव्यपदेशात्तस्य केवलं गृहिणी।
द्वितिथे दिवसस्य परा तिथिरिव सेव्या निशि त्वमसि॥ १४२

स्तननूतनखलेखालम्बी तव घर्म्मबिन्दुसन्दोहः।
आभाति मदसूत्रे प्रविशन्निव मौक्तिकप्रसरः॥ १४३

सौभाग्यगर्वमेका करोतु यूथस्य भूषणं करिणी।
सुहृदावमेतयो र्या मदान्धयो र्मध्यमधिवसति॥ १४४

स्वचरणपीड़ानुमितत्वन्मौलिरुजाऽपनीतमानक्रुधा।
अपराद्धा सुभग त्वां स्वयमियमनुनेतुमायाता॥ १४५

Digitized by Google

गिरिशि ... हारं ग्रहाय निःश्वासैर्गां सखि तदपि ।
यमुनाजीर्णभुजङ्गः कालिय इव सुमुखि कालिन्द्याः ॥ ६२४

गोष्ठेव सा ... मूर्तिमयी प्रभवतु गुणमयी वापि ।
स्नेहव्यतिभिवता सुता दीपेन वर्त्तिरिव ॥ ६२५

बक इव ... मनुदिवसवर्द्धमानो मे ।
ज्वलति दयिताहृदयं शोकः शरविशिखतीक्ष्णमुखः ॥ ६२६

गुरुत्वाकर्षकमरणं युवयूनः सकलकौतुकैकनिधेः ।
ख्यातो दृष्टिपोविनयश्च्य आगत्यैव पथिकेन ॥ ६२७

गोलितभुजङ्गभोगा क्रोड़ेनाभुग्नतापि कृष्णेन ।
अचलेव कीर्त्तयति भूः किमपरं नाम वसुमत्याः ॥ ६२८

श्यामा विलोचनहरा बालेयं मनसि हन्त सञ्जाता ।
लुम्पति पूर्वं लग्नं धूमलता भित्तिचित्रमिव ॥ ६२९

गतयो मतिमाहृत्ति गतयः कण्ठावलम्बनं गतयः ।
गतयो यमोरिति वचः स्मरामि तस्य प्रवासदिने ॥ ६३०

गुप्तपरपुरुषवाग्भिः पृष्टो गोपीभिरभिमतं कृष्णः ।
हसति वंशस्तनितैः स्तनविनिहितलोचनोऽभिमतं ॥ ६३१

शङ्करशिरसि निवेशितपदाऽहमिति मा मुदं वहेन्दुकले ।
फलमेतस्य भविष्यति तव चण्डीचरणरेणुमृजा ॥ ६३२

ग्रामतरुतरे समीरणदोलायितनीड़निर्वृतं वसति ।
कर्मकरवमगणितभयमशिथिलकेलि खगमिथुनं ॥ ६३३

गृहकं मुरतकमरवारद हृदयरहस्यैकसारसर्वस्व ।
गुणजनममममूलं अमरेद जम्बूफलं दलय ॥ ६३४

इतिभञ्जनगञ्जनसह निकाममुद्दाम ललितलाभ ।
परवाटीग्रतलम्पट दुष्टवृष स्मरसि गेहमपि ॥ २१३
संग्रावलम्बनं यद् यो विस्तारो गुणस्य याऽवमतिः ।
यज्जालस्य खलस्य च निजाङ्गसुप्तप्रथाध्याय ॥ २१४
वक्षःस्थलसुप्ते मम सुखमुपधातुम् न मौक्तिकमपि लभते ।
पीनोत्तुङ्गस्तनभरदूरीभूतं रतश्रान्ते ॥ २१५
वदनव्यापारान्त र्भावादनुरक्तमालपन्ती त्वं ।
दूति सतीनां सार्थं तस्य भुजङ्गस्य दंष्ट्रासि ॥ २१६
श्रीरपि भुजङ्गभोगे मोहेन विरक्तेन शायिता येन ।
सोऽपि हरिः पुरुषो यदि पुरुषा इतरेऽपि किं कुर्मः ॥ २१७
शङ्के या स्थैर्यमयी श्लथयति बाहू मनोभवस्यापि ।
दृषच्छिलामिव भवतीं कातर स्तरुणी विचालयति ॥ २१८
शार्दूलनखरभङ्गुरकठोरतरजातरूपवचनोक्ति ।
बालानामपि बाला सा हस्या त्वमपि हृदि वससि ॥ २१९
श्रुतएव श्रुतिहारिणि रागोत्कर्षेण कण्ठमधिवसति ।
गीत इव त्वयि मधुरे करोति नार्थग्रहं सुतनुः ॥ २२०
श्रीश्रीफलेन राज्यं हृणराजेनाल्पसाम्यतः प्राप्तं ।
त्वत्कुचयोः सम्यक्ः साम्याद् गतो घट चक्रवर्त्ति त्वं ॥ २२१
श्रोणी भूमावङ्के सुतो भयं मनसि भूर्जे मौक्तिकं ।
गूढश्वासो वदने सुरतमिदन्त्व रूपं त्रिदिवं ॥ २२२
श्लिष्यन्निव चुम्बन्निव पश्यन्निव चोल्लिखन्निवाद्दृतः ।
दधदिव हृदयस्यान्तः स्मरामि सख्या लग्नं ॥ २२३

विततनमोनीलनिचोलचोलसङ्गस्फुटाः कुरङ्गाक्षि ।
पत्राभरणनिकरा इव ताराप्रकरा विराजन्ति ॥ ६०२

वपुषा भुजङ्गसङ्गमसहेन तव तरुणि गुरुनितम्बेन ।
न क्षुभ्यति गम्भीरः को जलनिधि र्मन्दरेणेव ॥ ६०३

विविधाङ्गभङ्गिषु गुरु र्नूतनशिष्यां मनोभवाचार्य्यः ।
वैमल्यतयेव बालां तस्मै नर्त्तयति रतलीला ॥ ६०४

विपरीतमपि रतं ते स्रोतो नद्या इवानुकूलमिदं ।
तटवृक्षमिव मम हृदयं समूलमावेगतो हरति ॥ ६०५

वैभवभाजां दूषणमपि भूषणपक्ष एव निक्षिप्तं ।
कुसुमाशनामभ्रमं दृषद्म मगणयन्ति काव्यादाः ॥ ६०६

वक्राः कपटस्निग्धा मलिनाः कर्णान्तिके प्रसज्जन्तः ।
कं वञ्चयन्ति न सखे खलाश्च गणिकाकटाक्षाश्च ॥ ६०७

विद्युज्ज्वालावलयितजलधरपिठरोदराद्विनिर्याति ।
विषदोद्गमदुग्धतिमुषः प्रेयसि पयसा समं करकाः ॥ ६०८

व्यजनादिभिरुपचारैः किं मरुपथिकस्य गृहिणि खिद्यते मे ।
तापस्त्वदूरुकदलीद्वयमध्ये शान्तिमयमेति ॥ ६०९

विन्ध्याचल इव देह स्तव विविधावर्त्तनर्मदनितम्ब ।
स्खलयति गतिं ऊर्मेरपि सम्भावित रविरथस्तम्भः ॥ ६१०

वैगुण्यमपि हि महतां विनिर्म्मितं भवति कर्म्म शोभायै ।
दुर्व्वर्णितत्वमम्बरमपि हरति नितम्बिनीनृत्यं ॥ ६११

वीक्ष्य सतीनां गणने रेखामेकां तया स्वनामाङ्कां ।
सन्तु युवानो हसितुम् स्वयमेवापारि नाचरितुम् ॥ ६१२

Digitized by Google

वृतिविवरनिर्गतस्य प्रमदाबिम्बाधरस्य मधु पिबति ।
अवधीरितपीयूषः स्पृहति देवाधिराजोऽपि ॥ ५९१
वासितमधुनि वधूनामवतंसे मौलिमण्डने यूनां ।
विलसति सा पुरकुसुमे मधुपीव वनप्रसूनेऽपि ॥ ५९२
व्रीडाप्रसरः प्रथमं तदनु सरसभावपुष्टचेष्टेयं ।
रजनीविनिर्गमादनु तटीव दयिता मनो हरति ॥ ५९३
वाससि हरिद्रयेव त्वयि गौराङ्ग्या निवेशितो रागः ।
पिशुनेन सोऽपनीतः सहसा पतता जलेनेव ॥ ५९४
विस्मयविसारिसौरभरामान्ध्याधवाधनीयस्य ।
क्वचिदपि कुरङ्ग भवतो नाभीमादाय न स्थानं ॥ ५९५
वटकुटजशालशाल्मलिरसालबकुलसिन्धुवाराणां ।
अस्ति भिदा मलयाचलसम्भवसौरभ्यसाम्येपि ॥ ५९६
विनिहितकपर्दकोटिं चापलदोषेण शङ्करं त्यक्त्वा ।
वटमेकमनुसरन्ती जाह्नवि लुठसि प्रयागतटे ॥ ५९७
वेद रजनी चतुर्णां प्रहराणां सङ्क्रमं वियोगश्च ।
चरणानामिव कूर्मी सङ्कोचमपि प्रसारमपि ॥ ५९८
वृतिविवरेण सरन्ती सुभग त्वामीक्षितुम् सखीदृष्टिः ।
हरति युवहृदयपञ्जरमध्यस्था मन्मथेषुरिव ॥ ५९९
विपणितुलासामान्ये मा गणयेनं निरूपय निपुणं ।
धर्म्मधरोऽसावधरीकरोति गुरुमुपरि नयति लघुं ॥ ६००
वात्तरगम्यमनूरोरम्बरमवनी च वामनैकपदं ।
जलधिरपि पोतलङ्घ्यः सतां मनः केन कलयामि ॥ ६०१

Digitized by Google

वितरन्ती रसमन्तर्मंमार्द्रभावं तनोषि तनुमात्रि ।
अन्तःसलिला सरिदिव निवसति हृदि वहिरदृश्यासि ॥ ५८०

विहितविविधानुबन्धो मानोन्नतयावधीरितो मानी ।
लभते कुतः प्रबोधं स आमरित्वेव निद्रायः ॥ ५८१

व्रीडाविमुखीं वीतस्पर्शहामामद्य काकुवाङ्मधुरे ।
प्रेमार्द्रं सापराधं दिशति दिशं च शुभे बाला ॥ ५८२

बाष्पाकुलं प्रलपतो गृहिणि निवर्तस्व कान्त गच्छेति ।
यातं दम्पत्यो र्दिनमनुगमनावधि सरस्तीरे ॥ ५८३

वक्षःशायिनि सान्द्रश्वासे वाङ्मात्रसुभटे घनघर्मे ।
सुतनु ललाटनिवेशितललाटिके तिष्ठ विजितासि ॥ ५८४

विचरति परितः कृष्णे राधायां रागचपलनयनायां ।
दशदिग्व्यवविगुह्यं विशिखं विदधाति कुसुमधनुः ॥ ५८५

वीक्ष्यैव वेत्ति पथिकः पीवरबहुवायसं निजारामं ।
सौन्दर्यैकनिधेरपि दयितायाश्चरितमविचलितं ॥ ५८६

विमुखे चतुर्मुखे श्रितवति चामीगभावमीशेऽपि ।
मग्नमहीनिस्तारे हरिः परं स्तब्धरोमाभूत् ॥ ५८७

वापीकच्छे वासः काण्टकावृतयः सजागरा भ्रमराः ।
केतकविटप शिमिते मनु वारय मञ्जरीगन्धं ॥ ५८८

विचलसि मुग्धे विघ्नता यथा विशसि हृदयमदयस्य ।
शक्तिः प्रसूनधनुषः प्रकाम्पलक्ष्यं स्पृशन्तीव ॥ ५८९

विहितासमशरसमरो जितगाङ्गेयच्छविः कृताटोपः ।
पुरुषायितो विराजति देह स्तव सखि शिखण्डीव ॥ ५९०

विनयविनता दिनेऽसौ निशि मदनकलाविलासलसदङ्गी ।
निर्वाणज्वलितौषधिरिव निपुणप्रत्यभिज्ञेया ॥ ५६९

विषमशरविशिखभिन्ना पत्नीशरणं यदेकमभिलषसि ।
तस्य तव च्छायेव स्वीया जायाऽपि भयहेतुः ॥ ५७०

विविधायुधव्रणार्बुदविषमे वक्षःस्थले प्रियतमस्य ।
श्रीरपि वीरवधूरपि गर्वोत्पुलका सुखं स्वपिति ॥ ५७१

वैमुख्येऽपि विमुक्ताः शरा इवान्याययोधिनो वितनोः ।
भिन्दन्ति पृष्ठपतिताः प्रियहृदयं मम खरश्वासाः ॥ ५७२

व्यक्तमधुना समेतः खेड़ो मदिराक्षि दशनवसने ते ।
तव वसुधैकसारं लोभिनि यत् किमपि नाद्राक्षं ॥ ५७३

बालाविलासबन्धादप्रभवन् मनसि चिन्तयन् पूर्व्वं ।
सम्मानार्च्चिताञ्च तां गृहिणीमेवानुशोचामि ॥ ५७४

वीजयतोरन्योन्यं यूनो र्वियुतानि सकलगात्राणि ।
सम्मेलनीव श्रोणी परं निदाघेऽपि न विघटिता ॥ ५७५

व्यावेषं मानिन्या स्तमो दिवः कासरं कलमभूमेः ।
कुक्षमलिञ्च मलिन्याः प्रभातसन्ध्याऽपसारयति ॥ ५७६

वक्षसि विजृम्भमाणे स्तनभिन्नं त्रुटति कञ्चुकं तस्याः ।
पूर्व्वदयितानुराग स्तव हृदि न मनागपि त्रुटति ॥ ५७७

व्यक्तिमवेक्ष्य तदन्यां तस्यामेवेति विदिताधुना सा ।
हर्म्मंग हरिमुखमिव त्वामुभयोः साधारणं वेत्ति ॥ ५७८

व्यजनस्येव समीपे गतागतैस्तापहारिणो भवतः ।
चञ्चलमिव चञ्चलतां मम सख्याः प्रापितं चेतः ॥ ५७९

लक्ष्मीः शिक्षयति गुणानमून् पुन र्दुर्मति विधूनयति ।
पूर्णा भवति सुहृत्सु सुधारसचिरपचपि वक्रः ॥ ५५८
लतातन्तुनिबद्धहारः शून्यालयः पतत्पतगः ।
पथिके तस्मिन्वस्त्रपिहितमुखो रोदितीव सखि ॥ ५५९
लग्नं जघने तस्याः सुश्रिमाले कलितकारिकरक्रीड़ं ।
वप्रे सक्तं द्विपमिव शृङ्गारसर्वां विभूषयति ॥ ५६०
छिन्नं न मुखं नाग्रं न पक्षती न चरणाः परागेण ।
अस्पृशतेव नलिन्या विदग्धमधुपेन मधु पीतं ॥ ५६१
लग्नं जघने तस्याः शुष्यति नखलक्ष्म मानसं मम च ।
भुक्तमविषदमवेदनमिदमधिकसरागसाबाधं ॥ ५६२
लज्जयितुमखिलगोपी र्निपीतमनसं मधुद्विषं राधा ।
अस्त्रेव पृच्छति कथां शम्भो र्दयितार्धतुष्टस्य ॥ ५६३
लक्ष्मीनिःश्वासानिलपिशङ्गीकृतदुग्धजलधिसारभुजः ।
चीरनिधितीरसद्मो यशांसि गायन्ति राधायाः ॥ ५६४
लीलागारस्य वहिः सखि चरणातिथौ मयि प्रियया ।
प्रकटीकृतः प्रसादो दत्त्वा वातायने व्यजनं ॥ ५६५
वर्णच्युति र्न ललाटे न लुलितमङ्कं न चाधरे दंशः ।
उत्पलमहारि वारिचर न स्पृष्टमुपायचतुरेण ॥ ५६६
व्यालम्बिचूर्णकुन्तलचुम्बितनयनाञ्चले मुखे तस्याः ।
वाष्पजलबिन्दवोऽलकमुक्ता इव पान्थ निपतन्ति ॥ ५६७
विहितबहुमानमौना सखीप्रबोधै र्व्यदप्रमा तनुते ।
रागास्तिंका कुयाच्ञा लघुवीथ्या हरसि पुनरेषा ॥ ५६८

रूपमिदं कान्तिरसावयमुत्कर्षः सुवर्णरचनेयं ।
दुर्गतमिलिता ललिते भ्रमसि प्रतिमन्दिरद्वारं ॥ ५४७
रचिते निकुञ्चपत्ने भिक्षुकपात्रे ददाति सावज्ञं ।
पर्य्युषितमपि सुतीक्ष्णश्वासकदुष्टं वधूरन्नं ॥ ५४८
रचयति न सखि निजस्थितिमलघुः स्थापयति नायकः स यथा।
तिष्ठति तथैव तद्गुणविद्धेयं हारयष्टिरिव ॥ ५४९
राजसि कृशाङ्गि मङ्गलकलशी सहकारपल्लवेनेव ।
तेनैव चुम्बितमुखी प्रथमाविर्भूतरागेण ॥ ५५०
रूपगुणहीनभार्य्या भवति लघुधूलिरनिलचपलेव ।
प्रथयति पृथुगुणने या तरुणी तरणीव गरिमाणं ॥ ५५१
रागे नवे विजृम्भति विरहक्रममन्दमन्दाक्षे ।
सस्मितसलज्जभीचितमिदमिष्टं सिद्धमाचष्टे ॥ ५५२
रोषोऽपि रसवतीनां न कर्कशो नो चिरानुबन्धी वा ।
वर्षाणामुपलोऽपि हि सुस्निग्धः क्षणिककल्पश्च ॥ ५५३
रोदनमेतद्वन्ध्यं सखि किं बहुरपि ममार्घः ।
स्वप्नेनेव हि विहितो नयनमनोहारिणा तेन ॥ ५५४
रोषेणैव मया सखि वक्रोग्रन्थिलोऽपि कठिनोऽपि ।
ऋजुतामानीतोऽसौ सद्यः स्वेदेन वंश इव ॥ ५५५
रजनीमियमुपनेतुं पितृप्रसूः प्रथममुपतस्थे ।
रञ्जयति स्वयमिन्दुं कुनायकं दुष्टदूतीव ॥ ५५६
लग्नापि कृष्णवर्त्मनि सुस्निग्धवर्त्ति हन्त दग्धासि ।
अयमखिलनयनसुभगे न भुक्तमुक्तां पुनः स्पृशति ॥ ५५७

Digitized by Google

युगपज्जघनोरुस्तनपिधानमधुरे त्रपाञ्चिताङ्गि मुखि ।
लोलाक्षि नैष पवनो विरमति तव वसनपरिवर्त्ती ॥ ५३६

यद्यपि बद्धः शैले ग्रथ्यपि गिरिमथनमुषितसर्वस्वः ।
तदपि परिभीतभूधररक्षायां दीक्षितो जलधिः ॥ ५३७

यस्यां दिशि यस्य तरौ ध्यामेत्य शिखां यतोऽवतरतीव ।
दृष्ट्वा सुधांशुलेखां निशां चकोरस्तथा नयति ॥ ५३८

यत्राञ्जवेन लघुता गरिमाणं यत्र वक्रिमा तनुते ।
छन्दःशास्त्र इवास्मिन् लोके सरलः सखे किमसि ॥ ५३९

यन्नोपकारकं यन् न भूषणं यत् प्रकोपमातनुते ।
गुरुणापि तेन कार्य्यं पटेन किं श्लीपदेनेव ॥ ५४०

यूथपते तव कश्चिन् न हि मानस्यानुरूप इह विटपी ।
प्रेक्ष्य दिनं निदाघद्राघीयः क्व खलु ते छाया ॥ ५४१

यद्यपि चन्दनविटपी फलपुष्पविवर्जितो विधिना ।
निजवपुषैव तथापि स हरते सन्तापमपरेषां ॥ ५४२

राज्याभिषेकसलिलक्षालितमौलेः कथासु कृष्णस्य ।
गर्व्वभरमन्थराक्षी पश्यति पदपङ्कजं राधा ॥ ५४३

रतिकलहकुपितकान्ताकरविकुराकर्षमुदितगृहनाथं ।
भवति भवनं तदन्य प्रांशुः पर्णशाला वा ॥ ५४४

रोगी राजायत इति जनवादं सत्यमद्य कलयामि ।
आरोग्यपूर्व्वकं त्वयि तल्पोपान्तागते सुभग ॥ ५४५

लघुस्वरसप्रसरस्याजिभिरपरं प्रियं प्रति मे ।
त्रिस्रोतस इव निम्नं प्रति रागस्य द्विगुण आवेगः ॥ ५४६

यान्निहितां शेखरयसि मालां सा पातु शठ भवन्तमिति ।
प्रहरन्तीं शिरसि मदा स्मरामि तां सर्वगुणकोपां ॥ ५२५

यौवनगुप्तिं पत्यौ बन्धुषु मुग्धत्वमार्जवं गुरुषु ।
कुर्वाणा हलिवधूः प्रणम्यते व्याजतो युवभिः ॥ ५२६

यो गुरुभि र्न न मित्रै र्न विवेकैरेव नापि रिपुहसितैः ।
नियमित.पू ः सुन्दरि स विनीतत्वं त्वयानीतः ॥ ५२७

यन्मूलमार्द्रमुदकैः कुसुमं प्रतिपर्व फलभरः परितः ।
द्रुम तन्नाप्यसि वीचीपरिचयपरिणाममविचिन्त्य ॥ ५२८

यस्याङ्के स्मरसङ्गरविश्रान्तिप्रोञ्छना सखी स्वपिति ।
स वहतु सुभगाभिमानं मदनधनुर्वल्लिचोलइव ॥ ५२९

यदि दानगन्धमाघ्राद् वसन्ति समच्छदेपि दन्तिन्यः ।
किं मदकलङ्कमलिनां करी कपोलस्थलीं वहति ॥ ५३०

यदवधिविरहसान्द्रा विकासितकुसुमोत्करा शरच्छ्रेणी ।
पीतांशुकप्रियेयं तदवधि पल्लीपतेः पुत्री ॥ ५३१

यमुना तरङ्गतरलं न कुवलयं कुमुमहेले न सुलभं ।
यदि सौरभानुसारी झङ्कारी भ्रमति न भ्रमरः ॥ ५३२

ये शिरसि विनिहिता अपि भवन्ति न सखे समानसुखदुःखाः ।
चिकुरा इव ते बाला एव जरायां पाण्डुभावेपि ॥ ५३३

यन्नियतं निर्गुणं यन् न वंशजं यस्य नित्यनिर्वाणं ।
किं कुर्म्म स्तन्निहितं धनुस्तदे देवराजेन ॥ ५३४

या दाक्षिणा तमश्यामदक्षिणी दक्षिण स्तदितरस्त्वां ।
जलधि मध्यस्थः समवेलयोः सङ्गमाचरति ॥ ५३५

Digitized by Google

मानग्रहकोपादनु सा दयिताश्लेव रोषरे श्रमं।
आश्लगमयी विभूषा दाहाञ्चितगुणभावेन॥ ५१४

यूनः कण्टकिविटपानिवाञ्चलग्राहिणस्त्यजन्ती सा।
वन इव पुरेपि विचरति पुरुषं त्वामेव जानन्ती॥ ५१५

बुभास्तूपगताः स्मोः विबुधा वाङ्मात्रपाटवेन वयं।
अन्तर्भवति भवत्स्वपि नाभक्त स्तव्र विभ्रान्तं॥ ५१६

यत्र न दूती यत्र स्निग्धा न हृशोपि निपुणया निहिताः।
न गिरोऽप्यापि व्यक्तीकृतः स भावोऽनुरागेण॥ ५१७

या नीयते सपत्न्या प्रविश्य या वर्जिता भुजङ्गेन।
यमुनाया इव तस्याः सखि मलिनं जीवनं मन्ये॥ ५१८

यस्मिन्नयशोपि यशो फ्ली ि ो मानएव दौःशील्यं।
लघुता गुरुश्नता किं नवो युवा न सखि तेऽद्य हृष्टः॥ ५१९

यद् वीक्ष्यते खलानां महाभ्रं क्वापि दैवयोगेन।
काकानामिव मौक्त्यं तदपि न चिरादनर्थाय॥ ५२०

यत् खलु खलमुखहुतवहविनिहितमपि शुचिमेव परखेति।
तदनलशौचमिवांशुकमिह लोके दुर्लभं प्रेम॥ ५२१

यत्रावधिमर्थयते पाथेयार्थं ददाति सर्वस्वं।
तेनाऽनयातिदारुणशङ्कामारोपितं चेतः॥ ५२२

यूमामौर्थ्यावैरं वितन्वता तरुणि चक्ररुचिरेण।
तव जघनेनाकुलिता निखिला पल्ली खलेनेव॥ ५२३

यावज्जीवनभावौ तुल्याश्रययो नितान्तनिर्भेदः।
नद्योरिवैष यूनोः सङ्गो रसमधिकमावहतु॥ ५२४

Digitized by Google

तृषित इव घनविरहे रिपुरिव कुसुमेषुकेलिसंग्रामे ।
त्रस्त इव प्रलयसमये भजन्नताङ्गीं न तृप्यामि ॥ ५०३

मुञ्चसि किं मानवतीं व्यवसायद्विगुणरोषवेगेति ।
स्नेहभवः पयसाग्निः शान्तो न च रोष उच्छ्वसति ॥ ५०४

मलयजमपसार्य घनं वीजनमिव विहाय बाहुभ्याम् ।
अतनुतापादनिगलितनिदाघमालिङ्गते मिथुनं ॥ ५०५

महतोपि निम्नासान् महाशया दधति मात्सरमपि लघवः ।
स कृतेऽद्रीणुदधिं निदाघनद्यो न भेकमपि ॥ ५०६

मधुधारेव न मुञ्चसि मानिनि रुष्टापि माधुरीं सहजां ।
कृतमुखभङ्गापि रसं ददासि मम सरिदिवाम्भोधेः ॥ ५०७

मदमालष्टधनुर्ज्यास्वनैरिव स्त्रिणी पथिकतरुणानां ।
वीणातन्त्रीक्वाणैः केषां न विकल्पते चेतः ॥ ५०८

मम भयमस्याः कोपो निर्वेदोऽस्या ममापि मन्दाक्षम् ।
यातं क्षणान्तरिते स्मितसम्वृतिनमितकन्धरयोः ॥ ५०९

मुक्ताम्बरेव धावतु निपततु भुवि सा सखे त्रिपथगास्तु ।
क्षमेव नर्मदा मम वंशप्रभवानुरूपरसा ॥ ५१०

मृगमदलेपनमेतत् नीलनिचोलैरनिशि निषेवस्व ।
कालिन्द्यामिन्दीवरमिन्दिन्दिरसुन्दरीव सखि ॥ ५११

मम सख्या नयनपथे मिलितः शक्तो न कश्चिदपि चलितुम् ।
पतितोऽसि पथिक विषमे घट्टकुटीयं कुसुमकेतोः ॥ ५१२

महता प्रियेण निर्म्मितमप्रियमपि सुभग सह्यतां याति ।
सुतसम्भवेन यौवनविनाशनं न खलु भेदाय ॥ ५१३

Digitized by Google

मधुमथनवदनविनिर्गतवंशीसुषिरानुसारिणो रागाः ।
हन्त हरन्ति मनो मम कलिकाश्लिष्टाः स्मरस्येव ॥ ४९२
महतोः सुवृत्तयोः सखि हृदयगृहयोस्तयोः समुच्छ्रितयोः
अन्तर्गतयोः स्तनयोरपि निरन्तरं सङ्गतं भवति ॥ ४९३
मम वारितस्य बहुभि र्भूयोभूयः स्वबस्य भावयतः ।
जातो दिष्ट्येव तस्यां सखे न निवर्त्तते मोहः ॥ ४९४
मन्ये नमद्गारसे हतोसि वीचिविलोचनक्षेपैस्त्वं ।
यद्गुरुत्वसे लब्धवरस्थो भ्रंशोपि ते श्लाघ्यः ॥ ४९५
मेनामुल्लासयति स्मेरयति हरिं गिरिञ्च विमुखयति ।
हतकरबन्धावलम्बः परिणयने गिरिशकरकम्पः ॥ ४९६
मधुगन्धि घर्मतिलकं स्खलदुक्ति घूर्णदरुणविलोकनञ्च ।
तस्याः कदाधरामृतमाननमवधूय पास्यामि ॥ ४९७
मेदिन्यां तव निपतति नैव पदं बहुवल्लभेति गर्व्वेण ।
आश्लिष्य कैनं तरुणै स्तरीव वसनै र्विमुक्तासि ॥ ४९८
मूले विसर्गचतुरं समर्पयन्तो रसं पुरो विरसाः ।
इक्षव इव परपुरुषा विविधेषु रसेषु विनिधेयाः ॥ ४९९
महति स्नेहे निहितः कुसुमं बहुदत्तमर्च्चितो बहुशः ।
वक्रस्तदपि शनैश्चरग्रह इव दुष्टग्रहो दयितः ॥ ५००
मा शवरतरुणि पीवरवक्षोरुहयो र्भरेण भज गर्व्वं ।
निर्म्मोकरूपशोभा ययौ भुजङ्गीभिरुन्मुक्ताः ॥ ५०१
मम कुपितायाश्छायां भूमावालिङ्ग्य सखि मिलितपुलकः
स्नेहमयत्वमनुज्झन् करोति किं नैष मामपरुषं ॥ ५०२

मिव रालोच्य समं गुरु कृत्वा वदनमपि सन्तापः ।
अर्थः सतामिव हतो मुखमेतस्याः स मानोऽयं ॥ ४८२
मम रात्रियो मनस्विनि करमर्पयतो हराशि कस्यापि ।
यदि तदपि कामवन्योरिव मध्ये स्तस्य सौभाग्यं ॥ ४८३
मा स्पृश मानिनि सकुपितमिव भवितं व्यथितोऽतः क्रीड़ा ।
आलिङ्गनया सन्नितमुखमनाचार किं कुरुषे ॥ ४८४
मूलानि च शिशुकानाम् हृदयानि च कुलवतीकुचकलनां ।
मदिरमदिराप्रमत्ता गोदावरि किं विदारयसि ॥ ४८५
मलयद्रुमसाराणामिव चौराणां गुणप्रकर्षोऽपि ।
जड़समयनिपतितानामनादरायैव न गुणाय ॥ ४८६
मधुमथनमौलिमाले सखि तुलयसि किं सुधाकमला राधां ।
यस्तव पदमदसीयं सुरभयितुं सौरभोन्नदः ॥ ४८७
मयि यास्यति कल्पावधिदिनसङ्ख्यं चुम्बनं तथासेयं ।
प्रियया गुणोचिता सा तावत् सुरतात्तमा रजनी ॥ ४८८
मृगमदनिदानमटवीकुञ्ज ममपि नाभकवाटिका वहसि ।
हट्टविलासिनि भवती परमेका पौरसर्वस्वं ॥ ४८९
मधुदिवसेषु भ्राम्यन् यथा यथा विशति मानसं भ्रमरः ।
सखि नीलकण्ठकनिभ स्तथा तथा मदनविशिखोपि ॥ ४९०
मयि चलिते तव मुक्ता दृग्शः सुतारा: प्रिये सपानीयाः ।
सत्वमस्तूलग्राः सद्यः प्रयान्ति मम हृदयहारत्वं ॥ ४९१
मुग्धे मम मनसि शराः स्मरस्य पञ्चापि सततं विलग्नाः ।
यत्के स्तनगुटिकाद्वयमर्पितमेतेन तव हृदये ॥ ४९२

[illegible] [illegible] सवधू[illegible] ।
[illegible] सुसमधि ॥ ४७०

[illegible] कुर्वन्निव [illegible] ।
[illegible] ॥ ४७१

[illegible] पदं [illegible] ।
स [illegible] मां [illegible] ॥ ४७२

[illegible] ।
[illegible] मुक्तो गरिमा [illegible] ॥ ४७३

[illegible] [illegible] ।
[illegible] ॥ ४७४

[illegible] पीवरमुकुन्दरं [illegible] ।
निद्रायां प्रेमार्द्रः पश्यति निश्वस्य निश्वस्य ॥ ४७५

[illegible] कुसुममनुसरन्ती त्वां ।
अव्यक्तं कूजन्ती [illegible] तमसि सा भ्रमति ॥ ४७६

[illegible] प्रेरितस्पयसि तत्र तत्रैव ।
आवर्तपतितनौकायितमनया विनयमुपनीय ॥ ४७७

भ्रमयसि गुणमयि कण्ठग्रहयोग्यान् [illegible] ते ।
हालिकनन्दिनि तरुणान् ककुद्मिनो मेधिरज्जुरिव ॥ ४७८

[illegible] मौलौ गात्रे भुजङ्गमा[illegible] ।
तदपि तमोमय एव त्वमीश्वरः प्रकृतिमतिमेतुम् ॥ ४७९

[illegible] यथा लपति [illegible] बाला ।
[illegible] तथा [illegible] पिबति ॥ ४८१

Digitized by Google

[illegible]ऽ [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] ॥ ४५९ ॥

[illegible] [illegible] [illegible] [illegible] [illegible] ।
[illegible] जनानां सुखमीहितम[illegible] ॥ ४६० ॥

[illegible] [illegible] मधुपः ।
[illegible] नासानि[illegible]रिव ॥ ४६१ ॥

[illegible] [illegible] कुरुते [illegible] [illegible] ।
यावद्दोषं जानाति [illegible] पुनः [illegible] ॥ ४६२ ॥

[illegible] यद्यपि [illegible] ।
भग्ना भग्ना भूरिव न तु तस्या विघटते [illegible] ॥ ४६३ ॥

भ्रमसि [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।
धिङ्[illegible] तव [illegible] [illegible] [illegible] [illegible] ॥ ४६४ ॥

भूति[illegible] [illegible] [illegible] [illegible] [illegible] ।
सैव सुवर्ण[illegible] [illegible] परि[illegible] ॥ ४६५ ॥

भवति निदाघे दीर्घ[illegible] [illegible] [illegible] [illegible] ।
[illegible] दिवसा [illegible] [illegible] [illegible] [illegible] ॥ ४६६ ॥

भवता [illegible] [illegible] [illegible] [illegible] ।
तन्वी [illegible] [illegible] [illegible] न [illegible] [illegible] ॥ ४६७ ॥

भूति[illegible] [illegible] [illegible] [illegible] ।
[illegible] निश्वासैः [illegible] मनो [illegible] ॥ ४६८ ॥

भवता[illegible] [illegible] जातः किल [illegible] त्वं ।
[illegible] [illegible] ते [illegible] ॥ ४६९ ॥

परपतिनिर्दयबकुलटासक्त मीर्ष्यया न रुषा न कोपेन ।
दग्धघनमतोपतप्ता रोदिमि तव तानवं वीक्ष्य ॥ ४४८

प्रोञ्छन्त्येव यदा मां स्निह्यति मन्युकम्पितकुचकलशा ।
अंसनिषण्णमुखी सा स्नपयति बाष्पेण मम पृष्ठं ॥ ४४९

प्रेतैः प्रशस्तसत्त्वा साश्रु कैर्वीक्षिता स्खलद्धासैः ।
चुम्बति मृतस्य वदनं भूतमुखोल्कैचितं बाला ॥ ४५०

पिशुनः खलु सुजनानां खलमेव पुरो निधाय जेतव्यः ।
जग्ध्वा गरमात्मीयं जिगाय बाणं रणे कृष्णः ॥ ४५१

पिब मधुप बकुलकलिकां दूरे रसनाग्रमाधाय ।
अधरविलेपसमाप्ये मधुनि मुधा वदनमर्पयसि ॥ ४५२

प्रायेणैव खलानां मलिनानामाश्रयत्वमुपयान्ति ।
कालिन्दीपुटभेदः कालियपुटभेदनं भवति ॥ ४५३

पश्य प्रियतनुविघटनभयेन शशिमौलि देहसंलग्ना ।
सुभगैकदैवतमुमा शिरसा भागीरथीं वहति ॥ ४५४

पथिकवधूजनलोचनवाष्पनदीमातृकेषु देशेषु ।
घनमण्डलमाखण्डलधनुषा कुण्डलितमिव विधिना ॥ ४५५

प्रतिवेशिविप्रबन्धुषु दूरात् स्वच्छ्रागतोपि गेहिन्याः ।
प्रतिफलितलम्पटतया दिनमेकमगोपि गेहपतिः । ४५६

पर्पट इव रजनीभिर्मलिनो भुक्तापि निर्दयं ताभिः ।
द्रव्यग्रहेण न विना जघन्य मुक्तोऽसि कुलटाभिः ॥ ४५७

सुप्तोऽयमिति लाक्षारुणशिरसि वयस्येन दयित उपहसिते ।
तत्कालकलितलज्जा पिशुनयति सखीषु सौभाग्यं ॥ ४५८

प्रणयापराधरोषप्रसादविश्वासकेलिपाण्डित्यैः ।
रूढप्रेमा क्रियते किमु बाला कुतुकमात्रेण ॥ ४३७

पूर्व्वैरेव विचित्रै र्गमनै र्वनिताभिः पूज्यता भवतः ।
मुञ्च मदमस्य गर्व्वात् युवभिः कुञ्जरगञ्जनोऽसीति ॥ ४३८

प्रसभं प्रविशितायां वासागारं कथञ्च न सखीभिः ।
न शृणोतीव प्रातः सा विर्गमनमासमङ्केता ॥ ४३९

पूजा विना प्रतिष्ठां नास्ति च मन्त्रं विना प्रतिष्ठा च ।
तदुभयविप्रतिपन्ना पतन्तु जीर्णपाषाणं ॥ ४४०

पूर्व्वाधिको वदित्रां बहुमानः प्रेम नर्म्म विस्रोकः ।
भीरधिकेयं कथयति सपं कान्तया विभक्तमिव ॥ ४४१

पुलकितकठोरपीवरकुचकलशाश्लेषवेदनाभिज्ञः ।
ग्रन्थोरुपवीतफणी वाञ्छति मानग्रहं देव्याः ॥ ४४२

प्रिय आयाति दूरादिति सा प्रीतिर्बभूव मेऽभिक्याः ।
पथिकेभ्यः पूर्व्वागतइति मर्वात् सापि प्रतिभिन्ना ॥ ४४३

पृष्ठं प्रयच्छ मा स्पृश दूरादपसर्प विघ्नितवैमुख्यः ।
त्वामनुधावति तरणि स्तदपि गुणाकर्षणपरेयं ॥ ४४४

प्रियाया कुङ्कुमपिञ्जरपाणिद्वयोत्पञ्चिते गात्रः ।
प्रहितं मां याचञ्जलिसहस्र करणाय निर्याति ॥ ४४५

पश्चात्तिनिर्द्दि स कुलटायोषित नैविर्ष्यया न रोषेण ।
दृग्धममतोपतप्ता रोदिमि तव तामवं वीक्ष ॥ ४४६

प्राचीरान्तरितेयं प्रियस्य वदनेऽधरं समर्पयति ।
प्रागगिरिपिहिता रात्री सन्ध्यारागं दिनस्येव ॥ ४४७

पथिक कथं चपलोज्ज्वलमम्बुदजलबिन्दुनिवहमविषह्यं ।
नवपुरकनकद्रवमिव शिवशरशिखिभावितं सहसे ॥ ४२६

पथिकं श्रमेण सुप्तं दरतरला तरुणि सुमधुरच्छाया ।
व्यालम्बमानवेणिः सुखयति शाखेव सारोहा ॥ ४२७

प्रददासि नापरासां प्रवेशमपि पीनतुङ्गजघनोरुः ।
या तुङ्गकोलभारा यतो हृदि बहिरदृश्यासि ॥ ४२८

स्वतः निद्राति यथा यथालसा लुलितनिःसहैरङ्गैः ।
जामातरि मुदितमना स्नुषां तथा सादरा श्वश्रूः ॥ ४२९

प्रथयवलितया सकपटकोपकटाक्षैर्मया कृतस्तम्भः ।
श्वासतरलो गृहीतः सहासरभसं प्रियः कण्ठे ॥ ४३०

प्रियदुर्नयेन हृदय स्फुटसि यदि स्फुटनमपि तव श्लाघ्यं ।
तत्पालि समये तल्पीकृतस्य वसनाञ्चलस्येव ॥ ४३१

पवनोपनीतसौरभदूरोदकपूरपद्मिनीलुब्धः ।
अपरीक्षितस्वपक्षो गत्वा हत्वा पदं मधुपः ॥ ४३२

प्रेमलघूकृतकेशववक्षोभरविपुलपुलककुचकलसा ।
गोवर्द्धनगिरिगुरुतां मुग्धवधू निभृतमुपहसति ॥ ४३३

प्रियविरहनिःसहायाः सहजविपक्षाभिरपि सपत्नीभिः ।
रक्ष्यन्ते हरिणाक्ष्याः प्राणा गृहभङ्गभीताभिः ॥ ४३४

प्रकटयति रागमधिकं लपनमिदं वक्रिमाणमावहति ।
प्रीणयति च प्रतिपदं दूति शुकस्येव दयितस्य ॥ ४३५

प्रविशन्त्याः प्रियहृदयं बालायाः प्रबलयौवनव्याप्तं ।
नर्मनिशितदरतरङ्गितनयनमयेनासिना पन्थाः ॥ ४३६

Digitized by Google

प्रिय आयाते दूरादभूत इव सङ्गमोऽभवत् पूर्व्वः ।
मानकदितप्रसादाः पुनरासन्नपरसुरतादौ ॥ ४१५

पूर्व्वमहीधरशिखरे तमः समासन्नमिहिरकरकलितं ।
शूलप्रोतं सरुधिरमिदमन्धकवपुरिवाभाति ॥ ४१६

परिवृत्तनाभि लुप्तत्रिवलि श्यामस्तनाग्रमलसाचि ।
बहुधवलजघनलेखं वपुर्न पुरुषायितं सहते ॥ ४१७

प्रारब्धनिधुवनेव स्वेदजलं कोमलाङ्गि किं वहसि ।
ज्यामर्पयितुं नमिता कुसुमास्त्रधनुर्लतेव मधु ॥ ४१८

पुंसां दर्शय सुन्दरि मुखेन्दुमीषत्त्रपामपाकृत्य ।
जायाजित इति रूढा जनश्रुतिर्मे यशो भवतु ॥ ४१९

प्रसरतु शरत्त्रिधामा जगन्ति धवलयतु धाम तुहिनांशोः ।
पञ्जरचकोरिकाणाम् कणिकाकलोऽपि न विशेषः ॥ [illegible]

पतितेऽंशुके स्तनार्पितहस्तां तां निविडजघनपिहितोरुं ।
नखपदविकलां फूत्कृतिशतधूतदीपां मनः स्मरति ॥ ४२१

प्रथमागत सोत्कण्ठा चिरचलितेयं विलम्बदोषेव ।
वहन्ति साङ्गरागाः पथि तरव स्तव समाधानं ॥ ४२२

परितः स्फुरितमहौषधिमणिनिकरे केलितल्प इव शैले ।
काञ्चीगुण इव पतितः स्थितैकरत्नः फणी स्फुरति ॥ ४२३

प्रावृषि शैलश्रेणीनितम्बमुभ्भजसि दिगन्तरे भ्रमसि ।
चपलान्तरघन किं तव वचनीयं पवनवश्योऽसि ॥ ४२४

प्रतिदिवसक्षीणदशः तवैष वसनाञ्चलोऽतिकरकृष्टः ।
निजनायकमतिकृपनं कथयति कुग्राम इव विरलः ॥ ४२५

Digitized by Google

प्रतिबिम्बसम्भृताननमादर्शं मुग्ध मम सखीहस्तात् ।
आदातुमिच्छसि मुधा किं लोलाकमलमोहेन ॥ ४०४

प्राचीनाचलमौली यथा शशी गगनमध्यमधिवसति ।
त्वां सखि पश्यामि तथा छायामिव तनुं वहन्तीं ॥ ४०५

प्रावृषि शैलेषु निशापतिः सन्तापे सुधाभुजो हरिः ।
यदिदं मां त्यक्त्वा इव स न विरुषति गेहपतिः ॥ ४०६

पतिपुत्रकदूनाथी स्वजनयावोदयेऽपि या समया ।
अभिसरति सुभग सा त्वां स्तनयन्ती कण्टकं तमसि ॥ ४०७

प्रतिभूः शुक्लो विरहे हृदः शृङ्गारसंकथा गुरुषु ।
पुरुषायितं प्रसादं मावे परिभाव्यतां हृदयः ॥ ४०८

प्रत्यासन्नाप्युत्तमाङ्के तवपि तव कटाक्षोऽयं ।
विनिपतति कलिलकर्णः प्रविशति हृदयं न निःसरति ॥४०९

प्रणयप्रियनिकुञ्जेषु स्वन्ती प्रीतिभीतिमधुराक्षी ।
प्रियकीर्तनाभिनिवेशितचिबुकतया न पतितम् सुतनुः ॥ ४१०

प्रातः क्षणेऽत्र कथा वदतः सखि नास्य विद्यते क्रोधः ।
गुरुजनसंवादेऽपि योऽसौ न लज्जते पश्य कालिकया ॥ ४११

प्रायेण पररमणीहरि पशुपुगमासाद्य निर्जितविपक्षः ।
वैरात्किरिरिव पलङ्कः प्रत्यानयनं करोति मवां ॥ ४१२

प्रमदवनं तन च स्तनशैलं मूलं गभीरसरसाङ्क ।
जगति निदाघमिव स्तनशैल्यो दुर्गन्धं श्वयति ॥ ४१३

प्रोञ्छति तथापराधं मानं मर्दयति निर्वृतिं हरति ।
सुकृतैर्निर्लोभित यथा गुजागरदीर्घा निशा सुभग ॥ ४१४

Digitized by Google

निहिताऽशेषविषमाया त्वं तस्या हरसि हृदयपर्यन्तम् ।
न सुभग समुचितमीदृशमङ्गुलिदाने भुजं गिलसि ॥ ३८३

नीत्वायामं रजनीजागरमेकञ्च सादरं दत्त्वा ।
अचिरेण कैर्न तरुणी दीर्घायज्ञीव विमुक्तासि ॥ ३८४

नयतेऽस्मात्स्थानाद्दूरे कनके मणौ दृशि समुद्रे ।
यत्नं खलु तेजस्तद्दृखिलमीजायितमब्जमिवस्य ॥ ३८५

न स वर्णो न च रूपं न संस्कृतिः कापि नापि सा प्रकृतिः ।
बाला त्वद्विरहापदि जाताऽपभ्रंशभाषेव ॥ ३८६

न विभूषयति तथास्या वपुर्गुणेनैव जयसि सखि पुनः ।
अवधीरितास्त्रशस्त्रा कुसुमेषो मल्लविद्येव ॥ ३८७

नेत्राकृष्टो भ्रामं भ्रामं प्रेयान् यथा यथाऽस्ति तथा ।
मथ्यति सखि मनो मम दधिभाण्डं मन्थदण्ड इव ॥ ३८८

नानावर्णकरूपं प्रकाशयन्तो मनोहरं तन्वी ।
चित्रकारतूलिकेव त्वां सा प्रतिभित्ति भावयति ॥ ३८९

पथिकासक्ता किञ्चिन् न वेद घनकालममोपिका गोपी ।
कोकिलकलानुकारैः कौरावती मोघमपसरति ॥ ४००

प्रसरति लुम्पति पश्यति संश्लिष्यति पुलकमुकुलितैरङ्गैः ।
प्रियसङ्गाय स्फुरन्तीं वियोगिनी वामबाहुलतां ॥ ४०१

प्रविशसि न च निर्यातुम् जानासि व्याकुलत्वमातनुषे ।
बालके चेतसि तस्याः चक्रव्यूहेऽभिमन्युरिव ॥ ४०२

पश्यानुरूपमिन्दिन्दिरेण माकन्द मञ्जरी मुखरः ।
अपि च पिचुमर्दमुकुले नीकुल्लि कुलमाकुलं पतति ॥ ४०३

निजनयननिर्भिन्नबिम्बापितमपि निविडतारमोदकं ।
निर्मोकमञ्च भुजङ्गी तुष्यति पुनरपि मारपशुः ॥ २८२
कृत्वानमनार्द्रं मुञ्चसि कच्छ्रे च कञ्चुकं मुग्धे ।
मकरन्दोदकजुष्टं मदनधनुर्भिरिव कोलं ॥ २८३
नाहं वक्तुमपि शक्नोमि त्वमशीला वा प्रवञ्चपरिता कान्ते
मेमहत्वमात्वसुलभं भयमुदयति मम तु हृदयस्य ॥ २८४
कन्दुकमनसुचिपातैरदयैराक्षिप्तनैव सुभगस्य ।
अपराधं संसक्तः मानिनं रचयन्ति रागिण्यः ॥ २८५
न किमु विमोक्षोऽसि सख्या नियतं नेत्रविभागमात्रेण ।
हारयसि येन कुसुमं विमुञ्चे त्वयि कण्ठदाम देवे ॥ २८६
न गुणे न लक्षणे वा वयसि च रूपे च नादरो निहितः ।
अथि कौतुकेऽपि घटो कपिलाद्युनीति वचयं ॥ २८७
निष्कारणापराधं निष्कारणकलहपोषपरितोषं ।
मामामयमोक्षजीवनसुखदुःखं जयति स्वाम्यत्वं ॥ २८८
क प्राप्यसे कामिन्या हृदयमाकर्षसि वितनुषे बाधां ।
त्वं मम मन्मथखिलकुसुमायुधविधिप्रधानमिव ॥ २८९
मामाहति मधुमधुभिलं प्रियइति स्मरहत्यनुमतो मम न
तद्गुणमनस्कतोऽयं नीवी रज्जुः पशुः पुरुषः ॥ २९०
निखिलात्मकमनस्सामपि सैवैका मनसि मम स्फुरति ।
रेखालावणमणना यज्ञार्गवराजिरिव दयिता ॥ २९१
निधिनिक्षेपस्थानस्योपरि चिह्नार्थमिव लता विहिता ।
लोभयति कं तनूदरि जघनतटादुपरि रोमावली ॥ २९२

नीतस्तमसि न स्नेहं हरति न निर्वाति न मलिनं कुरुते ।
तद्वोज्ज्वली निशि निशि प्रेमा रत्नप्रदीप इव ॥ ३७१

निहितान् निहितानुज्झति नियतं मम धार्मिकानपि प्रेम ।
ग्रामे ग्रामे तिष्ठति तत्रैव कुलालचक्रमिव ॥ ३७२

निर्भरमपि संभुक्तं दृष्ट्वा प्रातः पिबन् न तृप्यामि ।
अर्धजनमर्मस्पर्शमश्वाचकोर इव शिशिरकरबिम्बं ॥ ३७३

निविडघटितोरुयुगलां श्वासोत्तुङ्गस्तनार्पितभुजाग्रां ।
तां स्निग्धकुञ्चितदृशं स्मरामि रतिनिःसहां सुतनुं ॥ ३७४

निर्गुण इति मृतदृति च द्वावेकार्थाभिधायिनौ विद्धि ।
पश्य धनुर्गुणशून्यं निर्जीवं यदिह संसन्ति ॥ ३७५

निजसूत्रसूत्रलम्बी विलोचनं तरल ते घनं हरतु ।
स्वयमुद्गृहीतवडिशः कर्कट इव मर्कटः पुरतः ॥ ३७६

नागरक गीतिरिव सा ग्रामस्थितापि हृदयहरा सुतनुः ।
कस्तूरी न मृगोदरवासवशाद् विस्मृतामेति ॥ ३७७

नखलिखितस्तनि कुरवकमयपृष्ठे भूमिलुलितसर्वाङ्गि ।
हृदयविदारणनिःसृतकुसुमास्त्रशरेव हरसि मनः ॥ ३७८

नीता लघिमानमियं तस्या गरिमाणमधिकमर्पयति ।
भार इव विषमभार्यः सुदुर्वहो भवति गृहवासः ॥ ३७९

न च दूती न च याच्ञा न चाञ्जलिर्न च कटाक्षनिक्षेपः ।
सौभाग्यमानिनां सखि कुचग्रहः प्रथममभियोगः ॥ ३८०

निशि विषमकुसुमविशिखप्रेरितयोर्नौ लब्धरतिरसयोर्हि ।
मानः क्षणेन विलसति दम्पत्योः शिशिरकणिकेव ॥ ३८१

[illegible] दुर्वृत्तसकलितमेघश्यामलकमिति[illegible]: ।
[illegible]वलोकनहितगुणाय, वपुः पुरोहारि ॥ २६०

[illegible]सतां परहितैव प्रयोजिका भवति ।
[illegible]भिषेके कारणतां दृष्टिरनुभवति ॥ २६१

नीरा[illegible]रन्तुरसैवतसभेदमेदुरैः शिशिरे ।
[illegible]पटैरिव तटैः सरितः ॥ २६२

[illegible]यायां विश्रम्य नि[illegible]म् ।
[illegible] मुग्धकुर[illegible]ति ॥ २६३

न [illegible] इति यद् व[illegible] न[illegible] ।
सखि स यशोदातनयो नित्यं कन्दलितकन्दर्पः ॥ २६४

नीत[illegible] स्वभावमर्पितवपुरपि वाम्यं न कामिनी त्यजति ।
हरदेहार्द्धग्रथिता निदर्शनं पार्वती तत्र ॥ २६५

[illegible]रम्भोयानुमितस्ववधूसौन्दर्य्यगर्वतरलस्य ।
निपतति पदं न भूमौ ग्रातिपुरतस्तन्तुवायस्य ॥ २६६

निपतति चरणे कोणं प्रविश्य निशि यन्निरीक्षते क स्वात् ।
सखि स खलु लोकपुरतः खलः खगरिमाणमुद्गिरति ॥ २६७

न [illegible]यितुं शक्यः खलो महाम्भोचितो यदि कथञ्चित् ।
[illegible]रिव गरलं निवर्त्ततेऽनर्थमुत्पाद्य ॥ २६८

[illegible] गिरीशं सवर्णितेऽनर्थावहं समाश्रयति ।
सम्भव[illegible] कः सङ्गमकाङ्क्षं दुरीश[illegible] ॥ २६९

[illegible] रञ्जित जगती करिणाश्च सत्कवीनाञ्च ।
[illegible]नं शोभायै सज्जना एव ॥ २७०

Digitized by Google

दरनिद्राणस्यापि स्मरस्य शिखिन निर्गता सुग्धं ।
मुग्धे तव दृष्टिरसावर्जुनयस्येषुरिव हन्ति ॥ ३५०
दुर्गतगृहिणी तनये करुणार्द्रा प्रियतमे रागमयी ।
मुग्धा रताभियोगं न मन्यते न प्रतिक्षिपति ॥ ३५१
दुर्गतगेहिनि जर्जरमन्दिर सुप्तैव वन्दसे चन्द्रं ।
वयमिन्दुवञ्चितदृशो निःशुलितदोलाविहारिण्यः ॥ ३५२
दारयितुम् किमपारि न हृदयं कुसुमेषुणापि बालानां ।
गूढप्रहारोच्छूनमिवाभाति यदुरः ॥ ३५३
दीर्घगवाक्षमुखान्तर्निपातिन स्तरुणि रश्मयः शोणाः ।
नृहरिनखाइव दानववक्षःप्रविशन्ति सौधतलं ॥ ३५४
दरतरलेक्षणि वक्षसि दरोन्नते तव मुखे च दरहसिते ।
आस्तां कुसुमं वीरः स्मरोऽधुना चित्रधनुषापि ॥ ३५५
दुष्टसखी सहितेयं पूर्णेन्दुमुखी सुखाय नेदानीं ।
राकेव वृष्टियुक्ता भवतोऽभिमताय निशि भवतु ॥ ३५६
दलिते पलालपुञ्जे वृषभं परिभवति गृहपतौ कुपिते ।
निभृतं निभालितवदनौ हलिकवधूदेवरौ हसतः ॥ ३५७
दीप्यन्तां ये दीप्त्यै घटिता मणयस्य वीरपुरुषाश्च ।
तेजः स्वविनाशाय तु नृणां तृणानामिव लघूनां ॥ ३५८
धूमैरश्रूणि पातय दह शिखया दहन मलिनयाङ्गारैः ।
जागरयिष्यति दुर्गतगृहिणी त्वां तदपि शिशिरनिशि ॥ ३५९
धैर्य्यं निधेहि गच्छतु रजनी सेष्यत्तु सुमुखि सोत्कण्ठः ।
प्रविश हृदि तस्य दूरं च ... तमना स्मरेषुरिव ॥ ३६०

Digitized by Google

दूरस्थापितहृदयो भूकुरङ्गी निकामकामहतः।
प्रायेणो प्राणानां भवति वनाग्नानाय तुल्येदः॥ २३९

द्वारे पुरुषः कोपि मधुकः समापे मिन्न घरे हस्तः।
कालावह चलत मिन्न प्रतोद प्रभातमहः॥ २४०

दयितकथासुखाभरणा स्मालोल कृतनार्पणलगोत्रं।
क्षिपतालिकृति गोपीमन्यन्त्रमनन्तरैरक्षः॥ २४१

दृष्टितोहमेन सार्धं प्रियेव कन्नेन रानजावहता।
मोहयता मयनीयं ताम्बुलेनेव नीताक्षि॥ २४२

हृष्टमहृष्टप्रायां दयितं ज्ञात्वा प्रकाशितस्तनया।
हृदयं कामे ताडितमस्य मिथ्याध्यवसितवयसा॥ २४३

दर्शितवसुनोच्छ्राये भ्रूविभ्रमभाजि वलति तव नयने।
चित्रपले हलधर इव पुरमिवावर्जितं सुतनु॥ २४४

दयितप्रार्थितदुर्लभसुखमदिरासारसेकसुकुमारः।
व्यथयति विरहे बकुलः क परिचयः प्रकृतिकठिनानां॥ २४५

द्विवैरेवास्मि दिनैरिति किं तदसि सखि तवाश्वासः।
कथयति चिरपथिकव्रतं दूरनिखातो मयाङ्कस्ते॥ २४६

दयितस्पर्शोन्मीलितघर्मजलस्खलितचरणनखलाक्षे।
गर्वभरमुखरिते सखि तच्चिकुरान् किमपराधयसि॥ २४७

दुष्टमन्वेव भेदानि तेन कुपुत्रेण किं प्रजातेन।
भीमेनेव निजं कुलमङ्गारवत् कृतं येन॥ २४८

दर्शिततापोच्छ्रायैस्तेजोवद्भिः सुगोत्रसञ्जातैः।
चौरैरमलमणीरैरापत्स्वपि मन्यते नाथः॥ २४९

त्वामभिलषतो मानिनि मम गरिमगुणोपि दोषतां यातः ।
पङ्किलकूलां तटिनीं पिपासतः सिन्धुरस्येव ॥ ३२८

तिमिरेपि दूरदृश्या कठिनाश्लेषे च रहसि मुखरा च ।
मन्मथवलयराजी गृहपतिशिरसा सह स्फुटतु ॥ ३२९

तव वृत्तेन गुणेन च समुचितसम्बन्धकण्ठलग्नायाः ।
हारस्येव सुन्दरि जातः पुन र्नायक स्तरलः ॥ ३३०

दर्शनविनीतमाना हर्षोल्लसत्कपोलतलं ।
चुम्बननिषेधमिषतो वदनं पिदधाति पाणिभ्यां ॥ ३३१

देहस्तम्भः स्खलनं शैथिल्यं वेपथुः प्रियध्यानं ।
पथि पथि गगनाश्लेषः कामिनि कस्तेऽभिसारगुणः ॥ ३३२

द्रावयता दिवसानि त्वदीयविरहेण तीव्रतापेन ।
ग्रीष्मेणेव नलिन्या जीवनमल्पीकृतं तस्याः ॥ ३३३

दुर्जनसहवासादपि शीलोत्कर्षं न सज्जन स्त्यजति ।
प्रतिपर्वतपनवासी निष्कलमात्रः शशी शीतलः ॥ ३३४

दयित प्रहितां दूतीमालम्ब्य करेण तमसि गच्छन्ती ।
स्वेदच्युतमृगनाभि र्दूराद् गौराङ्गि दृश्यासि ॥ ३३५

दयितागुणप्रकाशं शीतः स्वेनैव वदनदीपेन ।
प्रतिदिनविदलितवाटीवृत्तिघटनैः खिद्यसे किमिति ॥ ३३६

दाक्षिण्यान्म्रदिमानं भजन्तमेनं न भानुमवमंस्थाः ।
रौद्रीमुपागतेऽस्मिन् कः क्षमते दृष्टिमपि दातुम् ॥ ३३७

दृष्टैव विरहकातरतारकया प्रियमुखे समर्पितया ।
यान्ति समवल्लभायाः पुलिन्दवाणार्दिताः प्राणाः ॥ ३३८

त्वयि कुग्रामवटद्रुम वैश्रवणो वसतु वा लक्ष्मीः ।
पामरकुठारपातात् कातरशिरसैव ते रक्षा ॥ ३१७
नव मुखर वदनदोषं सहमाना मौनमुत्तमा सुतनुः ।
सा वहति वत भवनं घुणमन्तः शालभञ्जीव ॥ ३१८
दृष्टसुखमपि न खलु त्वां त्यजन्ति अमी हरिणवैरिणः शवराः ।
यमसैव जीवितमिदं त्यज योजितशृङ्गसङ्ग्रामः ॥ ३१९
त्रिपुररिपोरिव गङ्गा मम मानिनि जनितमदनदाहस्य ।
जीवनमर्पितशिरसो ददासि चिकुरग्रहेणैव ॥ ३२०
त्वत्सङ्कथासु मुखरः सनिन्दशानन्दसावहित्थइव ।
स खलु सखीनां निभृतं त्वया कृतार्थीकृतः सुभगः ॥ ३२१
त्वयि सर्पति पथि दृष्टिः सुन्दर वृतिविवरविनिर्गता तस्याः ।
दरतरलभिन्नशैवलजाला शफरीव विस्फुरति ॥ ३२२
ते सुतनु शून्यहृदया ये शङ्कं शून्यहृदयमपि विदधति ।
अङ्गीकृतकरपत्रो यस्तव हस्तग्रहं कुरुते ॥ ३२३
ते श्रेष्ठिनः क्व सम्प्रति शक्रध्वज यैः कृतस्तवोच्छ्रायः ।
ईषाम्बा मेठिम्बा अधुनातनास्त्वां विधित्सन्ति ॥ ३२४
तानवमेत्य च्छिन्नः परोपहितरागमदनसङ्घटितः ।
कर्ण इव कामिनीनां विराजते निर्भरः प्रेमा ॥ ३२५
तस्मिन्नाप्ताद्भावे विगतरसे शुण्ठिशकल इव ।
अतिभूतिभाजि मलिने नागरशब्दो विडम्बाय ॥ ३२६
तमसि घने विषमे पथि जम्बुकमुल्कामुखं प्रपन्नाः स्म ।
किं कुर्मः सोऽपि सखे स्थितो मुखं मुद्रयित्वेव ॥ ३२७

तद्विरहापदि पाण्डुस्तन्वङ्गी च्छायये केवलया।
हंसीव ज्योत्स्नायां सा सुभग प्रत्यभिज्ञेया॥ ३०६
त्वयि विनिवेशितचित्ता सुभग गता केवलेन कायेन।
घनजालरुद्धमीना नदीव सा नीरमात्रेण॥ ३०७
त्वयि संसक्तं तस्याः कठोरतर हृदयमसमशरतरलं।
मारुतचलमच्चलमिव कण्टकसम्पर्कतः स्फुटितं॥ ३०८
त्वमसूर्य्यम्पश्यासि पदमपि न विनयवारणं भ्रमसि।
छाये किमिह विधेयं मुञ्चन्ति न मूर्त्तिमन्तस्त्वां॥ ३०९
तव विरहे विस्तारितरजनौ जनितेन्दुचन्दनद्वेषे।
बिसिनीव माघमासे विना हुताशेन सा दग्धा॥ ३१०
तरुणि त्वच्चरणाहति कुसुमितकङ्केलि कोरकप्रकारं।
कुटिलचरिता सपत्नी न पिबति बत शोकविलापि॥ ३११
तल्पे प्रभुरिव गुरुरिव मनसिजतन्त्रे श्रमेषु भुजिष्येव।
गेहे श्रीरिव गुरुजनपुरतो मूर्त्तेव सा व्रीडा॥ ३१२
त्वमलभ्या मम तावल्लोकमशक्यस्य सम्मुखं व्रजतः।
छायेवापसरन्ती भीत्या न निवार्य्यसे यावत्॥ ३१३
तपसा क्लेशित एषः प्रौढबलो न खलु फाल्गुनेऽप्यासीत्
मधुना प्रमत्तमधुना को मदनं मिहिरमिव सहते॥ ३१४
त्वद्गमनदिवसगणनावलयरेखाभिरलङ्कृता सा सुभग।
गण्डस्थलीव तस्याः पाण्डुरिता भवनभित्तिरपि॥ ३१५
तस्याग्राम्यस्याहं सखि वक्रस्निग्धमधुरया दृष्ट्या।
विद्धा तदेकनेया पोत्रिणइव दंष्ट्रया धरणी॥ ३१६

Digitized by Google

ज्वर वीतौषधिबाध स्तिष्ठ सुखं दत्तमङ्गमखिलं ते ।
असुलभलोकाकर्षणपाषाणसखेन मोक्ष्यसि मां ॥ २९५

जीवनहेतो र्मिलिता मुञ्चति करकर्षणेऽपि न खलु त्वां ।
नेत्रि निम्नं सुन्दर मुग्धा तद्विरसतां मागाः ॥ २९६

जघनेन चापलं तव वितन्वतीयं तनूकृता तनुः ।
शाणेनेव क्षीणा स्मरारिपुत्री मनो विशति ॥ २९७

ज्योत्स्नाभिसारसमुचितवेशे व्याकोषमल्लिकोत्तंसे ।
विशति मनो निशितेव स्मरस्य कुमुदलतच्छुरिका ॥ २९८

जड़ सुखयसि परतरुणीं गृहिणीं कारयसि केवलं सेवां ।
आलिङ्गति दिशमिन्दुः स्वान्तु शिलां वारि वाहयति ॥ २९९

ज्योत्स्नागर्भितसैकतमध्यगतः स्फुरति यामुनः पूरः ।
दुग्धनिधौ नागाधिपतल्पतले सुप्त इव कृष्णः ॥ ३००

ठुङ्कृतकङ्कणपाणिक्षेपै स्तम्भावलम्बनै मौनैः ।
शोभयसि शुष्करुदितैरपि सुन्दरि मन्दिरद्वारं ॥ ३०१

ढक्कामाहत्य मदं वितन्वते करिण इव पुरुषाः ।
स्त्रीणां करिणीनामिव मदः परं स्वकुलनाशाय ॥ ३०२

तां तापयन्ति मन्मथवाणा स्त्वां प्रीणयन्तीव ते सुभग ।
तपनकरा स्तपनशिलां ज्वलयन्ति विधुं मधुरयन्ति ॥ ३०३

तव सुतनु सानुमत्या बहुधातुजनितनितम्बरागायाः ।
गिरिवरभुवइव लाभेनाप्नोमि द्वाङ्गुलेन दिवं ॥ ३०४

त्यक्तो मुञ्चति जीवनमुभ्क्जति नानुग्रहेऽपि लोलत्वं ।
किं प्रावृषेव पद्माकरस्य करणीयमस्य मया ॥ ३०५

Digitized by Google

चपलां यथा मदान्धश्छायामयमात्मानः करी हन्ति ।
आस्फालयति करं प्रतिगज स्तथायं पुरो बद्धः ॥ २८४
चुम्बनलोलुपमदधरहृतकाश्मीरं स्मरन्नद्याप्यामि ।
हृदयद्विरदालानस्तम्भं तस्या स्तद्‌रुयुगं ॥ २८५
चिकुरविसारणतिर्य्यगातकण्ठी विमुखवृत्तिरिति बाला ।
त्वामियमङ्गुलिकल्पितकचावकशा विलोकयति ॥ २८६
चुम्बनहृताञ्जनाक्षं स्फुटजागरमीक्षणं क्षिपसि ॥
किमुषसि वियोगकातरमसमेषुरिवाङ्गनाराचं ॥ २८७
छायाग्राही चन्द्रः कूटत्वं सततमम्बुजे भवति ।
छित्वोभयं सभायां स्तौति तवैवाननं लोकः ॥ २८८
छायामात्रं पश्यन्नधोपुरद्‌गतेन धैर्य्येण ।
तुदति मम हृदयमिषुणा राधाचक्रं किरिटीव ॥ २८९
जलबिन्दवः कतिपये नयनाद् गमनोद्यमे तव स्खलिताः ।
कान्ते मम गन्तव्या भूरेतैरेव पिच्छलिता ॥ २९०
जृम्भोत्तम्भितदोर्युगयन्त्रिततारुण्डक पीडितकपोलं ।
तस्याः स्मरामि जलकणलुलिताञ्जनमलसदृष्टि मुखं ॥ २९१
जागरयित्वा पुरुषं परं वने सर्व्वतोमुखं हरसि ।
अयि शरदनुरूपं तव शीलमिदं जातिशालिन्याः ॥ २९२
जीवामि लङ्घितानवधिदिनेति लज्जावशेन गेहिन्याः ।
मयि सम्वृतोऽपि वाष्पैरसम्वरैर्व्यञ्जितो मानः ॥ २९३
जाल्मो गुरुः सुधृष्टो वामेतरचरणभेद उपदेशः ।
ख्याति र्गुणवला इति भ्रमसि सुखं वृषभ रथ्यासु ॥ २९४

घटितजघनं निपीड़ितपीनोरु न्यस्तनिखिलकुचभारं ।
आलिङ्गत्यपि बाला वदत्यसौ मुञ्च मुञ्चेति ॥ २७२
घटितपलाशककपाटं निशि निशि सुखिनोहि शेरते यस्याः ।
चञ्चामरेण कैरव कति शक्या रचितुं सख्यीः ॥ २६७
घूर्णन्ति विप्रलब्धाः स्नेहापायात् प्रदोषकलिकाश्च ।
प्रातः प्रखित्याथ स्त्रीष्टदयं स्फुटति कमलस्य ॥ २७४
चपलस्य पलितलाञ्छितचिकुरं दयितस्य मौलिमवलोक्य ।
खेदोचितेऽपि समये सस्मद मेवादर्दे गृहिणी ॥ २७५
चण्डि प्रसारितेन स्पृशन् भुजेनापि कोपनां भवतीं ।
दृप्यामि प्रश्चिलामिव पिबन्नदीं नलिननालेन ॥ २७७
चपलभुजङ्गीभुक्तोज्झितशीतलगन्धवह निशि भ्रान्त ।
अपरांशां पूरयितुम् प्रत्यूषसदागतं गच्छ ॥ २७८
चिरपथिक द्राघिमभिलदलकलताशैवालावलिग्रथिता ।
कारतोयेव मृगाक्ष्याः दृष्टिरिदानीं सदानीरा ॥ २७९
चण्डि दरचपलचेलव्यक्तोरुविलोकनैकरसिकेन ।
धूलिभयादपि न मया, चरणाहतौ कुञ्चितं चक्षु ॥ २८०
चलकुण्डलचलदलकस्खलदुरसिजवसनसज्जदृग्युगं ।
जघनभरक्लमकूणित नयनमिदं हरति गतमस्याः ॥ २८१
चरणैः परागसैकतमफलमिदं लिखसि केतक्याः ।
इह वसति कान्तिसारे नान्तःसलिलापि मधुसिन्धुः ॥ २८२
चिरकालपथिक शङ्कातरङ्गिताक्षः किमोक्षसे मुग्धः ।
त्वयिविप्लिंशास्येशस्त्रणकिणराजीयमेतस्याः ॥ २८३

गुरुषु मिलितेषु शिरसा प्रणमसि लघुषून्नता समेषु समा ।
उचितज्ञासि तुले किं तुलयसि गुञ्जाफलैः कनकं ॥ २६१
गन्धग्राहिणी श्वासोच्छ्वासविश्वासनिहितनिखिलाङ्गि ।
उपभुक्तमुक्तभूरुहयतेऽधुना भ्रमरि न भ्रमसि ॥ २६२
गेहिन्या क्रियमाणं निरुध्यमानं नवोढ़या पुरतः ।
मम नौका वितयार्पितगुणा इव हृदयं द्विधा भवति ॥ २६३
गुण आकर्षणयोग्यो धनुष इवैकोपि लब्धलाभाय ।
लूतातन्तुभिरिव किं गुणैर्विमर्द्दसहैर्बहुभिः ॥ २६४
गायति गीते शंसति वंशे वादयति सा विपञ्चीषु ।
पाठयति पञ्जरशुकं तव सम्वादाक्षरं बाला ॥ २६५
गणयति न मधुव्ययमयमविरतमापिबतु मधुकरः कुमुदं ।
सौभाग्यमानवान् परमसूयति द्युमणये चन्द्रः ॥ २६६
गुणविधृता सखि तिष्ठसि तथैव देहेन किन्तु हृदयं ते ।
हृतममुना मालायाः समीरणेव सौरभ्यं ॥ २६७
गुरुसदने नेदीयसि चरणगते मयि च मूकयापि तया ।
नूपुरमपास्य पदयोः किं न प्रियमीरितं प्रियया ॥ २६८
ग्रथिलतया किमिषोः किमपभ्रंशेन गीतस्य ।
किमनार्जवेन शशिनः किं दारिद्र्येण दयितस्य ॥ २६९
गेहिन्या चिकुरग्रहसमयससीत्कारमीलितदृशापि ।
बालाकपोलपुलकं विलोक्य निहितोऽस्मि शिरसि पदा ॥ २७०
गुरुपक्ष जागरारुणघूर्णत्तारं कथञ्चिदपि चलते ।
नयनमिदं स्फुटमखपदनिवेशकोपकुटिलभ्रु ॥ २७१

Digitized by Google

शीरीफले शुकोऽसौ मरसं मत्वा मले जीर्णं जीर्यति ।
जीर्यति कर्णे महतां दुर्वादो नाल्पमपि निविशति ॥ २५०

गृहपतिपुरतो जारं कपटकथाकथितमन्मथावस्थं ।
प्रीणयति पीड़यति च बाला निश्वस्य निश्वस्य ॥ २५१

गतिमञ्चितपरयुवतिः करौ कपोलौ करोतु मदमलिनौ ।
गुरुजनसमासविन्धुर लम्बोदर किं मदं वहसि ॥ २५२

गेहिन्या गृह्णन्तो गोत्रस्खलितापराधतो मानं ।
स्निग्धा प्रिये समर्थां सखीषु बाला हृद्यं हिमति ॥ २५३

ग्रीष्मसमये समयेऽस्मिन् निर्निर्मितं कलय केलिवनमूले ।
अम्बुमालजालवलयच्छलेन कुण्डलितमिव ग्रैष्मं ॥ २५४

गुणवद्वरस इति मा लीलाविहगं विमुञ्च सखि मुग्धे ।
अस्मिन् वलयितमाले सर्पिन गुणयन्नणं त्रुटति ॥ २५५

गुरुगर्जसान्द्रविट्टङ्कभयमुद्रितकर्णचक्षुषां पुरतः ।
बाला चुम्बति जारं वज्रादधिको हि मदनेषुः ॥ २५६

गृहिणीगुणेषु गणिता विनय सेवा विधेयतेति गुणाः ।
मानः प्रभुता वाम्यं विभूषणं वामनयनानां ॥ २२७

गुणमात्मरमगुणज्ञा कमलौ गङ्गा च वेद हरिहरयोः ।
एका पदेऽपि रमते न वसति निःकृता शिरस्यपरा ॥ २५८

गत्वा जीवितसंशयमभ्यस्तः सोढुमतिचिराद्विरहः ।
प्रकाशय पुनरपि हितस्मसि सुरतदुरभ्यासमनाकं ॥ २५९

गोवर्धनस्थितश्रेण्युत्तरमतिशीलशीतलं हृत्वा ।
निश्वस्य मोघरूपे स्ववपुषि निश्चितं तया चक्षुः ॥ २६०

कोपात्कृष्टमुखरमरासने सम्मृश प्रिये यतनः ।
छिन्नस्यामधुपानिव कज्जलमलिनाश्रुजलबिन्दून् ॥ २३९
कामेनापि न भेत्तुं किमु हृदयमपारि वारवनितानाम् ।
मूर्व्विर्विशिखप्रहारैरच्छूनमिवाभाति रत्नाघः ॥ २४०
किं परजोवे ईर्ष्यसि विस्मयमधुराक्षि गच्छ सखि दूरं ।
चहिमविपत्लरमुरगग्राही खेलयतु निर्विघ्नः ॥ २४१
करचरणेन प्रहरति यथा यथाङ्गेषु कोपतरलाक्षी ।
रोषयति परुषवचनैस्तथा तथा प्रेयसीं रसिकः ॥ २४२
अस्त्रां निन्दति लुम्पति कः सरफलकस्य वर्णकं मुग्धः ।
को भवति रत्नकण्टकान्वेषे कस्या रुचिरहेति ॥ २४३
कोपवती पाणिलीलाचञ्चलचूताङ्कुरे त्वयि भ्रमति ।
करकृष्टनवकरवाले स्मर इव सा मूर्च्छिता सुतनुः ॥ २४४
कौलीनाद्गमैर्णां भजामि न कुलं स्मरः प्रमाणयति ।
सद्भावेन भजन्तो मम गोत्रस्खलनमनिवार्य्यं ॥ २४५
कुत इह कुरङ्गशावक केदारे कलममञ्जरीं त्यजसि ।
तृणप्रमना तृणशिखिशिखः तृणघटितकपटपुरुषोऽयम् ॥ २४६
खलसख्यं प्राङ्मधुरं वयोमन्तराले निदाघदिनमन्तं ।
एकादिमध्यपरिणतिरमणीया साधुजनमैत्री ॥ २४७
गुणमधिगतमपि धनवान् अचिरामाश्रयति रचति दरिद्रः ।
मज्जयति रज्जुमर्मासि पूर्णकुम्भः सखि न तुच्छः ॥ २४८
गुरुरपि लघूपमोहो निमज्जति नियतमाश्रये महतः ।
वानरकरोपनीतः शैलो मकरालयस्येव ॥ २४९

किं हसथ किं प्रधावथ किं जनमाह्वयथ बालका विफलं।
तद्दयं दर्शयति यथा रिष्टः कण्ठेऽमुना जग्धे ॥ २२८
कातरताकेकरितश्रवणत्र्यारोषमस्तनमधुराक्षी ।
भोक्तुं न भक्तुमथवा बलतीऽसावद्य लब्धनतिः ॥ २२९
को विभ्रमो गुणा के का कान्तिः शिशिरकिरणलेखानां ।
अन्तः प्रविश्य तासामाज्ञान्तं पश्य विशेषेण ॥ २३०
केतकगर्भगन्धादरेण दूरादमी द्रुतमुपेताः ।
मदनस्यस्तम्भवाजिन इव मधुपा भूरिमाददते ॥ २३१
कृतविविधमथनयत्नः पराभवाय प्रभुः सुरासुरयोः ।
इच्छति सौभाग्यमदात् स्वयम्बरेण श्रियं विष्णुः ॥ २३२
किं पुत्रि गण्डशैलभ्रमेण नवनीरदेषु मिद्रासि ।
अनुभव चपलाविलसितगर्जितदेशान्तरभ्रान्तीः ॥ २३३
कान्तः पदेन हत इति सरलामपराध्य किं प्रसादयथ ।
सोऽप्येवमेव सुलभः पदप्रसादतः प्रहारः किं ॥ २३४
कर्णगतेयममोघा दृष्टिः सत्र शक्तिरिन्द्रदत्ता च ।
सा नासादितविजया क्वचिदपि नापार्थपतितेयं ॥ २३५
किं वयसि किमिति दूतीयं दृश्यं सुमुखि तव कटाक्षेण ।
कामोऽपि तत्र सायकमकीर्त्ति भङ्गो न सन्धत्ते ॥ २३६
को वेद मूल्यमच्युते प्रभुणा पणीकृतस्य विधोः ।
प्रतिविजये यत्प्रतिपणमधरं धरनन्दिनी विदधे ॥ २३७
कुपितां प्रहरणभयेन मुञ्चामि न खलु चण्डि त्वां ।
अलिरनिलचलकिसलयताडनसहनो लतां भजते ॥ २३८

क्व ये ऽपि तव्यमाने भिक्षितेयं मां प्रमोहयत्येव ।
रौद्रेऽप्यधोऽपि नभः सुरापगवारिदृष्टिरिव ॥ २१७

कूपप्रमवार्था परमुचितमर्पा पदबन्धनं मन्ये ।
यः प्रकाले स्त्रष्टुम् न पार्थिवेनापि विगुणेन ॥ २१८

करवृद्धयितानिपातभ्रान्त्या विश्रान्त रजनिदुरवाप ।
रविरिव यशोऽभिषिक्तः क्षयोऽपि लोकस्य हरति दृशं ॥ २१९

किं कारयामि दिशानियममपि सम्या सहजशीतल प्रकृतिः ।
हन्त स्मरयामि न प्रियमात्मानमिवात्मनन्यथा ॥ २२०

केशैः शिरसो गरिमा मरणं पीयूषकुण्डपातेन ।
दयितपदगेन वहसि यदि भार स्तदिदमचिन्तितृत्वं ॥ २२१

किञ्चित् कर्कशतामनुरसं प्रदास्यविसर्गमधुरो मे ।
दुर्वौरिव ते सुन्दरि मानस्य ग्रन्थिरपि काम्यः ॥ २२२

केन गिरिशस्य हृत्ता बुद्धि भुजङ्गं जटावनेऽर्पयितुम् ।
येन रतिरभसकान्ताकरचिकुराकर्षणं मुषितं ॥ २२३

करचरणकाञ्चिदामप्रहारमविचिन्त्य बलगृहीतकचः ।
प्रणयी चुम्बति दयितावदनं स्फुरदधरमरुणाक्षं ॥ २२४

कुरुतां चापलमधुना कलयतु सुरसासि यादृशी तदपि ।
सुन्दरि हरीतकीमनु परिपीता वारिधारेव ॥ २२५

कज्जलतिलककलङ्कितमुखचन्द्रे गलितसलिलकणवेशि ।
नवविरहदहनदूनो जीवयितव्यस्त्वया कतमः ॥ २२६

कण्ठस्थितमुक्तयोऽपि हि परोपकारं त्यजन्ति न महान्तः ।
दर्शमात्रजीवना अपि करिणो दानद्रवार्द्रकराः ॥ २२७

Digitized by Google

[illegible] । [illegible]
विधास्य मां [illegible] ॥ २०६
[illegible] ।
[illegible] ॥ २०७
[illegible] ।
[illegible] ॥ २०८
[illegible] ।
[illegible] ॥ २०९
कमलमुखि [illegible] ।
[illegible] ॥ २१०
[illegible] भवता [illegible] ।
[illegible] ॥ २११
[illegible] ।
[illegible] ॥ २१२
[illegible] ।
[illegible] ॥ २१३
[illegible] ।
[illegible] महती ॥ २१४
किं [illegible] निजं [illegible] ।
न त्वां [illegible] ॥ २१५
[illegible] ।
[illegible] ॥ २१६

अयमेव सखि बोधयेति इति श्रुत्वा स्वल्पमालापमयं प्राप्ताः ।
को वेद गोष्ठमिलद् गोष्ठीन्तो विहितबहुमानम् ॥ १९५

एको हरः प्रियाधरमुखपेटो द्विषिमदः परे मूकाः ।
विषमवृत्तकं सर्जनीति यः पञ्चम मारकेव रूपो ॥ १९६

एष्यति मां पुनरयमिति गमने पदमङ्कनं मयाऽकारि ।
अधुनात्तद्वे कारणमर्धाक्षतो, हन्त कोऽपि कल्पेत ॥ १९७

एकैकशो युवजनं विलक्षमाणमवलोकनिव नयन ।
विश्राम्यति सुभग त्वां प्रवृत्ति राकाचन्द्रमिव ॥ १९८

एकः स्मरन् जीवति हृदयविद्धोऽपि सैव्यवशो राहुः ।
यः सबालविक्रमपरमारमुदां नाविमर्शि दुष्करं ॥ १९९

एकेन स्वर्णकुम्भलमपरेण त्वं आत्म विकुर्वन्मुजमम् ।
पश्यामि यामधीतिकृति, कोरवसि मदृष्टां ॥ २००

एकं जीवनमूलं चपलमपि तत्स्वपदेऽपि संततं ।
गन्तव्यं हृति वराक्षी त्वां मांसेव निश्वासे ॥ २०१

एकं विदति मनो मे यामि न यामीति हृदयमपरं मे ।
हृदयद्वयमुचितं तव सुन्दरि हृतकान्तचित्तामाः ॥ २०२

एराण्डपत्रशयया जनयति खेदमलघु अभिनलटं ।
धूलिपुटीव मिलन्ती स्मरज्वरं हरति दर्भिवधूः ॥ २०३

केलिनिलयं सखीमिव न याति नवोढा स्वयं न मां भजते ।
इत्थं स्वहिणीमात्रे स्तुवति प्रतिवेशिना हसितं ॥ २०४

कामकलावमनीयकोऽयं भेतकोति का यामा ।
हरिद्रयी वक्रा स्यात् तथा तथा कामकौतुकता ॥ २०५

Digitized by Google

उपनीय कलममुष्टिं कथयति सभय विकितृणो हलिकः ।
ग्रीष्मं सीमार्द्धमिमं वधूस्तने व्याधिमुपजातं ॥ १८४
उन्मुकुलिताधरपुटे भूतिकणभ्राममिलिताक्षि ।
धूमोऽपि नेह विरम भ्रमरोऽयं श्वसितमनुसरति ॥ १८५
उपरि परिप्लवते मम बालेयं महिषि हंसमालेव ।
सरसीव नलिनमाला पुनरस्यमाश्रयं प्राप्य वससि ॥ १८६
उत्कम्पवर्णपिच्छिलदोःसाधक हस्तविच्युत धीरः ।
स्थिरमामास्व सुतनु स्तनयो स्तव चञ्चलाञ्चलयोः ॥ १८७
उत्क्षिप्तबाहुदर्शितभुजमूलं चूतमुकुल मम सख्या ।
आकृष्यमाण राजति भवतः पदमुच्चैः स्वे लाभः ॥ १८८
उच्चकुचकुम्भनिहितो हृदयं चालयति जघनलम्बः ।
प्रतिनिम्नमध्यसङ्क्रमदावर्त्तनिभ स्तवचि ते हारः ॥ १८९
उल्लसितशीतदीधितिकलोपकण्ठे स्फुरन्ति तारौघाः ।
कुसुमायुधविहितधनुर्निर्गतमकरन्दबिन्दुनिभाः ॥ १९०
उपनीय प्रियमसमर्थविदं च मे दृग्धं मानमपनीय ।
नर्म्मोपक्रम एव चच्छे दूतीव चलितासि ॥ १९१
उत्तमवलितैकगतिः करीव सरसीपयः सखे धैर्य्यं ।
आस्कन्दितोऽन्यथा त्वं हस्तेनैव स्पृशन् हरसि ॥ १९२
ऊढाऽमुनानिवाहय पृष्ठे लग्नापि कालमचलापि ।
सर्व्वंसहे कठोरत्वचः वि.भङ्गेन कमठस्य ॥ १९३
ऋजुना निधेहि चरणौ परिहर सखि निखिलनागराचारं ।
इह डाकिनीति पल्लीपतिः कटाक्षेऽपि दण्डयति ॥ १९४

उत्सारितताम्रगोऽयं ज्योत्स्नावर्षी सुधाकरः स्फुरति ।
आसन्नकाञ्चनवर्णः शकट इव प्रकटितचोरः ॥ १७३

उपचारानुनयास्ते कितवस्योपेक्षिताः सखीवचसा ।
अधुना निष्ठुरमपि यदि स वदति कलिकैतवाद् यामि ॥ १७४

उषसि परिवर्त्य तन्व्या मुक्तादामोपवीततां नीतं ।
पुरुषायितवैदग्ध्यं व्रीडावति कं न कलितं ते ॥ १७५

उड्डीनानामेषां प्रासादात् तरुणि पक्षिणां पङ्क्तिः ।
विस्फुरति वैजयन्ती पवनच्छिन्नापविद्धेव ॥ १७६

उद्गारितभ्रामितदन्तुरदलबद्धमधुकरप्रकरे ।
काञ्चनकेतकि मा तव विकसतु सौरभ्यसम्भारः ॥ १७७

उल्लसितभ्रूः किमलिकान्तं विस्मयसि निस्तरङ्गाक्षि ।
क्षुद्रापचारविरसः पाकः प्रेम्णः गुडस्येव ॥ १७८

उद्दिश्य निःसरन्ती सखीमियं कपटकोपकुटिलभ्रूः ।
एवमवतंसमारीचपदाहतदीपं यथा पतति ॥ १७९

उदितोऽपि तुहिनगहने गगनप्रान्ते न दीप्यते तपनः ।
कठिनघृतपूरपूर्णे शरावशिरसि प्रदीप इव ॥ १८०

उद्गमनोपनिवेशनहासपरावृत्तिचलनवचनेषु ।
अनिशं स मोहयति मां हृल्लग्नः श्वास इव दयितः ॥ १८१

उच्छ्रितसौभाग्यमदस्फुटयाच्ञाभङ्गभीतयो यूनोः ।
अकलितमनसोरेका दृष्टि दूती निसृष्टार्था ॥ १८२

उत्तमभुजङ्गसङ्गमनिस्पन्दनितम्बचापलं तस्याः ।
मन्दरगिरिरिव विबुधैरितस्ततः कृष्यते कायः ॥ १८३

इदमुभयभित्तिसन्ततहारगुणान्तर्गतैककुचमुकुलं ।
गुलिकाधनुरिव बालावपु स्मरः श्रयति कुतुकेन ॥ १६२

इह शिखिशिखरावलम्बिविनोददरतरलवपुषि तरुहरिषि ।
पक्षाभिलषति पतितुम् विहङ्गी निजनीडक्रोडेन ॥ १६३

इक्षुर्नष्टोपृशाहे। धूर्तं मानग्रहस्य ते सुतनु ।
भ्रूलतिका च तवेयं भङ्गे रसमधिकमावहति ॥ १६४

इन्दीरिवास्य पुरतो यदृविमुखी सापवारणा भ्रमसि ।
तत् कथय किन्नु दुरितं सखि त्वया च्छाययेव कृतं ॥ १६५

इह कपटकुतुकतरलितदृशि विश्वासं कुरङ्ग किं कुरुषे ।
नवरभसतरलितेयं व्याधवधू र्बालधी र्बलते ॥ १६६

इह वहति बहुमहोदधिविभूषणा मानभियमुर्व्वीं ।
देवस्य कमठमूर्त्ते र्न पृष्ठमपि निखिलमाप्नोति ॥ १६७

ईर्षारोषज्वलितो निजपतिसङ्गं विचिन्तयंस्तस्याः ।
चुतवसनजघनभाजनसान्द्रानन्देन निर्व्वामि ॥ १६८

ईश्वरपरिग्रहोचितमोहोऽस्यां मधुप किं मुधा पतसि ।
कनकाभिधानसारा वीतरसा कितव कलिकेयं ॥ १६९

ईषदवशेषजड़िमा शिशिरे गतमात्र एव चिरमङ्गैः ।
नवयौवनेव तन्वी निषेव्यते निर्भरं वापी ॥ १७०

उल्लसितभ्रूधनुषा तव पृथुना लोचनेन रुचिराङ्गि ।
अचला अपि न महान्तः के चञ्चलभावमानीताः ॥ १७१

उपनीय यन्नितम्बे भुजङ्गमुख्यैरलम्भि विबुधैः श्रीः ।
प्रवाः स मन्दरगिरिः सखि गरिमाणं समुद्वहतु ॥ १७२

आस्वादितोऽसि मोहाद्यत्र विदिता वदनमाधुरी भवतः ।
मधुलिप्तक्षुरधाराच्छेदाय परं विजानासि ॥ १५१

आकृष्टिवक्रकटकं केन तव प्रकृतिकोमलं सुभगे ।
अनेन भुजलतापाशं ग्राह्यं मदनस्य राज्यमिव ॥ १५२

आरुह्य दूरमगणितरौद्रक्लेशा प्रकाशयन्ती स्वं ।
वातधूतोत्कनपटी वहिर्बलिव हरसि मां सुतनु ॥ १५३

आयासः परहिंसा वैतंसिक सारमेय तव सारः ।
त्वामुत्साह्य विभाज्यः कुरङ्ग एषोऽधुनैवान्यैः ॥ १५४

आनयति पथिकतरुणी हरिण इह प्रणयन्निवासक्तं ।
उपकलममगोपि कलमकवलमात्रलिकन्दलनोत्सुकः ॥ १५५

आसीदेव यदार्द्रः किमपि तदा नायकाहतोऽप्यासः ।
निष्ठुरभावादधुना कटूनि रटति सखि पटह इव ॥ १५६

आज्ञाकरस्य ताडनपरिभवसहस्य सत्यमहमस्याः ।
न तु शीलशीतलेयं प्रियतां वक्तुमपि वेद ॥ १५७

आधाय दुग्धकलशे मन्थानं क्लान्तदोलिता गोपी ।
अप्राप्तपारिजाता दैवे दोषं निवेशयति ॥ १५८

आस्तां मानसकथनं सखीषु वा मयि निवेद्य दुर्विनये ।
शिथिलितरतिगुणगर्वा ममापि सा लज्जिता सुतनु ॥ १५९

आवर्त्तैरातपेन शोभां हिण्डीरपाण्डुरै दधती ।
गायति मुखरितसलिला प्रियसङ्गममङ्गलं सुरसा ॥ १६०

इयमुन्नतिं हरन्ती नेत्रनिकोचं विदधती पुरतः ।
न विजानीमः किं तव वहति सुग्रीव हिमनिद्रा ॥ १६१

Digitized by Google

आक्षिपसि कर्दमस्था निम्नैव बहो वलि त्वया मध्ये ।
इति जितसकलवराङ्गी तनुदाने किम लज्जसे युवति ॥ १४०

आवेपथपरवशस्तनकेशग्रहकेलिकुतुकतरलेन ।
स्मेरा पतिरपि गुरुरिति धर्मं न भाविता तेन ॥ १४१

आकुञ्चितैकजङ्घं दराहृतार्धोरु गोपितार्धोरु ।
सुतनोः श्वसितक्रमनमदुदरं स्फुटनाभि शयनमिदं ॥ १४२

आगच्छताऽनवेक्षितपृष्ठेनार्थी वराटकेनेव ।
मुक्ताऽसि तेन जघनांशुकमपि वोढुमशक्तेव ॥ १४३

आदाय धनमनल्पं ददानया सुभग तावकं वासः ।
मुग्धा रजकगृहिण्या जाता दिनैः कतिपयैर्निःस्वा ॥ १४४

आस्तां वरमवकेशी मा दोहदमस्य रचय चूततरोः ।
एतस्मात् फलितादपि केवलमुद्वेगमवगच्छ ॥

आरब्धमब्धिमथनं स्वहस्तयित्वा द्विजिह्वममरैर्यत् ।
उचितस्तत्परिणामो विषमं विषमेव यज्जातं ॥ १४६

आवर्जितालकावलि श्वासोत्कम्पस्तनार्तितैकभुजं ।
शयनं रतिविवशतनोः स्मरामि शिथिलांशुकं तस्याः ॥ १४७

आम्राङ्कुरोऽयमरुणश्यामलरुचि रश्मिनिर्गतः सुतनु ।
तव कमठखर्परपुटान् मूर्द्धवोद्वृ गतः स्फुरति ॥ १४८

आभङ्गुराग्रबहुगुणदीर्घा त्वादप्रिया दृष्टिः ।
कर्षति मनो मदीयं झटमीनं वडिशरज्जुरिव ॥ १४९

आलप यथा यथेच्छसि युक्तं तव कितव किमुपरोधयसि ।
जीवातिकाम्बुनमसौ जीवितरक्षा सखी सुभगा ॥ १५०

Digitized by Google

आलोक एव विमुखो क्वचिदपि दिवसे न दक्षिणा भवसि ।
छायेव तदपि तापं त्वमेव मे हरसि मानवति ॥ १२९

आयाकाकुर्याच्छ्राक्षेपो हसितञ्च शुष्करुदितञ्च ।
इति निधुवनपाण्डितां धारयं स्त्वया न हपयामि ॥ १३०

आयापयिष्यसि पदं दास्यसि दयितस्य शिरसि किं त्वरसे ।
असमयमानिनि ऽ गर्वे मा कुरु भग्नाङ्कुरं प्रेम ॥ १३१

आसाद्य भङ्गमनया द्यूते विहिताभिरुचितकेलिपणे ।
निःसारवतामानिनि कपटरुषोत्सारिताः सख्यः ॥ १३२

आदरणीयगुणा सखि मरुता निहितासि तेन शिरसि त्वं ।
तव लाघवदोषोऽयं सौधपताकेव यच्चलसि ॥ १३३

आयाति याति खेदं करोति मधु हरति मधुकरीवान्या ।
अधिदेवता त्वमेव, श्रीरिव कमलस्य, मम मनसः ॥ १३४

आर्द्रमपि स्तनजघनान् निरस्य सुतनु त्वयैतदुन्मुक्तं ।
स्वस्थमवाप्तुमिव स्वाम् तपनांशूनंशुकं पिबति ॥ १३५

आरोपिता शिलायाम् अश्मेव त्वं स्थिरा भवेति मन्त्रेण ।
मग्नापि परिणयापदि जारमुखं वीक्ष्य हसितैव ॥ १३६

आसाद्य दक्षिणां दिशमविलम्बं त्यजति चोत्तरां तरणिः ।
पुरुषं हरन्ति कान्ताः प्रायेण हि दक्षिणा एव ॥ १३७

आदानपानलेपैः काचिद् गरलोपतापहारिण्यः ।
सदसि शिलैव सिद्धौषधिवत् स्त्री कापि जीवयति ॥ १३८

आन्दोललोलकेशी चलकाञ्चीकिङ्किणीगणक्वणितां ।
पुरुषायितां स्मरे तां स्मरचामरविभ्रमयष्टिमिव ॥ १३९

Digitized by Google

अतिरभसेन भुजोयं वृतिविवरेण प्रवेशितः सहसा ।
दयिता सम्मीलिते नागच्छति वर्त्मना तेन ॥ ११८

अम्बरमधरनिविष्टं तवेदमतिचपलमलघु जघनतटं ।
चातक इव नवमभ्रं निरीक्षमाणो न तृप्यामि ॥ ११९

अथमन्धकारसिन्धुरभाराक्रान्तावनीभराक्रान्तः ।
उन्नतपूर्वाद्रिमुखः कूर्म्मः सन्ध्यासमुद्गमति ॥ १२०

अन्तर्मूर्ती निवसति जडे जडः शिशिरमहसि हरिणइव ।
अजडे शशीव तपने सुतनु प्रविष्टोऽपि निःसरति ॥ १२१

अगणितजनापवादा त्वत्पाणिस्पर्शहर्षतरलेयं ।
आयास्यती वराकी ज्वरस्य तल्पं प्रकल्पयति ॥ १२२

अपरीक्षकस्य जनुषोः पश्यत पूर्णत्वतुच्छताभाजोः ।
आकाशमुनिभयोः काश्चिद् गुणभूतः कश्चिदपि भर्त्ता ॥ १२३

अभिनवकेलिक्रान्ता कलयति बाला क्रमेण घर्म्माम्भः ।
जामर्पयितुं नमिता कुसुमास्त्रधनुर्लतेव मधु ॥ १२४

अविरलपतिताश्रु वपुः पाण्डुस्निग्धं तवोपनीतमिदं ।
अतधौतमाजरमिव मे स्मरशरदाहव्यथां हरति ॥ १२५

अन्तर्निपतितगुञ्जागुणरमणीय स्वकोऽस्ति केदारः ।
निजगोपीविनयवशयखेदेन विदीर्णहृदय इव ॥ १२६

अमुना हतमिदमिदमिति प्रतिवेशिनेऽङ्गमङ्गमियं ।
दीपमिषदलितलज्जा स्वहिणी दर्शयति पतिपुरतः ॥ १२७

आन्तरमपि बहिरिव हि व्यञ्जयितुमशेषतः सततं ।
असती सत्कविसूक्तिः काचघटीति त्रयं वेद ॥ १२८

अभिनवयौवनदुर्जयविपक्षजनहसनमभ्यमानमपि ।
सूनोः पितृप्रियत्वाद् बिभर्ति शुभमामदं गृहिणी ॥ १०७
अपमानितमिव सम्प्रति गुरुणा यौवेन कुर्वतं मैत्रं ।
बालोत्सुकतकणौस्तनकलशनिमग्नं पयो विभाति ॥ १०८
अलसयति गात्रमखिलं क्लमं मोचयति लोचनं हरति ।
स्वाप इव प्रेयान् मम मोक्तुम् न ददाति शयनीयम् ॥ १०९
अंशावलम्बिकरधृतकचमिदमभिषेकधवलनखरेखं ।
धौताधरनयनं वपुरस्त्रमनङ्गस्य तव निसितम् ॥ ११०
अविनिर्हितं विनिहितमिव युवसु सच्छेषु वास्वामदृशः ।
उपदर्शयन्ति हृदयं दर्पणबिम्बेषु वदनमिव ॥ १११
अतिलज्जया त्वयैव प्रकटः प्रेयानकारि निभृतोऽपि ।
प्रासादमौलिरुपरि प्रसरन्त्या वैजयन्त्येव ॥ ११२
अनेकान्तरसंयमनगुणयोगाद् गावः पदार्पणे बंधुभिः ।
खलमपि तुदन्ति मेढीभूतमधस्थमालम्ब्य ॥ ११३
अननुग्रहेण न तथा बाधयति कटुकूजितैर्यथा पिशुनः ।
रुधिरादानादधिकं दुनोति कर्णे क्वणन्मशकः ॥ ११४
अग्रे लघिमा पश्चान् महतापि पिधीयते न हि महिम्ना ।
वामन इति त्रिविक्रममभिदधति दशावतारविदः ॥ ११५
अङ्के स्तनन्धय स्तव चरणे परिचारिकाः प्रियः पृष्ठे ।
अस्ति किमलब्धमधिकं गृहिणि यदाशङ्कसे बाला ॥ ११६
अधर उदस्तः कूजितमामीलितमक्षि लोलितो मौलिः ।
आस्वादितमिव चुम्बनसुखमस्पर्शेऽपि तव बालायाम् ॥ ११७

अमुना भ्रमरकुलेना अपि कयापि मतया परं पद्मवासाः ।
अविरहिति कौसुम्भे नयनलगुलिका इव अनेन ॥ ९६

अतिशीतशीलतया लोकेषु सखी त्वदुग्रतापा नः ।
चरमामारदीर्घमार्गः प्रतापमस्याः प्रियो वेद ॥ ९७

अन्यास्वपि गृहिणीति ध्यायन्नभिलषितमाप्नोति ।
पश्यन् पाषाणमयीः प्रतिमा इव देवतात्वेन ॥ ९८

अनुपेत्य गौरभावं बालक परितोगभीरमधुरस्य ।
अस्याः प्रेम्णः पात्रं न भवति सरितो रसस्येव ॥ ९९

अधिवासनमाधेयं गुणमार्गमपेक्षते न च यद्यमां ।
कलयति युवजनमौलिं केतककलिकास्वरूपेण ॥ १००

अपनीतनिखिलतापां सुभग स्वकरेण विनिहितां भवता ।
पतिशयनवारपालिं ज्वरौषधिं वहति सा मालां ॥ १०१

अगणितगुणेन सुन्दर ज्ञात्वा चारित्रमपुरादासीनम् ।
भवताऽनन्यगतिः सा विहितावर्त्तेन तरणिरिव ॥ १०२

अनुरक्तस्तमया पुनरागतये स्थापितोत्तरीयस्य ।
अधरकवासस स्तव सर्वगुणभेगाऽधिका शोभा ॥ १०३

अर्धः प्राथितरक्तो हत इतरो मे पिधुन्तुदस्येव ।
चुम्बयित्र प्रियायाः पथि सङ्गतालिङ्गिताधरस्य ॥ १०४

अवधीरितोऽपि निद्रामिषेण मामाक्रामन्मन्दनया प्रियया ।
अनबोधितोऽस्मि चपलो वाष्पस्तिमितेन तल्पेन ॥ १०५

अथि अन्दमाद्रवाध्यादास्वादितशर्करस्य तत्र पथिक ।
स्वामी रसमाध्वीदः पुरतो ननु हास्यता महती ॥ १०७

Digitized by Google

अयि चूतश्रीफलभरनताङ्गि विषम्बिकाशिसोरभेय ।
खपचघटखर्परराङ्गा त्वं किल फलितापि विफलैव ॥ ८५

अञ्जलिरकारि लोके क्वांनिमवापैव रञ्जिता जगती ।
सन्ध्यायायाइव वसतिः स्वल्पापि सखे सुखायैव ॥ ८६

अगृहीतानुनयां मामुपेत्य सख्यो गता यतैकाहम् ।
प्रसभं करोषि मयि च त्वदुपरि वपुरद्य मोचयामि ॥ ८७

अस्थिरराग: कितव: मानी चपलो विदूषक स्त्वमसि ।
मम सख्या: पतसि करे पश्यामि यथा ऋजु र्भवसि ॥ ८८

अन्यत्र कारतमनसो दर्शितगौरा निरन्तरालेयं ।
त्वामनुधावति विमुखं गङ्गेव भगीरथं दृष्टिः ॥ ८९

अन्तःकलुषस्तम्भितरसया भृङ्गारनालयेव मम ।
अपुरम्मुखस्य विहिता वरवर्णिनि न त्वया दृप्तिः ॥ ९०

अयि सरले सरलतरो मंदमुदितद्विपकपोलपालेव ।
अनेयानयमुग्धगन्धः व्यतिहारः कथणमाचष्टे ॥ ९१

अस्याः कररुहखण्डितकाण्डपटप्रकटनिर्गता दृष्टिः ।
पटविगलितनिष्कलुषा स्रवते पीयूषधारेव ॥ ९२

अस्याः पतिग्टहगमने करोति माता ऽश्रुपिच्छिलां पदवीम् ।
मुग्धगर्विता पुनरसौ हसति शनैः शुष्करुदितमुखी ॥ ९३

अङ्के निवेश्य कूणितदृशःशनैरकरुणेति शंसन्त्याः ।
मोचयामि वेणीबन्धं कदा नखै र्गन्धतैलात्तैः ॥ ९४

अलमनलङ्कृतिसुभगे भूषणमुपहासविषयमितरासाम् ।
कुरुषे वनस्पतिलताप्रसूनमिव वन्ध्यवल्लीनाम् ॥ ९५

इदमुभयभित्तिसन्ततहारगुणान्तर्गतैककुचमुकुलं।
गुञ्जिकाधनुरिव बालावपु स्मरः श्रयति कुतुकेन ॥ १६२

इह शिखिशिखरावलम्बिविनोदद्दरतरलवपुषि तरुहरिषि।
पक्षाभिलषति पतितुम् विहङ्गी निजमौड़मेहेन ॥ १६३

इन्दुर्नष्टोपग्राहे। दूतं मानग्रहस्य ते सुतनु।
भ्रूलतिका च तवेयं भङ्गं रसमधिकमावहति ॥ १६४

इन्द्रीरिवास्य पुरतो यद्विमुखी सापवारणा भ्रमसि।
तत् कथय किन्नु दुरितं सखि त्वया च्छाययेव कृतं ॥ १६५

इह कपटकुतुकतरलितहृष्टि विश्वासं कुरङ्ग किं कुरुषे।
नवरभसतरलितेयं व्याधवधू र्बालधी वलते ॥ १६६

इह वहति बहुमहोदधिविभूषणा मानमियमुर्व्वी।
देवस्य कमठमूर्त्ते र्न पृष्ठमपि निखिलमाप्नोति ॥ १६७

ईर्षारोषज्वलितो निजपतिसङ्गं विचिन्तयंस्तस्याः।
चुम्तवसनजघनभाजनसान्द्रानन्देन निर्व्वामि ॥ १६८

ईश्वरपरिग्रहोचितमोहोऽस्यां मधुप किं मुधा पतसि।
कनकाभिधानसारा वीतरसा कितव कलिकेयं ॥ १६९

ईषदवशेषजड़िमा शिशिरे गतमात्र एव चिरमङ्गैः।
नवयौवनेव तन्वी निषेव्यते निर्भरं वापी ॥ १७०

उल्लसितभ्रूधनुषा तव पृथुना लोचनेन रुचिराङ्गि।
अचला अपि न महान्तः के चञ्चलभावमानीताः ॥ १७१

उपनीय यन्नितम्बे भुजङ्गमुख्यैरलम्भि विबुधैः श्रीः।
एषः स मन्दरगिरिः सखि गरिमाणं समुद्वहतु ॥ १७२

आस्वादितोऽसि मोहाद् यन्न विदिता वदनमाधुरी भवतः ।
मधुलिप्तक्षुरदशनाच्छेदाय परं विजानाति ॥ १५१

आकुञ्चितमकटकं केन तव प्रकृतिकोमलं सुभगे ।
धनेन भुजमृणालं ग्राह्यं मदनस्य राज्यमिव ॥ १५२

आकृष्य दूरमगणितरौद्रकेशा प्रकाशयन्ती स्वं ।
वातधूतोञ्चनपटो बहिर्गमिव हरति मां सुतनु ॥ १५३

आयासः परहिंसा वैतंसिक सारमेय तव सारः ।
त्वामुत्सार्य्य विभाज्यः कुरङ्ग एषोऽधुनैवास्मै ॥ १५४

आनयति पथिकतरुणी हरिण इह प्रणयन्निवाकाशं ।
उपकूलमगोऽपि कोमलकलमावलिकावलनोत्सुकः ॥ १५५

आसीदेव यदार्द्रः किमपि तदा नायमाहतोऽप्यारट् ।
निष्ठुरभावादधुना कटूनि रटति सखि पटह इव ॥ १५६

आज्ञाकरस्य ताडनपरिभवसहस्य सत्यमहमस्याः ।
न तु शीलशीतलेयं प्रियतरं वक्तुमपि वेद ॥ १५७

आधाय दुग्धकलशे मन्थानं कान्तदोलिता गोपी ।
अप्राप्तपारिजाता देवे दोषं निदेशयति ॥ १५८

आस्तां मानसकथनं सखीषु वा मयि निवेद्य दुर्विनये ।
शिथिलितरतिगुणगर्वा ममापि सा लज्जिता सुतनु ॥ १५९

आवर्त्तैरातपेण शोभां हिण्डीरपाण्डुरै र्दधती ।
गायति मुखरितसलिला प्रियसङ्गममङ्गलं सुरसा ॥ १६०

इयमुन्नतिं हरन्ती नेत्रनिकोचं विदधती पुरतः ।
न विजानीमः किं तव वदति सपत्नीव हिमशिखा ॥ १६१

Digitized by Google

आक्षिपसि कर्दमस्था विश्रेव बद्धो वलि त्वया मध्ये ।
दलितमिलत्कमलदलवदास्ये तनुदाम किम लज्जसे युवति ॥ १४०

आक्षेपचरणसङ्गनवीनपदकेलिकुतुकतरलेन ।
क्षोणी पतिरपि गुरुरिति धर्मं न आविला तेन ॥ १४१

आकुञ्चितैकजङ्घं दूराहृतार्धोरु गोपितार्धोरु ।
सुतनोः ध्वसितक्रमनमदुदरं स्फुटनाभि शयनमिदं ॥ १४२

आगच्छताऽनवेक्षितपृष्ठेनार्थी वराटकेनैव ।
मुक्ताऽस्मि तेन जघनांशुकमपि वोढुमशक्तेव ॥ १४३

आदाय धनमनल्पं दत्तानया सुभग तावकं वासः ।
मुग्धा रजकगृहिण्या कृता दिनैः कतिपयैर्निःस्वा ॥ १४४

आस्तां वरमवकेशी मा दोहद मस्य रचय चूततरोः ।
एतस्मात् फलितादपि केवलमुद्वेगमवगच्छ ॥

आरब्धमब्धिमथनं स्वहस्तयित्वा द्विजिह्वममरैर्यत् ।
उचितस्तत्परिणामो विषमं विषमेव यज्जातं ॥ १४६

आवर्जितालकावलि श्वासोत्कम्पस्तनार्पितैकभुजं ।
शयनं रतिविवशतनोः स्मरामि शिथिलांशुकं तस्याः ॥ १४७

आम्राङ्कुरोऽयमरुणश्यामलरुचि रश्मिनिर्गतः सुतनु ।
तव कमठखर्परपुटान् मूर्द्धवोद्धुं गतः स्फुरति ॥ १४८

आभङ्गुराग्रबहुगुणदीर्घा स्वादप्रिया दृष्टिः ।
कर्षति मनो मदीयं ह्रदमीनं बडिशरज्जुरिव ॥ १४९

आलप यथा यथेच्छसि युक्तं तव कितव किमुपरोधयसि ।
जीवातिवाञ्छनमसौ जीवितरक्षा सखी सुभगा ॥ १५०

आलोक एव विमुखी कचिदपि दिवसे न दक्षिणा भवसि ।
छायेव तदपि तापं त्वमेव मे हरसि मानवति ॥ १२९

आज्ञाकाकुर्याच्ञाक्षेपो हसितञ्च शुष्करुदितञ्च ।
इति निधुवनपाण्डितां धारयं त्वया न तृप्यामि ॥ १३०

आज्ञापयिष्यसि पदं दास्यसि दयितस्य शिरसि किं त्वरसे ।
असमयमानिनि गर्वं मा कुरु भग्नाङ्कुरं प्रेम ॥ १३१

आसाद्य भङ्गमनया द्यूते विहिताभिरुचितकेलिपणे ।
निःसारवतामानिति कपटकपोतसारिताः सख्यः ॥ १३२

आदरणीयगुणा सखि महता निहितासि तेन शिरसि त्वं ।
तव लाघवदोषोऽयं सौधपताकेव यच्चलसि ॥ १३३

आयाति याति खेदं करोति मधु हरति मधुकरीवान्या ।
अधिदेवता त्वमेव, श्रीरिव कमलस्य, मम मनसः ॥ १३४

आर्द्रमपि स्नानजघनात् निरस्य सुतनु त्वयैतदुत्सृष्टं ।
स्वस्थमवाप्तुमिव त्वाम् तपनांशूनंशुकं पिबति ॥ १३५

आरोपिता शिलायाम् अश्मेव त्वं स्थिरा भवेति मयैव ।
मम्नापि परिणयापदि जारमुखं वीक्ष्य हसितैव ॥ १३६

आसाद्य दक्षिणां दिशमविलम्बं त्यजति चोत्तरां तरणिः ।
पुरुषं हरन्ति कान्ताः प्रायेण हि दक्षिणा एव ॥ १३७

आदानपानलेपैः काचिद् गरलोपतापहारिण्यः ।
सहसि स्थितैव सिद्धौषधिवत् त्वो कापि जीवयति ॥ १३८

आन्दोललोलकेशी चलकाञ्चीकिङ्किणीगणक्वणितां ।
पुरुषायितां स्मरे तां स्मरचामरचित्रयष्टिमिव ॥ १३९

अतिरमसेन भुजोयं वृतिविवरेण प्रवेशितः सदनं ।
इयिता सखीभिरितो नागच्छति वर्त्मना तेन ॥ ११८

अम्बरमध्यनिविष्टं तवेदमतिचपलमलघु जघनतटं ।
घातक इवं नवमभ्रं निरीक्षमाणो न तृप्यामि ॥ ११९

अयमन्धकारसिन्धुरभाराक्रान्तावनीभराक्रान्तः ।
उन्नतपूर्वाद्रिमुखः कूर्मः सन्ध्यास्तमुद्वमति ॥ १२०

अन्तर्मूर्ती निवसति जड़े जड़ः शिशिरमहसि हरिणइव ।
सजड़ शशीव तपने सुतनु प्रविष्टोऽपि निःसरति ॥ १२१

अगणितजनापवादा त्वत्पाणिस्पर्शहर्षतरलेयं ।
आयास्यती वराकी ज्वरस्य तल्पं प्रकल्पयति ॥ १२२

अर्थोपार्जनशीलस्य पश्यत पूर्णत्वतुच्छताभाजोः ।
आशाम्भुंशयोः कश्चिद् गुणभूतः कश्चिदपि भर्त्ता ॥ १२३

अभिनवयौवनक्रान्ता कलयति बाला क्रमेण चर्म्माम्भः ।
आसिपेयितुं नमिता कुसुमास्त्रधनुर्लतेव मधु ॥ १२०

अविरलपतिताश्रु वपुः पाण्डुस्निग्धं तवोपनीतमिदं ।
शतधौतमाजामिव मे स्मरशरदाहव्यथां हरति ॥ १२५

अन्तर्निपतितगुञ्जागुणरमणीय सकोस्ति केदारः ।
निजगोपीविनयवयखेदेन विदीर्णहृदय इव ॥ १२६

अमुना हृतमिदमिदमिति प्रतिवेशिनेऽङ्गमङ्गमिय ।
दीपमिषदलितलज्जा गृहिणी दर्शयति पतिपुरतः ॥ १२७

आभ्यन्तरमपि बहिरिव हि वयञ्जयितुमभीप्सतः सततं ।
असती सत्कविसूक्तिः काचघटीति त्वयं वेद ॥ १२८

Digitized by Google

अभिनवयौवनदुर्जयविषयजनजनमानिनामपि ।
सूनोः पितृप्रियत्वाद् बिभर्ति सुभगमदं गृहिणी ॥ १०७
अपमानितमिव मन्यति गुरुणा यौवेण कुर्वतं नेत्रं ।
बालोत्सुकतरुणीस्तनकलशमिवार्द्रं पयो बिभर्ति ॥ १०८
अलसयति गात्रमखिलं क्लमं मोचयति लोचनं हरति ।
स्वप इव प्रेयान् मम मोक्तुम् न ददाति प्रसन्नोत्सम् ॥ १०९
अंशावलम्बिकरधृतकचमिदमभिषेकधवलनखरेणं ।
धौताधस्तनयनं वपुरस्मनङ्गस्य तव निसितम् ॥ ११०
अविनिर्हितं विनिहितमिव युवसु लक्ष्येषु बास्वामदृष्टः ।
उपदर्शयन्ति हृदयं दर्पणबिम्बेषु वदनमिव ॥ १११
अतिलज्जया त्वयैव प्रकटः प्रेयानकारि निभृतो ऽपि ।
प्रासादमौलेरुपरि प्रसरन्त्या वैजयन्तेव ॥ ११२
अनेकान्तसंग्रथनगुणयोगाद् गावः पदार्पणे बन्धुभिः ।
खलमपि तुदन्ति मेढीभूतमधास्यमालम्ब्य ॥ ११३
अननुग्रहेण न तथा वाधयति कटुकूजितैर्यथा पिशुनः ।
रुधिरादानादधिकं दुनोति कर्णे क्वणन्मशकः ॥ ११४
अग्रे लघिमा पश्चान् महतापि पिधीयते न हि महिम्ना ।
वामन इति त्रिविक्रममभिदधति दशावतारविदः ॥ ११५
अङ्कं स्तनन्धय स्तव चरणे परिचारिकाः प्रियः पृष्ठे ।
अस्ति किमलब्धमधिकं गृहिणि यदायस्यसे बाला ॥ ११६
अधर उदस्तः कूजितमामीलितमक्षि लोलितो मौलिः ।
आमादितमिव चुम्बनसुखमसमर्थो ऽपि तव बालाम् ॥ ११७

अगुणा अप्यङ्कगता अपि कयापि गतया परं पदमवाप्ताः ।
अधिवसति कौसुम्भे नयनजलगुलिका इव जनेन ॥ ९६

अतिशीतलशीतलतया लोकेषु सखी लघुप्रतापा नः ।
वचनामारहेमानः प्रतापमस्याः प्रियो वेद ॥ ९७

अन्यास्वपि गृहिणीति ध्यायन्नभिलषितमाप्नोति ।
पश्यन् पाषाणमयीः प्रतिमा इव देवतालेन ॥ ९८

अनुपेत्य नीचभावं बालक परितोगभीरमधुरस्य ।
अस्याः प्रेम्णः पारं न भवति सरितो रसस्येव ॥ ९९

अधिवासनमाधेयं गुणमार्गमपेक्षते न च प्रथमा ।
कलयति युवजनमौलिं केतककलिकास्वरूपेण ॥ १००

अपनीतनिखिलतापां सुभग स्वकरेण विनिहितां भवता ।
पतिशयनवारपालिं ज्वरौषधिं वहति सा मालां ॥ १०१

अमर्षितगुणेन सुन्दर कृत्वा चारित्रमप्युदासीनम् ।
भवताऽनन्यगतिः सा विहितावर्त्तेन तरणिरिव ॥ १०२

अनुरक्तारक्तमया पुनरागतये स्थापितोत्तरीयस्य ।
अर्धेरकवाससस्तव सर्वगुणभेदाऽधिका शोभा ॥ १०३

अर्धः प्राक्षितरक्तो घृत इतरो मे निधुमन्दस्येव ।
मुखयित्र प्रियायाः पथि सङ्गतयाऽऽलिङ्गिताधस्य ॥ १०४

अवधीरितोऽपि निद्रामिषेण माद्यान्नामस्तृणया प्रियया ।
अप्रबोधितोऽस्मि चपलो वाष्पस्तिमितेन तल्पेन ॥ १०५

अपि चन्द्रमातृसाध्यादास्वादितशर्करस्य तव पथिक ।
साक्षी रसमाधुर्येः पुरतो ननु हास्यता महतो ॥ १०७

अयि चूतश्रीफलभरनताङ्गि विपञ्चिकाशिरोरत्ने ।
श्वपचघटखर्पराङ्का त्वं किल फलितापि विफलैव ॥ ८५

अञ्जलिरकारि लोकैर्ग्लानिमवाप्यैव रञ्जिता जगती ।
सन्ध्यायायाइव वसतिः स्वल्पापि सखे सुखायैव ॥ ८६

अगृहीतानुनयां मामुपेत्य सख्येव गता क्वैकाहम् ।
प्रसभं करोषि मयि च त्वदुपरि वपुरद्य मोक्ष्यामि ॥ ८७

अस्थिरराग: कितव: मानी चपलो विदूषक स्त्वमसि ।
मम सख्या: पतसि करे पश्यामि यथा ऋजु र्भवसि ॥ ८८

अकरुण कातरमनसो दर्शितनीरा निरन्तरालेयं ।
त्वामनुधावति विमुखं गङ्गेव भगीरथं दृष्टिः ॥ ८९

अन्तःकलुषस्तम्भितरसया भृङ्गारनालयेव मम ।
अप्रगुणमुखस्य विहिता वरवर्णिनि न त्वया हूतिः ॥ ९०

अयि सरले सरलतरो मंदमुदितद्विपकपोलपालेव ।
अनेयानयमुग्धगन्धः व्यतिहारः कथनमाचष्टे ॥ ९१

अस्याः कररुहखण्डितकाण्डपटप्रकटनिर्गता दृष्टिः ।
पटविगलितनिष्कलुषा स्वदते पीयूषधारेव ॥ ९२

अस्याः पतिगृहगमने करोति माता ऽश्रुपिच्छिलां पदवीम् ।
गुणगर्विता पुनरसौ हसति शनैः शुष्करुदितमुखी ॥ ९३

अङ्के निवेश्य कूणितदृशः शनैरकरुणेति शंसन्त्याः ।
मोक्ष्यामि वेणीबन्धं कदा नखै र्गन्धतैलाक्तैः ॥ ९४

अलमनलङ्कृतिसुभगे भूषणमुपहासविषयमितरासाम् ।
कुरुषे वनस्पतिलताप्रसूनमिव वन्ध्यवल्लीनाम् ॥ ९५

Digitized by Google

अमिलितवदनमपीडितवक्षोरुहमतिविधुरजघनोरु ।
शपथशतेन भुजाभ्यां केवलमालिङ्गितोऽस्मि तया ॥ ७४

अतिपूजितताराियं दृष्टिश्रुतिलङ्घनक्षमा सुतनु ।
जिनसिद्धान्तस्थितिरिव सवासना कं न मोहयति ॥ ७५

अलमविषयभयलज्जा वञ्चितमात्मानमियमियत्समयम् ।
नवपरिचितदयितगुणा शोचति नालपति शयनसखीः ॥ ७६

अनुरागवर्त्तिनी तव विरहेणोग्रेण सा गृहीताङ्गी ।
त्रिपुररिपुणेव गौरीवरतनुरर्द्धावशिष्टैव ॥ ७७

अन्यश्रवणे प्रेयसि विपरीते स्रोतसीव विहितास्थाः ।
तद्गतिभिरुह्यन्त्यः सखि भवन्ति विफलश्रमा हास्याः ॥ ७८

अधिकः सर्व्वेभ्यो यः प्रियः प्रियेभ्यो हृदि स्थितः सततम् ।
स लुठति विरहे जीवः कण्ठेऽस्यास्त्वमिव सम्भोगे ॥ ७९

अनयनपथे प्रिये न तु व्यथा यथा दृश्य एव दुष्प्रापे ।
ग्लानैव केवलं निशि तपनशिला वासरे ज्वलति ॥ ८०

अजनितप्रेमैव वरम् न पुनः सञ्जातविघटितप्रेम ।
उत्पाटितनयन स्ताम्यति यथा न तथा जातान्धः ॥ ८१

अविभाव्यो मितेऽपि स्थितिमात्रेणैव नन्दयन् दयितः ।
रहसि व्यवदेश्यादय मर्थ इवाराजके भोग्यः ॥ ८२

अश्रौषीरपराधान् तथ्यमिदं कथय सम्मुखं वीक्ष्य ।
अभिधीयते न किं यदि न मानचौराननः कितवः ॥ ८३

अभिनामनुश्रोतसमथ्यदथान्यत्तटात्तटं भजतोः ।
उदितेऽर्द्धेऽपि तन्माघस्नानं प्रसमाप्यते यूनोः ॥ ८४

Digitized by Google

अयि कोशकार कुरुषे वनेचराणाम् पुरो गुणोद्गारम् ।
यन्नविचार्य विदारितजठरस्त्वं स खलु ते लाभः ॥ ६३

अगणितमहिमा लङ्घितगुरुरधनेहः स्तनन्धयविरोधी ।
इष्टाकोर्त्तिस्तस्या स्त्वयि रागः प्राणनिरपेचः ॥ ६४

अपराधादधिकं मां, व्यथयति तव, कपटवचनरचनेयम् ।
शस्त्राघातो न तथा सूचीव्यधवेदना यादृक् ॥ ६५

असतीलोचनमुकुरे किमपि प्रतिफलति यन्मनोवर्त्ति न ।
सारस्वतमपि चक्षुः सतिमिरमिव तन्न लक्षयति ॥ ६६

अन्यमुखे दुर्व्वादो यः प्रियमुखे स एव हि परिहासः ।
इतरेन्धनजन्मा यो धूमः सोऽगुरुसम्भवो धूपः ॥ ६७

अयि सुभग कुतुकतरला विचरन्ती सौरभानुसारेण ।
त्वयि मोहाय वराकी पतिता मधुपीव विषकुसुमे ॥ ६८

अयि मुग्धगन्धसिन्धुरशङ्कामात्रेण दन्तिनो दलिताः ।
उपभुञ्जते कररयून् केवलमिह मत्कुणाः करिणः । ६९

अतिविनयवामनतनु विलङ्घते गेहदेहलीं न बधूः ।
अस्याः पुनरारभटीं कुसुमवाटी विजानाति ॥ ७०

अन्तर्गतै गुणैः किं छिन्ना अपि यत्र साक्षिणो विरलाः ।
सगुणो गीते यदसौ वनेचरं हरिणमपि हरति ॥ ७१

अललितसकलविभूषाम् प्रातर्बालां विलोक्य मुदिताभिः ।
प्रियशिरसि वीक्ष्य यावकमथ निश्वसितं सपत्नीभिः ॥ ७२

अयि लज्जावति, निशीथरतनिःसहाङ्गि, सुखसुप्ते ।
लोचनकोकनदच्छदमुन्मीलय सुप्रभातं ते ॥ ७३

Digitized by Google

वाणी प्राकृतसमुचितरसा बलेनैव संस्कृतं नीता।
निम्नानुरूपनीरा कलिन्दकन्येव गगनतलं ॥ ५२
आर्या समयतीयं प्रगल्भमनसामनादृता येषाम्।
दूतीरहिता इव ते न कामिनीमनसि निविशन्ते ॥ ५३
रतरीतिवीतरसना प्रियेव शुद्धापिवा मुदे सरसा।
अरसा सालङ्कृतिरपि न रोचते शालभञ्जीव ॥ ५४
अवधिदिनावधिजीवाः प्रसीद जीवन्तु पथिकजनजायाः।
दुर्लङ्घ्यवर्त्मशैलौ स्तनौ पिधेहि प्रियापालि ॥ ५५
पतिवत्सला सुशीला सेवाचतुरा मनोनुकूला च।
भजनि विनीता गृहिणी सपदि सपत्नीस्तनोद्वेगे ॥ ५६
अयि कुलनिकुलमूलोच्छेदनदुःशीलवीचिवाचाले।
बकविघस पङ्कसारा न चिरात् कावेरि भवितासि ॥ ५७
अयि विविधवचनरचने ददासि चन्द्रं करे समानीय।
व्यसनदिवसेषु दूति क पुनस्त्वं दर्शनीयासि ॥ ५८
अस्तखानिर्लोको लाञ्छनमुपदिशतु जीवतामोजः।
तदपि न मुञ्चति स त्वां वसुधाच्छायामिव सुधांशुः ॥ ५९
अतिचापलं वितन्वन् अन्तर्निविशन् निकामकाठिन्यः।
मुखरयसि स्वयमेतां सद्वृत्तां शङ्कुरिव घण्टाम् ॥ ६०
अङ्गेषु जीर्यति परं खञ्जनयूनो मनोभवप्रसरः।
न पुनरनन्तर्गमितनिधिनि धरामण्डले केलिः ॥ ६१
अन्धत्वमन्धसमये वधिरत्वं वधिरकाल आलम्ब्य।
श्रीकेशवयोः प्रणयी प्रजापति र्नाभिवासरवः ॥ ६२

Digitized by Google

वंशे घुणइव न विशति दोषो रसभाविते सतां मनसि ।
रसमपितु न प्रतीच्छति बहुदोषः सन्निपातीव ॥ ४१
विगुणोपि काव्यबन्धः साधूनामाननं गतः स्वदते ।
फुत्कारोपि सुवंशे गुंद्यमानः श्रुतिं हरति ॥ ४२
स्वयमपि भूरिच्छिद्रश्चापलमपि सर्वतोमुखं तन्वन् ।
विततस्वभावस्य पिशुनो दोषस्य विवेचने ऽधिकृतः ॥ ४३
अन्तर्गूढ़ानर्थान् व्यञ्जयतः प्रसादरहितस्य ।
सन्दर्भस्य नदस्य च न रसः प्रीत्यै रसज्ञानाम् ॥ ४४
यद्दैवनीयमसतामस्तप्रायं सुवर्णविन्यासं ।
सुरसार्थमयं काव्यं त्रिविष्टपं वा समं विद्मः ॥ ४५
सत्कविरसनाशूर्पी निष्कष्टतरशब्दशालिपाकेन ।
तृप्तो दयिताधरमपि नाद्रियते का सुधा दासी ॥ ४६
अकलितशब्दालङ्कृतिरनुकूला स्खलितपदनिवेशापि ।
अभिसारिकेव रमयति सूक्तिः सोत्कर्षशृङ्गारा ॥ ४७
अध्वनि पदग्रहपरं मदयति हृदयं नवा नवा अमर्शं ।
काव्यमभिज्ञसभायां मञ्जीरं केलिवेलायाम् ॥ ४८
आस्वादितदयिताधररसस्यैव सूक्तयो मधुराः ।
अकलितरसालमुकुलो न कोकिलः कलमुदं चयति ॥ ४९
बालाकटाक्षसूत्रित मसतीनेत्रत्रिभागकृतभाष्यम् ।
कविमाणवको दतीव्याख्यातमधीयते भावम् ॥ ५०
मसृणपदरीतिगीताः सज्जनहृदयाभिसारिकाः सुरसाः ।
मदनाद्वयोपनिषदो विशदा गोवर्द्धनस्यार्याः ॥ ५१

Digitized by Google

विहितघनालङ्कारम् किञ्चिन्नवर्णावलीमयस्फुरणम् ।
शक्रायुधमिव वक्रम् वल्मीकभुवं मुनिं नौमि ॥ ३०

व्यासगिरां निर्य्यासं सारं विश्वस्य भारतं वन्दे ।
भूषणतयैव संज्ञां यदाङ्कितां भारती वहती ॥ ३१

श्रीरामायणभारतबृहत्कथानां कवीन् नमस्कुर्म्मः ।
त्रिस्रोता इव सरसा सरस्वती स्फुरति यैर्भिन्ना ॥ ३२

सति काकुत्स्थकुलोन्नतिकारिणि रामायणे किमन्यकाव्येन ।
रोहति कुल्या गङ्गापूरे किं बहुरसे वसति ॥ ३३

अतिदीर्घजीविदोषाद् व्यासेन यशोऽपहारितं हन्त ।
कैर्नोच्येत गुणाढ्यः स एव जन्मान्तरापन्नः ॥ ३४

साकूतमधुरकोमलविलासिनीकण्ठकूजितप्राये ।
शिक्षासमयेऽपि मुदे रतलीलाकालिदासोक्ती ॥ ३५

भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥ ३६

जाता शिखण्डिनी प्राग् यथा शिखण्डी तथावगच्छामि ।
प्रागल्भ्यमधिकमाप्तुम् वाणी वाणो बभूवेति ॥ ३७

यं गणयन्ति गुरोरनु यस्यास्तेऽधर्म्मकर्म्म सङ्कुचितं ।
कविमहमुशनसमिव तं तातं नीलाम्बरं वन्दे ॥ ३८

सकलकलाः कल्पयितुम् प्रभुः प्रबन्धस्य कुमुदबन्धोश्च ।
सेनकुलतिलकभूपति रेको राकाप्रदोषश्च ॥ ३९

काव्यस्याक्षरमैत्रीभाजो नच कर्कशा नच ग्राम्याः ।
शब्दा अपि सत्पुरुषा अपि साधव एवार्थबोधाय ॥ ४०

Digitized by Google

उन्नालनाभिपङ्करुह इव येनावभाति शम्भुरपि ।
जयति पुरुषायितायास्तदाननं शैलकन्यायाः ॥ १९

अङ्कनिलीनगजाननशङ्काकुलबाहुलेयहृतवसनौ ।
सस्मितहरकरकलितौ हिमगिरितनयास्तनौ जयतः ॥ २०

कण्ठोचितोपि हुङ्कृतिमात्रनिरस्तः पदान्तिके पतितः ।
यस्याश्चन्द्रशिखः शरभञ्जनिभो जयति सा चण्डी ॥ २१

देवेऽर्पितवरणस्रजि बहुमाये वहति कैटभीरूपं ।
जयति सुरासुरहसिता लज्जाजिह्मेक्षणा लक्ष्मीः ॥ २२

तानसुरानपि हरिमपि तं वन्दे कपटकैटभीरूपं ।
ये यद्बिम्बाधररसलुब्धाः पीयूषमपि मुमुचे ॥ २३

तल्पीकृताहिरगणितगरुडो हाराभिहतविधिं जयति ।
फणशतपीतश्वासो रागान्धायाः श्रियः केलिः ॥ २४

स्मेराननेन हरिणा सस्पृहमाकारयेहिना कलितं ।
जयति पुरुषायितायाः कमलायाः कैटभीध्यानं ॥ २५

श्रितकान्तकेलिकुतुकश्रीशीतश्वाससेकनिद्राणः ।
घीरितविततालिरुतो नाभिसरोजे विधिं जयति ॥ २६

एकरद, द्वैमातुर, निस्त्रिगुण, चतुर्भुजापि पञ्चकर ।
जय षडानतमुख सप्तच्छदगन्धिमदाष्टतनूतनय ॥ २७

मङ्गलकलशद्वयमयकुम्भमदम्भेन भजत गजवदनं ।
यद्दानतोयतरलैस्तिलतुलनालम्बि रोलम्बैः ॥ २८

याभिरनङ्गः साङ्गीकृतः स्त्रियोऽस्त्रीकृताश्च येन ।
ताभ्याचारप्रवणौ प्रणमत तौ कामिनीकामौ ॥ २९

प्रणयकुपितप्रियापदलाक्षासन्ध्यानुबन्धमधुरेन्दुः ।
तद्रसकनकनिकषग्रावग्रीवः शिवो जयति ॥ ८

पूर्णनखेन्दुद्विगुणितमञ्जीरा प्रेमशृङ्खला जयति ।
हरशशिलेखा गौरीचरणाङ्गुलिमध्यगुल्फेषु ॥ ९

श्रीकरपिहितं चक्षुः सुखयतु नः पुण्डरीकनयनस्य ।
जघनमिवेक्षितुमागतमब्जनिभं नाभिसुषिरेण ॥ १०

श्यामं श्रीकुचकुङ्कुममञ्जरितमुरो मुरद्विषो जयति ।
दिनमुखनभ इव कौस्तुभविभाकरो यद्विभूषयति ॥ ११

प्रतिबिम्बितप्रियातनु सकौस्तुभं जयति मुरभिदो वक्षः ।
पुरुषायितमभ्यस्यति लक्ष्मीर्यद्वीक्ष्य मुकुरमिव ॥ १२

केलिचलाङ्गुलिलम्भितलक्ष्मीनाभिर्मुरद्विषश्चरणः ।
स जयति येन कृता श्रीरनुरूपा पद्मनाभस्य ॥ १३

रोमावली मुरारेः श्रीवत्सनिषेविताग्रभागा वः ।
उन्नालनाभिनलिनच्छायेवोत्तापमपहरतु ॥ १४

आदाय सप्ततन्त्रीचितां विपञ्चीमिव त्रयीं गायन् ।
मधुरं तुरङ्गवदनोचितं, हरिर्जयति हयमूर्धा ॥ १५

स जयति महावराहो जलनिधिजठरे चिरं निमग्नापि ।
येनान्त्रैरिव सह फणिगणैर्बलादुद्धृता धरणी ॥ १६

ब्रह्माण्डकुम्भकारं भुजगाकारं जनार्दनं स्तौमि ।
स्फारे यत्फणचक्रे धरा, शरावश्रियं वहति ॥ १७

चण्डीजङ्घाकाण्डः शिरसा चरणस्पृशि प्रिये जयति ।
शङ्करपर्यन्तजितो वीरस्तम्भः स्मरस्येव ॥ १८

Digitized by Google

रभ्नास्नश्चोरकान्ते मुनिमुनिमुनिभि र्दृश्यते चेद्विरामो
बाले वर्ण्यैः कवीन्द्रैः सुतनु निगदिता स्रग्धरा सा प्रसिद्धा ४१

इति श्रीकालिदासविरचितः श्रुतबोधः सम्पूर्णः ॥

आर्य्यासप्तशती ।

पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ।
अङ्कुरितइव मनोभूर्यस्मिन् भस्मावशेषोऽपि ॥ १

मा वम संवृणु विषमिदमिति सातङ्कं पितामहेनोक्तः ।
प्रातर्जयति सलज्जः कज्जलमलिनाधरः शम्भुः ॥ २

जयति प्रियापदान्ते गरलग्रैवेयकः स्मराराति: ।
विषमविशिखे विशन्निव शरणं गलबद्धकरवालः ॥ ३

जयति ललाटकटाक्षः शशिमौलेः पक्ष्मलः प्रियाप्रणतौ ।
धनुषि स्मरेण निहितः सकण्टकः केतकेषुरिव ॥ ४

जयति जटाकिञ्जल्कं गङ्गामधु, मुण्डवलयबीजमयं ।
गलगरलपङ्कसम्भव मम्भोरुहमाननं शम्भोः ॥ ५

सन्ध्यासलिलाञ्जलिमपि कङ्कणफणिपीयमानमविजानन् ।
गौरीमुखार्पितमना विजयाहसितः शिवो जयति ॥ ६

प्रतिबिम्बितगौरीमुखविलोकनोत्कम्पशिथिलकरगलितः ।
स्वेदभरपूर्य्यमाणः शम्भोः सलिलाञ्जलि र्जयति ॥ ७

Digitized by Google

सुभुखि लघवः पञ्च प्राद्यास्ततो दशमान्तिमः
तदनु ललितालापे वर्णौ तृतीयचतुर्थकौ
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्कनकप्रभे
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ३६
यदि प्राद्यो ह्रस्वःकलितकमले पञ्च गुरवः
ततो वर्णाः पञ्च प्रकृतिसुकुमाराङ्गि लघवः
त्रयोऽन्ये चोपान्त्याः सुतनुजघने भोगसुभगे
रसैरीशैर्यस्यां भवति विरतिः सा शिखरिणी ३७
द्वितीयमलिकुन्तले गुरु षडष्टमद्वादशं
चतुर्दशमथ प्रिये गुरु गभीरनाभीह्रदे
सपञ्चदशमान्तिमं तदनु यत्र कान्ते यतिः
गिरीन्द्रफणभृत्कुलैर्भवति सुभ्रु पृथ्वीति सा ३८
चत्वारः प्राक् सुतनु गुरवो द्वौ दशैकादशौ चेत्
मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशान्त्यौ
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि तां सङ्गिरन्ते ३९
आद्यं यत्र गुरुत्रयं प्रियतमे षष्ठं ततश्चाष्टमं
सन्ध्येकादशतस्त्रयस्तदनु चेदष्टादशाद्यान्तिमाः
मार्तण्डैर्मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिम्बानने
तद्वृत्तं प्रवदन्ति काव्यरसिकाः शार्दूलविक्रीडितं ४०
चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि
द्वौ तद्वत् षोडशाद्यो मृगमदतिलके षोडशान्त्यौ तथान्त्यौ

अयि कृशोदरि यत्र चतुर्थकं गुरु च सप्तमकं दशमं तथा
विरतिरश्च तथैव सुमध्यमे द्रुतविलम्बितमित्युपदिश्यते २८
प्रथमाक्षरमाद्यतृतीययो र्द्रुतविलम्बितकस्य हि पादयोः
यदि नास्ति तदा कमलेक्षणे भवति सुन्दरि सा हरिणीप्लुता२९
उपेन्द्रवज्राचरणेषु सन्ति चेदुपान्त्यवर्णा लघवः परेकृताः
मदोल्लसद्भ्रूजितकामकार्मुके वदन्ति वंशस्थविलं बुधास्तदा३०
यस्यामशोकांकुरपाणिपल्लवे वंशस्थपादा गुरुपूर्ववर्णकाः
तारुण्यहेलारतिरङ्गलालसे तामिन्द्रवंशां कवयःप्रचक्षते ३१
यस्यां प्रिये प्रथमकमक्षरद्वयं तुर्यं तथा गुरु नवमं दशान्तिमं
सान्त्यं भवेद्यतिरपिचेद्युगग्रहैःसालक्ष्यतामृतरुतेप्रभावती३२

आद्यं चेत् त्रितयमथाष्टमं नवान्त्यं
द्वावन्तौ गुरुविरतौ सुभाषिते स्यात्
विश्रामो भवति महेशनेत्रदिग्भि
र्विज्ञेया ननु सुदति प्रहर्षिणी सा ३३
आद्यं द्वितीयमपि चेद् गुरु तच्चतुर्थं
यत्राष्टमञ्च दशमान्त्यमुपान्त्यमन्त्यं
अष्टाभिरिन्दुवदने विरतिश्च षड्भिः
कान्ते वसन्ततिलकं किल तं वदन्ति ३४
प्रथममगुरु षट्कं विद्यते यत्र कान्ते
तदनु च दशमं चेदक्षरं द्वादशान्त्यं
गिरिभिरथ तुरङ्गै र्यत्र कान्ते विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ३५

Digitized by Google

वाणी प्राकृतसमुचितरसा बलेनैव संस्कृतं नीता।
निम्नानुरूपनीरा कलिन्दकन्येव गगनतलं ॥ ५२
आर्या समग्रतोयं प्रगल्भमनसामनादृता येषाम्।
दूतीरहिता इव ते न कामिनीमनसि निविशन्ते ॥ ५३
रतरीतिवीतरसना प्रियेव शुद्धापिवा मुदे सरसा।
अरसा सालङ्कृतिरपि न रोचते शालभञ्जीव ॥ ५४
अवधिदिनावधिजीवाः प्रसीद जीवन्तु पथिकजनजायाः।
दुर्लङ्घ्यवर्म्मशैलौ स्तनौ पिधेहि प्रियापालि ॥ ५५
अतिवत्सला सुशीला सेवाचतुरा मनोनुकूला च।
अजनि विनीता गृहिणी सपदि सपत्नीस्तनोद्भेदे ॥ ५६
अयि कुलनिकुलमूलोच्छेदनदुःशीलवीचिवाचाले।
बकविषस पङ्कसारा न चिरात् कावेरि भवितासि ॥ ५७
अयि विविधवचनरचने दत्तासि चन्द्रं करे समानीय।
व्यसनदिवसेषु दूति क्व पुनस्त्वं दर्शनीयासि ॥ ५८
अस्तव्यानिर्लोको लाञ्छनमुपदिशतु हीयतामोजः।
तदपि न मुञ्चति स त्वां वसुधाच्छायामिव सुधांशुः ॥ ५९
अतिचापलं वितन्वन् अन्तर्निविशन् निकामकाठिन्यः।
मुखरयसि स्वयमेतां सद्वृत्तां शङ्कुरिव घण्टाम् ॥ ६०
अङ्गेषु जीर्यति परं स्वञ्जनयूनो मनोभवप्रसरः।
न पुनरनन्तर्गमितनिधिनि धरामण्डले केलिः ॥ ६१
अन्धत्वमन्धसमये वधिरत्वं वधिरकाल आलम्ब्य।
शीकृष्णवतोः प्रणयी प्रजापति नाभिवासवतः ॥ ६२

Digitized by Google

वंशे गुणइव न विशति दोषो रसभाविते सतां मनसि ।
रसमपि तु न प्रतीच्छति बहुदोषः सन्निपातीव ॥ ४१
विगुणोपि काव्यबन्धः साधूनामाननं गतः स्वदते ।
फुत्कारोपि सुवंशे नुंदामानः श्रुतिं हरति ॥ ४२
स्वयमपि भूरिच्छिद्रश्चापलमपि सर्वतोमुखं तन्वन् ।
तितउस्खलस्य पिशुनो दोषस्य विवेचने ऽधिकृतः ॥ ४३
अन्तर्गूढानर्थान् व्यञ्जयतः प्रसादरहितस्य ।
सन्दर्भस्य नदस्य च न रसः प्रीत्यै रसज्ञानाम् ॥ ४४
यद्यमैवनीथमसतामस्तृतप्रायं सुवर्णविन्यासं ।
सुरसार्थमयं काव्यं त्रिविष्टपं वा समं विद्मः ॥ ४५
सत्कविरसनाशूर्पीनिष्क्षुतरशब्दशालिपाकेन ।
तृप्तो दयिताधरमपि नाद्रियते का सुधा दासी ॥ ४६
अकलितशब्दालङ्कृतिरनुकूला स्खलितपदनिवेशापि ।
अभिसारिकेव रमयति सूक्तिः सोत्कर्षशृङ्गारा ॥ ४७
अध्वनि पदग्रहपरं मदयति हृदयं नवा नवा श्रवणं ।
काव्यमभिज्ञसभायां मञ्जीरं केलिवेलायाम् ॥ ४८
आस्वादितदयिताधररसस्यैव सूक्तयो मधुराः ।
अकलितरसालमुकुलो न कोकिलः कलमुदं चयति ॥ ४९
बालाकटाक्षसूत्रित मसतीनेत्रत्रिभागकृतभाष्यम् ।
कविमाणवको दूतीव्याख्यातमधीयते भावम् ॥ ५०
मसृणपदरीतिगीताः सज्जनहृदयाभिसारिकाः सुरसाः ।
मदनाद्वयोपनिषदो विशदा गोवर्द्धनस्यार्याः ॥ ५१

Digitized by Google

विहितघनालङ्कारम् किञ्चिन्नवर्णावलीमयस्फुरणम्।
शक्रायुधमिव वक्रम् वल्मीकभुवं मुनिं नौमि॥ ३०
व्यासगिरां निर्यासं सारं विश्वस्य भारतं वन्दे।
भूषणतयैव संज्ञां पदाङ्कितां भारती वहती॥ ३१
श्रीरामायणभारतबृहत्कथानां कवीन् नमस्कुर्मः।
त्रिस्रोताइव सरसा सरस्वती स्फुरति यै र्भिन्ना॥ ३२
सति काकुत्स्थकुलोन्नतिकारिणि रामायणे किमन्यकाव्येन।
रोहति कुल्या गङ्गापूरे किं बहुरसे वसति॥ ३३
अतिदीर्घजीविदोषाद् व्यासेन यशोऽपहारितं हन्त।
कै र्नोच्येत गुणाढ्यः स एव जन्मान्तरापन्नः॥ ३४
साकूतमधुरकोमलविलासिनीकण्ठकूजितप्राये।
शिक्षासमयेऽपि मुदे रतलीलाकालिदासोक्ती॥ ३५
भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा॥ ३६
जाता शिखण्डिनी प्राग् यथा शिखण्डी तथावगच्छामि।
प्रागल्भ्यमधिकमाप्तुम् वाणी वाणो बभूवेति॥ ३७
यं गणयन्ति गुरोरनु यस्यास्तेऽधर्म्मकर्म्म सङ्कुचितं।
कविमन्हमुग्मनसमिव तं तातं नीलाम्बरं वन्दे॥ ३८
सकलकलाः कल्पयितुम् प्रभुः प्रबन्धस्य कुमुदबन्धोश्च।
सेनकुलतिलकभूपति रेको राकाप्रदोषश्च॥ ३९
काव्यस्याचरमैत्रीभाजो नच कर्कशा नच ग्राम्याः।
शब्दा अपि सत्पुरुषा अपि साधव एवार्थबोधाय॥ ४०

Digitized by Google

उत्तालनाभिपङ्करुह इव येनावभाति शम्भुरपि ।
जयति पुरुषायितायास्तदाननं शैलकन्यायाः ॥ १९

अङ्कनिलीनगजाननशङ्काकुलबाहुलेयहृतवसनौ ।
सस्मितहरकरकलितौ हिमगिरितनयास्तनौ जयतः ॥ २०

कण्ठोचितोऽपि हुङ्कृतिमात्रनिरस्तः पदान्तिके पतितः ।
यस्याश्चन्द्रशिखः शरभसन्निभो जयति सा चण्डी ॥ २१

देवेऽर्पितवरणस्रजि बहुमाये वहति कैटभीरूपं ।
जयति सुरासुरहसिता लज्जाजिह्मेक्षणा लक्ष्मीः ॥ २२

तानसुरानपि हरिमपि तं वन्दे कपटकैटभीरूपं ।
ये यं बिम्बाधररसलुब्धैः पीयूषमपि मुमुचे ॥ २३

तल्पीकृताहिरमणितगरुडो हाराभिहतविधि जयति ।
फणभृतपीतश्वासो रागान्धायाः श्रियः केलिः ॥ २४

स्मेराननेन हरिणा सस्पृहमाकारवेदिना कलितं ।
जयति पुरुषायितायाः कमलायाः कैटभीध्यानं ॥ २५

श्रान्तकान्तकेलिकुतुकश्रीशीतश्वाससेकनिद्राणः ।
घोरितवितताली कृतो नाभिसरोजे विधि जयति ॥ २६

एकरद, द्वैमातुर, निस्त्रिगुण, चतुर्भुजापि पञ्चकर ।
जय षडाननमुख सप्तच्छदगन्धिमदाष्टतनूतनय ॥ २७

मङ्गलकलशद्वयमयकुम्भमदम्भेन भजत गजवदनं ।
यद्दानतोयतरले स्तिलतुलनालम्बि रोलम्बैः ॥ २८

याभिरनङ्गः साङ्गीकृतः स्त्रियोऽस्त्रीकृताश्च येन ।
धाम्याधारप्रवणौ प्रणमत तौ कामिनीकामौ ॥ २९

Digitized by Google

प्रणयकुपितप्रियापदलाक्षासन्ध्यानुबन्धमधुरेन्दुः ।
तद्वलयकनककणिकाकषग्रावस्त्रीवः शिवो जयति ॥ ८

पूर्णनखेन्दु त्रिगुणितमञ्जीरा प्रेमशृङ्खला जयति ।
हरशशिलेखा गौरीचरणाङ्गुलिमध्यगुल्फेषु ॥ ९

श्रीकरपिहितं चक्षुः सुखयतु नः पुण्डरीकनयनस्य ।
जघनमिवेक्षितुमागतमब्जनिभं नाभिसुषिरेण ॥ १०

श्यामं श्रीकुचकुङ्कुमपिञ्जरितमुरो मुरद्विषो जयति ।
दिनमुखनभ इव कौस्तुभविभाकरो यद्विभूषयति ॥ ११

प्रतिबिम्बितप्रियातनु सकौस्तुभं जयति मुरभिदो वक्षः ।
पुरुषायितमभ्यस्यति लक्ष्मीर्यद्वीक्ष्य मुकुरमिव ॥ १२

केलिचलाङ्गु लिलम्भितलक्ष्मीनाभिर्मुरद्विषश्चरणः ।
स जयति येन कृता श्रीरनुरूपा पद्मनाभस्य ॥ १३

रोमावली मुरारेः श्रीवत्सनिषेविताग्रभागा वः ।
उन्नालनाभिनलिनच्छायेवोत्तापमपहरतु ॥ १४

आदाय सप्ततन्त्रीचितां विपञ्चीमिव त्रयीं गायन् ।
मधुरं तुरङ्गवदनोचितं, हरिर्जयति हयमूर्द्धा ॥ १५

स जयति महावराहो जलनिधिजठरे चिरं निमग्नापि ।
येनान्त्रैरिव सह फणिगणैर्बलादुद्धृता धरणी ॥ १६

ब्रह्माण्डकुम्भकारं भुजगाकारं जनार्द्दनं स्तौमि ।
स्फारे यत्फणचक्रे धरा, शरावश्रियं वहति ॥ १७

चण्डीजङ्घाकाण्डः शिरसा चरणस्पृशि प्रिये जयति ।
शङ्करपर्यन्तजितो वीरस्तम्भः स्मरस्येव ॥ १८

Digitized by Google

रम्भास्तम्भोरुकान्ते मुनिमुनिमुनिभि र्दृश्यते चेद्विरामो
बाले वर्ण्यैः कवीन्द्रैः सुतनु निगदिता स्रग्धरा सा प्रसिद्धा ४१

इति श्रीकालिदासविरचितः श्रुतबोधः सम्पूर्णः ॥

आर्य्यासप्तशती ।

पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ।
अङ्कुरितइव मनोभूर्यस्मिन् भस्मावशेषोऽपि ॥ १

मा वम संवृणु विषमिदमिति सातङ्कं पितामहेनोक्तः ।
प्रातर्जयति सलज्जः कज्जलमलिनाधरः शम्भुः ॥ २

जयति प्रियापदान्ते गरलग्रैवेयकः स्मरारातिः ।
विषमविशिखे विशन्निव शरणं गलबद्धकरवालः ॥ ३

जयति ललाटकटाक्षः शशिमौलेः पक्ष्मलः प्रियाप्रणतौ ।
धनुषि स्मरेण निहितः सकण्टकः केतकेषुरिव ॥ ४

जयति जटाकिञ्जल्कं गङ्गामधु, मुण्डवलयबीजमयं ।
गलगरलपङ्कसम्भव मम्भोरुहमाननं शम्भोः ॥ ५

सन्ध्यासलिलाञ्जलिमपि कङ्कणफणिपीयमानमविजानन् ।
गौरीमुखार्पितमना विजयाहसितः शिवो जयति ॥ ६

प्रतिबिम्बितगौरीमुखविलोकनोत्कम्पशिथिलकरगलितः ।
स्वेदभरपूर्य्यमाणः शम्भोः सलिलाञ्जलि र्जयति ॥ ७

Digitized by Google

सुमुखि लघवः पञ्च प्राच्यास्ततो दशमान्तिमः
तदनु ललितालापे वर्णौ तृतीयचतुर्थकौ
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्कनकप्रभे
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ३६
यदि प्राच्यो ह्रस्वःकलितकमले पञ्च गुरवः
ततो वर्णाः पञ्च प्रकृतिसुकुमाराङ्गि लघवः
त्रयोन्ये चोपान्त्याः सुतनुजघने भोगसुभगे
रसैरीशैर्यस्यां भवति विरतिः सा शिखरिणी ३७
द्वितीयमलिकुन्तले गुरु षडष्टमद्वादशं
चतुर्दशमथ प्रिये गुरु गभीरनाभीह्रदे
सपञ्चदशमान्तिमं तदनु यत्र कान्ते यतिः
गिरीन्द्रफणभृत्कुलैर्भवति सुभ्रु पृथ्वीति सा ३८
चत्वारः प्राक् सुतनु गुरवो द्वौ दशैकादशौ चेत्
मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशान्त्यौ
तद्वद्यान्त्यौ युगरसहयैर्यत्र कान्ते विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि तां सङ्गिरन्ते ३९
आद्यं यत्र गुरुत्रयं प्रियतमे षष्ठं ततश्चाष्टमं
सन्त्येकादशतस्त्रयस्तदनु चेदष्टादशाद्यान्तिमाः
मार्तण्डैर्मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिम्बानने
तद्वृत्तं प्रवदन्ति काव्यरसिकाः शार्दूलविक्रीडितं ४०
चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि
द्वौ तद्वत् षोडशाद्यौ मृगमदतिलके षोडशान्त्यौ तथान्त्यौ

अयि कृशोदरि यत्र चतुर्थकं गुरु च सप्तमकं दशमं तथा
विरतिगश्च तथैव सुमध्यमे द्रुतविलम्बितमित्युपदिश्यते २८
प्रथमाक्षरमाद्यतृतीययो र्द्रुतविलम्बितकस्य हि पादयोः
यदि नास्ति तदा कमलेक्षणे भवतिसुन्दरि सा हरिणीप्लुता २९
उपेन्द्रवज्राचरणेषु सन्ति चेदुपान्त्यवर्णा लघवः परेकृताः
मदोल्लसद्भ्रूजितकामकार्मुके वदन्ति वंशस्थविलं बुधास्तदा ३०
यस्यामशोकांकुरपाणिपल्लवे वंशस्थपादा गुरुपूर्ववर्णकाः
तारुण्यहेलारतिरङ्गलालसे तामिन्द्रवंशां कवयः प्रचक्षते ३१
यस्यां प्रिये प्रथमकमक्षरद्वयं तुर्यं तथा गुरु नवमं दशान्तिमं
सान्त्वं भवेद्यतिरपिचेद्युगग्रहैः सालक्ष्यतामसृतरुतिप्रभावती ३२

आद्यं चेत् त्रितयमथाष्टमं नवान्त्यं
द्वावन्तौ गुरुविरतौ सुभाषिते स्यात्
विश्रामो भवति महेशनेत्रदिग्भि
र्विज्ञेया ननु सुदति प्रहर्षिणी सा ३३
आद्यं द्वितीयमपि चेद् गुरु तच्चतुर्थं
यत्राष्टमञ्च दशमान्त्यमुपान्त्यमन्त्यं
अष्टाभिरिन्दुवदने विरतिश्च षड्भिः
कान्ते वसन्ततिलकं किल तं वदन्ति ३४
प्रथममगुरु षट्कं विद्यते यत्र कान्ते
तदनु च दशमं चेदक्षरं द्वादशान्त्यं
गिरिभिरथ तुरङ्गै र्यत्र कान्ते विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ३५

Digitized by Google

ह्रस्वोवर्णो जायते यत्र षष्ठः कम्बुग्रीवो तद्वदेवाष्टमान्त्यः
विश्रान्तः स्यात्तन्विवेदैस्तुरङ्गैःताभाषन्तेशालिनीं छान्दसीयाः
आद्यचतुर्थमहीननितम्बे सप्तमकं दशमञ्च तथान्त्यं
यत्र गुरु प्रकटस्मरसारे तत् कथितं ननु दोधकवृत्तं १८
यस्यास्त्रिषट्सप्तममक्षरं स्यात् ह्रस्वं सुजंघे नवमञ्च तद्वत्
गत्या विलज्जीकृतहंसकान्ते तामिन्द्रवज्रां ब्रुवते कवीन्द्राः १९
यदीन्द्रवज्राचरणेषु पूर्वे भवन्ति वर्णा लघवः सुवर्ण
अमन्दमाद्यन्मदने तदानीमुपेन्द्रवज्रा कथिता कवीन्द्रैः २०
यत्र द्वयोरप्यनयोस्तु पादा भवन्ति सीमन्तिनि चन्द्रकान्ते
विद्वद्भिराद्यैः परिकीर्तिता सा प्रयुज्यतामित्युपजातिरेषा २१
आख्यानकी सा प्रकटीकृतार्थे यदीन्द्रवज्राचरणः पुरस्तात्
उपेन्द्रवज्राचरणास्त्रयोऽन्ये मनीषिणोक्ता विपरीतपूर्वा २२
आद्यमक्षरमतस्तृतीयकं सप्तमञ्च नवमं तथान्तिमं
दीर्घमिन्दुमुखि यत्र जायते तां वदन्ति कवयो रथोद्धतां २३
अक्षरञ्च नवमं दशमञ्च व्यत्ययाद् भवति यत्र विनीते
प्राक्तनैः सुनयने यदि सैव स्वागतेति कविभिः कथितासौ २४
सतृतीयकषष्ठमनङ्गरते नवमं विरतिप्रभवं गुरु चेत्
घनपीनपयोधरभारनते ननु तोटकवृत्तमिदं कथितं २५
यदि तोटकस्य गुरु पञ्चमकं विहितं विलासिनि तदक्षरकं
रससंख्यकं गुरु न चेदबले प्रमितार्क्षरेति कविभिः कथिता २६
यदाद्यं चतुर्थं तथा सप्तमं स्यात्तथैवाक्षरं ह्रस्वमेकादशाद्यं
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातं २७

Digitized by Google

आर्य्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत् ।
कामिनि तामुपगीतिं प्रतिभाषन्ते महाकवयः ॥ ६ ॥

आद्यचतुर्थं पञ्चमकं चेत् ।
यत्र गुरु स्यात् सा क्षरपङ्क्तिः ॥ ७ ॥

अगुरु चतुष्कं भवति गुरु द्वौ ।
घनकुचयुग्मे ! शशिवदनासौ ॥ ८ ॥

तुर्यं पञ्चमकं चेद् यत्र स्याल्लघु बाले ।
विद्वद्भिर्मृगनेत्रे प्रोक्ता सा मदलेखा ॥ ९ ॥

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययो ॥ १० ॥

आदिगतं तुर्यगतं पञ्चमकं चान्त्यगतम् ।
स्यात् गुरु चेत् संकथितं माणवकाक्रीडमिदम् ॥ ११ ॥

द्वितुर्य्यषष्ठमष्टमं गुरु प्रयोजितं यदा ।
तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम् ॥ १२ ॥

सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ।
विद्वद्वृन्दैर्वीणावाणि ! व्याख्याता सा विद्युन्माला ॥ १३ ॥

तन्वि ! गुरु स्यादाद्यचतुर्थं पञ्चमषष्ठं चान्त्यमुपान्त्यम् ।
इन्द्रियबाणैः यत्र विरामः सा कथनीया चम्पकमाला ।

चम्पकमाला यत्र भवेद् अन्त्यविहीना प्रेमनिधे !
छन्दसि दक्षा ये कवय स्तां मणिमध्यं ते ब्रुवते ॥ १५ ॥

मन्दाक्रान्तान्त्ययतिरहिता सालङ्कारे यदि भवति या ।
सा विद्वद्भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलवदने ! ॥ १६ ॥

Digitized by Google

साकूतं हैमवत्या मृदुलहसितया वीक्षितायास्तवाम्ब !
व्यालोलल्लासितत्वात्सहरिनवघटाताण्डवं नःपुनातु ॥५१॥
विभूषिता नागरिपूत्तमाङ्गा सद्यःकृतानेकजनार्त्तिभङ्गा ।
मनोहरोत्तुङ्गचलत्तरङ्गा गङ्गा ममाङ्गान्यमलीकरोतु ॥५२॥
इमां पीयूषलहरीं जगन्नाथेन निर्मिताम्
यःपठेत्तस्य सर्वत्र जायन्ते जयसम्पदः ॥ ५३ ॥

इति श्रीपण्डितराजाभिध श्रीजगन्नाथकविरचितो
गङ्गालहरीस्तवराजः सम्पूर्णः ।

श्रुतबोधः ।

छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते ।
तमहं सम्प्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥
संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रम् ।
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥ २ ॥
एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम् ॥ ३ ॥
यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या ॥ ४ ॥
आर्य्यापूर्वार्द्धसमं द्वितीयमपि भवति यत्र हंसगते ।
छन्दोविदस्तदानीं गीतिं ताममृतवाणि ! भाषन्ते ॥५॥

Digitized by Google

पयः पीत्वा मातः ! स्तवसपदि यातःसहचरै-
र्विमूढैः संरन्तुं क्वचिदपि न विश्रान्तिमगमत् ।
इदानीमुत्सङ्गे मृदुपवनसञ्चारशिशिरे
चिरादुन्निद्रं मां सदयहृदये स्थापय चिरम् ॥ ४६ ॥

बिधान द्रागेव द्रढिमरमणीयं परिकरं
किरीटे बालेन्दुं नियमय पुनःपन्नगगणैः ।
न कुर्यास्त्वंहेलामितरजनसाधारणधिया
जगन्नाथस्यायं सुरधुनि ! समुद्धारसमयः ॥ ४७ ॥

शरच्चन्द्रश्वेतां शशिशकलशोभालमुकुटां
करैःकुम्भाम्भोजे वरभयनिरासौ विदधतीम ।
सुधासाराकाराभरणवसनां शुभ्रमकर-
स्थितां त्वां ध्यायन्त्युदयति न तेषां परिभवः ॥ ४८ ॥

दरस्मितसमुल्लसद्वदनकान्तिपूरामृतै-
र्भवज्वलनभर्जितानानिशमूर्च्छयन्ती नरान् ।
विवेकमयचन्द्रिकाचयचमत्कृतिं तन्वती
धनोतु तमसन्ततीः सपदि सन्ततीरङ्गना ॥ ४९ ॥

मन्त्रैर्मीलितमौषधैर्मुकुलितं त्रस्तं सुराणां गणैः
स्रस्तं सान्द्रसुधारसैर्विदलितं गारुत्मतैर्ग्रावभिः ।
वीचिक्षालितकालिमाहितपदे स्वर्लोककल्लोलिनि
त्वं तापं निरयाधुना ममभवव्यालावलीढात्मनः ॥ ५० ॥

द्यूते नागेन्द्रकृत्तिंप्रमथगणफणिश्रेणिनन्दीन्दुमुख्यं
सर्वस्वं हारयित्वा त्वमथ पुरभिदि द्राक् पणीकर्तुकामे ।

भवान्यासापत्न्यस्फुरितनयनं कोमलरुचा
करेणोत्क्षिप्तास्ते जननि ! विजयन्तां लहरयः ॥ ४० ॥

प्रपद्यन्ते लोकाः कति न भवतीमत्रभवती-
मुपाधिस्तत्रायं स्फुरति यदभीष्टं वितरसि ।
अये ! तुभ्यंमात ! मम तु पुनरात्मा सुरधुनि !
स्वभावादेवत्वय्यमितमनुरागं विधृतवान् ॥ ४१ ॥

ललाटे या लोकैरिह खलु सलीलं तिलकिता
तमो हन्तुं धत्ते तरुणतरमार्तण्डतुलनाम् ।
विलुम्पन्ती सद्योविधिलिखितदुर्वर्णसरणिं
त्वदीया सा मृत्स्ना मम हरतु कृत्स्नामपि शुचम् ॥ ४२ ॥

नरान्मूढांस्तत्तज्जनपदसमासक्तमनसो
हसन्तः सोल्लासं विकचकुसुमव्रातमिषतः ।
पुनाना सौरभ्यैः सततमलिनोऽनित्यमलिनान्
सखायो नः सन्तु त्रिदशतटिनीतीरतरवः ॥ ४३ ॥

यजन्त्येके देवान् कठिनतरसेवांस्तदपरे
वितानव्यासक्ता यमनियमरक्ताःकतिपये ।
अहन्तु त्वन्नामस्मरणभृतकामस्त्रिपथगे
जगज्जालं जाने जननि ! तृणजालेन सदृशम् ॥ ४४ ॥

अविश्रान्तंजन्मावधिसुकृतजन्मार्जनकृतां
सतां श्रेयःकर्तुं कति न कृतिनः सन्ति विबुधाः ।
निरस्तालम्बानामकृतसुकृतानान्तु भवती
विनामुष्मिंल्लोके न परमवलोके हितकरः ॥ ४५ ॥

अलभ्यं सौरभ्यं हरति सततं यः सुमनसां
क्षणादेव प्राणानपि विरहशस्त्रक्षतभृताम्।
त्वदीयानां लीलाचलितलहरीणां व्यतिकरा
त्पुनीते सोऽपि द्रागहह! पवमानस्त्रिभुवनम्॥ २५॥
कियन्तः सन्त्येके नियतमिह लोकार्थघटकाः
परे पूतात्मानः कति न परलोकप्रणयिनः।
सुखं शेते मातः! तव खलु कृपातः पुनरयं
जगन्नाथः शश्वत्त्वयि विहितलोकद्वयभरः॥ २६॥
भवत्या हि व्रात्याधमपतित पाषण्डपरिषत्-
परित्राणस्नेहः श्लथयितुमशक्यः खलु यथा।
ममाप्येवं प्रेमणा दुरितनिवहेष्वम्ब जगति
स्वभावोऽयं सर्वैरपि खलु यतो दुष्परिहरः॥ २७॥
प्रदोषान्ते नृत्यत्पुरमथनलीलोद्धतजटा
तटाभोगप्रेङ्खल्लहरिभुजसन्तानविधुतिः।
गलत्क्रोडक्रीडज्जलडमरुढाङ्कारसुभग
स्तिरोधत्तां तापं त्रिदशतटिनीताण्डवविधिम्॥ २८॥
सदैव त्वय्येवार्पितकुशलचिन्ताभरमिमं
यदि त्वं मामम्ब त्यजसि समयेऽस्मिन्नविषये।
तदाविश्वासोऽयं त्रिभुवनतलादस्तमयते
निराधारा चेयं भवति खलु निर्व्याजकरुणा॥ २९॥
कपर्दादुल्लस्य प्रणयमिलदर्धाङ्गयुवतेः
पुरारेः प्रेङ्खन्त्यो मृदुलतरसीमन्तसरणौ।

Digitized by Google

अहोमामुद्धर्तुं जननि ! घटयन्त्याः परिकरं
तव श्लाघाङ्कर्तुं कथमिव समर्थो नरपशुः ॥ २९ ॥

न कोऽप्येतावन्तं खलु समयमारभ्य मिलितो
यदुद्धारादाराद्भवति जगतो विस्मयभरः ।
इतीमामीहान्ते मनसि चिरकालं स्थितवती
मयं सम्प्राप्तोऽहं सफलयितुमम्ब प्रणयतः ॥ ३० ॥

श्वदृत्तिव्यासङ्गो नियतमथ मिथ्याप्रलपनं
कुतर्केष्वभ्यासः सततपरपैशुन्यमननम् ।
अपि श्रावंश्रावं मम तु पुनरेवंविधगुणा-
नृते त्वत् को नाम क्षणमपि निरीक्षेत वदनम् ॥ ३१ ॥

विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलम्
नयाभ्यामालीढ़ा परमरमणीया तव तनुः ।
अयं हि न्यक्कारो जननि ! मनुजस्य श्रवणयो
र्ययोर्नान्तर्यातस्तव लहरिलीलाकलकलः ॥ ३२ ॥

विमानैःस्वच्छन्दं सुरपुरमयन्ते सुकृतिनः
पतन्ति द्राक् पापाजननि ! नरकान्तःपरवशाः ।
विभागोऽयं तस्मिन्नुभयमथ मूर्त्तौ जनपदे
न यत्र त्वं लीलाशमितमनुजाशेषकलुषाः ॥ ३३ ॥

अपि घ्नन्तोविप्रानविरतमुषन्तोगुरुसतीः
पिबन्तो मैरेयं पुनरपहरन्तश्च कनकम् ।
विहाय त्वय्यन्ते तनुमतनुदानाध्वरजषा
मुपर्य्यं विक्रीडन्त्यखिलसुरसम्भावितपदाः ॥ ३४ ॥

Digitized by Google

अनाथः सौहार्द्रां विगलितगतिः पुण्यगतिदां,
पतन्विश्वोद्धर्त्रीं, गदविगलितः सिद्धभिषजम् ।
सुधासिन्धुं तृष्णाकुलितहृदयो मातरमयं
शिशुः संप्राप्तस्त्वामहमिह विदध्याः समुचितम् ॥ २४ ॥

विलीनोऽयं वैवस्वतनगरकोलाहलभयो
गता दूता दूरं क्वचिदपि परेतान्मृगयितुम् ।
विमानानां व्रातो विदलयति वीथीर्दिविषदां
कथा ते कल्याणी यदवधि महीमण्डलमगात् ॥ २५ ॥

स्फुरत् कामक्रोधप्रबलरससञ्जातजटिल-
ज्वरज्वालाजालज्वलितवपुषां नः प्रतिदिनम् ।
हरन्तां सन्तापं कमपि मरुदुल्लासिलहरी
छटाचञ्चत्पाथः कणसरणयो दिव्यसरितः ॥ २६ ॥

इदं हि ब्रह्माण्डं सकलभवनाभोगभवनं
तरङ्गैर्यस्यान्तर्लुठति परितस्तिन्दुकमिव ।
सएष श्रीकण्ठप्रविततजटाजूटजडितो
जलानां सङ्घातस्तव जननि ! तापं हरतु नः ॥ २७ ॥

त्रपन्ते तीर्थानि त्वरितमिह यस्योद्धृतिविधौ
करं कर्णे कुर्वन्त्यपि किल कपालिप्रभृतयः ।
इमं तं मामम्ब ! त्वमियमनुकम्पार्द्रहृदया
पुनाना सर्वेषामघमथनदर्पन्दलयसि ॥ २८ ॥

श्वपाकानां व्रातैरमितविचिकित्साविगलितै-
र्विमुक्तानामेको किल सदनमेनःपरिषदाम् ।

समाधानं बुद्धेरथ खलु तिरोधानमधियां
श्रियामाधानं नः परिहरतु तापस्तव वपुः ॥ १८ ॥

पुरो धावं धावं द्रविणमदिराघूर्णितदृशां
महीपानां नानातरुणतरखेदस्य नियताम्।
ममैवायं मन्तुः स्वहितशतहन्तुर्जडधियो
वियोगस्ते मातः! यदिह करुणातः क्षणमपि ॥ १९ ॥

मरुल्लीलालोलल्लहरिलुलिताम्भोजपटल-
स्खलत्पांसुव्रातच्छुरणविसरत्कौङ्कुमरुचि।
सुरस्त्रीवक्षोजक्षरदगुरुजं बालजटिलं
जलन्ते जम्बालं मम जननजालं रमयतु ॥ २० ॥

समुत्पत्तिः पद्मारमणपदपद्मामलतला
निवासः कन्दर्पप्रतिभटजटाजूटभवने।
अथायं व्यासङ्गो हतपतितनिस्तारणविधे
नै कस्मादुत्कर्षस्तव जननि! जागर्त्ति जगतः ॥ २१ ॥

न गेभ्यो यान्तीनां कथय तटिनीनां कतमया
पुराणां संहर्तुः सुरधुनि! कपर्दोऽधिरुरुहे
कया वा श्रीभर्त्तुः पदकमलमक्षालि सलिलै
स्तुलालेशो यस्यां तव जननि! दीयेत कविभिः ॥ २२ ॥

विधत्तां निःशङ्कन्निरवधिसमाधिं विधिरहो
सुखं शेषे शेतां हरिरविरतं नृत्यति हरः।
कृतैः प्रायश्चित्तैरलमथ तपोदानयजनैः
सवित्री कामानां यदि जगति जागर्ति भवती ॥ २३ ॥

विनिन्द्यान्युन्मत्तैरपि च परिहार्य्याणि पतितै-
रवाच्यानि व्रात्यैः सपुलकमपास्यानि पिशुनैः ।
हरन्ती लोकानामनवरतमेनांसि कियतां
कदाप्यश्रान्ता त्वं जगति पुनरेका विजयसे ॥ १३ ॥
स्खलन्ती स्वर्लोकादवनितलशोकापहृतये
जटाजूटग्रन्थौ यदसि विनिबद्धा पुरभिदा ।
अये निर्लोभानामपि मनसि लोभं जनयतां
गुणानामेवायं तव जननि ! दोषः परिणतः ॥ १४ ॥
जडानन्धान् पङ्गून् प्रकृतिबधिरानुक्तिविकलान्
ग्रहग्रस्तानस्ताखिलदुरितनिस्तारसरणान् ।
निलिम्पैर्निर्मुक्तानपि च निरयान्तर्निपतितान्
नरानम्ब ! त्रातुं त्वमिह परमं भेषजमसि ॥ १५ ॥
स्वभावस्वच्छानां सहजशिशिराणामयमपाम्
अपारस्ते मात ! जगति महिमा कोऽपि जयति ।
मुदा यं गायन्ति द्युतलमनवद्यद्युतिभृतः
समासाद्याद्यापि स्फुटपुलकसान्द्राः सगरजाः ॥ १६ ॥
क्षतात् क्षुद्रात्पापाज्झटिति निःसन्तप्तमनसः
समुद्धर्तुं सन्ति त्रिभुवनतले तीर्थनिवहाः ।
अपि प्रायश्चित्तप्रसरणपथातीतचरिता-
नरानूरीकर्तुं त्वमिव जननि ! त्वं विजयसे ॥ १७ ॥
निधानन्धर्म्माणां किमपि च विधानं नवमुदां
प्रधानं तीर्थानाममलपरिधानं त्रिजगतः ।

Digitized by Google

मृगास्तावद्वैमानिकशतसहस्रैःपरिवृता
विशन्ति स्वच्छन्दं विमलवपुषो नन्दनवनम् ॥ ७ ॥

स्मृतं सद्यः स्वान्तं विरचयति शान्तं सकृदपि
प्रगीतं यत्पापं झटिति भवतापञ्च हरति ।
इदं तद्गङ्गेति श्रवणरमणीयं खलु पदं
मम प्राणप्रान्ते वदनकमलान्तर्विलसतु ॥ ८ ॥

यदन्तः खेलन्तः खलु बहुल सन्तोषभरिता
न काकानाकाधीश्वरनगरसाकाङ्क्षमनसः ।
निवासाल्लोकानां जनिमरणशोकापहरणं
तदेतत्ते तीरं श्रमशमनधीरं भवतु नः ॥ ९ ॥

नयत् साक्षाद्वेदैरपिगलितभेदैरवसितं
न यस्मिञ्जीवानां प्रसरति मनोवागवसरः ।
निराकारं नित्यं निजमहिमनिर्वासिततमो
विशुद्धं यत्तत्त्वं सुरतटिनि तत्त्वं न विषयः ॥ १० ॥

महादानैर्ध्यानैर्बहुविधवितानैरपि च यन्
न लभ्यं घोराभिःसुविमलतपोराजिभिरपि ।
अचिन्त्यं तद्विष्णोःपदमखिलसाधारणतया
ददाना केनासि त्वमिह तुलनीया कथय ? नः ॥ ११ ॥

नृणामीक्षामात्रादपि परिहरन्त्या भवभयं
शिवायास्ते मूर्त्तेःक इह बहु मानं कथयतु ? ।
अमर्षम्लानायाः परममनुरोधं गिरिभुवो
विहाय श्रीकण्ठःशिरसि नियतं धारयति याम् ॥ १२ ॥

दरिद्राणां दैन्यं दुरितमथ दुर्वासनहृदां
द्रुतं दूरीकुर्वन् सकृदुपगतो दृष्टिसरणिम् ।
अपि द्रागाविद्यद्रुमदलनदीक्षागुरुरिह
प्रवाहस्ते वारां श्रियमयमपारां दिशतु नः ॥ २ ॥
स्मृतिं याता पुंसामकृतसुकृतानामपि च या
हरत्यन्तस्तन्द्रां तिमिरमिव चन्द्रांशुसरणिः ।
इयं सा ते मूर्त्तिः सकलसुरसंसेव्यसलिला
ममान्तःसन्तापं त्रिविधमथ तापञ्च हरताम् ॥ ३ ॥
तवालम्बादम्ब ! स्फुरदलघुगर्वेण सहसा
मया सर्वेऽवज्ञासरणिमथ नीताः सुरगणाः ।
इदानीमौदास्यं यदि भजसि भागीरथि ! तदा
निराधारो हा ! रोदिमि कथय केषामिह पुरः ॥ ४ ॥
अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा
विलोलद्वानीरं तव जननि ! तीरं श्रितवताम् ।
सुधातःस्वादीयः सलिलमिदमातृप्ति पिबतां
जनानामानन्दः परिहसति निर्वाणपदवीम् ॥ ५ ॥
उदञ्चन्मार्त्तण्डस्फुटकपट-हेरम्बजननी-
कटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः ।
भवन्तु त्वङ्गन्तो हरशिरसि गङ्गातनुभुव
स्तरङ्गाःप्रोत्तुङ्गा दुरितभवभङ्गाय भजताम् ॥ ६ ॥
प्रभाते स्नातीनां नृपतिरमणीनां कुचतटी
गतो यावन्मात ! मिलति तव तोयैर्मृगमदः ।

Digitized by Google

सुराधीशैः सर्वैः स्तुतपदमनु श्रीहरिमिति "प्रसी ॥४॥"
कदाचित्स्वच्छायाखचितमभिमन्वानं यदुपतिं
समाधिस्वच्छायाचल इव विलोलैकमकरम् ।
अये ! भक्तोदाराम्बुजवदन ! नन्दस्य तनयं "प्रसी" ॥ ५ ॥
कदाचित्कालिन्द्यास्तटतरुकदम्बे स्थितमनु
स्मयन्तं साकूतं हृतवसनगोपीस्तनघटम् ।
अहो ! शक्रानन्दाम्बुजवदन ! गोवर्धनधरं "प्रसी" ॥६॥
कदाचित् कान्तारे विजयसखमिष्टं नृपसुतं
वदन्तं पार्थेत्थं नृपसुत ! सखे ! बन्धुरिति च ।
भ्रमन्तं विश्रान्तं श्रितमुरलि रम्यं हरिममी "प्रसी" ॥७॥
कदा द्रक्ष्ये पूर्णं पुरुषममलं पङ्कजदृशं
अहो ! विष्णो ! राधारसिक ! मुरलीमोहन ! विभो !
दयां कर्तुं दीने परमकरुणाब्धे समुचितं "प्रसी" ॥ ८ ॥

इति करुणालहरी संपूर्णा ।

गङ्गालहरी ।

समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्
महैश्वर्य्यं लीलाजनितजगतः खण्डपरशोः ।
श्रुतीनां सर्वस्वं सुकृतमथ मूर्त्तं सुमनसाम्
सुधासौन्दर्य्यन्ते सलिलमशिवं नः शमयतु ॥ १ ॥

स्वकीयैरम्भोभिः सलिलनिधिसौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि ! वाचां स्तुतिरियम् ॥१०२

मञ्जीरध्वनिभिश्चरणं वलिध्वनिभिर्मध्यं
हाराभिरामकुचमम्बु रुहायताक्षम् ।
लीलालकं हिममहीधरकन्यकाख्यं
ज्ञानस्वरूपमिदमीश्वरदीपदीप्यम् ॥ १०३ ॥

इति शङ्कराचार्यविरचितानन्दलहरी समाप्ता ।

श्रीकृष्णलहरी ।

कदा वृन्दारण्ये विपुलयमुनातीरपुलिने
चरन्तं गोविन्दं हलधरसुदामादिसहितम् ।
अहो कृष्ण ! स्वामिन् मधुरमुरलीमोहनविभो !
प्रसीदेतिक्रोशन्निमिषमिवनेष्यामिदिवसान् ॥१॥

कदा कालिन्दीयैर्हरिचरणमुद्राङ्किततटैः
स्मरं गोपीनाथं कमलनयनं सस्मितमुखम् ।
अहो पूर्णानन्दाम्बुजवदनभक्तैकललनं "प्रसी" ॥ २ ॥

कदाचित् खेलन्तं व्रजपरिसरे गोपतनयैः
कुतश्चित् संप्राप्तं किमपि भयितं गोपललनम् ।
अये राधे ! किं वा हरसि रसिके ! कञ्चुकयुगं "प्रसी" ॥३॥

कदाचित् गोपीनां हसितचकितस्निग्धनयनं
स्थितं गोपीवृन्दे नटमिवनटं तं सललितम् ।

Digitized by Google

समुद्भूतस्थूलस्तनभरमुरश्चारुहसितं
कटाक्षे कन्दर्पाः कतिचनकदम्बद्युतिवपुः ।
हरस्य त्वद्भ्रान्तिं मनसि जनयन्तः समतुलां
भवत्यां ये भक्ताः परिणतिरमीषामियमुमे ॥ ९७ ॥

कलत्रं वैधात्रं कति कति भजन्ते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः ।
महादेवं हित्वा तव सति सतीनामचरमे
कुचाभ्यामासङ्गः कुरवकतरोरप्यसुलभः ॥ ९८ ॥

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो
हरेः पत्नीं पद्मां हरसहचरीमद्रितनयाम् ।
तुरीया कापि त्वं दुरधिगमनिःसीममहिमा
महामाये विश्वं भ्रमयसि परब्रह्ममहिषि ॥ ९९ ॥

सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विजयते
रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा ।
चिरञ्जीवन्नेव क्षपितपशुपाशव्यतिकरः
परब्रह्माभिख्यं रसयति रसं त्वद्भजनवान् ॥ १०० ॥

निधे नित्यस्मेरे निरवधि गणे नीतिनिपुणे
निरायातज्ञाने नियमपरिचित्तैकनिलये ।
नियत्या निर्मुक्ते निखिलनियमान्तस्तुतिपदे
निरातङ्के नित्ये निगमय ममापि स्तुतिमिमाम् ॥ १०१

प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चन्द्रोपलजललवैरर्घ्यरचना ।

Digitized by Google

सुविक्षेपे शिक्षां सुभगमणिमञ्जीररणित-
च्छलादाचक्षाणं चरणकमलं चारुचरितम् ॥ ९१ ॥

अराला केशेषु प्रकृतिसरलानन्दहसित
शिरीषाभा गात्रे दृषदिव कठोरा कुचतटे ।
भृशं तन्वी मध्ये पृथुरसि वरारोहविषये
जगत्त्रातुं शम्भोर्जयति करुणा काचिदरुणा ॥ ९२ ॥

पुरारातेरन्तः पुरमसि ततस्त्वच्चरणयोः
सपर्या मर्यादातरलकरणा नाम सुलभा ।
तथाह्येते नीताः शतमखमुखाः सिद्धिमतुलां
तव द्वारोपान्तस्थितिभिरणिमाद्याभिरमराः ॥ ९३ ॥

गतास्ते पञ्चत्वं द्रुहिणहरिरुद्रेश्वरशिवाः
शिवस्स्वच्छच्छायाघटितकपटप्रच्छदपटः ।
त्वदीयानां भासां प्रतिफलनलाभारुणतया
शरीरी शृङ्गारो रसइव दृशां दोग्धि कुतुकम् ॥ ९४ ॥

कलङ्कः कस्तूरीरजनिकरविम्बं जलमयं
कलाभिः कर्पूरैर्मरकतकरण्डं निविडितम् ।
अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं
विधिर्भूयो भूयो निविडयति नूनं तव कृते

स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो
निषेव्ये नित्ये त्वामहमिति सदा भावयति यः ।
किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो
महासम्वर्ताग्निर्विरचयति नीराजनविधिम् ॥ ९६ ॥

नमोवाकं ब्रूमोनयनरमणीयाय पदयो
स्तवास्मै द्वन्द्वाय स्फुटरुचिरसालक्तकवते।
असूयत्यत्यन्तं यदभिहननाय स्पृहयते
पशूनामीशानः प्रमदवनकङ्केल्लितरवे॥ ८६॥

मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं
ललाटे भर्तारं चरणयुगलं ताडयति ते।
चिरादन्तःशल्यं दहनकृतमुन्मीलितवता
तुलाकोटिक्वाणैः किलकिलितमीशानरिपुणा॥ ८७॥

पदन्ते कान्तीनां प्रपदमपदं देवि विपदां
कथं नीतं सद्भिः कठिनकमठीकर्परतुलाम्।
कथम्बा बाहुभ्यामुपयमनकाले पुरभिदा
तदादाय न्यस्तं दृषदि दयमानेन मनसा॥ ८८॥

नखैर्नाकस्त्रीणां करकमलसङ्कोचशशिभिः
तरूणां दिव्यानां हसत इव ते चण्डि! चरणौ।
फलानि स्वःस्थेभ्यः किसलयकराग्रेण ददतां
दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ॥ ८९॥

कदा काले मातः! कथय कलितालक्तकरसं
पिबेयं विद्यार्थी तव चरणनिर्णेजनजलम्।
प्रकृत्या मूकानामपि च कविताकारणतया
यदाधत्ते वाणीमुखकमलताम्बूलरसताम्॥ ९०॥

पदन्यासक्रीडापरिचयमिवारब्धुमनसः
चरन्तस्ते खेलां भवनकलहंसा न जहति।

चिरन्ते मध्यस्य त्रुटिततटिनीतीरतरुणा
समावस्थास्थेम्नो भवतु कुशलं शैलतनये ॥ ८० ॥
गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजान्
नितम्बादाक्षिप्य त्वयि हरणरूपेण विदधे ।
अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतीं
नितम्बप्राग्भावः स्थगयति लघुत्वं नयति च ॥ ८१ ॥
करीन्द्राणां शुण्डाकनककदलीकाण्डपटलीम्
उभाभ्यामूरुभ्यामुभयमपि निर्जित्य भवती ।
सुवृत्ताभ्यां पत्यौ प्रणतिकठिनाभ्यां गिरिसुते
विजिग्ये जानुभ्यां विबुधकरिकुम्भद्वयमपि ॥ ८२ ॥
पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते
निषङ्गौ ते जङ्घे विषमविशिखो बाढमकृत ।
यदग्रे दृश्यन्ते दशशरफलाः पादयुगले
नखाग्रच्छद्मानः सुरमुकुटशाणैकनिशिताः ॥ ८३ ॥
श्रुतीनां मूर्द्धानो दधति तव यौ शेखरतया
ममाप्येतौ मातः ! शिरसि दयया धेहि चरणौ ।
ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी
ययोर्लाक्षालक्ष्मीररुणहरिचूड़ामणिरुचिः ॥ ८४ ॥
हिमानीहन्तव्यं हिमगिरितटाक्रान्तरुचिरौ
निशायां निद्राणं निशि च परभागेण विशदौ ।
परं लक्ष्मीपात्रं श्रियमभिसृजन्तौ प्रणयिनां
सरोजं त्वत्पादौ जननि ! जयतश्चित्रमिह किम् ॥ ८५ ॥

Digitized by Google

कुचौ सद्यः स्विद्यत्तटघटितकूर्पासभिदुरौ
कषन्तौ दोर्मूलं कनककलसाभौ कलयताम्।
भयात् त्रातुं भङ्गादुदरमविलम्बं तनुभुवा
त्रिधा बद्धं देवि! त्रिवलिनवलीवल्लिभिरिव ॥ ७५ ॥
तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः
पयः पारावारः परिहरति सारस्वतइव।
दयावत्या दत्तं द्रविड़शिशुरास्वाद्य तव यत्
कवीनां प्रौढ़ानामजनि कमनीयं कवयिता ॥ ७६ ॥
हरक्रोधज्वालावलिभिरवलीढेन वपुषा
गभीरे ते नाभीसरसि कृतझम्पो मनसिजः।
समुत्तस्थौ तस्मादचलतनये धूमलतिका
जनस्तां जानीते जननि तव रोमावलिरिति ॥ ७७ ॥
यदेतत् कालिन्दीतनुभरतरङ्गाकृति शिवे
कृशे मध्ये किञ्चिज्झटिति तव तन्नाति सुधियाम्।
विमर्दादन्योन्यं कुचकलसयोरन्तरगतं
तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीम् ॥ ७८ ॥
स्थिरोगङ्गावर्तस्तनमुकुललोमावलिलता
तलारालं कुण्डं कुसुमशरतेजोहुतभुजः।
रते लीलागारं किमपि तव नाभीति गिरिजे
बिलद्वारं सिद्धेर्गिरिश नयनानां विजयते ॥ ७९ ॥
निसर्गक्षीणस्य स्तनतटभरेण क्लमजुषो
नमन्मूर्त्तेर्नाभौ वलिषु शनकैस्त्रुटतइव।

Digitized by Google

विराजन्ते नानाविधमधुररागाङ्कुरभुवां
त्रयाणां ग्रामाणां स्थितिनियमसीमान इव ते ॥ ६९ ॥
मृणालीमृद्वीणां तव भुजलतानां चतसृणां
चतुर्भिः सौन्दर्य्यं सरसिजभवस्तौति वदनैः ।
नखेभ्यः सन्त्रस्यन् प्रमथदलनादन्धकरिपोः
चतुर्णां शीर्षाणां सममभयहस्तार्पणधिया ॥ ७० ॥
नखानामुद्योतैर्नवनलिनरागं विहसतां
कराणान्ते कान्तिं कथय कथयामः कथममी ।
कदाचिद्वा साम्यं व्रजतु कलया हन्त कमलं
यदि क्रीडल्लक्ष्मीचरणतललाक्षारुणदलम् ॥ ७१ ॥
समन्देवि ! स्कन्दद्विपवदनपीतं स्तनयुगं
तवेदं नः खेदं हरतु सततं प्रस्तुतमुखम् ।
यदालोक्याशङ्काकुलितहृदयो हासजनकः
स्वकुम्भौ हेरम्बः परिमृशति हस्तेन झटिति ॥ ७२ ॥
अमू ते वक्षोजावमृतरसमाणिक्यकलसौ
न सन्देहस्पन्दो नगपतिपताके मनसि नः ।
पिबन्तौ तौ यस्मादविदितबधूसङ्गमरसौ
कुमारावद्यापि द्विरदवदनक्रौञ्चदलनौ ॥ ७३ ॥
वहत्यम्बस्तम्बेरमवदनकुम्भप्रकृतिभिः
समारब्धां मुक्तामणिभिरमलां हारलतिकाम् ।
कुचाभोगो बिम्बाधररुचिभिरन्तः शबलितां
प्रतापव्यामिश्रां पुरविजयिनःकीर्त्तिमिव ते ॥ ७४ ॥

अविश्रान्तं पत्युर्गुणगणकथाम्रेडनजडा
जवापुष्पच्छाया जननि ! तव जिह्वा विजयते ।
यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी
सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ॥ ६४ ॥

रणे जित्वा दैत्यानपहृतशिरस्त्रैः कवचिभिः
निवृत्तैश्चण्डांशत्रिपुरहरनिर्माल्यविमुखैः
विरिञ्चीन्द्रोपेन्द्रैः शशिशकलकर्पूरघटिरा
विलुठ्यन्ते मातस्तव वदनताम्बूलकणिकाः ॥ ६५ ॥

विपंच्या गायन्ती विविधमवदानं पशुपतेः
तयारब्धे वक्तुं चलितशिरसा साधुवदने ।
त्वदीयै र्माधुर्य्यैरपलपिततन्त्रीकलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतम् ॥ ६६ ॥

कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया ।
करग्राह्यं शम्भोर्मुखमुकुरवृन्तं गिरिसुते
कथङ्कारं ब्रूमस्तवचिवुकमौपम्यरहितम् ॥ ६७ ॥

भुजाश्लेषान्नित्यं पुरदमयितुः कण्टकवती
तव ग्रीवाधत्ते मुखकमलनालश्रियमियम् ।
स्वतःश्वेताकालागुरुबहुलजम्बालमलिना
मृणालीलालित्यं व्रजति तदधोहारलतिका ॥ ६८ ॥

गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे
विवाहव्यानद्धप्रगुणगणसंख्याप्रतिभुवः ।

तिरश्चीनो यत्र श्रवणपथमुल्लंघ्य विलसन्
अपाङ्गव्यासङ्गो दिशति शरसन्धानधिषणाम् ॥ ५८ ॥
स्फुरद्गण्डाभोगप्रतिफलितताटङ्कयुगलं
चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथम्।
यमारुह्य द्रुह्यत्यवनिरथमर्केन्दुचरणं
महावीरो मारः प्रमथपतये स्वं जितवते ॥ ५९ ॥
सरस्वत्याः सूक्तीरमृतलहरीकौशलभिदः
पिवन्त्याः सर्वाणि श्रवणचुलुकाभ्यामविरलम्।
चमत्कारश्लाघाचलितशिरसः कुण्डलगणो
झणत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते ॥ ६० ॥
असौ नासावंसस्तुहिनगिरिवंशध्वजपुटे
त्वदीयो नेदीयः फलतु फलमस्माकमुचितम्।
वहन्नन्तर्मुक्ताः शिशिरतरनिश्वासघटिताः
समृद्धा यस्तासां वहिरपि च मुक्तामणिधरः ॥ ६१ ॥
प्रकृत्यारक्तायास्तव सुदति दन्तच्छदरुचेः
प्रवक्ष्ये सादृश्यं जनयतु कथं विद्रुमलता।
न विम्बं तद्विम्बप्रतिफलनलाभादरुणितं
तुलामध्यारोढुं कथमपि विलज्जेत कलया ॥ ६२ ॥
स्मितज्योत्स्नाजालं तव वदनचन्द्रस्य पिवतां
चकोराणामासीदतिरसतया चञ्चुजड़िमा।
अतस्ते शीतांशोरमृतलहरीरम्लरुचयः
पिवन्ति स्वच्छन्दं निशि निशि भृशं काञ्जिकधिया ॥ ६३॥

विभक्तं त्रैवर्ण्यं व्यतिकरितलीलाञ्जनतया
विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते ।
पुनःस्रष्टुं देवान् द्रुहिणहरिरुद्रानुपरतान्
रजःसत्वं विभ्रत्तमइतिगुणानां त्रयमिदम् ॥ ५३ ॥
पवित्रीकर्तुं नः पशुपतिपराधीनहृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः ।
नदः शोणो गङ्गा तपनतनयेति ध्रुवममुं
त्रयाणां तीर्थानामुपनयसि सम्भेदमनघे ॥ ५४ ॥
तवापर्णे कर्णेजपनयनपैशुन्यचकिता
विलीयन्ते तोये नियतमनिमेषाः सफरिकाः ।
इयञ्च श्रीर्बद्धच्छदपुटकवाटं कुवलयं
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥ ५५ ॥
निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहुः सन्तो धरणिधरराजन्य तनये
त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः
परित्रातुं शङ्के परिहृतनिमेषास्तव दृशः ॥ ५६ ॥
दृशाद्राघीयस्यादरदलितनीलोत्पलरुचा
दवीयांसन्दीनं स्नपय कृपया मामपि शिवे ।
अनेनायं धन्यो भवति नच ते हानिरियता
वने वा हर्म्ये वां समकरनिपातो हिमकरः ॥ ५७ ॥
अरालं ते पाणियुगलमगराजन्यतनये
न केषामाधत्ते कुसुमशरकोदण्डकुतुकम् ।

Digitized by Google

धनुर्मन्ये सव्येतरकरगृहीतं रतिपतिः
प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरमिदम् ॥ ४७ ॥
अहः सूतेऽसव्यं तव नयनमर्कात्मकतया
त्रियामां वामं ते सृजति रजनीनायकतया ।
तृतीया ते दृष्टिर्दरदलितहेमाम्बुजरुचिः
समाधत्ते सन्ध्यां दिवसनिशयोरन्तरचरीम् ॥ ४८ ॥
विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः
कृपापारावारा किमपि मधुराभोगवतिका ।
अवन्ती ते दृष्टिर्बहुनगरविस्तारविजया
ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते ॥ ४९ ॥
कवीनां सन्दर्भस्तवकमकरन्दैकरसिकं
कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलम् ।
अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वादतरला
वसूयासंसर्गादलिकनयनं किञ्चिदरुणम् ॥ ५० ॥
शिवे शृङ्गाराद्रातदितरमुखे कुत्सनपरा
सरोषागङ्गायां गिरिशनयने विस्मयवती ।
हराहिभ्यो भीता सरसिरुहसौभाग्यजननी
सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा ॥ ५१ ॥
गते कर्णाभ्यर्णं गरुड़इव पक्ष्माणि दधती
पुरांभेत्तुश्चित्ते प्रशमरसविद्रावणफले ।
इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके
तवाकर्णाकृष्टस्मरशरविलासङ्कलयतः ॥ ५२ ॥

Digitized by Google

गतै माणिक्यत्वं गगनमणिभिः सान्द्रघटितं
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः ।
समीपे यच्छाया स्फुरणशबलं चन्द्रशकलं
धनुः सौनासीरं किमिदमिति बध्नाति धिषणाम् ॥ ४२ ॥
धुनोतु ध्वान्तं नस्तुलितदलितेन्दीवरदलं
घनं श्लक्ष्णं स्निग्धं चिकुरनिकुरम्बं तव शिवे ।
यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो
वसन्त्यस्मिन् मन्ये बलमथनवाटीविटपिनाम् ॥ ४३ ॥
वहन्ती सिन्दूरं प्रबलकबरीभारतिमिर
द्विषां वृन्दै वंदीकृतमिव नवीनार्ककिरणम् ।
तनोतु क्षेमं नस्तव वदनसौन्दर्यलहरी
परीवाहस्रोतःसरणिरिव सीमन्तसरणिः ॥ ४४ ॥
अरालैः स्वाभाव्यादलिकलभसश्रीभिरलकैः
परीतं ते वक्त्रं परिहसति पङ्केरुहरुचिम् ।
दरस्मेरे यस्मिन् दशनरुचिकिञ्जल्करुचिरे
सुगन्धौ माद्यन्ति स्मरमथनचक्षुर्मधुलिहः ॥ ४५ ॥
ललाटं लावण्यद्युतिविमलमाभाति तव यत्
द्वितीयं तन्मन्ये मुकुटघटितचन्द्रस्य शकलम् ।
विपर्यासन्यासादुभयमभिसन्धाय मिलितः
सुधालेपस्यूतिः परिणमति राकाहिमकरः ॥ ४६ ॥
भ्रुवौ भुग्ने किञ्चिद्भुवनभयभङ्गव्यसनिनि
त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणे ।

यमाराध्यं भक्त्या रविशशिशुचीनामविषये
निरालोके लोको निवसति निजालोकभवने ॥ ३६ ॥
विशुद्धौ ते शुद्धस्फटिकविशदं व्योमसदृशं
शिवं सेवे देवीमपि शिवसमानव्यसनिनीम् ।
ययोः कान्त्या यान्त्या शशिकिरणसारूप्यसरणीं
विधूतान्तर्ध्वान्ता विलसति चकोरीव जगती ॥ ३७ ॥
समुन्मीलत् संवित् कमलमकरन्दैकरसिकं
भजे हंसद्वन्द्वं किमपि महतां मानसचरम् ।
यदालापादष्टादशगुणितविद्यापरिणतिः
यदादत्ते दोषाद्गुणमखिलमद्भ्यः पय इव ॥ ३८ ॥
तडित्वन्तं शक्त्या तिमिरपरिपन्थिस्फुरणया
स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषम् ।
तमश्यामं मेघं कमपि मणिपूरैकसरणिं
निषेवे वर्षन्तं हरमिहिरतप्तं त्रिभुवनम् ॥ ३९ ॥
तव स्वाधिष्ठाने हुतवहमधिष्ठाय नियतं
तमीडे संवर्त्तं जननि जननीं तां च समयाम् ।
यदालोके लोकान् दहति महति क्रोधकलिते
दयार्द्रा ते दृष्टिः शिशिरमुपचारं रचयति ॥ ४० ॥
तवाधारे मूले सह समयया लास्यपरया
भवात्मानं वन्दे नवरसमहाताण्डवनटम् ।
उभाभ्यामेताभ्यामुभयविधिमुद्दिश्य दयया
सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदम् ॥ ४१ ॥

Digitized by Google

चतुःषष्ट्या तन्त्रैः सकलमभिसन्धाय भुवनं
स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रः पशुपतिः ।
पुनस्त्वन्निर्बन्धादखिलपुरुषार्थैकघटनात्
स्वतन्त्रन्ते तन्त्रं क्षितितलमवातीतरदिदम् ॥ ३१ ॥
शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः
स्मरो हंसः शक्रस्तदनु च परामारहरयः ।
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता
भजन्ते ते वर्णास्तव जननि नामावयवताम् ॥ ३२ ॥
स्मरं योनिं लक्ष्मीं त्रितयमिदमाद्ये तव मनो
निधायैके नित्ये निरवधिमहाभोगरसिकाः ।
जपन्ति त्वां चिन्तामणिगुणनिबद्धाक्षवलयाः
शिवाग्नौ जुह्वन्तः सुरभिघृतधाराहुतिशतैः ॥ ३३ ॥
शरीरं त्वं शम्भोः शशिमिहिरवक्षोरुहयुगं
तवात्मानं मन्ये भगवति भवात्मानमनघम् ।
अतः शेषः शेषीत्ययमुभयसाधारणतया
स्थितः सम्बन्धो वां सरसपरमानन्दपदयोः ॥ ३४ ॥
मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि
त्वमापस्त्वं भूमिस्त्वयि परिणतायां नहि परम् ।
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा
चिदानन्दाकारं शिवयुवतिभावेन बिभृषे ॥ ३५ ॥
तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं
परं शम्भुं वन्दे परिमिलितपार्श्वं परचिता ।

Digitized by Google

तथाहि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमुकुटाः ॥ २५ ॥
विरिञ्चिः पञ्चत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनम् ।
वितन्द्रा माहेन्द्री विततिरपि सम्मीलितदृशां
महासंहारेऽस्मिन् विहरति सति त्वत्पतिरसौ ॥ २६ ॥
जपो जल्पः शिल्पं सकलमपि मुद्राविरचनं
गतिः प्रादक्षिण्यभ्रमणमदनाद्या हुतविधिः ।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्य्यापर्य्यायस्तव भवतु यन्मे विलसितम् ॥ २७ ॥
ददाने दीनेभ्यः श्रियमनिशमाशानुसदृशी
ममन्दं सौन्दर्य्यस्तवकमकरन्दं विकिरति ।
तवास्मिन्मन्दारस्तवकशुभगे यातु चरणे
निमज्जन्मज्जीवः करणचरणैः षट्चरणताम् ॥ २८ ॥
सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं
विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः ।
करालं यत् क्ष्वेडं कवलितवतः कालकलना
न शम्भोस्तन्मूलं जननि तव ताटङ्कमहिमा ॥ २९ ॥
किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम् ।
प्रणम्रेष्वेतेषु प्रसभमुपयातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥ ३० ॥

किरन्तीमङ्गेभ्यः किरणनिकुरम्बामृतरसं
हृदि त्वामाधत्ते हिमगिरिशिलामूर्तिमिव यः ।
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव
ज्वरप्लुष्टं दृष्ट्या सुखयति सुधासारसिरया ॥ २० ॥
तडिल्लेखातन्वीं तपनशशिवैश्वानरमयीं
निषण्णां षण्णामप्युपरि कमलानां तव कलाम् ।
महापद्माटव्यां मृदितमलमायेन मनसा
महान्तः पश्यन्तो दधति परमाह्लादलहरीम ॥ २१ ॥
भवानि त्वं दासे मयि वितर दृष्टिं सकरुणा
मिति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः ।
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं
मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम् ॥ २२ ॥
त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा
शरीरार्द्धं शम्भोरपरमपि शङ्के हृतमभूत् ।
तथाहि त्वद्रूपं सकलमरुणाभं त्रिनयनं
कुचाभ्यामानम्रं कुटिलशशिचूड़ालमुकुटम् ॥ २३ ॥
जगत् सूते धाता हरिरवति रुद्रः क्षपयति
तिरस्कुर्वन्नेतान् स्वमपि वपुरीशस्तिरयति ।
सदापूर्वः सर्वं तदिदमनुगृह्णाति च शिवः
तवाज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयोः ॥ २४ ॥
त्रयाणां देवानां त्रिगुणजनितानामपि शिवे
भवेत् पूजा पूजा तव चरणयो र्या विरचिता ।

दिवि द्विषट् त्रिंशन्मनसि च चतुःषष्टिरिति ये
मयूखास्तेषामप्युपरि तव पादाम्बुजयुगम् ॥ १४ ॥
शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां
वरत्रासत्राणस्फटिकगुटिकापुस्तककराम्।
सकृन्नत्वा न त्वां कथमपि सतां संविदधते
मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः ॥ १५ ॥
कवीन्द्राणां चेतः कमलवनमालातपरुचिं
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम्।
विरिञ्चिप्रेयस्यास्तरुणतरशृङ्गारलहरीं
गभीराभिर्वाग्भिर्विदधति सभारञ्जनमयीम् ॥ १६ ॥
सवित्रीभिर्वाचां शशिमणिशिलाभङ्गरुचिभिः
वशिन्याद्याभिस्त्वां सह जननि सञ्चिन्तयति यः।
स कर्त्ता काव्यानां भवति महतां भङ्गिशुभगैः
वचोभि र्वाग्देवीवदनकमलामोदमधुरैः ॥ १७ ॥
तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिः
दिवं सर्वामुर्वीमरुणिमणिमग्नां स्मरति यः।
भवन्त्यस्य त्रस्यद्वनहरिणशालीननयनाः
सहोर्वश्या वश्याः कति कति नगीर्वाणगणिकाः ॥१८॥
मुखं विन्दुं कृत्वा कुचयुगमधस्तस्य तदधो
हरस्यार्द्धं ध्यायेद्धरमहिषि ते मन्मथकलाम्।
स सद्यः संक्षोभं नयति वनिता इत्यतिलघु
त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगाम् ॥ १९ ॥

Digitized by Google

महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसि ॥ ९ ॥
सुधाधारासारैश्चरणयुगलान्तर्विगलितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसा ।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥ १० ॥
चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरधः
प्रभिन्नाभिः शम्भोर्नवभिरिति मूलप्रकृतिभिः ।
त्रयश्चत्वारिंशद्वसुदलकलाश्रत्रिवलयः
त्रिरेखाभिः सार्धं तव भवनकोणाः परिणताः ॥ ११ ॥
त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितुं
कवीन्द्राः कल्पान्ते कथमपि विरिञ्चिप्रभृतयः ।
यदालोकौत्सुक्यादमरललना यान्ति सहसा
तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवीम् ॥ १२ ॥
नरं वर्षीयांसं नयनविरसं नर्मसु जडं
तवापाङ्गालोके पतितमनुधावन्ति शतशः ।
गलद्वेणीबन्धाः कुचकलसविस्रस्तसिचया
हठात् तुटत्काञ्चीविगलितदुकूला युवतयः ॥ १३ ॥
क्षितौ षट्पञ्चाशद्द्विसमधिकपञ्चाशदुदके
हुताशे द्वाषष्टिश्चतुरधिकपञ्चाशदनिले ।

Digitized by Google

दिवि द्विषट् त्रिंशन्मनसि च चतुःषष्टिरिति ये
मयूखास्तेषामप्युपरि तव पादाम्बुजयुगम् ॥ १४ ॥
शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां
वरत्रासत्राणस्फटिकगुटिकापुस्तककराम्।
सकृन्नत्वा न त्वां कथमपि सतां संविदधते
मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः ॥ १५ ॥
कवीन्द्राणां चेतः कमलवनमालातपरुचिं
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम्।
विरिञ्चिप्रेयस्यास्तरुणतरशृङ्गारलहरीं
गभीराभिर्वाग्भिर्विदधति सभारञ्जनमयीम् ॥ १६ ॥
सवित्रीभिर्वाचां शशिमणिशिलाभङ्गरुचिभिः
वशिन्याद्याभिस्त्वां सह जननि सञ्चिन्तयति यः।
स कर्त्ता काव्यानां भवति महतां भङ्गिशुभगैः
वचोभि र्वाग्देवीवदनकमलामोदमधुरैः ॥ १७ ॥
तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिः
दिवं सर्वामुर्वीमरुणिमणिमग्नां स्मरति यः।
भवन्त्यस्य त्रस्यद्वनहरिणशालीननयनाः
सहोर्वश्या वश्याः कति कति नगीर्वाणगणिकाः ॥१८॥
मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य तदधो
हरार्द्धं ध्यायेद्यरमहिषि ते मन्मथकलाम्।
स सद्यः संक्षोभं नयति वनिता इत्यतिलघु
त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगाम् ॥ १९ ॥

Digitized by Google

नमोऽस्तु वृन्दावनपूर्णताभ्यां
नमोऽस्तु वृन्दावनगोचराभ्याम् ॥ १२४ ॥
वृन्दारण्योत्तमं नास्ति नास्ति मत्तोऽधमः क्वचित् ।
राधानाथः प्रभावेण यदि स्यान्मिलनं तयोः ॥ १२५ ॥
श्रीमद्वृन्दावने सर्वाः सकलामैकमङ्गलम् ।
सर्वाश्चर्यानन्तशक्ति मुखे विजयतां मम ॥ १२६ ॥

इति श्रीवृन्दावनशतकं समाप्तम् ॥

आनन्दलहरी ।

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
नचेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥ १ ॥
तनीयांसं पांशुं तव चरणपङ्केरुहभवं
विरिञ्चिः सञ्चिन्वन् विरचयति लोकानविकलम् ।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसा
हरः संक्षुभ्यैनं भजति भसितोद्धूननविधिम् ॥ २ ॥
अविद्यानामन्तस्तिमिरमिहिरोद्दीपनकरी
जडानां चैतन्यं स्तवकमकरन्दश्रुतिशिरा ।

Digitized by Google

ममापि स्यादेतादृशमपि दिनं किन्तु परमं
यदा वृन्दाटव्याः कथमपि कृतस्पर्शनमपि ।
अहो ! देहं दूरादपि समवलोक्यापि जनुषां
मुहुर्धन्यं मन्ये धरणिपतितः स्यां कृतनतिः ॥ ११९ ॥
यदपि च मम नास्ति श्रीलवृन्दावनीये
महिमनि न समोऽर्हं हन्त विश्वासगन्धः ।
यदपि मम न तस्मिन्नास्ति वासैष नापि
प्रसरतु मम तादृश्येव वाणी तथापि । १२० ॥
अचैतन्यप्रायं जगदिदमहो सर्वविदपि
प्रथीयः श्रीवृन्दावनमहिमबीजाज्जनिमतिः ।
अहो ! भ्राम्यदृष्ट्वा विविधसदसद्वर्त्मसु तथा
न पूर्णं स्वाचित्तं परमिह निषेवे पदरजः ॥ १२१ ॥
हा वृन्दावन ! हा महारसमय ! प्रेमैकसम्पन्निधे !
हा राधापति ! नागर ! स्मरकलासाक्षिन् ! मदेकप्रिय !
हा रासेश्वरविभ्रमूर्च्छनलतावल्लीस्वगाद्यद्भुत
श्रीमद्राप्रकृतेः परादपि पर त्वं मे गतिस्त्वं गतिः ॥१२२॥

नमोऽस्तु वृन्दावनसुन्दराभ्यां
नमोऽस्तु वृन्दावनविभ्रमाभ्याम् ।
नमोऽस्तु वृन्दावनजीवनाभ्यां
नमोऽस्तु वृन्दावननागराभ्याम् ॥ १२३ ॥
नमोऽस्तु वृन्दावनसत्कृपाभ्यां
नमोऽस्तु वृन्दावनसद्रसाभ्याम् ।

Digitized by Google

अहो ! वृन्दारण्ये ऽद्भुतमहिमसीमन्यपि सुदु-
र्घटाशा काप्येका समुदयति हा किं न भविता ॥ ११३ ॥

कदा वा कालिन्दीतटनिकटवृन्दावनलता
निकुञ्जान्तः सुप्तं तदतिसरसं प्रेष्ठमिथुनम् ।
मिथो गाढाश्लिष्टं मृदु मृदु मया लालितपदं
मुदा वीक्षे स्वप्नेऽप्यहह सुखनिद्रागतमहम् ॥ ११४ ॥

महाश्चर्यानन्तस्वमहिमबलादेव सकला
धमस्याप्याशानां व्यतिकरमसम्भाव्यमपि मे ।
कदा वृन्दारण्यं स्ववसतिकथामात्रनिवहत्
कृपापूरं सम्पूरयतु परतोऽप्यर्वुदजनैः ॥ ११५ ॥

स्वकर्मस्रोतोभिः सततमभितश्चालितममुं
प्रभो ! जीवं यत्र क्वचिदपि न यात्यन्तविवशम् ।
परन्त्वेतावन्मे भवतु भवदुःखार्दितहृदो-
ऽप्यविश्रान्तं वृन्दावनपदपरे वास्तु रसना ॥ ११६ ॥

न सत्याख्ये लोके स्पृहयति मनो ब्रह्मपदवीं
न वैकुण्ठे विष्णोरपि मृगयते पार्षदतनुम् ।
अपि श्रीवृन्दावनसरसभावोत्सवरतां
निवासे धन्यानां सुबहुकृमिजन्मापि मनुते ॥ ११७ ॥

श्रीमद्वृन्दाविपिनकुसुमामोदवाही समीरो
यस्मिन् देशे सरति तदवच्छिन्नकृष्णामृतो वा ।
येषां वृन्दावनमनुसकृज्जीवया सन्नतं वा
तत्रैवास्तां मम खलु जनिर्हन्त तेषां गृहेऽपि ॥ ११८ ॥

कदा वा तूष्णीकः शिथिलितसमस्तव्यवहृतिः
त्यजन् दीर्घश्वासं कथमपि गृहीतैककवलः ।
सदा जाग्रत्प्रायः क्षणमुदिततन्द्रोऽतिमधुरं
तदालोके वृन्दावनभुवि निजप्राणमिथुनम् ॥ १०८ ॥
अकस्मादेकस्मान्नवललितकुञ्जादुत वहिः
भवत् स्मित्वा नव्यं तरुणमिथुनं लौकिकमिव ।
गतौ दूरं दृष्ट्वा पुनरथ निवृत्य स्वदयितौ
वितर्क्य स्यां वृन्दावनभुवि महाप्रेमविकलः ॥ १०९ ॥
कदा पूर्णज्योत्स्नाधवलरजनौ वासवलये
चरन्नेको वृन्दावनप्रतिविलासस्मृतिपरः ।
अकस्मादानन्दाम्बुधिलहरिकोलाहलमिव
ध्वनिं दिव्यं वेणोर्वलयरसनादेश्च शृणुयाम् ॥ ११० ॥
कदा वा कस्यापि स्फुटनवकदम्बस्य विटपे
स्फुरद्गोपीभर्तुः किमपि कवये स्मेरवदनम् ।
कदा श्रीराधायाः कुसुमचयलीलाञ्चललितं
करं वृक्षे वृन्दावनभुवि लतासु क्वचिदपि ॥ १११ ॥
इदं मे किं भावि स्रुतकनकगौरच्छवि हरिं
मणिश्यामं धामद्वयमिह मिथो मेऽर्पितभुजम् ।
निरीक्षे तत्स्मेरं बहुविध महाप्रेमविकृतिं
स्थितं पश्चाच्छायाद्वयमथ पुरो मूर्च्छयति माम् ॥ ११२ ॥
अपि प्रेमोत्कण्ठात्क्षितिषु विलुठत् स्वं वपुरिदं
करेण स्पृष्ट्वा मामनुचरयते राधा प्रिययुता ।

Digitized by Google

अत्यन्तार्त्या विकलविकलोदिव्यमूर्त्तेर्ययापि
श्रीखर्याप्राकरप्रगहप्रावाक्सुधासाषितः स्याम् ॥१०२॥
एतत् कारुण्यपुञ्जं कतिदिनकलितप्राश्रयश्रीहि राधा
कृष्णाङ्घ्रिद्वन्द्वगूढप्रणयमयरसास्वादिनी साधुहृष्टैः ।
श्रीमद्वृन्दावनं ये निजमहितपराकारिरूपेण सान्द्रा
नन्दोत्सवद्दिव्याप्रोच्चलितमधुरिमैकार्णवेनाविरासाम् । १०३ ॥
कदा सुदृढभावनोदितनिजेष्टरूपो
मनागपि मृतशरीरकोनहिरसेप्रविष्टोऽद्भुते ।
त्वयं किमु मुञ्चस्तंकं किमथवा नमि वाञ्छितो
बहिर्दृगपि मुग्धवद्वा बहुविहरामि वृन्दावने ॥ १०४ ॥
नान्यद्वदामि न शृणोमि न चिन्तयामि
नान्यद्व्रजामि न भजामि न चाश्रयामि ।
पश्यामि जाग्रति तथा स्वप्नेऽपिनान्यत्
श्रीराधिकारतिविनोदवनं विनाहम् ॥ १०५ ॥
किं मां खेदयसे विमुञ्च वसनं तल्पोत्तमेऽस्मिन् सुखे
नागत्य स्वपिहि त्यज त्यजभुज श्लिष्यामि कान्तेसक्त् ।
आः किं निर्दयमुञ्च मुञ्च नकिमप्यापीडये राधिका
कृष्णा लापमिमं कदानु शृणुयां वृन्दाटवीकीरतः ॥१०६॥
कदा वाखच्छन्दं दिनरजनिवृन्दावनवने
चरन्नेकान्तः स्वस्तुत नवनिजकुञ्जानि प्रविशन् ।
अकस्मादेकासौकिरमधुरकैशीरसुधया
इतो न त्वं याया इति मृदुगिरा वारयति माम् ॥ १०७॥

Digitized by Google

शृण्वन्ति शुकसारिकाः सुचरितानि राधापतेः
स्तदेकपरितुष्टये तरुलतासदोत्फुल्लिताः ।
सरांसि कमलोत्पलादिभिरधुश्च यत्र श्रियं
तदुच्चवजते मनः स्मरतदेववृन्दावनम् ॥ ९७ ॥
नानाकेलिनिकुञ्जमण्डपयुते नानासरोवापिका
रम्ये गुल्मलताद्रुमैश्च परितो नानाविधैः शोभिते ।
नानाजातिसमुल्लसत्खगमृगैः नानाविलासस्थली
प्रद्योतद्युति रोचिषि प्रिय कदा ध्येयोऽसि वृन्दावने ॥ ९८ ॥
यत्रैवातिरसप्रदं विहरते मत्प्रेष्ठवस्तुद्वयं
भक्तिः कापि महारसोत्सवमयी यत्रैव निस्यन्दते ।
तत्रैव प्रविशन्ति नैव निगमश्रेणीगिरां भङ्गय
स्तस्मिन्नेव ममास्तु धीः प्रणयिनी वृन्दावने पावने ॥ ९९ ॥
वाण्या गद्गदया कदा मधुपतेः नामानि संकीर्तये
धाराभिर्नयनाम्भसां तरुतलक्षौणीं कदा पङ्कये ।
दृष्ट्वा भावनया पुरोमिलदिव स्वान्तस्वभोग्यं महो
द्वन्द्वं हेमहरिन्मणिच्छवि कदा नं स्ये मुहुर्विह्वलः ॥१००॥
वृन्दारण्यनिकुञ्जसीमनि वसन् प्रेमान्तरश्चिन्तयन्
स्वप्राणैकधनं किशोरमिथुनं द्रक्ष्याम्यकस्मात् कदा ।
श्यामाकाञ्चनचन्द्रिका रसमयी गौरीश्च काश्चित् छटाः ।
पश्यामि शृण्वंश्च शीतमधुरा काश्चिन्मिथोवाक्सुधा ॥१०१॥
वृन्दारण्ये किमपि जनतादुःप्रवेशं प्रदेशं
गत्वा प्रत्यैर्निजदयितयोर्नामजल्पन्नुदस्रुः ।

चित्रैः कीरमयूरकोकिलमुखैर्नानाविहङ्गैर्लसत्
पद्माद्यैश्च सरोभिरङ्गुतमहं ध्यायामि वृन्दावनम् ॥ ८० ॥

ताम्बूलपानकमनोहरमोदकादि-
रम्ये लसन्मृदुलपल्लवशायतल्पे।
दूरे स्थितालिभिरहोसुखदावपेक्ष्य
वृन्दावनं स्मर निकुञ्जगृहैः मनोज्ञम्॥ ८१ ॥

क्वचिद्रतिविमर्दितप्रसवतल्पकैः क्वचिद्
क्वचित्तोपकरणाद्रिभृतप्रियमृदुप्रसूनास्तरैः।
क्वचित् प्रमदराधिकामधुपतिप्रवृत्तोत्सवैः
सदानवनिकुञ्जकैः स्मर सुमञ्जु वृन्दावनम् ॥ ८२ ॥

राधाकृष्णरहःसुहृद्भिरितिधरस्योपत्यकासु स्फुरन्
नानाकेलिनिकुञ्जवीथिषु नवोन्मीलत्कदम्बादिषु।
भ्रामं भ्राममहर्निशं ननु परं श्रीवासकेलिस्थली
रम्यास्वेव कदा प्रकाशितरहः प्रेमा भवेयं कृती॥ ८३ ॥

अलं त्वयिसुदुःखदैः युवतिपुत्रवित्तादिकैः
विमुक्तिकथयाप्यलं मम नमो विकुण्ठप्रिये।
परं त्विह भवेभतु भवे वासमानव्यथो
भजे नन्दतनयो वने लसति यत्र तस्मिन् रतिः॥ ८४ ॥

नमामि वृन्दावनमेवमूर्ध्ना वदामि वृन्दावनमेव वाचा।
स्मरामि वृन्दावनमेव बुद्ध्या वृन्दावनादन्यदहं न जाने ॥८५॥

राधापतिरतिकन्दं वृन्दावनमेव जीवनं येषाम्।
तच्चरणाम्बुजरेणो राशामेवाहमाशासे॥ ८६ ॥

सकलविभवसारं सर्वधर्मैकसारं
सकलभजनसारं सर्वसिद्धैकसारम् ।
सकलमहिमसारं वस्तु वृन्दावनान्तः
सकलमधुरिमाम्भोराशिसारं विहारम् ॥ ८५ ॥

दैवी वाक् प्रतिषेधिनी भवतु मे स्याद्वा गुरूणां गिरां
श्रेणी शास्त्रविदामिहास्तु बहुधा यः कोऽपि कोलाहलः ।
त्यक्त्वा साधनसाध्यजातमखिलं प्रलगेतु मे राधिका
क्रीड़ाकाननवाससम्पदि मनाक् व्यावर्तते नो मनः ॥८६ ॥

प्रगायन्नटन्नुच्चलालुठन्
वप्रे धावन् रुदन् सम्पत् मूर्च्छितो वा ।
कदा वा महाप्रेममाध्वीमदान्धः
विचरिष्यामि वृन्दावने लोकवाह्यः ॥ ८७ ॥

न लोकं न धर्मं न गेहं न देहं
न निन्दा स्तुतिर्वापि सौख्यं न दुःखम् ।
विजानन् किमप्युन्मदप्रेममाध्वी-
ग्रहग्रस्तवत् कर्हि वृन्दावनेस्याम् ॥ ८८ ॥

हरे कृष्ण कृष्णेति कृष्णेति मुख्यान्
महाश्चर्य्यनामावलीसिद्धमन्त्रान् ।
कृपामूर्त्तिचैतन्यदेवेन गीतान्
कदाभ्यस्य वृन्दावने स्यां कृतार्थः ॥ ८९ ॥

हैमस्फाटिकपद्मरागरचितैर्माहेन्द्रनीलैर्द्रुमैः
नानारत्नमयस्थलीभिरलिभिर्झङ्कारितोद्यल्लिभिः ।

तथापि प्राचीनैः परमसुकृतैरत्र मिलितं
न नेष्यामोऽन्यत्र क्वचिदपि कथञ्चिद्वपुरिदम्। ७९ ॥
जरत्कन्थामेकां दधदपि च कौपीनममिशं
प्रगायन् श्रीराधामधुपतिरहःकेलिलहरीम्।
फलं वा मूलं वा किमपि दिवसान्ते कवलयन्
कदा नेष्ये वृन्दावनभुवि दशां जीवनमयीम्। ८० ॥
प्रकृत्युपरि केवले सुखनिधौ परब्रह्मणि
श्रुतिप्रथितवैभवं परपदं विकुण्ठाभिधम्।
तदन्तरखिलोज्ज्वलं जयति माथुरं मण्डलं
महारसमयं सखे! कलय तत्र वृन्दावनम्। ८१ ॥
कदा वृन्दारण्यं श्रवणरसनस्पर्शनगिरी-
दृग्घ्राणाद्यैः मे स्फुरति वनमिच्छन् श्ववदिव।
कदा वा तल्लोकोत्तररसमदान्धो मधुपते
गुणानुच्चैरुच्चैः सरसमुपगास्यामि परितः। ८२ ॥

स्वानन्दसच्चिद्घनरूपतामतिः
यावन्न वृन्दावनवासिजन्तुषु।
तावत् प्रविष्टोऽपि न तत्र विन्दते
ततोऽपराधात् पदवीं परात्पराम्। ८३ ॥
यदैव सच्चिद्रसरूपबुद्धिः
वृन्दावनस्थस्थिरजङ्गमेषु।
स्यान्निर्व्यलीकं पुरुषस्तदैव
चकास्ति राधाप्रियसेविरूपः। ८४ ॥

Digitized by Google

श्रीराधायाः कनकरुचिरज्योतिरङ्गच्छटौघैः
शुद्धप्रेमोज्ज्वलरसमयैः सेव्यमानं समन्तात्।
गोविन्दस्याम्बुदरुचितनोर्ज्योतिरम्भोधिपूरैः
सान्द्रानन्दात्मभिरपि चितं नौमि वृन्दावनं तत्॥ ७४॥
निन्दा वा स्तुतिरेव वा बहुविपत् सम्पत्तिरेवास्तु वा
पाण्डित्यं बत मूर्खतापि यदि वा रागो विरागोऽथवा।
यत् किंचिद्भवतु श्रुतेरपि मनाग्लक्ष्यं न यद्वैभवं
तद्वृन्दाविपिनं न जीवनमहं स्वप्नेऽपि हातुं क्षमः॥ ७५॥
चाण्डालश्वखरादिवा यदि जनाः कुर्वन्ति सर्वे तिर-
स्कारं दुर्विषहञ्च तेन नहि मे खेदोऽस्त्यणीयानपि।
देवा दैत्य इमे च भूतनिवहाः प्राणाश्च दद्युर्महा-
स्नेहात्तुष्टिमतो न मे गुरुतृषा वृन्दावनीये वसे॥ ७६॥
भ्रातः! समस्तान्यपि साधनानि
विहाय वृन्दावनमाश्रयस्व
यथा तथा प्राक्तनवासनावशात्
शरीरवाणी हृदयं विचेष्टताम्॥ ७७॥
तादृक् कालो भवतु भगवान् येन कस्याश्चिदेनी
दृश्या शप्तोऽप्यहह न बहिर्यामि वृन्दाटवीतः।
तादृक् दम्भोऽप्युदयतु तथाहङ्कृतिश्चापि मे स्याद्
येनाप्यस्मिन्विस्मयवने रोचये नित्यवासम्॥ ७८॥
वरं वृन्दारण्ये हरि हरि करेखर्परभृतो
भ्रमामो भैक्षार्थं स्वपचगृहवीथीषु दिनशः।

Digitized by Google

विभ्राजत्तिलका कलिन्दतनयानीरोर्मिनीलाम्बरा
उद्यत्काञ्चनचम्पकच्छविरहो नानारसोल्लासिनी ।
कृष्णप्रेमपयोधरेव रसदैनात्यन्तसम्मोहिनी
गोपस्त्रीजनवल्लभा विजयति राधेव वृन्दाटवी ॥ ६७ ॥
यस्मिन् कोटिसुरद्रुमैः सुरयुता भूमीरुहः पोषका
भक्तिः सद्वनिता महारसमयी यत्र स्वयं सिञ्चति ।
यत्र श्रीहरिदासवर्यवनिताः खट्वायमानाः शिलाः
तद् वृन्दावनमद्भुतं सुखमयं को नाम नालम्बते ॥ ६८ ॥

विन्दन्ति यावत् प्रणयं न मन्दा वृन्दावने प्रेमविलासकन्दे ।
तावन्न गोविन्दपदारविन्दस्वच्छन्दसद्भक्तिरहस्यलाभः ॥ ६९ ॥

स्मारं स्मारं नवजलधरश्यामलं धामविद्युत्
कोटिज्योतिस्तनुलतिकया राधयाश्लिष्यमाणः ।
उच्चैरुच्चैः सरससरसी प्राञ्जवी जृम्भमाण-
प्रेमाविष्टो भ्रमति सुकृती कोऽपि वृन्दावनान्तः ॥ ७० ॥

राधापदाङ्कभूषितवृन्दारण्यस्थलीषु निर्भरप्रेम्णा हरि हरि ।
कदा लुठामि प्रतिपद गलदश्रुवल्लसत्पुलकः ॥ ७१ ॥
पूर्णोज्ज्वलत्प्रेमरसैकमूर्तिः यत्रैव राधाविजयी हरीति ।
तदेव वृन्दावनमाश्रितानां भवेत् परं भक्तिरहस्यलाभः ॥७२॥

सर्वं त्यक्त्वा सरसविसदप्रेमपीयूषसान्द्रे
वृन्दारण्येऽद्भुततरलतागुल्मकाद्यैः मनोज्ञे ।
राधाकृष्णोज्ज्वलगुणगणोद्गानमत्तालिकारैः
नीरेणापि स्थितिमिह तनोरध्यवस्या वसन्तु ॥ ७३ ॥

Digitized by Google

अन्यत् किं व्रजवासिनामपि न यत् दृश्यं कदालोकये
तद्वृन्दावनरूपमद्भुतमहं राधापदैकाश्रयः ॥ ६० ॥
विस्मृत्य द्वैतमात्रं प्रणयमयमहो ज्योतिरेकार्णवान्तः
श्रीवृन्दारण्यमत्युज्ज्वलद्वतुलरसाम्भोधितस्मिन् सखे त्वम् ।
वेषं किञ्चिद्गृहीत्वोज्ज्वलमखिलकलाकोमलाभीरबाला
प्राणाः श्रीराधिकायाः किमपि रसनिधेश्चाटुकारं भजेथाः ॥ ६१

दुर्वासनासुदृढरज्जुशतैर्निबद्धम्
आकृष्य सर्वत इदं स्वबलेन कृष्ण ! ।
वृन्दावने विहरतः सह राधया ते
पादारविन्दसविधं नय मानसं मे ॥ ६२ ॥

वशीकर्तुं शक्यो नहि नहि मनागिन्द्रियगणो
गुणोभूर्नैकोऽपि प्रविशति सदा दोषनिचयः ।
क्व याम किं कुर्मो हरि हरि मयीशोऽप्यकरुणः
स्ववासं श्रीवृन्दावन वितर मानन्यगतिकम् ॥ ६३ ॥
जातिप्राणधनानि यान्तु सुयशोराशिः परिक्षीयतां
सद्धर्मो विलयं प्रयान्तु सततं सर्वैश्च निर्भर्त्स्यताम् ।
आधिव्याधिशतेन जीर्यतु वपुर्लुप्तप्रतीकारतः
श्रीवृन्दाविपिनं तथापि न मनाक् त्यक्तुं ममास्तां मतिः॥ ६४॥
रक्षति संसारभयाद्दोषाकरम् अप्यशेषदेहभृद्वृन्दम् ।
वृन्दावनमिति तेन प्रथितं तं नौमि काननं किमपि ॥ ६५॥
वृन्दारण्यदन्यत् प्रकृतेरन्तर्बहिर्वापि ।
नैवास्ति मधुरवस्त्वित्यवकलितं यैः नमस्तेभ्यः ॥ ६६ ॥

Digitized by Google

स्निग्धश्यामाभिरामच्छविसद्रुमघटश्चोत्तमहेमावदातं
ज्योतिर्वृन्दं किशोराकृतिमधुरमहो घूर्णमानं रसेन ।
नित्यं यत्रैव खेलायति मदनकलाकौतुकेनात्युदारं
सारं सारादशेषादवतु दशदिशःश्रीलवृन्दावनं नः ॥ ५५ ॥

अपारकरुणाकरं व्रजविलासिनीनागरं
मुहुः सुबहुकाकुभिर्नतिभिरेतदभ्यर्थये ।
अनर्गलबृहन्महाप्रणयसीधुसिन्धौ मम
क्वचिज्जनुषि जायतां रतिरिहैव वृन्दावने ॥ ५६ ॥

नानामार्गरतोऽपि दुर्मतिरपि त्यक्तस्वधर्मोऽपि हि
स्वच्छन्दाचरितोऽपि दूरभगवत्सम्बन्धगन्धोऽपि च ।
कुर्वन् यत्र च कामलोभवशतो वासं समस्तोत्तमं
यायादेव रसात्मकं परमहं तन्नौमि वृन्दावनम् ॥ ५७ ॥

इह सकलसुखेभ्यः सूत्तमं भक्तिसौख्यं
तदपि चरमकाष्ठां सम्यगाप्नोति यत्र ।
तदिह परमपुंसो धाम वृन्दावनाख्यं
निखिलनिगमगूढं मूढबुद्धिर्न वेद ॥ ५८ ॥

भजन्तमपि देवतान्तरमथाक्षरब्रह्मणि स्थितं
पशुवदेव वा विषयभोगमात्रे रतम् ।
अचिन्त्यनिजशक्तितः स्वगतराधिकामाधव-
प्रगाढरसदुर्मदं कुरुत एव वृन्दावनम् ॥ ५९ ॥

यत्कोट्यंशमपि स्पृशेन्न निगमो यन्नो विदुर्योगिनः
श्रीशब्रह्मशुकार्जुनोद्धवमुखाः पश्यन्ति यन्न क्वचित् ।

त्यजति य इह भक्तो राधिकाप्राणनाथे
न खलु भवति वन्ध्या तस्य वृन्दावनाशा ॥ ४८ ॥
कुरु सकलमधर्मं मुञ्च सर्वं स्वधर्मं
त्यज गुरुमपि वृन्दारण्यवासानुरोधात् ।
स तव परमधर्मः सा च भक्तिर्गुरूणां
स किल कलुषराशिर्यदि वासान्तरायः ॥ ४९ ॥

निर्मर्य्यादाश्चर्यकारुण्यपूर्णौ
राधाकृष्णौ पश्यतश्चेत् कदाचित् ।
यः कोऽप्यस्मिन् यादृशस्तादृशो वा
देहस्यान्ते प्राप्नुयादेव सिद्धिम् ॥ ५० ॥

राधामधुपतिपादाम्बुजभक्तादूरमुक्तस्य ।
अजितेन्द्रियस्य कृपया मम वृन्दारण्यमाश्रयो भवतु ॥५१॥

राधामाधवपादपङ्कजरजःप्रेमोन्मदैतत्प्रिय-
क्रीडाकाननवासिषु स्थिरचरप्राणिष्वपि द्रोहिषु ।
प्रद्वेषं परमापराधमहह ! त्यक्तेतरैरप्यघैः
युक्तोऽप्यामरणान्तलब्धवसतिर्वृन्दावने स्यात् कृती ॥ ५२ ॥

न लोकवेदोद्धतमार्गभेदैः आविश्य संक्लिश्यत रे विमूढाः ।
हठेन सर्वं परिहृत्य वृन्दावनान्तरे पर्णकुटीं कुरुध्वम् ॥ ५३ ॥

यत्तद्वल्गन्तु शास्त्राण्यहह ! जनतया म्रक्षितां यत्तदेव
स्वं स्वं यत्तन्मतं स्थापयतु सुबहुमतिस्तर्कमार्गे प्रवीणः
अस्माकं तूज्ज्वलैकोन्मदविमलरसप्रेमपीयूषमूर्त्तेः
श्रीराधाया विहाराटविमिहमविनान्यत्र निर्याति चेतः ॥५४॥

Digitized by Google

मायान्धीकृतदृष्टिभिस्तु कलितं नानाविरूपात्मना
तद्वृन्दाविपिनं कदाधिवसतः स्याम्मे तनुर्चिन्मयी ॥ ४२ ॥
यत्र प्रविष्टः सकलोऽपि जन्तुः सर्वैः पदार्थैरप्यवुधैरदृश्यः ।
स्वानन्दसच्चीतघनत्वमेति तदेव वृन्दावनमाश्रयन्तु ॥ ४३ ॥

वृन्दावनस्थेष्वपि येऽत्र दोषान्
आरोपयन्ति स्थिरजङ्गमेषु ।
आनन्दमूर्तिष्वपराधिनस्ते
श्रीराधिकामाधवयोः कथं स्युः ॥ ४४ ॥

ये वृन्दावनवासिनिन्दनरता ये वा न वृन्दावनं
स्वायन्ते तुलयन्ति ये च कुधियः केनापि वृन्दावनम् ।
ये वृन्दावनमत्र नित्यसुखचिद्रूपं सहन्ते न वा
तैः पापिष्ठनराधमैः न भवतु स्वप्नेऽपि मे सङ्गतिः ॥ ४५ ॥
असह्य बहुदुर्वचो यदिह वदन्ति साचात्मम
स्त्रियं बलादपहरन्ति चेत् प्रियसुतादिकं घ्नन्ति वा
धनान्यपि च जीवनं यदि हरन्ति वृन्दावनस्थिता-
स्तदपि ते प्रिया मम भवन्ति वन्द्याः परम् ॥ ४६ ॥
परस्वस्तेयैकव्यसनमपि नित्यं परवधू-
प्रसक्तं विश्वेषामहह बहुधा हिंसकमपि ।
दुराचारं लोभादपहृतमपि भ्रातरहण -
दिवान्धस्त्वं वृन्दावनगतजनं नावगणये: ॥ ४७ ॥
परधनपरदारद्वेषमात्सर्यलोभा-
नृतपरुषपराभिद्रोहमिथ्याभिलापान् ।

Digitized by Google

अलमलमिह योषिद्दुर्भीसङ्गरङ्गैः
अलमलमिह वित्तापत्यविद्यायशोभिः।
अलमलमिह नानासाधनायासदुःखैः
भवत भवत वृन्दारण्यमाश्रित्य धन्याः॥ ३७॥

वैकुण्ठं कोटिकोटिप्रगुणितमपि नो यत्र जालेशमात्रां
प्रोन्मीलत्सौभगाब्धेर्लवमपि लभते शुद्धभावोज्ज्वलायाः।
कुर्वीरन् भक्तिकोटीर्भगवति न तथाप्यद्भुतप्रेममूर्तेः
श्रीराधाया अभक्तैः किमपि न कलितां नौमि वृन्दाटवीं ताम्॥ ३८॥

इदमपि भविता किं यत्र कुत्रापि वृन्दा
पदमपि मम जातं श्रीनवीथीमकस्मात्।
मधुरमधुरराधामाधवानङ्गखेला-
वनमुपनयदन्तर्दास्यति प्रेममूर्च्छाम्॥ ३९॥

कदा नु वृन्दावनवीथिकास्वहं
परिभ्रमन् श्यामलगौरमद्भुतम्।
किशोरमूर्तिद्वयमेकजीवनं
पुरःस्फुरद्वीक्ष्य पतामि मूर्च्छितः॥ ४०॥

किमेतादृग्भाग्यं मम कलुषमूर्तेरपि भवेन्
निवासो देहान्तावधि यदिह वृन्दावनभुवि।
तयोः श्रीदम्पत्योः नवनवविलासैर्विहरतोः
पदज्योतिःपूरैरपि तु मम सङ्गोऽपि भविता॥ ४१॥

भूतं स्थावरजङ्गमात्मकमहो यत्र प्रविष्टं किम-
प्यानन्दैकघनाकृतिस्वमहसा नित्योत्सवं भासते।

खगवृन्दं पशुवृन्दं द्रुमवल्लीवृन्दमुन्मदप्रेम्णा।
श्रीवयद्दमृतरसेन ख्यातं वृन्दावनं नमत ॥ २८ ॥
ऊषरमपि हरिभक्तैः नाना दुर्मार्गनिष्ठमप्यधमम्।
वृन्दाविपिनमचिन्त्यप्रभावमुन्मादये प्रेम्णा ॥ २९ ॥
भक्त्यैकयान्यत्र कृतार्थमानिनो धीरास्तदेतन्न वयं विदामः।
श्रीराधिकामाधववल्लभं नः परन्तु वृन्दावनमेव संश्रयः ॥३०॥
दोषाकरोऽहं गुणलेशहीनः सर्वाधमो दुर्लभवस्तुकांक्षी।
वृन्दाटवीमुज्ज्वलभक्तिसारवीजं कदा प्राप्य भवामि पूर्णः ॥३१॥
शुद्धोज्ज्वलप्रेमरसामृताब्धेः अनन्तपारस्य किमप्युदारम्।
राधाभिधाय प्रणकास्ति सारं तदेव वृन्दाविपिनं गतिर्मे ॥३२॥
सर्वसाधनहीनोऽपि वृन्दारण्यैकसंश्रयः।
यः कोऽपि प्राप्नुयादेव राधाप्रियरसोत्सवम् ॥ ३३॥
त्यजन्तु स्वजनाः कामं देहहन्तीव मामृवन्।
न वृन्दावनसीमातः पदं मे चलतु क्वचित् ॥ ३४ ॥
सा मे न माता स च मे पिता न
स मे न बन्धुः स च मे सखा न।
स मे न मित्रं स च मे गुरुर्न
यो मे न वृन्दावनवासमादिशेत् ॥ ३५ ॥
तच्छास्त्रं मम कर्णमूलमपि न स्वप्नेऽपि यायाद्धहो
श्रीवृन्दाविपिनस्य यत्र महिमा नात्यद्भुतः श्रूयते।
ते मे दृष्टिपथं न यान्तु नितरां सम्भाष्यतामाप्नुयुः
ये वृन्दावनवैभवे श्रुतिगते नोल्लासिनो नोऽखिलाः ॥३६॥

Digitized by Google

साक्षादिवास्ते पुरुषोत्तमाङ्घ्रि सेवारसादप्यधिको रसौघः ।
स्पन्देत वृन्दाविपिनेऽप्यदृष्टो राधाप्रियो यो भुवनस्य साक्षी ॥२१॥

जागर्ति दुन्दुभिरवः परमोऽत्र राधा
वृन्दावन वनमतिप्रकटं पुराणे ।
तस्याविधेयमसमेद्धमहानुराग
मूर्तेस्तदङ्गनमिहेत्य हरिं क्व पश्ये ॥ २२ ॥

मिलन्तु चिन्तामणिकोटिकोटयः
स्वयं वहिर्दृष्टिमुपैतु वा हरिः ।
तथापि वृन्दावनधूलिधूसरं
न देहमन्यत्र कदापि यातु मे ॥ २३ ॥

कृपयतु मयि वृन्दारण्यराजीमनाग
प्यतिवहनकृपोरुस्नेहभावादुदिष्णुः
फलतु तदनुकम्पाकल्पवल्लीफलं त्वत्
प्रभवतु वसतिर्मे तत्प्रियारामसीम्नि ॥२४॥

तेनाकारि समस्तएव भगवद्धर्मोऽपि तेनाद्भुतः
सर्वस्मात् पुरुषार्थतोऽपि परमः कश्चित् करस्थीकृतः ।
तेनाधायि समस्तमूर्द्धनि पदं ब्रह्मादयस्तं नम-
न्त्यादेहान्तमधारि येन वसतौ वृन्दावने निश्चयः ॥२५॥

पुलिने पुलिने कलिन्दजाया विचरंश्चापि तले तले तरूणाम् ।
स्रवणीभूतसुसौख्यकन्दवृन्दाविपिने हन्त कदा दिनानि नेष्ये ॥२६॥

गौरश्यामलमिथुनं खेलति कन्दर्प लीलया यत्र ।
राधामाधवनाम्ना प्रथितं तन्नौमि काननं किमपि ॥२७॥

Digitized by Google

नाहं वेद्मि कथं नु माधवपदाम्भोजद्वयी ध्यायते
का वा श्रीशुकनारदाद्यकलिते मार्गेऽस्तु मे योग्यता ।
तस्माद्भद्रमभद्रमेव यदि नामास्तां ममैकं परं
राधाकेलिनिकुञ्जमञ्जुलतरं वृन्दावनं जीवनम् ॥ १५ ॥
यत्सीमानमपि स्पृशन्न निगमो दूरात् परं लक्षते
किञ्चिद्गूढतया यदेव परमानन्दोत्सवैकावधिः ।
यन्माधुर्य्यकलोऽप्यवेदि न शिवस्वायम्भुवाद्यैरहं
तद्वृन्दावननामधाम विशदं विन्दामि राधापतेः ॥ १६ ॥
कदा नु वृन्दावनकुञ्जमण्डले भ्रमंभ्रमं हेमहरिन्मणिप्रभम्
संस्मृत्य संस्मृत्य तदङ्गु तत्प्रियं द्वयं द्वयं विस्मृतिमेतु मेऽखिलम् ॥१७॥
छिद्येत खण्डश इदं यदि मे शरीरम्
घोरा विपत्तितचयो यदि वा पतन्ति ।
हा हन्त हन्त न तथापि ममेह भूयात्
वृन्दावनादितरतीर्थपदे यियासा ॥ १८ ॥
स्वयं पतितपत्रकणामृतवत् क्षुधाभक्षयन्
सदा मिहिरनन्दिनीशुचिपयोञ्जलीभिः पिबन् ।
कदा मधुरराधिकारमणरासकेलिस्थलिं
विलोक्य रसशेवधिमधिवसामि वृन्दावनम् ॥ १९ ॥
भूमिर्यत्र सुकोमला वहुविधप्रद्योतिरत्नच्छटा
नानाचित्रमनोहरं खगमृगाद्याश्चर्यरागान्वितम् ।
वल्लीभूरुहजातयोऽद्भुततमा यत्र प्रधानादिभिः
तन्मे नन्दकिशोरकेलिभवनं वृन्दावनं जीवनम् ॥२०॥

Digitized by Google

महोज्ज्वलरसोन्मदप्रणयसिन्धुनिःस्यन्दिनी
महामधुरराधिकारमणखेलनानन्दिनी
रसेन समधिष्ठिता भुवनवन्द्यया वृन्दया
चकास्तु हृदि मे हरेः परमधाम वृन्दाटवी ॥ ८ ॥
जन्मनि जन्मनि वृन्दावनभुवि वृन्दारकेन्द्रवन्द्यायाम्
अपि तृणगुल्मकभावे भवतु ममाशासमुल्लासः ॥ ९ ॥
हरिपदपङ्कजसख्यांहिनरः समनुभूय पूर्णोऽपि
यत्रैव आशास्ते तृणतां तन्नौमि राधिकाविपिनम् ॥१०॥
राधावल्लभपादपल्लवजुषां सज्जन्मनीतायुषां
नित्यं सेवितवैष्णवांघ्रिरजसां वैराग्यजीवस्पृशाम् ।
हन्तैकान्तरसप्रविष्टमनसामप्यस्ति यद्दूरतः
तद्राधाकरुणावलोकमचिराद्विन्दन्तु वृन्दावने ॥ ११ ॥
राधानन्दकिशोरौ निरवधिरससागरे निमग्नौ
निजकेलिधाम वृन्दाविपिनमुदीक्ष्यैव सौख्यमाप्नुवतः ॥१२॥
उद्दामप्रमदोज्ज्वलैकरसया भक्त्या विधूताः कृते
व्यक्तं कस्यचिदेव चित्तमुकुरे तत्तद्विषाभोगवत् ।
यस्मिन् दिव्यविचित्रकेलिमिथुनं तच्छ्यामगौरं विधु
ज्योत्स्नावत् परिचाययेत तदिह किं विन्देय वृन्दावनम् ॥१३॥
विशुद्धाद्वैतैकप्रणयरसपीयूषजलधेः
घनीभूतद्वीपे समुदयति वृन्दावनमहो ।
मिथः प्रेमोद्घूर्णद्रसिकमिथुनक्रीडमनिशं
तदेवाध्यासीनं प्रविशति पदे क्वापि मधुरे ॥ १४॥

Digitized by Google

तद्वृन्दावनमुग्धदेन रसिकद्वंद्वेन केनाप्यहो
नित्यक्रीड़तया गृहीतमिह के विद्युर्न गौरप्रियाः ॥ २ ॥
गुणैः सर्वैर्हीनोऽप्यहमखिलजीवाधमतमो
ऽप्यशेषैः दोषाग्रैरपिच वलितो दुर्मतिरपि।
प्रसादात्तस्यैवाविदमहह राधां व्रजपतेः
कुमारं श्रीवृन्दावनमपि स गौरो मम गतिः ॥ ३ ॥
श्रीवृन्दावनकेलिरङ्गसहजं सौन्दर्य्यशोभावयो
वैदग्ध्यादिचमत्कृतेः परतरं विश्रान्तिधामाद्भुतम्।
तत्प्रेमोहनदिव्यनागरवरद्वन्द्वं मिथो जीवनं
गौरश्यामलमुज्ज्वलोन्मदरसाविष्टं हृदि स्फूर्जतु ॥ ४ ॥
इह भ्रामं भ्रामं जगति नहि गन्धोऽपि कलितो
यदीयस्तत्रैवाखिलनिगमदुर्लभ्यशरणौ।
अपारे श्रीवृन्दावनमहिमपीयूषजलधौ
महाश्चर्य्यौंशीने मधुरिमनि चित्तं लगतु मे ॥ ५ ॥
जयति जयति वृन्दारण्यमान्यूनसिन्धोः
अनुपममिव सारं शारदाकोटिकाव्यम्।
खगमृगतरुवल्लीकुञ्जवापीतड़ाग
स्थलगिरिक्षितिदीनामद्भुतैः सौभगाद्यैः ॥ ६ ॥
वृन्दारण्ये चर चरण दृक् पश्य वृन्दावनश्रीः
जिह्वे! वृन्दावनगुणगणान् कीर्त्तय श्रोत्र दृष्टान्।
वृन्दाटव्या भज परिमलं घ्राण गात्र त्वमस्मिन्
वृन्दारण्ये लुठ पुलकितं कृष्णकेलिस्थलीषु ॥ ७ ॥

रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्त्तसुदुस्तरा प्रकटितप्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः॥२६॥

इतो न किञ्चित् परतो न किञ्चित्
यतो यतो यामि ततो न किञ्चित् ।
विचार्य्य पश्यामि जगन्न किञ्चित् ।
स्वात्मावबोधादधिकं न किञ्चित् ॥ २७ ॥

संसारमृगतृष्णायां त्वं मनो धावसि किं मुधा ।
अनाविलमिदं ब्रह्मसरः किं नावगाहसे ॥ २८ ॥

इति शान्तिशतके ब्रह्मप्राप्तिर्नामचतुर्थः
परिच्छेदः सम्पूर्णम् ॥ ४ ॥

वृन्दावन शतकम् ।

नमस्तस्मै कस्मैचिदपि पुरुषायाद्भुत महा
महिम्ने विभ्राजत्कनकरुचिधाम्ने स्वकृपया ।
असङ्कोचेनैव श्वपचमखिलेभ्यः स्वयमहो
ददौ यस्तद्भक्तिं विमलतरनानारसमयीम् ॥ १ ॥
यस्मिन्न प्रविशन्त्यनोऽपि महतां का तत्त्ववार्त्ता पुनः
शास्त्राणां स्वपितश्च यद्भगवता भक्त्यैव भक्तोत्सवे ।

नित्यं प्रच्युतिशङ्कया क्षणमपि स्वर्गे न मोदामहे।
अप्यन्येषु विना शिवस्तु विषयाभोगेषु तृष्णा न मे
स्वर्णद्याः पुलिने परं हरिपदध्यानं मनो वाञ्छति ॥२०॥
अयि बोधाम्बुधौ भावः स्वच्छोऽयं विश्वबुद्बुदः
विनीत उदितो वेत्ति विकल्पपटलं मनः॥ २१॥
अहङ्कारः क्वापि व्रजतु जिनहेमात्वमिहभूः
अभूमिर्दर्पाणामहमपसरत्वं पिशुन: हे।
अरे क्रोध! स्थानान्तरमनुसरानन्यमनसां
त्रिलोकीनाथो नो हृदि वसतु देवो हरिरसौ॥ २२॥
मातर्माये! भगिनि कुमते! हे पितर्मोहजाल!
व्यावर्तध्वं भवतु भवतामेष दीर्घो वियोगः।
सद्यो लक्ष्मीरमणचरणभ्रष्टगङ्गाप्रवाह-
व्यामिश्रायां दृषदि परमब्रह्मदृष्टिर्भवामि॥ २३॥
आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर्बहुकार्यकारणशतैः कालोऽपि न ज्ञायते।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमोदमदिरामुन्मत्तभूतं जगत्॥ २४॥
मातर्मेदिनि! तात! मारुत सखे ज्योतिः! सुबन्धो जल!
भ्रातर्व्योम! निबद्ध एष भवतामस्तु प्रणामाञ्जलिः।
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परे ब्रह्मणि॥ २५॥
आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला

समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ १४ ॥
गतः कालो यत्र द्विचरणपशूनां चितिभुजां
पुरः स्वस्तीत्युक्त्वा विषयसुखमास्वादितमभूत् ।
इदानीमस्माकं तृणमिव समस्तं कलयतां
अपेक्षा भिक्षायामपि किमपि चेतस्त्रपयति ॥ १५ ॥
पूर्वं तावत् कुवलयदृशां लोललोलैरपाङ्गैः
आकर्षद्भिः किमपि हृदयं पूजिता यौवनश्रीः ।
सम्प्रत्यन्तर्निहितसदसद्भावलब्धप्रबोध-
प्रत्याहारैर्विशदहृदये वर्त्तते कोऽपि भावः ॥ १६ ॥
गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः
सम्प्राप्स्यन्ते जठरहरिणा गात्रकण्डूविनोदम् ॥ १७ ॥
कदा भिक्षाभक्तैः करकलितगङ्गाम्बुतरलैः
शरीरं मे स्थास्यत्युपरतसमस्तेन्द्रियसुखम् ।
कदा ब्रह्माभ्यासस्थिरतनुतयारण्यविहगाः
पतिष्यन्ति स्थाणुभ्रमहतधियः स्कन्धशिरसि ॥ १८ ॥
रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगैः
सत्रासञ्च सकौतुकञ्च सकृपं दृष्टस्य तैर्नागरैः ।
निर्व्याजीकृतचित्सुधारसमुदा निद्रायमाणस्य मे
निःशङ्कं करटः कदा करपुटीभिक्षां विलुण्ठिष्यति ॥१९॥
एणाक्षीस्पृहयालुतान कथमप्यास्ते विवेकोदयान्

सत्यं सूनुरयं दया च भगिनी भ्राता मनःसंयमः ।
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनं
यस्यैते हि कुटुम्बिनो वद सखे ! कस्माद्भयं योगिनः ॥९॥
धिक् धिक् तान् कृमिनिर्विशेषवपुषः स्फूर्जन्महाविद्ययो
निष्यन्दीकृतशान्तयोऽपि च तमःकारागृहेष्वासते ।
तं विद्वांसमिह स्तुमः करपुटीभिक्षान्नशाकेऽपि वा ।
बाला वक्त्रसरोजिनीमधुनि वा यस्या विशेषो रसः ॥१०॥
मातर्लक्ष्मि ! भजस्व कञ्चिदपरं मत्काङ्क्षिणी मा स्म भूः
भोगेभ्यः स्पृहयालवस्तव वशाः का निःस्पृहाणामसि ।
सद्यः स्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृते
भिक्षासक्तुभिरेव सम्प्रति वयं वृत्तिं समीहामहे ॥ ११ ॥
जिह्वे ! लोचननासिके श्रवण ! हे ! त्वक् ! चापि नो वार्यसे
सर्वेभ्योऽस्तु नमःकृताञ्जलिरहं सप्रश्रयं प्रार्थये ।
युष्माकं यदि सम्मतं तदधुना नात्मानमिच्छाम्यहं
होतुं भूमिभुजां निकारदहनज्वालाकराले गृहे ॥१२॥
गतः कालो यत्र प्रणयिनि मयि प्रेमकुटिलः
कटाक्षः कालिन्दीलघुलहरिवृत्तिः प्रभवति ।
इदानीमस्माकं जठरकमठीपृष्ठकठिना
मनोवृत्तिस्तत् किं व्यसनिनि मुधैव क्षपयसि ॥ १३ ॥
यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं
तदा ज्ञातं तारामयमिदमशेषं जगदपि ।
इदानीमस्माकं पटुतरविवेकाञ्जनजुषां

यद्द्वारार्पितदृष्टिभिः क्षितिभुजां विद्वद्भिरप्यास्यते ॥ ३ ॥
कामं जीर्णपलाशसंहतिकृतां कन्थां वसाने वने
कुर्यामम्बुभिरप्ययाचितसुखैः प्राणानुबन्धस्थितिम् ।
साङ्गग्लानि सवेपितं सचकितं स्वान्तर्निदाघज्वरं
वक्तुं नलहसुत्सहे सकृपणं देहीति दीनं वचः ॥ ४ ॥
सत्यं वक्तुमशेषमस्ति सुलभा वाणी मनोहारिणी
दातुं दानवरं शरण्यमभयं स्वच्छं पिबध्यो जलम् ।
पूजार्थं परमेश्वरस्य विमलः स्वाध्याययज्ञः परं
क्षुद्व्याधेः फलमूलमस्ति शमनं क्लेशात्मकैः किं धनैः ॥ ५ ॥
सन्ति स्वादुफला वनेषु तरवः स्वच्छं पयो निर्झरं
वासो वल्कलमाश्रयो गिरिगुहा शय्या लतावल्लरी ।
आलोकाय निशासु चन्द्रकिरणाः सख्यं कुरङ्गैः सह
स्वाधीने विभवेऽप्यहो नरपतिं सेवन्त इत्यद्भुतम् ॥ ६ ॥
पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्षमक्षय्यमन्नं
वस्त्रं विस्तीर्णमाशादशकममलिनं तल्पमस्वल्पमुर्वी ।
येषां निःसङ्गताङ्गीकरणपरिचितिः स्वान्तसन्तोषिणस्ते
धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥ ७ ॥
महाशय्या भूमिर्मसृणमुपधानं भुजलता
वितानश्चाकाशं व्यजनमनुकूलोऽयमनिलः ।
स्फुरच्चन्द्रो दीपः स्वधृतिवनितासङ्गमुदितः
सुखं शान्तः शेते विगतभवभीतिर्नृप इव ॥ ८ ॥
धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी

Digitized by Google

यदेते साधूनामुपरि विमुखाः सन्ति धनिनो
न चैषामवज्ञैषामपि तु निजवित्तव्ययभयम्।
अतः खेदो नास्मिन् परममनुकम्प्यैव भवति
स्वमांसत्रस्तेभ्यः कइह हरिणेभ्यः परिभवः॥ २३॥
तस्मादनन्तमजरं परमं विकासि
तद्ब्रह्म वाञ्छत बुधा यदि चेतनास्ति।
यस्यानुषङ्गत इमे भुवनाधिपत्य-
भोगादयः कृपणवत् सतां विभान्ति॥ २४॥

इति शान्तिशतके कर्तव्यतोपदेशो नाम तृतीयः परिच्छेदः॥ ३॥

लक्ष्मीर्निर्वृतिमेति हीनचरितैर्वैरेव तत्किं तया
किं नाद्यैव करोमि तामनुचरीं रामां सकामामिव।
ब्रह्माण्डे निपतत्यपि स्खलति न प्रायेण येषां मनः
तेषामार्यमनस्विनामनुपदं गन्तास्मि नाहं यदि॥ १॥
लब्धाः श्रियः सकलकामदुघास्ततः किं?
सन्तर्पिताः प्रणयिनो विभवैस्ततः किम्?।
न्यस्तं पदं शिरसि विद्विषतां ततः किं?
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम्?॥ २॥
निष्पन्दाः किमु कन्दरोदरभुवः क्षीणास्तरूणां त्वचः
किं शुष्काः सरितः स्फुरद्गिरिगुहाग्रावस्खलद्वीचयः।
प्रत्युत्थानमितस्ततः प्रतिदिनं कुर्वद्भिरुद्ग्रीविभिः

विरम विरम चेतः! सन्निधानादमीषां
सुखकणमणिहेतोः साहसं मास्म कार्षीः ॥ १७ ॥
एकीभूय स्फुटमिव किमप्याचरद्भिः प्रलीनैः
एभिर्भूतैः स्मर कति कृताः स्वान्त ते विप्रलम्भाः ।
तस्मादेषां त्यज परिचयं चिन्तय स्वव्यवस्थाम्
आभाषस्ते किमु न विदितः खण्डितः पण्डितः स्यात् ॥१८॥
धूर्तैरिन्द्रियनामभिः प्रणयितामापादयद्भिः स्वयं
सम्भोक्तुं विषयामिषं किल पुमान् सौख्याशया वञ्चितः ।
तैः शेषे कृतकृत्यतामुपगतैरौदास्यमालम्बितं
सम्प्रत्येष विधेर्नियोगवशगः कर्मान्तरैर्बध्यते ॥ १९ ॥
दैवे समर्प्य चिरसञ्चितमोहजालं
सुस्थाः सुखं वसत किं परयाचनाभिः ।
मेरुं प्रदक्षिणयतोऽपि दिवाकरस्य
ते तस्य सप्त तुरगा न कदाचिदष्टौ ॥ २० ॥
आकाशमुत्पततु गच्छतु वा दिगन्तम्
अम्भोनिधिं विशतु तिष्ठतु वा यथेष्टम् ।
जन्मान्तरार्जितशुभाशुभकृन्नराणां
छायेव न त्यजति कर्मफलानुबन्धः ॥ २१ ॥
उपशमफलाद्विद्यावीजात् फलान्तरमिच्छतां
भवति विफलो यत् प्रारम्भस्तदत्र किमद्भुतम् ।
नियतविषया ह्येते भावा न यान्ति विपर्ययं
जनयति यतः शालिर्वीजं न जातु यवाङ्कुरम् ॥ २२ ॥

Digitized by Google

भिक्षार्थं व्यवसीयतां प्रतिदिनं सत्कर्म सञ्चीयतां
कोपश्चेतसि क्षीयतां परतरं ब्रह्मानुसन्धीयताम् ॥ ११ ॥
यत् क्षान्तिः समये श्रुतिः शिव शिवेत्युक्तौ मनोनिर्वृतिः
भैक्षे चाभिरुचिर्धनेषु विरतिः शश्वत्समाधौ रतिः।
एकान्ते वसतिर्गुरौ प्रतिनतिः सद्भिः समं सङ्गतिः
सत्त्वे प्रीतिरनङ्गनिर्जितिरसौ सन्मुक्तिमार्गे स्थितिः ॥ १२॥
सम्भोगाद्विषयामिषस्य परितस्तैमित्यमस्याखिल
ज्ञानोन्मेषतया कथं तव भवेदात्मास्पदं देहिनः।
साध्यं तद्धि तदेव साधनमितो व्यावृत्तिरेवामिषात्
तस्यां ज्योतिरुपैत्यनिन्धनमिदं दोषत्रयं धक्ष्यति ॥१३॥
बुद्धेरगोचरतया न गिरां प्रचारो
दूरे गुरुप्रथितवस्तुकथावतारः।
तत्त्वं क्रमेण विदुषां करुणावदाते
श्रद्धावतां हृदि पदं स्वयमादधाति ॥ १४ ॥
दुःखाङ्गारकतीव्रः संसारोऽयं महानसो गहनः
इह विषयामिषलालस मानस मार्जार मा निपत ॥१५॥
अरे चेतोमीन भ्रमणमधुना यौवनजले
त्यज त्वं स्वच्छन्दं युवतिजलधौ पश्यसि न किम्।
तनूजालीजालं स्तनयुगलतुम्बीफलयुतं
मनोभूः कैवर्तः क्षिपति परितस्त्वां प्रति मुहुः ॥ १६ ॥
विषयविषधराणां दोषदंष्ट्रोत्कटानां
विप्रयविषविमर्दव्यक्तदुश्चेष्टितानाम्।

Digitized by Google

नरान् गेहात् गेहात् प्रतिदिवसमाकृष्य नयतः
कृतान्तात् किं शङ्का नहि भवति रे ! जाग्रत जनाः !॥५॥
के यूयं नो वयमिति च वः के भवामो भवाब्धौ
कर्मोर्मीणां विषमवलनैः फेणवत् पुञ्जिताः स्मः ।
तत्त्वेपीयः चयिणि विषये चित्तमाधाय धीराः
सर्वारम्भे विशति जगतामन्तरात्मन्यनन्ते ॥ ६ ॥
सूक्तिं कर्णसुधां व्यनक्तु सुजनस्तस्मिन्न मोदामहे
ब्रूतां वाचमसूयको विषमुचं तस्मिन्न खिद्यामहे ।
या यस्य प्रकृतिः सतां वितनुतां किं नस्तया जायते
कुर्मस्तत् खलु कर्म्म जन्मनिगडच्छेदाय यज्जायते ॥ ७ ॥
मन्निन्दया यदि जनः परितोष मेति
नन्वप्रयत्नसुलभोऽयमनुग्रहो मे ।
श्रेयोऽर्थिनोहि पुरुषाः परतुष्टिहेतोः ।
दुःखार्जितान्यपि धनानि परित्यजन्ति ॥ ८ ॥
स्वधर्म पीड़ामपहाय योऽयं मत्पापशुद्ध्यर्थमिह प्रवृत्तः ।
नचेत् चमामप्यहमस्य कुर्य्यां मत्तः कृतघ्नो वद कीदृशोऽन्यः॥९॥
कश्चित् पुमान् चिपति मां प्रतिरूक्षवाक्यैः
सोऽहं चमाभवनमेत्य मुदं प्रयामि ।
शोकं व्रजामि पुनरेवयत स्तपस्वी
चारित्रतः स्खलितवानिति मन्निमित्तम् ॥ १० ॥
नन्वात्मन्यवधीयतां गृहसुखाद्वैराग्यमाधीयताम्
बन्धुभ्यो व्यवधीयतां सुरसरित्तीरे सदा स्थीयताम् ।

Digitized by Google

अकुत्सिते कर्म्मणि यः प्रवर्त्तते
निवृत्तरागस्य गृहं तपोवनम् ॥ ३० ॥

इति शान्तिशतके विवेकोदयो नाम द्वितीयः
परिच्छेदः ॥ २ ॥

महता पुण्यपण्येन क्रीतेयं काय-नौ स्त्वया
पारं दुःखोदधेर्गन्तुं त्वरया यन्न भिद्यते ॥ १ ॥
दिवसरजनीकूलच्छेदैः पतद्भिरनारतं
वहति निकटे कालः स्रोतःसमस्तभयावहम् ।
इह हि पततां नास्त्यालम्बो न चापि निवर्त्तनं
तदिह महतां कोऽयं मोहो यदेष मदाविलः ॥ २ ॥
अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत् स्वय मिमान् ।
व्रजन्तः स्वातन्त्र्यात् परमपरितापाय मनसः
स्वयं भुक्ता ह्येते शमसुखमनन्तं विदधति ॥ ३ ॥
भवारण्यं भीमं तनुगृहमिदं छिद्रबहुलं
बली कालश्चौरो नियतमसिता मोहरजनी ।
गृहीत्वा ज्ञानासिं विरतिफलकं शीलकवचं
समाधानं कृत्वा स्थिरतरदृशो जाग्रत जनाः ! ॥ ४ ॥
गृहे पर्य्यन्तस्थे द्रविणकणमोषं श्रुतवता
स्ववेश्मान्यारक्षा क्रियत इति मार्गोऽयमुचितः ।

Digitized by Google

आहारः फलमूलमात्मरचितं शय्या मही वल्कलं
सम्वीताय परिच्छदः कुशसमित्पुष्पाणि पुत्रा मृगाः ।
वस्त्रानाश्रयदानभोगविभवा निर्यन्त्रणाः शाखिनो
मित्राणीत्यधिकं गृहेषु गृहिणां किं नाम दुःखाद्दते॥ २४॥

विवेकः किं सोऽपि स्वरसजनिता यत्र न कृपा
स किं योगी यस्मिन् न भवति परानुग्रहरसः ।
स किं धर्मो यत्र स्फुरति न परद्रोहविरतिः
श्रुतं किं तद्वा स्यादुपशमफलं यन्न भवति ॥ २५ ॥

अग्रे कस्यचिदस्ति कश्चिदभितः केनापि पृष्ठे कृतः
संसारः शिशुभाव-यौवनजराभारावतारादयम् ।
बालस्तं बहुमन्यतामसुलभं प्राप्तं युवा सेवतां
वृद्धस्त्वं विषयाद्वहिष्कृत इव व्यावृत्य किं पश्यसि ॥ २६ ॥

पुत्रदारादिसंसारः पुंसां सम्मूढचेतसाम्
विदुषां शास्त्रसंसारः सद्योगाभ्यासविघ्नकृत् ॥ २७ ॥

सार्वभौमभवनं वनवासो निस्स्वभावभवभावनया ते ।
बालिशो हि विषयेन्द्रियचौरैः मुष्यते स्वभवने च वने च ॥२८॥

स्थूलप्रावरणोऽतिपूर्वकथकः काशाश्रुलालाविलो
भग्नोरःकटिपृष्ठजानुदशनो मुग्धेऽतिथीन् वारयन् ।
शृण्वन् धृष्टवधूवचांसि धनुषा संत्रासयन् वायसान्
आशापाशनिबद्धजीवविभवो वृद्धो गृहे श्वायति ॥ २९ ॥

वनेषु दोषाः प्रभवन्ति रागिणां
गृहेषु पञ्चेन्द्रियनिग्रहस्तपः ।

Digitized by Google

ते तीक्ष्णदुर्जननिकारशरैर्न भिन्ना
धीरास्त एव शमसौख्यभुजस्त एव।
सीमन्तिनीभुजलतागहनं युदस्य
येऽवस्थिताः शमफलेषु तपोवनेषु॥ १८॥

कुरङ्गाः कस्माथं प्रतिविटपमारोप्य मटवीं
श्रयन्ति क्षेमं ते पुलिनकुशलं भद्रमुपलाः।
निशान्तादस्मात् कथमपि विनिष्क्रान्तमधुना
मनोऽस्माकं दीर्घामभिलषति युष्मत्परिचितम्॥ १९॥

वासो वल्कलमास्तरः किसलयान्योकस्तरूणां तलं
मूलानि क्षतये क्षुधां गिरिनदीतोयं तृषाशान्तये।
क्रीडा मुग्धमृगैर्वयांसि सुहृदो नक्तं प्रदीपः शशी
स्वाधीने विभवे तथापि कृपणा याचन्त इत्यद्भुतम्॥ २०॥

शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दः सहाया मृगाः।
इत्यप्रार्थितसर्वलभ्यविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत् परार्थघटनायत्नैर्विना स्थीयते॥ २१॥

पूरयित्वार्थिनामाशां प्रियं कृत्वा द्विषामपि
पारं गत्वा श्रुतौघस्य धन्या वनमुपासते॥ २२॥

अलमति चपलत्वात् स्वप्नमायोपमत्वात्
परिणतिविरसत्वात् सङ्गमेनाङ्गनायाः।
इति यदि शतकृत्वस्तत्त्वमालोचयाम-
स्तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा॥ २३॥

महावेशः क्लेशः प्रकृतिचपला श्रीरपि खला
यमः स्वैरी वैरी तदपि न हितं कर्म्म विहितम् ॥ १२ ॥
अर्थप्राणविनाशसंशयकरीं प्राप्यापदं दुस्तरां
प्रत्यासन्नभयं न वेत्ति विभवं स्वं जीवितं कांक्षति ।
उत्तीर्णस्तु ततो धनार्थमपरां भूयो विशत्यापदं
प्राणानाञ्च धनस्य चाधमधिया मन्योन्यभावः पणः ॥ १३ ॥
विमलमतिभिः कैरप्येतज्जगज्जनितं पुरा
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।
इह हि भुवनान्यन्ये वीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥ १४ ॥
रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गीतादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ।
किन्तु प्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुर-
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥ १५ ॥
आस्तामकण्टकमिदं वसुधाधिपत्यं
त्रैलोक्यराज्यमपि नैव तृणाय मन्ये ।
निःशङ्कसुप्तहरिणीकुलसङ्कुलासु
चेतः परं वलति शैलवनस्थलीषु ॥ १६ ॥
हरिणचरणक्षुण्णोपान्ताः सशाद्वलनिर्झराः
कुसुमललितैर्विष्वग्वातैस्तरङ्गितपादपाः ।
विविधविहगश्रेणी चित्रध्वनिप्रतिनादिता
मनसि न मुदं केषां दध्युः शिवा वनभूमयः ॥ १७ ॥

Digitized by Google

यदा पूर्वं नासीदुपरि च तथा नैव भविता
तदा मध्यावस्था क्षणपरिचयो भूतनिचयः ।
अतः संयोगेऽस्मिन् परिचितवियोगे च सहजे
किमाधारःप्रेमा: किमधिकरणाः सन्तु च शुचः ॥ ७॥
इन्द्रस्याशुचिशूकरस्य च सुखे दुःखे च नास्त्यन्तरं
स्वेच्छाकल्पनया तयोः खलु सुधा विष्ठा च काम्याशनम् ।
रम्भा चाशुचिशूकरी च परमप्रेमास्पदं मृत्युतः
संत्रासोऽपि समः स्वकर्मगतिभिश्चान्योन्यभावः समः ॥ ८॥
कृमिकुलचितं लालाक्लीर्णं विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या खादन्नरास्थि निरामिषम् ।
सुरपतिमिव पार्श्वस्थं श्वा सशङ्कितमीक्षते
गणयति नहि क्षुद्रो लोकः परिग्रहफल्गुताम् ॥ ९ ॥
अमीषां जन्तूनां कतिपयनिमेषस्थितिजुषां
वियोगे धीराणां क इह परितापस्य विषयः ।
क्षणादुत्पद्यन्ते विलयमपि यान्ति क्षणममी
न केऽपि स्थातारः सुरगिरिपयोधिप्रभृतयः ॥ १० ॥
पुत्रः स्यादिति दुःखितः सति सुते तस्यामये दुःखितः
तद्दुःखादिकमार्जने तदनये तन्मूर्खता दुःखितः ।
जातश्चेत् सगुणोऽथ तन्मृतिभयं तस्मिन्मृते दुःखितः
पुत्रव्याजमुपागतो रिपुरयं मा कस्यचिज्जायताम् ॥ ११ ॥
स्थिरापायः कायः प्रणयिषु सुखं स्थैर्यविमुखं
महाभोगा रोगाः कुवलयदृशः सर्पसदृशः ।

Digitized by Google

अयमविचारितचारुतया संसारो भाति रमणीयः।
अत्र पुनः परमार्थदृशां न किमपि सारमणीयः॥ १॥

केनाप्यनर्थरुचिना कपटं प्रयुक्तं
एतत् सुहृत्तनयबन्धुमयं विचित्रम्।
कस्यात्र कः परिजनः स्वजनो जनो वा
स्वप्नेन्द्रजालसदृशः खलु जीवलोकः॥ २॥

आरम्भः संशयानामविनयभवनं पत्तनं साहसानाम्
दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानाम्।
दुस्त्याज्यं यन्महद्भिः सुरनरवृषभैः सर्वमायाकरण्डं
स्त्रीरूपं केन लोके विषममृतमयं धर्मनाशाय सृष्टम्॥ ३॥

यदा प्रकृत्यैव जनस्य रागिणो
भृशं प्रदीप्तो हृदि मन्मथानलः।
तदात्र भूयः किमनर्थपण्डितैः
कुकाव्यहव्याहुतयो निवेशिताः॥ ४॥

दधति तावदमी विषयाः सुखं
स्फुरति यावदियं हृदि मूढ़ता।
मनसि तत्त्वविदान्तु विवेचके
क्व विषयाः क्व सुखं क्व परिग्रहाः॥ ५॥

निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेश्वरत्वं पुनः।
चक्रेशः पुनरिन्द्रतां सुरपति ब्रह्मास्पदं वाञ्छति
ब्रह्मा विष्णुपदं पुनःपुनरहो आशावधिं को गतः॥ ६॥

Digitized by Google

रेतः शोणितयोरियं परिणतिर्यद्वर्ष्म तच्चाभवन्
मृत्योरास्पदमाश्रयो गुरुशुचां रोगस्य विश्रामभूः ।
जानन्नप्यवशो विवेकविरहादश्नन् न विद्याश्रयो
शृङ्गारीयति पुत्रकाम्यति बत चेवीयति स्त्रीयति ॥ २६ ॥

क्वैतद्वक्त्रारविन्दं क्व तदधरमधु क्वायतास्ते कटाक्षाः
क्वालापाः कोमलास्ते क्व च मदनधनुर्भङ्गुरो भ्रूविलासः ।
इत्थं खट्वाङ्गकोटौ प्रकटितदशनं मञ्जुगुञ्जत्समीरं
रागान्धानामिवोच्चैरुपहसति महामोहजालं कपालम् ॥२७॥

शृणु हृदय ! रहस्यं यत् प्रशस्तं मुनीनां
न खलु न खलु योषित्सन्निधिः संविधेयः ।
हरति हि हरिणाक्षी क्षिप्रमक्षिक्षुरप्रैः
पिहितशमतनुत्रं चित्तमप्युत्तमानाम् ॥ २८ ॥

समाश्लिष्यत्युच्चैर्घनपिशितपिण्डं स्तनधिया
मुखं लालाक्लिन्नं पिबति चषकं सासवमिव ।
अमेध्यक्लेदार्द्रे पथि च रमते स्पर्शरसिको
महामोहान्धानां किमपि रमणीयं न भवति ॥ २९॥

इति शान्तिशतके परीतापोपशमो नाम
प्रथमः परिच्छेदः ॥ १ ॥

Digitized by Google

बीभत्सा विषया जुगुप्सिततमः कायो वयो गत्वरं
प्रायोबन्धुभिरध्वनीव पथिकैः योगो वियोगावहः ।
हातव्योऽयमसार एष विरसः संसार इत्यादिकं
सर्वस्यैव हि वाचि चेतसि पुनः कस्यापि पुण्यात्मनः ॥ २० ॥
तडिन्मालालोलं प्रतिदिवसदत्तान्धतमसं
भवे सौख्यं हित्वा शमसुखमुपादेयमनघम् ।
इतिव्यक्तोद्गारं चटुलवचसः शून्यमनसो
वयं वीतव्रीडाः शुकइव पठामः परममी ॥ २१ ॥
यदासौ दुर्वारः प्रसरति मदश्चित्तकरिणः
तदा तस्योद्दामप्रसररसरूढैः व्यवसितैः ।
क्व तत् धैर्यालानं क्व च निजकुलाचारनिगडः
क्व सा लज्जारज्जुः क्व विनयकठोराङ्कुशमपि ॥ २२ ॥

भिक्षाशनं भवनमायतनैकदेशः
शय्या भुवः परिजनो निजदेहभारः ।
वासश्च जीर्णपटखण्डनिबद्धकन्था
हाहा ! तथापि विषयान् न जहाति चेतः ॥ २३ ॥

त्वामुदर ! साधु मन्ये शाकैरपि यदसि लब्धपरितोषम् ।
हतहृदयं ह्यधिकाधिकवाञ्छा शतदुर्भरं न पुनः ॥ २४ ॥
शुचां पात्रं धात्री परिणतिरमेध्यप्रचयभू
रयं भूतावासो विमृश कियतीं याति न दशाम् ।
तदस्मिन् धीराणां क्षणमपि किमास्थातुमुचितं
खलीकारः कोऽयं यदहमहमिवेति रभसः ॥ २५ ॥

Digitized by Google

यद्दत्तं मुहुरीक्षसे न धनिनां ब्रूषे न चाटुं मृषा
नैषां गर्वगिरः शृणोषि न पुनः प्रत्याशया धावसि।
काले बालतृणानि खादसि सुखं निद्रासि निद्रागमे
तन्मे ब्रूहि कुरङ्ग! कुत्र भवता किं नाम तप्तन्तपः? ॥१४॥
कामं वनेषु हरिणास्तृणेन जीवन्त्ययत्नसुलभेन।
विदधति धनिषु न दैन्यं ते खलु पशवो वयं सुधियः॥१५॥
आस्वाद्य स्वयमेव वच्मि महती मर्मच्छिदो वेदना
मा भूत् कस्यचिदप्ययं परिभवो याच्ञेति संसारिणः।
पश्य भ्रात! रियं हि यौवनजराधिक्कारकेलिस्थली
मानम्लानमसी गुणव्यतिकरप्रागल्भ्यगर्वच्युतिः ॥ १६ ॥
क्व गन्तासि? भ्रातः! कृतवसतयो यत्र धनिनः
किमर्थं? प्राणानां स्थितिमनुविधातुं कथमपि।
धनैर्याच्ञालब्धैर्ननु परिभवोऽभ्यर्थनफलं
निकारोऽग्रे पश्चाद्धनमहह! भो! स्वाहि निधनम् ॥१७॥
प्राणानां वत किं ब्रुवे कठिनतां तैरेव सा विष्कृता
निष्क्रामन्ति कथञ्चिदेव हि न ये याच्ञावचोभिः समम्।
आत्मानं पुनराक्षिपामि विदितस्थैर्योऽपि येषामहो
मिथ्याशङ्कितसद्वियोगविधुरो यत् प्रार्थये सर्वशः ॥ १८ ॥
अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किं नास्माभिः विगलितविवेकैः व्यवसितम्।
यदीशानामग्रे द्रविणकणमोहान्धमनसां
कृतं वीतव्रीडैः निजगुणकथापातकमपि ॥ १९ ॥

Digitized by Google

अजानन्दाहार्त्तिं विशति शलभो दीपदहनं
न मीनोऽपि ज्ञात्वा वृतवडिशमश्नाति पिशितम्।
विजानन्तोऽप्येतान् वयमिह विपज्जालजटिलान्
न मुञ्चामः कामानहह! गहनो मोहमहिमा॥ ८॥
क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न सन्तोषतः
सोढ़ा दुःसहशीतवाततपनक्लेशा न तप्तं तपः।
ध्यातं वित्तमहर्निशं नच पुनर्विष्णोः पदं शाश्वतं
तत् तत् कर्म्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चितम्॥ ९॥
कृत्वा शस्त्रविभीषिकां कतिपयग्रामेषु दीनाः प्रजा
मथ्नन्तो विटजल्पितैरुपहृता क्षौणीभुजस्ते किल।
विद्वांसोऽपि वयं किल त्रिजगतीसर्गस्थितिव्यापदां
ईशस्तत्परिचर्य्यया न गणितो यैरेष नारायणः॥ १०॥
नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढ़ा वराका वयम्॥ ११॥
जन्मेदं वन्ध्यतां नीतं भवभोगोपलिप्सया।
काचमूल्येन विक्रीतो हन्त! चिन्तामणिर्मया॥ १२॥
याच्ञाशून्यमयत्नलभ्यमशनं वायुः कृतो वेधसा
व्यालानां पशवस्तृणाङ्कुरभुजः सुस्थाः स्थलीशायिनः।
संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां
यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः॥ १३॥

Digitized by Google

यदि शान्तो मनो देयं यदि मुक्तिपदे रतिः ।
तदा शिवजनमित्रस्य पद्ममाराध्यतां धिया । २ ॥

सन्तोषसन्ततिकरं विदुषां कवीनां
सांसारिकाप्रतिमदुःखविनाशबीजम् ।
यत्नेन शान्तिशतकं विदधे विवेकी
श्रीशिवजनः प्रकृतिसुन्दरशुद्धबुद्धिः ॥ ३ ॥

आत्मानात्मविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करम्
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः ।
न प्राप्तानि पुरा न सम्प्रति न च प्राप्तौ दृढ़प्रत्यया
वाञ्छामात्रपरिग्रहाण्यपि वयं त्यक्तुं न तानि क्षमाः ॥ ४ ॥

धन्यानां गिरिकन्दरोदरभुवि ज्योतिः परं ध्यायतां
अनन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्के स्थिताः ।
अस्माकन्तु मनोरथोपरचितप्रासादवापीतट
क्रीड़ाकाननकेलिमण्डपजुषामायुः परं क्षीयते ॥ ५ ॥

विशीर्णः प्रारम्भो वपुरपि जराव्याधिविधुरं
गतं दूरे विप्रस्वजनभरणं वाञ्छितमपि ।
इदानीं व्यामोहादहह! विपरीते हतविधौ
विधेयं यत्तत्त्वं स्फुरति मम नाद्यापि हृदये ॥ ६ ॥

बीभत्साः प्रतिभान्ति किन्न विषयाः किन्तु स्पृहायुक्ततो
देहस्यापचयो मतो निविशते गाढ़ो गृहेषु ग्रहः ।
ब्रह्मोपास्यमिति स्फुरत्यपि हृदि व्यावर्तिका वासना
का नामेयमतर्क्यहेतुगहना दैवी सतां यातना ॥ ७ ॥

समस्तनीतिशास्त्रज्ञो वाहने पूजितश्रमः।
शौर्यवीर्यगुणोपेतः सेनाध्यक्षो विधीयते ॥ १०५ ॥
मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः।
धीरो यथोक्तवादी च एष दूतो विधीयते ॥ १०६ ॥
पुत्रपौत्रगुणोपेतः शास्त्रज्ञो मिष्टपाचकः।
शूरश्च कठिनश्चैव सूपकारः स उच्यते ॥ १०७ ॥
इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः।
अप्रमादी सदा दक्षः प्रतीहारः स उच्यते ॥ १०८ ॥
यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ १०९ ॥
किं करिष्यन्ति वक्तारः श्रोता यत्र न विद्यते।
नग्नक्षपणके देशे रजकः किं करिष्यति ॥ ११० ॥

इति श्रीचाणक्यशतकं समाप्तम्।

शान्तिशतकम्।

नमस्यामो देवान् ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः।
फलं कर्मायत्तं किममरगणैः किञ्च विधिना
नमस्तत् कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ १ ॥

Digitized by Google

कुटुम्बमासाद्य कुतोऽर्थसञ्चयः ?
कुपुत्रमासाद्य कुतो जलाञ्जलिः ? ।
कुगेहिनीं प्राप्य गृहे कुतः सुखं ?
कुशिष्यमध्यापयतः कुतो यशः ? ॥ ६५ ॥

कूपोदकं वटच्छाया श्यामा स्त्री चेष्टकालयम् ।
शीतकाले भवेदुष्णं ग्रीष्मकाले च शीतलम् ॥ ६६ ॥

विषं चंक्रमणं रात्रौ विषं राज्ञोऽनुकूलता ।
विषं स्त्रियोऽप्यन्यहृदो विषं व्याधिरवीक्षितः ॥ ६७ ॥

दुरधीता विषं विद्या अजीर्णे भोजनं विषम् ।
विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम् ॥ ६८ ॥

प्रदोषे निहतः पन्थाः पतिता निहताः स्त्रियः ।
अल्पबीजं हतं क्षेत्रं भृत्यदोषाद् हतः प्रभुः ॥ ६९ ॥

हतमश्रोत्रियं श्राद्धं हतो यज्ञस्त्वदक्षिणः ।
हता रूपवती वन्ध्या हतं सैन्यमनायकम् ॥ १०० ॥

वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्वादवचोयुक्त एष राजपुरोहितः ॥ १०१ ॥

कुलशीलगुणोपेतः सर्वधर्मपरायणः ।
प्रवीणः प्रेषणाध्यक्षो धर्माध्यक्षो विधीयते ॥ १०२ ॥

आयुर्वेदकृताभ्यासः सर्वेषां प्रियदर्शनः ।
आर्यशीलगुणोपेत एष वैद्यो विधीयते ॥ १०३ ॥

सकृदुक्तगृहीतार्थो लघुहस्तो जिताक्षरः ।
सर्वशास्त्रसमालोकी प्रकृष्टो नाम लेखकः ॥ १०४ ॥

Digitized by Google

पादपानां भयं वातात् पद्मानां शिशिराद् भयम् ।
पर्वतानां भयं वज्रात् साधूनां दुर्जनाद् भयम् ॥ ८४ ॥
प्राज्ञे नियोज्यमाने तु सन्ति राज्ञस्त्रयो गुणाः ।
यशः स्वर्गनिवासश्च विपुलश्च धनागमः ॥ ८५ ॥
मूर्खे नियोज्यमाने तु त्रयो दोषा महीपतेः ।
अयशश्चार्थनाशश्च नरके गमनं तथा ॥ ८६ ॥
बहुभिर्मूर्खसङ्घातैरन्योन्यपशुवृत्तिभिः ।
प्रच्छाद्यन्ते गुणाः सर्वे मेघैरिव दिवाकरः ॥ ८७ ॥
यस्य चैत्वं नदीतीरे भार्य्या वापि परप्रिया ।
पुत्रस्य विनयो नास्ति मृत्युरेव न संशयः ॥ ८८ ॥
असम्भाव्यं न वक्तव्यं प्रत्यक्षमपि दृश्यते ।
शिला तरति पानीयं गीतं गायति वानरः ॥ ८९ ॥
सुभिक्षं कृषके नित्यं नित्यं सुखमरोगिणि ।
भार्य्या भर्तुः प्रिया यस्य तस्य नित्योत्सवं गृहम् ॥९० ॥
हेला स्यात् कार्यनाशाय बुद्धिनाशाय निर्धनम् ।
याचना माननाशाय कुलनाशाय भोजनम् ॥ ९१ ॥
सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति छाया केन निवार्यते ? ॥ ९२ ॥
प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ? ॥ ९३ ॥
नदीकूले च ये वृक्षाः परहस्तगतं धनम् ।
कार्यं स्त्रीगोचरो यत् स्यात् सर्वं तद्विफलम्भवेत् ॥ ९४ ॥

Digitized by Google

कोऽतिभारः समर्थानां ? किं दूरं व्यवसायिनाम् ?
को विदेशः सविद्यानां ? कः परः प्रियवादिनाम् ? ॥७३॥
आपदां कथितः पन्था इन्द्रियाणामसंयमः।
तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम् ॥ ७४ ॥
नच विद्यासमो बन्धुर्न च व्याधिसमो रिपुः।
न चापत्यसमः स्नेहो नच दैवात् परं बलम् ॥ ७५ ॥
समुद्रावरणा भूमिः प्राकारावरणं गृहम्।
नरेन्द्रावरणा देशाश्चरित्रावरणाः स्त्रियः ॥ ७६ ॥
घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्।
तस्माद् घृतञ्च वह्निञ्च नैकत्र स्थापयेद्बुधः ॥ ७७ ॥
आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः॥ ७८ ॥
जीर्णमन्नं प्रशंसीयात् भार्याञ्च गतयौवनाम्।
रणात् प्रत्यागतं शूरं शस्यञ्च गृहमागतम् ॥ ७९ ॥
असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः।
सलज्जा गणिका नष्टा निर्लज्जाश्च कुलस्त्रियः॥ ८० ॥
अवंशपतितो राजा मूर्खपुत्रश्च पण्डितः।
अधनेन धनं प्राप्य तृणवन्मन्यते जगत् ॥ ८१ ॥
ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनम्।
शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते ॥ ८२ ॥
पुस्तकस्था तु या विद्या परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥ ८३ ॥

Digitized by Google

दुर्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलम् ॥ ६२ ॥
यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥ ६३ ॥
शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥ ६४ ॥
सद्यो मांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकञ्चैव सद्यः प्राणकराणि षट् ॥ ६५ ॥
सिंहादेकं बकादेकं षट् शुनस्त्रीणि गर्दभात् ।
वायसाच्चतुः शिक्षेत् चत्वारि कुक्कुटादपि ॥ ६६ ॥
प्रभूतमल्पकार्यं वा यो नरः कर्तुमिच्छति ।
सर्वारम्भेण तत् कुर्यात् सिंहादेकं प्रकीर्त्तितम् ॥ ६७ ॥
सर्वेन्द्रियाणि संयम्य बकवत् पतितो जनः ।
कालदेशोपपन्नानि सर्वकार्याणि साधयेत् ॥ ६८ ॥
बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः ।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः ॥ ६९ ॥
अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्दभात् ॥ ७० ॥
गूढमैथुनधर्मञ्च काले काले च संग्रहम् ।
अप्रमादमनालस्यं चतुः शिक्षेत वायसात् ॥ ७१ ॥
युद्धञ्च प्रातरुत्थानं भोजनं सह बन्धुभिः ।
स्त्रियमापद्गतां रक्षेच्चतुः शिक्षेत कुक्कुटात् ॥ ७२ ॥

Digitized by Google

वस्त्रहीनस्त्वलङ्कारो घृतहीनञ्च भोजनम् ।
स्तनहीना च या नारी विद्याहीनञ्च जीवनम् ॥ ५१ ॥
भोज्यं भोजनशक्तिश्च रतिशक्तिर्वराः स्त्रियः ।
विभवो दानशक्तिश्च नाल्पस्य तपसः फलम् ॥ ५२ ॥
पुत्रप्रयोजना दाराः पुत्रः पिण्डप्रयोजनः ।
हितप्रयोजनं मित्रं धनं सर्व्वप्रयोजनम् ॥ ५३ ॥
दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः ।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः ॥ ५४ ॥
शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो न हि सर्व्वत्र चन्दनञ्च वने वने ॥ ५५ ॥
अशोच्यो निर्धनः प्राज्ञोऽशोच्यः पण्डितबान्धवः ।
अशोच्या विधवा नारी पुत्रपौत्रप्रतिष्ठिता ॥ ५६ ॥
अविद्यः पुरुषः शोच्यः शोच्यं मैथुनमप्रजम् ।
निराहाराः प्रजाः शोच्याः शोच्यं राज्यमराजकम् ॥ ५७ ॥
कुलीनैः सह सम्पर्कं पण्डितैः सह मित्रताम् ।
ज्ञातिभिश्च समं मेलं कुर्वाणो न विनश्यति ॥ ५८ ॥
कष्टा वृत्तिः पराधीना कष्टो वासो निराश्रयः ।
निर्धनो व्यवसायश्च सर्वकष्टा दरिद्रता ॥ ५९ ॥
तस्करस्य कुतो धर्म्मो दुर्जनस्य कुतः क्षमा ।
वेश्यानाञ्च कुतः स्नेहः कुतः सत्यञ्च कामिनाम् ॥ ६० ॥
प्रेषितस्य कुतो मानं कोपनस्य कुतः सुखम् ।
स्त्रीणां कुतः सतीत्वञ्च कुतो मैत्री खलस्य च ॥ ६१ ॥

Digitized by Google

ऋणशेषोऽग्निशेषश्च व्याधिशेषस्तथैव च।
पुनश्च वर्द्धते यस्मात्तस्मात् शेषं हि कारयेत्॥ ४० ॥
चिन्ताज्वरो मनुष्याणां वस्त्राणामातपो ज्वरः।
असौभाग्यं ज्वरः स्त्रीणामश्वानां मैथुनं ज्वरः ॥ ४१ ॥
अस्ति पुत्रो वशे यस्य भृत्यो भार्य्या तथैव च।
अभावे सति सन्तोषः स्वर्गस्थोऽसौ महीतले॥ ४२ ॥
दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः।
ससर्पे च गृहे वासो मृत्युरेव न संशयः॥ ४३ ॥
माता यस्य गृहे नास्ति भार्या चाप्रियवादिनी।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥ ४४ ॥
ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी।
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ॥ ४५ ॥
कोकिलानां स्वरो रूपं नारीरूपं पतिव्रता।
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम्॥ ४६ ॥
अविद्याजीवनं शून्यं दिक् शून्या चेदबान्धवा।
पुत्रहीनं गृहं शून्यं सर्वशून्या दरिद्रता॥ ४७ ॥
अदाता वंशदोषेण कर्मदोषाद्दरिद्रता।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता॥ ४८ ॥
गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेको गुरुः स्त्रीणां सर्वत्राभ्यागतो गुरुः॥ ४९ ॥
अतिदर्पे हता लङ्का अतिमाने च कौरवाः।
अतिदाने बलिर्बद्धः सर्वमत्यन्तगर्हितम्॥ ५० ॥

Digitized by Google

आपदर्थं धनं रक्षेत् दारान् रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥ २९॥
परदारं परद्रव्यं परीवादं परस्य च।
परीहासं गुरोः स्थाने चापल्यञ्च विवर्जयेत्॥ ३०॥
त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥ ३१॥
चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान्।
नासमीक्ष्य परं स्थानं पूर्व्वमायतनं त्यजेत्॥ ३२॥
लुब्धमर्थेन गृह्णीयात् क्रुद्धमञ्जलिकर्म्मणा।
मूर्खं छन्दोऽनुवृत्तेन तथा तथ्येन पण्डितम्॥ ३३
अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।
वञ्चनञ्चापमानञ्च मतिमान् न प्रकाशयेत्॥ ३४
धनधान्यप्रयोगेषु तथा विद्यागमेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सदा भवेत्॥ ३५॥
धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत्॥ ३६॥
यस्मिन् देशे न सम्मानं न प्रीतिर्न च बान्धवाः।
न च विद्यागमः कश्चित् तं देशं परिवर्जयेत्॥ ३७॥
मनसा चिन्तितं कार्य्यं वचसा न प्रकाशयेत्।
अन्यलक्षितकार्य्यस्य यतः सिद्धिर्न जायते॥ ३८॥
कुदेशञ्च कुवृत्तिञ्च कुभार्य्यां कुनदीं तथा।
कुद्रव्यञ्च कुभोज्यञ्च वर्जयेत्तु विचक्षणः॥ ३९॥

Digitized by Google

परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ १८ ॥
सकृद् दुष्टञ्च मित्रं यः पुनः सन्धातुमिच्छति ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ १९ ॥
न विश्वसेदविश्वस्तं मित्रञ्चापि न विश्वसेत् ।
कदाचित् कुपितं मित्रं सर्व्वदोषं प्रकाशयेत् ॥ २० ॥
जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे ।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये ॥ २१ ॥
उपकारगृहीतेन शत्रुणा शत्रु मुद्धरेत् ।
पादलग्नं करस्थेन कण्टकेनेव कण्टकम् ॥ २२ ॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणेन हि जानाति मित्राणि च रिपूंस्तथा ॥ २३ ॥
दुर्ज्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥ २४ ॥
दुर्ज्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सः ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ २५ ॥
सर्पः क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः ।
मन्त्रौषधिवशः सर्पः खलः केन निवार्य्यते ॥ २६ ॥
नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम् ।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ॥ २७ ॥
हस्ती हस्तसहस्रेण शतहस्तेन वाजिनः ।
शृङ्गिणो दशहस्तेन स्थानत्यागेन दुर्ज्जनः ॥ २८ ॥

Digitized by Google

रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ७ ॥
नक्षत्रभूषणं चन्द्रो नारीणां भूषणं पतिः ।
पृथिवीभूषणं राजा विद्या सर्व्वस्य भूषणम् ॥ ८ ॥
माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥ ९ ॥
वरमेको गुणी पुत्त्रो न च मूर्खशतैरपि ।
एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि ॥ १० ॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताड़येत् ।
प्राप्ते तु षोड़शे वर्षे पुत्त्रं मित्रवदाचरेत् ॥ ११ ॥
लालने बहवो दोषास्ताड़ने बहवो गुणाः ।
तस्मात् पुत्त्रञ्च शिष्यञ्च ताड़येन्नतु लालयेत् ॥ १२ ॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्वं सुपुत्त्रेण कुलं यथा ॥ १३ ॥
एकेनापि कुवृक्षेण कोटरस्थेन वह्निना ।
दह्यते तद्वनं सर्वं कुपुत्त्रेण कुलं यथा ॥ १४ ॥
दूरतः शोभते मूर्खो लम्बशाटपटावृतः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥ १५ ॥
विषादप्यमृतं ग्राह्यममेध्यादपि काञ्चनम् ।
नीचादप्युत्तमां विद्यां स्त्रीरत्नं दुष्कुलादपि ॥ १६ ॥
उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ १७ ॥

श्लोका लोकस्य भूत्यै शतमिति रचिताः श्रीमयूरेण भक्त्या
युक्तश्चैतान् पठेद्यः सकृदपि पुरुषः सर्व्वपापैर्विमुक्तः ।
आरोग्यं सत्कवित्वं मतिमतुलबलं कीर्त्तिमायुः प्रकर्षं
विद्यामैश्वर्य्यमर्थं सुखमपि लभते सोऽत्र सूर्य्यप्रसादात् ॥ १०१ ॥

इति महाकवि श्रीमयूरभट्टकृतं सूर्य्यशतकं समाप्तम् ।

चाणक्यशतकम् ।

नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ।
सर्व्वबीजमिदं शास्त्रं चाणक्यं सारसंग्रहम् ॥ १ ॥
मूलसूत्रं प्रवक्ष्यामि चाणक्येन यथोदितम् ।
यस्य विज्ञानमात्रेण मूर्खो भवति पण्डितः ॥ २ ॥
विद्वत्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्व्वत्र पूज्यते ॥ ३ ॥
पण्डिते च गुणाः सर्व्वे मूर्खे दोषा हि केवलम् ।
तस्मान्मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते ॥ ४ ॥
मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत् ।
आत्मवत् सर्व्वभूतेषु यः पश्यति स पण्डितः ॥ ५ ॥
किं कुलेन विशालेन गुणहीनस्तु यो नरः ।
अकुलीनोऽपि शास्त्रज्ञो दैवतैरपि पूज्यते ॥ ६ ॥

Digitized by Google

आपो नाकापगाया अपि कलुषमुषो मज्जतां नैव यत्र
त्रातुं यातेऽन्यलोकान् स दिशतु दिवसस्यैकहेतुर्हितं वः ॥ ९५ ॥
एतत्पातालपङ्कप्लुतमिव तमसा साकमुद्गाढ़मासी
दप्रज्ञाताप्रतर्क्यं निरवगति तथालक्षणं सुप्तमन्तः।
यादृक् सृष्टेः पुरस्तान्निशि निशि निखिलं जायते तादृगेव
त्रैलोक्यं यद्वियोगादवतु रविरसौ सर्गतुल्योदयो वः ॥ ९६ ॥
द्वीपे योऽस्ताचलोऽस्मिन् भवति खलु स एवापरत्रोदयाद्रिः
या यामिन्युज्ज्वलेन्दुद्युतिरिह दिवसोऽन्यत्र दीप्तातपः सः।
यद्वश्यौ देशकालाविति हि नियमतो नोभयं देशकाला
वव्यात्सप्रभुलाञ्छितभुवनहितो हेतुरह्नामिनो वः ॥ ९७ ॥
व्यग्रैरुग्रग्रहोडुग्रसनगुरुतरैर्नोसमग्रैरुदग्रैः
प्रत्यग्रैरीषदुग्रैरुदयगिरिगतो गोगणैर्गौरयन् गाम्।
उद्दामार्चिर्विलीनामरनगरनगग्रामगर्भामिवाक्राम्
न्यग्रेश्रेयोविधत्ते क्षपयतु गहनं स ग्रहग्रामणीर्वः ॥ ९८ ॥
योनिः साम्नां विधाता मधुरिपुरजितो धूर्जटिः शङ्करोऽसौ
मृत्युः कालोऽलक्ष्म्यायाः पतिरपि धनदः पावको जातवेदाः
इत्थं संज्ञा हविस्वादिवदमृतभुजां या यदृच्छाप्रवृत्ताः
स्तासामेकोऽभिधेयस्तदनुगुणगणो यः स सूर्योऽवताद्वः ॥ ९९ ॥
देवः किं बान्धवः स्यात्प्रियसुहृदथवाचार्य आहोस्विदार्यो
रक्षा चक्षुर्नु दीपो गुरुरुत जनको जीवितं बीजमोजः।
एवं निर्णीयते यः क इव न जगतां सर्वदा सर्वदोऽसौ
सर्वाकारोपकारी दिशतु दशशताभीषुरभ्यर्थितं वः ॥ १०० ॥

Digitized by Google

नाकौकः प्रत्यनीकक्षतिपटुमहसां वासवाग्नेयराज्ञां
सर्वेषां साधुपातां जगदिदमदितेरात्मजत्वे समेऽपि।
येनादित्याभिधानं निरतिशयगुणे मात्मनि न्यस्तमस्तु
स्तुत्यस्त्रैलोक्यवन्द्यैस्त्रिदशमुनिगणैः सोंऽशुमान् श्रेयसे वः ॥९०

भूमिं धाम्नोऽभिवृष्ट्या जगति जलमयीं पावनीं संस्मृताव
प्याग्नेयीं दाहशक्तिं मुहुरपि यजमानात्मिकांप्रार्थितानाम्।
लीलामाकाश एवामृतकरघटितां ध्वान्तपक्षस्य पर्व
ण्येवं सूर्योऽष्टभेदो भव इव भवतः पातु बिभ्रत् स्वमूर्त्तिम् ।९१॥

प्राक्कालोन्निद्रपद्माकरपरिमलनाविर्भवत्पादशोभो
भक्त्यात्यन्तोरुखेदोऽप्रतिर्दिवि विनतासूनुना नीयमानः।
समाक्रामन्नाशापरान्तान्यधिकमधरयन् यो जगन्ति स्तुतोऽलं
देवैर्देवः सपायादपर इव मुरारातिरह्नां पतिर्वः ॥ ९२ ॥

यः स्रष्टापां पुरस्तादचलवरसमभ्युन्नतेर्हेतुरेको
लोकानां यस्त्रयाणां स्थित उपरिपदे दुर्विलंघ्येन धाम्ना।
स्वः सिद्धैः प्रसन्नद्युतिशुभचतुराशामुखस्ताद्विभक्तो
द्वे धा वेधा इवाविष्कृतकमलरुचिः सोऽर्चिषामाकरो वः ॥९३॥

साद्रिद्यावीनदीकादिशति दशदिशो दर्शयन् प्राग् दृशो यः
सादृश्यं दृश्यते नो सदशशतदृशि त्रैदशेयस्य देशे।
दीर्घांशुर्वः स दिश्यादशिवयुगदशा दर्शितद्वादशात्मा
शंशास्वप्रांश्च यस्याशयविदतिशयं दन्दशूकासनाद्यः ॥ ९४ ॥

तीर्थानि व्यर्थकानि ह्रदनदसरसीनिर्झराम्भोजिनीनां
नीरुन्धन्तो नुदन्ति प्रतिदिनमशुभं श्वभ्रपातानुबन्धि।

कर्त्ता निःश्रेयसानामपि मतु खलु यः केवलं वासराणां
सोऽव्यादेकोयमेच्छाविहितबहुतृहद्दिग्धकार्यैाय मा वः ॥ ८४॥
लोठल्लोष्टाविचेष्टः श्रितशयनतलो निःसहीभूतदेहः
सन्देही प्राणितव्ये सपदिदशदिशः प्रेक्षमाणोऽन्धकाराः।
निःश्वासायाससिन्नः परमपरवशोजायते जीवलोकः
शोकेनान्यत्र लोकाभ्युदयलतिगते यत्र सोऽर्कोऽवताद्वः ॥८५॥
क्षामक्षोलोपिलोकांस्तनुपत्ततिक्षतावाक्षितः खैर्यकोटीं
वृक्षां दृष्टिं विजिह्मां विदधदपि करोत्यन्तरत्यन्तभद्राम्।
यस्तापस्यापि हेतुर्भवति नियमिनामेकनिर्वाणदायी
भूयात्सप्रागवस्थाधिकतरपरिणामोदयोऽर्कः श्रिये वः ॥८६॥
व्यापन्नर्तुर्नकालो व्यभिचरति फलं नौषधीर्वृष्टिरिष्टा
नेष्टैस्तुष्यन्ति देवा नहि वहति मरुन्निर्मलाभानि भानि।
आशाःशान्तानभिन्नत्यवधिमुदधयोविभ्रति क्षाभृतक्ष्मां
यस्मिंस्त्रैलोक्यमेवं न चलतितपतिस्तात् सहुर्यः श्रिये वः॥ ८७
कैलासे कृत्तिवासा विहरतिविरहत्रासदेहोढ़कान्तः
श्रान्तः शेते महाहावधिजलधिविनाच्छद्मना पद्मनाभः।
योगीद्योगैकतानो गमयति सकलं वासरं स्वं स्वयम्भू
र्भूरित्रैलोक्य चिन्ताभृतिभुवनविभो यत्र भास्वान् स वोऽव्यात्८८
एतद्यन्मण्डलं खे तपति दिनकृतस्तान्नृचोर्चींषि यानि
द्योतन्ते तानि सामान्ययमपि पुरुषोमण्डलेऽस्मिन्यजूंषि।
एवं यं वेद वेदत्रितयमयमयं वेद वेदीसमग्रो
वर्गःस्वर्गापवर्गं प्रकृतिरविकृतिः सोऽस्तु सूर्यः श्रियेवः॥८९॥

Digitized by Google

उद्यद्यूद्यानवाप्यां बहुलतमतमः पङ्कपूरं विदार्य
प्रोज्झितं पद्मपार्श्वेष्वविमलमरुणच्छायया विस्फुरन्त्या ।
कल्याणानि क्रियाद्वः कमलमिव महन्मण्डलं चण्डभानोः
रन्वीतं दृष्टमिद्धैस्तोरसकृद् अलिकुलाकारिणा राहुणा यत् ॥ ७९ ॥
चक्षुर्दक्षद्विषो यन्न तु दहति पुरा पूरयत्येव कामं
नास्तं जुष्टं मरुद्भिर्यदिह नियमिनां यानपात्रं भवाब्धौ ।
यद्दीतभ्रान्तिभाक्त्वद्भ्रमदपि जगतां भ्रान्तिमभ्रान्ति हन्ति
प्रध्वस्ताव्याधि कुर्वत्क्रियमयचहिताधायि तन्मण्डलं वः ॥ ८० ॥
सिद्धैः सिद्धान्तमिश्रं श्रितविधिविबुधैश्चारणैश्चाटुगर्भं
गीत्वा गन्धर्वमुख्यैर्मुहुरहिपतिभिर्यातुधानैर्यतात्मा ।
साध्यैः साध्यैर्मुनीन्द्रैर्मुदिततममनो मोक्षिभिः पक्षपातात्
प्रातः प्रारभ्यमाणस्तुतिरवतु रविर्विम्बवल्योदयो वः ॥ ८१ ॥
भासामासन्नभावाधिकतरपटुलश्चक्रवालस्य तापात्
छेदाद्विच्छिन्नमच्छस्तुरगखुरपुटन्यासनिःशङ्कटङ्कैः ।
निःसङ्गस्यन्दनाङ्ग भ्रमणनिकषणात्पातु वस्त्रिप्रकारं
तप्तांशुस्तप्तरीचापर इव परितः पर्यटन् हाटकाद्रिम् ॥ ८२ ॥
नोद्युक्तं नाकमद्या विकसितकनकाम्भोरुहाभ्राजितन्तुं
मुष्टानैवोपभोग्या भवति भृशतरं नन्दनोद्यानलक्ष्मीः ।
नोन्मृङ्गाणि द्रुतानि द्रुतममरगिरेः कामधौतानि धौता
नीचं धाम व्युमार्गेनन्दयति दयया यत्र सोऽव्यादिनो वः ॥ ८३ ॥
ध्वान्तस्यैवान्तहेतुर्न भवति मलिनैकात्मनः पाप्मनोऽपि
प्राक्पादोपान्तभाजां जनयति नपरम्पङ्कजानां प्रबोधम् ।

Digitized by Google

शुद्धज्ञानैकनिधानं धरविरससुधापानपात्रं मरुत्वद्
दिग्भागोद्यस्य भारां सततमविकलं मण्डलं मङ्गलं वः ॥७३॥
वेलावर्द्धिष्णुसिन्धोः फलमिव ललितार्वैर्गतोऽयमपारेषु
लोकोद्धिवलक्षितफलमिवमिव मधोरागमसन् महांसि।
प्रातः पूर्वोऽग्रभागे प्रथममयतु गिरःशेखरीभूतमद्रेः
पौरस्त्योन्नभस्तिस्तिमिततमतमः खण्डनं मण्डलं वः॥ ७४ ॥
प्रत्युमस्तमहेमोज्ज्वलरुचिरचलः पद्मरागेव येन
न्यायः विश्वपुष्पं यदलिकुलसितैरम्बरेन्दीवरस्य।
कालव्यालस्य चिह्नं कलिततमसहोमूर्ध्नि रत्नं महत्यत्
दीप्तांशोः प्रातरव्यादरविकलअमलमण्डलंमङ्गलं वः॥ ७५ ॥
कस्नाता तारकाणां पतति तनुरवश्यायविन्दुर्यदेन्दु
निद्राणाहवक्त्रारारेरुषसि सुररिपोःकौस्तुभोनोऽमशिरः।
वह्नेः सापह्नुतेव द्युतिरुदयमते यत्र तन्मण्डलं वो
मार्तण्डीयं पुनीयाद्दिवि भुवि च तमांसीव मुष्णन् महांसि।७६।
यत्प्राच्यांप्राक्प्रकास्ति प्रभवति च यतः प्राणवातुर्जिहाना
दिवं मध्ये यदन्तो भवति ततदृष्टा येन पीताप्यलोऽपः।
यत्पर्य्यायेण लोकानवति च अमतां जीवितं नय तद्वो
विश्वानुग्राहि विश्वंस्त्रजदपि च रवेर्मण्डलं मुक्तयेऽस्तु॥ ७७ ॥
शुष्यत्त्वूढान्धकारामकरवसतयीमाररीणां खलोनां
येनोत्ताः स्फुटन्तस्तडिति तिलतुलां यान्तगोष्पासुगान्ते।
तवक्तांशोरकाण्डत्रिभुवनदहनाशङ्कया धाम लक्ष्मं
संहत्यालोकमात्रं प्रलघुविदधतस्तात्सुदे मण्डलं मः॥ ७८ ॥

Digitized by Google

क्रेषाक्रन्दो हरीणां सुरभिखुरहतैः पूरयन्नेमिनादै
यस्याव्याप्तोऽप्रभानोः स दिवि भुवि यथा व्यक्तमिक्रोरथो वः ॥ ६८ ॥
एकाह्नेनैव दीर्घां त्रिभुवनपदवीं लङ्घयन् यो लघिष्ठः
पृष्ठे मेरोर्गरीयान्दलितमणिदृषत्स्निग्धि पिंषन् शिरांसि
यः सर्वस्योपरिष्टादथच पुनरधस्तादिवास्ताद्रिमूर्ध्नि
अप्नस्याव्यात्स एवं दुरधिगमपरिस्पन्दनः स्यन्दनो वः ॥ ६९ ॥
निष्पन्दानां विमानामखिलवितत दिवां देववृन्दारकाणां
वृन्दैरानन्दसान्द्रोद्यममपि वहतां विन्दतां वन्दितुं नो ।
मन्दाकिन्याममन्दः पुलिनभुवि मृदुर्मन्दरे मन्दराभे
मन्दारैर्मण्डितोऽरं दधदपि दिनकृत्स्यन्दनस्तान्मुदे वः ॥ ७० ॥
चक्री चक्रारपंक्तिं हरिरपि च हरीन् धूर्जटिर्धूर्ध्वजाग्रान्
अक्षं नक्षत्रनाथोऽरुणमपि वरुणः कूबराग्रं कुबेरः ।
रंहः सङ्घः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोन्वहमहिमरुचेः सोऽवतात्स्यन्दनो वः ॥ ७१ ॥
नेत्राहीनेन मूले विहितपरिकरः सिद्धसाध्यैर्मरुद्भिः
पादोपान्ते स्तुतोऽलं वलिहरिरभसाकर्षणाबद्धवेगः ।
भ्राम्यन् व्योमाम्बुराशावशिशिरकिरणस्यन्दनः सन्ततं वो
दिश्याल्लक्ष्मीमतुल्यामतुलितमहिमेवापरो मन्दराद्रिः ॥ ७२ ॥

मण्डलवर्णनम् ।

यज्ज्यायो बीजमह्नामपहृततिमिरं चक्षुषामञ्जनं यत्
यद्द्वारं मुक्तिभाजां यदखिलभुवनज्योतिषामेकमोकः ।

उत्कीर्णस्वर्णरेणुद्रुतखुरदलितापार्श्वयोः ग्रावदृग्भैः
अश्रान्तभ्रान्तचक्रभ्रमनिशितमिलन्नेमि निम्ना भरेण ।
मेरोर्मूर्धन्यघं वो विघटयतु रवेरेकवीथी रथस्य
स्रोतोदत्ताम्बुरिक्तप्रकटितपुलिनोधूसरा स्वर्धुनी वः ॥ ६३ ॥
ध्वान्तौघध्वंसदीक्षाविधिगुरु वहता प्राक्सहस्रं कराणां
अर्वाञ्चा यो गरिम्णः पदमतुलमुपानीयताध्यासनेन ।
सश्रान्तानां नितान्तं भरमिव महतामक्षमाणां विसोढुं
स्कन्धात् स्कन्धं व्रजन् वो वृजिनविजितये भास्वतः स्यन्दनोऽस्तु॥६४
योऽक्षीभूतान् युगस्य ग्रसितुमिवपुरो दन्दशूकान् दधानो
द्वेधाव्यस्ताम्बुवाहावलिविहितबृहत्पक्षविक्षेपशोभः
सावित्रः स्यन्दनोऽसौ निरतिशयरयप्रीणितानूरुरेनः
क्षेपीयो वो गरुत्मानिव हरतु हरीच्छाविधेयप्रचारः ॥ ६५॥
धूर्ध्वस्ताग्र्यग्रहाणि ध्वजपटपवनान्दोलितेन्दूनि दूरं
राहौ ग्रासाभिलाषादनुसरति पुनर्दत्तचक्रव्यथानि ।
भ्रान्ताश्वश्वासहेलाधुतविबुधधुनीनिर्झराम्भांसि भद्रं
देयासुर्वो दवीयो दिवि दिवसपतेः स्यन्दनप्रस्थितानि ॥६६॥
अक्षे रक्षां निबध्य प्रतिसरवलयैर्योजयन्त्यो युगाग्रं
धूस्तम्भे दग्धधूपाः प्रतिहतसुमनो गोचरे कूबरस्य ।
चर्चाञ्चक्रे ददत्यो मलयजरजसा सिद्धसाध्यस्त्रिसन्ध्यं
वन्दन्तेयं द्युमार्गे स दहतु दुरितान्यंशुमत्स्यन्दनो वः ॥६७॥
नन्तुं नाकालयानामनिशमुपनताम्पद्धतिः पंक्तिरेव
मोदे नक्षत्रराशेरत्नशरयमिलच्चक्रपिष्टस्य धूलिः ।

पूर्वं प्रष्ठो रथस्य क्षितिभृदधिपतीन् दर्शयंस्त्रायतां व
स्त्रैलोक्यास्थानदानोद्यतदिवसपतेः प्राक् प्रतीहारपालः ॥५७॥
यस्मिन् जातं विकाशोच्चणकमलवनं भासिनो भासि वक्रे
तातं नत्वाश्वपार्श्वान्नय यम महिषं राक्षसा वीक्षिताः स्व ।
सप्तान् सिञ्च प्रचेतः पवन भज जवं वित्तपा वेदितस्त्वं
वन्देशर्व्वेति जल्पन् प्रतिदिशमधिपान् पातु पूष्णोऽग्रणीर्वः॥५८
पाशानाशान्तपालादरुण वरुणतो मा ग्रहीः प्रग्रहार्थं
तृष्णां कृष्णस्य चक्रे जहिहि नहि रथो याति मे नैकचक्रः ।
योक्तुं योग्यं किमुच्चैःश्रवसमभिलषस्यष्टमं हृत्रशतो
स्त्यक्तान्यापेचविश्वोपकृतिरिरिति रविः शास्ति यं सोऽवताद्वः ।५९।
नोमूर्च्छां छिन्नवाञ्छः श्रमविवशवपुर्नैवनाप्यास्य शोषी
पाम्यः पथ्यतराणि चपयतु भवतां भास्वतोऽग्रेसरः सः ।
यः संश्रित्यत्रिलोकीमटति पटुतरैस्ताप्यमानो मयूखैः
आरादारामरेखामिवहरितमणिश्यामलामश्वपंक्तिम् ॥ ६० ॥
शीर्दन्तोऽन्तर्निमज्जज्जड़खुरमुषलाः सैकते नाकनद्याः
स्कन्दन्तःकन्दराली कनकशिखरिणो मेखलासु स्खलन्तः ।
दूरं दूर्वास्थलोत्का मरकतदृषदि स्थास्नवो यत्र याताः
पूष्णोऽश्वाः पूरयंस्तैस्तदवतु जवनैर्लङ्घितेनाग्रगो वः ॥ ६१॥
पीनोरःप्रेरिताभ्रैश्चरमखुरपुटाग्रस्थितैः प्रातरद्रा
वादीर्घाङ्गैरुदस्तो हरिभिरपगतासङ्गनिःशब्दचक्रः ।
उत्तानानूरुमूर्धावनतिहठभवद्विप्रतीपप्रणामः
प्राक्श्रेयो विधत्तांसवितुरवतरन् व्योमवीथीं रथो वः ॥६२ ।

Digitized by Google

दत्तार्घैर्दूरनम्रैर्वियति विनयतो वीज्यितः सिद्धसङ्घैः
शम्यैर्यः सारथिर्वः स दशशतरुचेः सातिरेकं करोतु।
आपीय प्रातरेव प्रततहिमपयः स्यन्दिनीरिन्दुभासो
यः काष्ठादीपनोऽग्रे जडित इव भृशं सेवते पृष्ठतोऽर्कम्॥५२॥
मुञ्चन् रश्मीन् दिनादौ दिनगमसमये संहरंश्च स्वतन्त्रः
लोके प्रख्यातवीर्य्यो विरतहरिपदाक्रान्ति वक्त्राभियोगः।
कालोत्कर्षाद्यतुलं प्रसभमधिपतो योजयन् यो द्विजानां
सेवाप्रीतेन पूष्णा स्वसम इव कृतस्त्रायतां सोऽरुणो वः॥५३॥
ग्रात श्यामालताया: परशुरिव तमोऽरण्यवह्नेरिवार्चिः
प्राच्येवाग्रे गृहीतुं ग्रहकुमुदवनं प्रागुदस्तो ग्रहस्तः।
ऐक्यं भिन्दन् द्युभूम्योरवधिरिव विधातेव विश्वप्रबोधं
वाहानां वोविनिता व्यपनयतु विपन्नाम धामाधिपस्य॥ ५४ ॥
पौरस्त्यस्तोयदर्त्तोः पवन इव पतन् पावकस्येव धूमो
विश्वस्येवादिसर्गः प्रणव इव परं पावनं वेदराशेः।
सन्ध्यानृत्योत्सवेच्छोरिव मदनरिपोर्नन्दिनान्दीनिनादः
सौरस्याग्रेसुखं वो वितरतु विनतानन्दनः स्यन्दनस्य॥ ५५ ॥
पर्य्याप्तं तप्तचामीकरकटकतटेश्लिष्टशीतेतरांशो
रासीदत् स्यन्दनाश्वानुकृतिमरकते पद्मरागायमाणः।
यः सोत्कर्षां विभूषां कुरुत इव कुलक्ष्माभृदीशस्य मेरोः
एनां स्वल्पाय दूरं समयतु स गुरुः काद्रवेयद्विषो वः॥ ५६ ॥
नीत्वाश्वान् सप्तकक्ष्या इव नियमवशं वेत्रकल्पप्रतोदः
सूर्णं ध्वान्तस्य राशावितरजन इवोत्सारिते दूरभाजि।

हेलालोलं वहन्ती विषधरदमनस्याग्रजेनावकृष्टा
स्वर्वाहिन्याः सुदूरं जनितजवजवाः स्यन्दनस्य स्वनेन ।
निर्व्याजं तापमाने हरितिमनि निजैः स्फीतफेनाहितश्रीः
अश्वीयाश्वप्रपङ्क्तिः शमयतु बहुनिर्वापरा तापनी वः ॥ ४७ ॥
मार्गोपान्ते सुमेरोर्नुवति प्रणतो नाकधाम्नां निकाये
वीक्ष्य व्रीडावतीनां प्रतिकुहरमुखं किन्नरीणां मुखानि ।
सूतेऽसूयत्यपीषज्जडमतिवहतां कन्धरार्धैर्वलद्भिः
वाहानां व्यस्यताद्वः सममसमहरेर्हेषितं कल्मषाणि ॥ ४८ ॥
धुन्वन्तो नीरदालीर्निजरुचिहरिताः पार्श्वयोः पक्षतुल्याः
स्तानूत्तानैः खलीनैः खचितमुखरुचः श्चोतता लोहितेन ।
उड्डीयेव व्रजन्तो वियति गतिवशादर्कवाहाः क्रियासुः
क्षेमं हेमाद्रिहृद्यद्रुमशिखरशिरःश्रेणिशाखाशुका वः ॥ ४९ ॥

सारथिवर्णना ।

प्रातः शैलाग्ररङ्गे रजनिजवनिकापायसंलक्ष्यलक्ष्मीः
विक्षिप्यापूर्वपुष्पाञ्जलिमुडुनिकरं सूत्रधारायमाणः ।
यामेष्वङ्केष्विवाङ्कः कृतरुचिषु चतुर्ष्वेव यातः प्रतिष्ठा
मव्यात् प्रस्तावयन् वो जगदटनमहानाटिकां सूर्यसूतः ॥ ५० ॥
आक्रान्त्याकाशमानं पङ्गुमिव हरिणां वाहकोऽप्यूरुहीणां
भ्राम्यन्तं पक्षपाताज्जगति समरुचिः सर्वकर्मैकसाक्षी ।
शत्रुं नेत्रश्रुतीनामवजयति वयोज्येष्ठभावे समेऽपि
स्वाम्ना धाम्नां निधिर्यः सभवदघनुदे नूतनस्तादनूरुः ॥ ५१ ॥

Digitized by Google

अस्ताद्रीशोत्तमाङ्गे श्रितशशिनि तमः कालकूटे निपीते
याति व्यक्तिं पुरस्तादरुणकिसलये प्रत्युषः पारिजाते ।
उद्यन्त्या रत्नपीताम्बरविशदतरोद्वीक्षिता तीक्ष्णभानोः
लक्ष्मीर्लक्ष्मीरिवास्तु स्फुटकमलपुटोपाश्रया श्रेयसे वः ॥ ४२ ॥

नोदन्वान् जन्मभूमिर्न तदुदरभुवो बान्धवाः कौस्तुभाद्या
यस्याः पार्श्वो न पद्मं न च नरकरिपूरःस्थली वासवेश्म ।
तेजोरूपा परैव त्रिषु भुवनतटेष्वादधाना व्यवस्थां
सा श्रीः श्रेयांसि दिश्यादशिशिरमहसो मण्डलाग्रोद्गता वः ॥ ४३ ॥

अश्ववर्णना ।

रक्षन्त्वक्षुण्णहेमोपलपटलमलं लाघवादुत्पतन्तः
पातङ्गाः पङ्गुवर्गाजितपवनजवा वाजिनस्ते जगन्ति ।
येषां वीतान्यचिह्नोन्नयमपि वहतां मार्गमाख्याति मेरो
रुद्यन्नुद्दामदीप्तिद्युमणिमणिशिलावेदिकाजातवेदाः ॥ ४४ ॥

भ्रुष्टाः पृष्ठेंशुपातैरतिनिकटतया दत्तदाहातिरेकैः
एकाहाक्रान्तकृत्स्नत्रिदिवपथपृथुश्वासशोषाः श्रमेण ।
तीव्रोदन्वास्वरन्तामहितविहतये सप्तयः सप्तसप्ते
रभ्यासाकाशगङ्गाजलशवलगलावर्जिताश्वानना वः ॥ ४५ ॥

मत्वाऽन्यान् पार्श्वतोऽश्वान् स्फटिकतटदृषद्दृष्टदेहाद्द्रवन्ती
व्यस्तेऽह्न्यस्तसन्ध्याश्रयमिति मृदुपदा पद्मरागोपलेषु ।
सादृश्यात् दृश्यमूर्त्तिर्मरकततटदृषदि क्लिष्टसूता सुमेरोः
मूर्धन्यावृत्तिलब्धध्रुवगतिरवतु ब्रध्नवाहावली वः ॥ ४६ ॥

आसाद्यापाद्यते यं पुनरपि च जगद्यौवनं सद्य उद्यन्
उद्योतोद्योतितद्योर्द्युतु दिवसकृतो साववद्यानि वोऽद्य ॥ २६ ॥
आरालैश्चन्द्रकान्तैश्च्युततिमिरतया भानवास्तारकाणाम्
एणाङ्कालोकलोपादुपहतमहसामोषधीनां लयेन ।
आरादुत्प्रेक्ष्यमाणाक्षणमुदयतटान्तर्हितस्याहिमांशोः
आभा प्राभातकी वोऽवतु नतु नितरान्तावदाविर्भवन्ती ॥ २७ ॥
सानौ सा नोदयेनारुणितदलपुनर्यौवनानां वनानाम्
आलीमालोढ़पूर्वा परिहृतकुहरोपान्तनिम्नातनिम्ना ।
भावीभावोपशान्तिं दिशतु दिनपतेर्भासमाभा समाना
राजी राजीवरेणोः समसमयमुदेतीव यस्या वयस्या ॥ २८ ॥
उज्जृम्भाम्भोरुहाणां प्रभवति पयसां या श्रियै नोष्णतायै
पुष्णात्यालोकमात्रं नतु दिशति दृशां दृश्यमाना विघातम् ।
पूर्वाद्रेरेव पूर्वन्दिवमनु च पुनः पावनी दिङ्मुखानां
एनां स्येनीविभासौमुदतुनुतिपदैकास्पदं प्राक्तनी वः ॥ २९ ॥
वाचां वाचस्पतेरप्यचलभिदुचिता चार्यकाणां प्रपञ्चैः
वैरिञ्चानां तथोच्चारितरुचिर ऋचामाननानां चतुर्णाम् ।
उच्चेतावोसु वाच्यच्युतिशुचिचरितं यस्य नोच्चैर्विविच्य
प्राच्यं वर्चश्चकासच्चिरमुपचिनुतात्तस्य चण्डार्चिषो वः ॥ ४० ॥
मूर्द्ध्न्यद्रेर्धातुरागस्तरुषु किशलयो विद्रुमौघः समुद्रे
दिङ्मातङ्गोत्तमाङ्गेष्वभिनवनिहितः सान्द्रसिन्दूररेणुः ।
सीम्नि व्योम्नश्च हेम्नः सुरशिखरिभुवो जायते यः प्रकाशः
शोणिम्नाऽसौखरांशोरुषसि दिशतु वः शर्म्मशोभैकदेशः ॥ ४१ ॥

मीलच्चक्षुर्विजिह्मश्रुतिजडरसनं निघ्नितघ्राणवृत्ति
स्वव्यापाराक्षमत्वक् परिमुषित मनः श्वासमात्रावशेषम् ।
विस्रस्ताङ्गं पतित्वा स्वपदपहरतादप्रियं वोऽर्कजन्मा
कालव्यालावलीढं जगदगद इवोत्थापयन् प्राक् प्रतापः ॥ २१ ॥

निःशेषं नैशमम्भः प्रसभमपनुदन्नश्रुलेशानुकारि
स्तोकस्तोकापनीतारुणरुचिरचिरादस्तदोषानुषङ्गः ।
दाता दृष्टिं प्रसन्नां त्रिभुवननयनस्याशु युष्मद्विरुद्धं
बध्याद् ब्रध्नस्य सिद्धाञ्जनविधिरपरः प्राङ्मणोऽर्चिः प्रचारः ॥ २२ ॥

भूत्वा जम्भस्य भेत्तुः ककुभि परिभवारम्भभूः शुभ्रभानोः
बिभ्राणा बभ्रुभावं प्रसभमभिनवाम्भोजजृम्भा प्रगल्भा ।
भूषाभूयिष्ठशोभा त्रिभुवनभवनस्यास्य वैभाकरी प्राग्
विभ्रान्ति भ्राजमाना विभवतु विभवोद्भूतये सा विभा वः ॥ २३ ॥

संसक्तं सिक्तमूलादभिनवभुवनोद्यानकौतूहलिन्या
यामिन्या कन्यकेवामृतकरकलशावर्जितेनामृतेन ।
अर्कालोकः क्रियाद्वो मुदमुदयशिरश्चक्रवालालवालाद्
उद्यद्बालप्रवालप्रतिमरुचिरहः पादपप्राक्प्ररोहः ॥ २४ ॥

भिन्नं भासारुणस्य क्वचिदभिनवया विद्रुमाणां त्विषेव
भिन्नं नक्षत्ररत्नद्युतिनिकरकरालान्तरालं क्वचिच्च ।
अन्तर्निःशेषकृष्णश्रियमुदधिमिव ध्वान्तराशिं पिबंस्ता
दौर्वः पूर्वोऽप्यपूर्वोऽग्निरिव भवदघप्लुष्टयेऽर्कावभासः ॥ २५ ॥

गन्धर्वैर्गद्यपद्यव्यतिकरितवचो हृद्यमातोद्यवाद्यैः
यो देवो नारदाद्यैर्मुनिभिरभिनुतो वेदवेद्यैर्विभिद्य ।

आदध्यादन्धकारे रतिमतिशयिनीमावहन् वीक्षणानां
बालो लक्ष्मीमपारामपरइव गुहोऽहर्पतेरातपो वः ॥ २५ ॥
तीव्रं निर्वाणहेतुर्यदपि च विपुलं यत् प्रकर्षेण चाणु
प्रत्यक्षं यत् परोक्षं यदिह यदपरं नश्वरं शाश्वतञ्च ।
यत् सर्वस्य प्रसिद्धं जगति कतिपये योगिनो यद्विदन्ति
ज्योतिस्तद्द्विप्रकारं सवितुरवतु वो बाह्यमाभ्यन्तरञ्च ॥ २६ ॥
ज्योत्स्नांसाक्रान्तत्स्नपाण्डुद्युतितिमिरमसीशेषकल्माषमीषत्
जृम्भोद्भूतेन पिङ्गं सरसिजरजसा सन्ध्यया शोणशोचिः ।
प्रातः प्रारम्भकाले सकलमिव जगच्चित्रमुन्मीलयन्ती
कान्तिस्तीक्ष्णत्विषोऽक्ष्णांमुदमुपनयतान्तूलिकेवातुलां वः ॥२७॥
आयान्ती किं सुमेरोः सरणिररुणिता पाद्मरागैःपरागैः
आहोस्वित्स्वस्य माहारजनविरचिता वैजयन्ती रथस्य ।
माञ्जिष्ठी प्रष्ठवाहावलिविधुतशिरश्चामराली नु लोकैः
आशङ्क्यालोकितैवं सवितुरघनुदे स्यात् प्रभाते प्रभा वः ॥ २८॥
ध्वान्तध्वसं विधत्ते न तपति नितरां नातिरूपं व्यनक्ति
न्यक्त्वं नीत्वापि नक्तं न वितरतितरां तावदह्नस्त्विषं यः ।
स प्रातर्मा विरंसीदसकलपटिमा पूरयन् युष्मदाशा
माशाकाशावकाशावतरणतरुणप्रक्रमोऽर्कप्रकाशः ॥ २९ ॥
रत्नानां मण्डनाय प्रभवति नियतोद्देशलब्धावकाशं
वह्नेर्दावादि दग्धुं निजजड़िमतया कर्त्तुमानन्दमिन्दोः ।
यत्तु त्रैलोक्यभूषाविधिरघदहनं ह्लादिवृष्ट्याशु तद्वो
बाहुल्योत्पाद्य कार्याधिकतरमवतादेकमेवार्कतेजः ॥ ३० ॥

Digitized by Google

अश्यामः कालएको न भवति भुवनान्तेऽपि वीतेऽन्धकारे
सद्यः प्रालेयपादो न विलयमचलश्चन्द्रमाप्याभ्युपैति ।
बन्धः सिद्धाञ्जलीनां नहि कुमुदवनस्यापि यश्चोज्झिहाने
तत्प्रातः प्रेक्षणीयं दिशतु दिनपतेर्धाम कामाधिकं वः ॥ २० ॥
यत्कान्तिं पङ्कजानां न हरति कुरुते प्रत्युताधिक्यरम्यां
नो धत्ते तारकाभां तिरयति नितरामाशु यन्नित्यमेव ।
कर्त्तुं नालं निमेषं दिवसमपि परं यत्तदेकं त्रिलोक्याः
चक्षुः सामान्यचक्षुर्विसदृशमघभिद्भास्वतस्ताद्दृशीवः ॥ २१ ॥
क्ष्मां क्षेपीयः क्षपाभ्रः शिशिरतरलस्पर्शतर्षाहृतेव
द्रागाशा नेतुमाशाद्विरदकरसरः पुष्कराणां विबोधम् ।
प्रातः प्रोल्लङ्घ्य विष्णोः पदमपि घृणये वातिवेगाद्दवीय
स्युद्दामद्योतमाना दहतु दिनपतेर्दुर्निमित्तं द्युतिर्वः ॥ २२ ॥
नो कल्पापायवायोरदयरयदलत्क्ष्माधरस्यापि गम्या
गाढोद्गीर्णोज्ज्वलश्रीरहनि न रहिता नो तमःकज्जलेन ।
प्राप्तोत्पत्तिः पतङ्गान्न पुनरुपगता मोषमुष्णत्विषो वो
वर्तिः सैवान्यरूपा सुखयतु निखिलद्वीपदीपस्य दीप्तिः ॥ २३ ॥
निःशेषाशावपूरप्रवणगुरुगुणश्लाघनीयस्वरूपा
पर्य्याप्ता नोदयादौ दिनगमसमयोपप्लवेऽप्युन्नतैव ।
अत्यन्तं यानभिज्ञा क्षणमपि तमसा साकमेकत्र वस्तुं
ब्रध्नस्येद्धा रुचिर्वोरुचिरिव रुचितस्याप्तये वस्तुनोऽस्तु ॥ २४ ॥
बिभ्राणः शक्तिमाशु प्रशमितबलवत्तारकौर्जित्यगुर्वीं
कुर्वाणो लीलयाधः शिखिनमपि लसच्चन्द्रकान्तावभासम् ।

ते प्रावृष्यात्तपानातिशयरुज इवोद्दान्ततोया हिमर्त्तौ
मार्त्तण्डस्य प्रचण्डाश्चिरमशुभभिदे भीषवो वो भवन्तु ॥ १४ ॥
तन्वाना दिग्वधूनां समधिकमधुरालोकरम्यामवस्था
मारूढप्रौढ़िलेशोत्कलितकपिलिमालंकृतिः केवलेव ।
उज्जृम्भाम्भोजनेत्रद्युतिनि दिनमुखे किञ्चिदुन्निद्यमाना
श्मश्रुश्रेणीव तासां दिशतु दशशती शर्म घर्मत्विषो वः ॥ १५ ॥
मौलीन्दोर्मैषमोषीदृद्युतिमिति वृषभाङ्केन यः शङ्किनेव
प्रत्यग्रोद्घाटिताम्भोरुहकुहरगुहासुस्थितेनैव धात्रा ।
कृष्णेन ध्वान्तकृष्णस्तनुपरिभवत्रस्नुनेव स्तुतोऽलं
त्राणाय स्तात्तनीयानपि तिमिररिपोः स त्विषामुद्गमो वः ॥ १६ ॥
विस्तीर्णं व्योमदीर्घाः सपदि दश दिशोव्यस्तवेलाम्भसोऽब्धीन्
कुर्वद्भिर्दृश्यमानां नगनगरगणाभोगपृथ्वीञ्च पृथ्वीं ।
पद्मिन्युच्छ्वास्यते यैरुषसि जगदपि ध्वंसयित्वा तमिस्रा
मुस्रावि स्रंसयन्तु द्रुतमनभिमतं ते सहस्रत्विषो वः ॥ १७ ॥
अस्तव्यस्तत्वशून्यो निजरुचिरनिशानश्वरः कर्त्तुमीशो
विश्वं वेश्मेव दीपः प्रतिहततिमिरं यः प्रदेशे स्थितोऽपि ।
दिक्कालापेक्षयासौ त्रिभुवनमटतस्तिग्मभानोर्नवाख्यां
यातः शातक्रतव्यां दिशि दिशतु शिवं सोऽर्चिषामुद्गमो वः ॥ १८ ॥
मागान् म्लानिं मृणालीमृदुरिति दययेवाप्रविष्टोऽहिलोकं
लोकालोकस्य पार्श्वं प्रतपति न परं यस्तदाख्यार्थमेव ।
ऊर्द्ध्वं ब्रह्माण्डखण्डस्फुटनभयपरित्यक्तदैर्घ्योद्युसीम्नि
स्वेच्छावश्यावकाशावधिरवतु स वस्तापनोरोचिरोघः ॥ १९ ॥

दत्तानन्दाः प्रजानां समुचितसमयाक्लिष्टसृष्टैः पयोभिः
पूर्वाह्णे विप्रकीर्णा दिशि दिशि विरमत्यह्नि संहारभाजः ।
दीप्तांशोर्दीर्घदुःखप्रभवभयोदन्वदुत्तारनावो
गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु ॥ ९ ॥
बन्धध्वंसैकहेतुं शिरसि नतिवशाद्बद्धसन्ध्याञ्जलीनां
लोकानां ये प्रबोधं विदधति विपुलाम्भोजषण्डाशयेव ।
ते युष्माकं स्वचित्तप्रथितपृथुतरप्रार्थनाकल्पवृक्षाः
कल्पन्तां निर्विकल्पं दिनकरकिरणाः केतवः कल्मषस्य ॥१०॥
धारा रायो धनायापदि सपदि करालम्बभूताः प्रपाते
तत्त्वालोकैकदीपास्त्रिदिवपतिपुरःप्रस्थितौ वीथ्य एव ।
निर्वाणोद्योगियोगिप्रगमनिजतनुद्वारि वेत्रायमाणा
स्त्रायन्तांतीव्रभानोर्दिवसमुखसमुत्सारस्मयः कल्मषात् ॥ ११ ॥
प्राचि प्रागाचरन्त्योऽनतिचिरमचले चारुचूडामणित्वं
तुच्छत्वोरोचनाम्बुप्रचुरमिव दिशामुच्चकैश्चर्चनाय ।
चाटूत्कैश्चक्रनाम्नां चतुरमविचलैर्लोचनैरर्च्यमानाः
चेष्टन्तां चिन्तितानामुचितमचरमाश्चष्टरोचीरुचो वः ॥ १२ ॥
एकं ज्योतिर्दृशौ द्वे त्रिजगति गदितान्यब्जजास्यैश्चतुर्भि
र्भूतानां पञ्चमं यान्यलमृतुषु तथा षट्सु नानाविधानि ।
युष्माकं तानि सप्तत्रिदशमुनिनुतान्यष्टदिग्भाञ्जि भानोः
यान्ति प्राह्णे नवत्वं दश दधतु शिवं दीधितीनां शतानि ॥१३॥
आवृत्तिभ्रान्तविश्वाः श्रममिव दधतः शोषिणः स्वोष्मणेव
ग्रीष्मे दावाग्नितप्ता इव रसमसकृद्ये धरित्र्या धयन्ति ।

Digitized by Google

निष्पर्य्यायं प्रतस्त्रिभुवनभवनप्राङ्गणे पान्तु युष्मान्
उष्णांशोः सन्ततावयवमजमिव भूम्नं बिभ्रतो ब्रध्नपादाः ॥ ३ ॥
प्रभ्रश्यत्युत्तरीयत्विषि तमसि समुद्वीक्ष्य वीतावृतीन् प्राग्
जन्तूं स्तन्तून् यथा यानतनु वितनुते तिग्मरोचिर्मरीचीन् ।
ते सान्द्रीभूय सद्यः क्रमविशददशाशादशालीविशालं
शश्वत्सम्पादयन्तोऽम्बरममलमलं मङ्गलं वो दिशन्तु ॥ ४ ॥
न्यक् कुर्वन्नोषधीशे मुषितरुचि शुचेवौषधीः प्रोषिताभा
भास्वद्ग्रावोद्गतेन प्रथममिव कृताभ्युद्गतिः पावकेन ।
पक्षच्छेदव्रणासृक्स्रुतइव दृषदो दर्शयन् प्रातरद्रेः
आताम्रस्तीव्रभानोरनभिमतनुदे स्तादभस्त्युद्गमो वः ॥ ५ ॥
शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्
दीर्घाघ्रातानघौघैः पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्तेः
दत्तार्घाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमंहोविघातम् ॥ ६ ॥
बिभ्राणा वामनत्वं प्रथम मथ तथैवांशवः प्रांशवो वः
क्रान्ताकाशान्तरालास्तदनु दश पूरयन्तस्ततोऽपि ।
ध्वान्तादाच्छिद्य देवद्विष इव बलितो विश्वमाश्वश्नुवानाः
कृच्छ्राण्युच्छ्रायहेलोपहसितहरयो हारिदश्वा हरन्तु ॥ ७ ॥
उद्गाढेनारुणिम्ना विदधति बहुलं येऽरुणस्यारुणत्वं
मूर्द्धोद्धूतौ खलीनक्षतरुधिररुचो ये रथाश्वाननेषु ।
शैलानां शेखरत्वं श्रितशिखरशिखास्तन्वते ये दिशन्तु
प्रेङ्खन्तः खे खरांशोः खचितदिनमुखास्ते मयूखाः सुखं वः ॥ ८ ॥

Digitized by Google

यदा किञ्चित् किञ्चिद्बुधजनसकाशादधिगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ९९ ॥
माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने
युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः
पूतग्रावगिरीन्द्रकन्दरदरीकुञ्जे निवासः क्वचित् ॥ १०० ॥

इति श्रीभर्तृहरिविरचितं वैराग्यशतकं समाप्तम् ।

सूर्यशतकम् ।

रश्मिवर्णनम् ।

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सक्तैरिवौघैरुदयगिरितटीधातुधाराद्रवस्य ।
आयान्त्या तुल्यकालं कमलवनरुचेवारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥ १ ॥
भक्तिप्रह्वाय दातुं मुकुलपुटकुटीकोटरक्रोडलीनां
लक्ष्मीमाक्रष्टुकामा इव कमलवनोद्घाटनं कुर्वते ये
कालाकारान्धकारानन पतितजगत्साध्वसध्वंसकल्याः
कल्याणं वः क्रियासुः किसलयरुचयस्ते करा भास्करस्य॥२॥
गर्भेष्वम्भोरुहाणां शिखरिषु च शिताग्रेषु तुल्यं पतन्तः
प्रारम्भे वासरस्य व्युपरतिसमये चैकरूपास्तथैव ।

क्रशः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी पूयक्लिन्नः क्रमिकुलशतैराहततनुः
क्षुधाक्षामो जीर्णः पिठरकपालार्पितगलः ।
शुनीमन्वेति श्वा हतमपि निहन्त्येव मदनः ॥ ९४ ॥

मृत्पिण्डो जलरेखया वलयितः सर्वोऽप्ययं नन्वणुः
स्वयीकृत्य तमेव संयुगशतैराज्ञां गणाः भुञ्जते ।
दद्युस्ते ददतोऽथवा किमपरे क्षुद्रा दरिद्रा भृशं
धिग्धिक् कापुरुषाधमान् धनलवं तेभ्योऽपि वाञ्छन्ति ये॥९५॥

ददतु ददतु गालीर्गालिमन्तो भवन्तः
वयमपि तदभावाद्गालिदानेऽसमर्थाः ।
जगति विदितमेतद्दीयते विद्यमानं
नहि शशकविषाणं कोऽपि कस्मै ददाति ॥ ९६ ॥

पुरा विद्वत्तासीदमलिनधियां क्लेशहतये
गता कालेनासौ विषयसुखसिद्धौ विषयिणाम् ।
इदानीं सम्प्रेक्ष्य क्षितिलवभुजःशास्त्रविमुखान्
अहो कष्टं ! सापि प्रतिदिनमधोऽधः प्रविशति ॥ ९७ ॥

स जातः कोऽप्यासीन्मदनरिपुणा मूर्ध्नि धवलं
कपालं यस्योच्चैर्विनिहितमलङ्कारविधये ।
नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना
नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ ९८ ॥

यदा किञ्चिज्ज्ञोऽहं द्विपइव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।

Digitized by Google

कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखं
सर्वं रम्यमनित्यतामधिगतं चित्ते न किञ्चित् पुनः ॥ ८८ ॥

भिक्षाशी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदा
हानादानविभिन्नवर्णरहितः कश्चित्तपस्वी स्थितः ।
रथ्याकीर्णविशीर्णजीर्णवसनैरास्यूतकन्थाधरो
निर्मानो निरहंकृतिः शमसुखाभोगैकबद्धस्पृहः ॥ ८९ ॥

मातर्मेदिनि ! तात मारुत ! सखे ज्योतिः ! सुबन्धो जल !
भ्रातर्व्योम ! निबद्ध एष भवतामग्रे प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मल
ज्ञानापास्तसमस्तमोहमहिमा लीये परे ब्रह्मणि ॥ ९० ॥

स्वादिष्ठं मधुनो घृताच्च रसवत्यच्छं पयस्तत्परं
दैवीवागमृतात्ततो रसवतस्तेनैव तृप्ता वयम् ।
कुक्षौ यावदिमे भवन्ति धृतये भिक्षाहृताः सक्तवः
तावद्दास्यकृतार्जितैर्गृहि धनैर्वृत्तिं समीहामहे ॥ ९१ ॥

निवृत्ता भोगेच्छा पुरुषबहुमानो विगलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो धृष्टः ! कायस्तदपि मरणापायचकितः ॥ ९२ ॥

हिंसाशून्यमयत्नलभ्यमशनं वायुः कृतो भोजनं
व्यालानां पशवस्तृणाङ्कुरभुजः पुष्टाः स्थलीशायिनः ।
संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां
यामन्वेषयतां प्रयान्ति सहसा सर्वे समाप्तिं गुणाः ॥ ९३ ॥

Digitized by Google

मही शय्या शय्या विपुलमुपधानं भुजलता
वितानञ्चाकाशं व्यजनमनुकूलोऽयमनिलः ।
स्फुरद्दीपश्चन्द्रो विरतिवनितासङ्गमुदितः
सुखं शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥ ८३ ॥

अवधूतचर्य्या ।

कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी
नैश्चिन्त्यं निरपेक्ष्यभैक्ष्यमशनं निद्रा श्मशाने वने ।
स्वातन्त्र्येण निरङ्कुशं विहरणं स्वान्तं प्रशान्तं सदा
स्थैर्य्यं योगमहोत्सवेऽपि च यदि त्रैलोक्यराज्येन किम् ॥ ८४ ॥
भूः पर्य्यङ्को निजभुजलता कन्दुकः खं वितानं
दीपश्चन्द्रो विरतिवनितालब्धसङ्गप्रमोदः ।
दिक्कान्ताभिः पवनचमरैर्वीज्यमानः समन्तात्
भिक्षुः शेते नृप इव भुवि त्यक्तसर्व्वस्पृहोऽपि ॥ ८५ ॥
ब्रह्माण्डो मण्डलीमात्रं को लोभोऽयं मनस्विनः
शफरीस्फुरितेनाब्धेः क्षुब्धता जातु जायते ॥ ८६ ॥
यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं
तदा दृष्टं नारीमयमिदमशेषं जगदिति ।
इदानीमस्माकं पटुतरविवेकाञ्जनजुषां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ ८७ ॥
रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली
रम्यं साधुसभासमागमसुखं काव्येषु रम्याः कथाः ।

Digitized by Google

जीर्णाएव मनोरथाश्च हृदये यातञ्च तद्यौवनं
हन्ताङ्गेषु गुणाश्च वन्ध्यफलतां याता गुणज्ञैर्विना ।
किं युक्तं सहसाभ्युपैति बलवान् कालः कृतान्तोऽक्षमी
न ध्यातं मदनान्तकाङ्घ्रि युगलं मुक्त्वास्तु नान्यागतिः ॥७७॥
महेश्वरे वा जगतामधीश्वरे जनार्दने वा जगदन्तरात्मनि ।
न वस्तुतो मे प्रतिपत्तिरस्ति तथापि भक्तिस्तरुणेन्दुशेखरे ॥७८॥

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने
सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः ।
भवाभोगोभग्नाः शिवशिवशिवेत्युच्चवचसः
कदा यास्यामोऽन्तर्गतबहुलबाष्पाकुलदृशः ॥ ७९ ॥

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदया
स्मरन्तः संसारं विरसपरिणामावधिगतम् ।
कदा पुण्यारण्ये परिगतशरच्चन्द्रकिरणा
स्त्रियामा नेष्यामो हरचरणचित्तैकशरणाः ॥ ८० ॥

कदा वाराणस्याममरतटिनीरोधसि वसन्
वसानः कौपीने शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ ! त्रिपुरहर ! शम्भो ! त्रिनयन !
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ ८१ ॥

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो ! त्वां
ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावशय्यानिषण्णः ।
आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात् स्मरारे !
दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥८२॥

Digitized by Google

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत् क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः॥ ७२॥
तपस्यन्तः सन्तःकिमधिनिवसामः सुरनदीं
गुणोदारान्दारानुत परिचरामः सविषयान्।
पिवामः शास्त्रौघानुत विविधकाव्यामृतरसान्
न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने॥ ७३॥
दुराराध्यः स्वामी तुरगचलचित्ताः क्षितिभुजो
वयञ्च स्थूलेच्छाः सुमहति पदे बद्धमनसः।
जरा देहे मृत्युर्हरति दयितं जीवितमिदं
सखे! नान्यच्छ्रेयोजगति विदुषामन्त्र तपसः॥ ७४॥
रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गेयादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकं प्रीतये।
किन्तु भ्रान्तपतङ्गपक्षपवनव्यालोलदीपाङ्कुर
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तङ्गताः॥ ७५॥

शिवार्चनपद्धति।

आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृक्
नैवास्माकं नयनपदवीं श्रोत्रमार्गं गतोवा।
योऽयं धत्ते विषयकरिणीगाढ़गूढ़ाभिमानः
क्षीवस्यान्तःकरणकरिणः संयमालानलीलाम्॥ ७६॥

तस्मादनन्तमजरं परमं विकासि
तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः ।
यस्यानुषङ्गिण इमे भुवनाधिपत्य
भोगादयः कृपणलोकमता भवन्ति ॥ ६७ ॥
पातालमाविशसि यासि नभोविलंघ्य
दिङ्मण्डलं भ्रमसि मानस ! चापलेन ।
भ्रान्त्यापि जातु विमलं कथमात्मनीनं
न ब्रह्म संस्मरसि निर्वृतिमेषि येन ॥ ६८ ॥

नित्यानित्यविचारः ।

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः
स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः ।
मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं
स्वात्मानन्दपदप्रवेशकलनं शेषा वणिग्वृत्तयः ॥ ६९ ॥
गात्रं सङ्कुचितं गतिर्विगलिता भ्रष्टा च दन्तावली
दृष्टिर्नश्यति वर्द्धते वधिरता वक्त्रञ्च लालायते ।
वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषते
हा कष्टं ! पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते ॥ ७० ॥
वर्णं सितं समववीक्ष्य शिरोरुहाणां
स्थानं जरापरिभवस्य तदेव पुंसाम् ।
आरोपितास्थिशकलं परिहृत्य यान्ति
चाण्डालकूपमिव दूरतरं तरुण्यः ॥ ७१ ॥

Digitized by Google

आत्मीभावमुपैहि सन्त्यज निजां कल्लोललोलां मतिं
मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना ॥ ६१ ॥
मोहं मार्जय तामुपार्जय रतिं चन्द्रार्धचूड़ामणौ
चेतः स्वर्गतरङ्गिणीतटभुवि व्यासङ्गमङ्गीकुरु
कोवा वीचिषु बुद्बुदेषु च तड़िल्लेखासु च श्रीषु च
जालाग्रेषु च पन्नगेषु च सरिद्वेगेषु च प्रत्ययः ॥ ६२ ॥
चेतश्चिन्तय मा रमां सकृदिमामस्थायिनीमास्थया
भूपालभ्रुकुटीकुटीरविहरव्यापारपण्याङ्गनाम् ।
कन्थाकञ्चुकिताः प्रविश्य भवनद्वाराणि वाराणसी
रथ्यापंक्तिषु पाणिपात्रपतितां भिक्षामपेक्षामहे ॥ ६३ ॥
अग्रे गीतं सरसकवयः पार्श्वयो र्दाक्षिणात्याः
पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम् ।
यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वं
नोचेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ ६४ ॥
प्राप्ताः श्रियः सकलकामदुघास्ततः किं
न्यस्तं पदं शिरसि विद्विषतां ततः किम् ।
सम्पादिताः प्रणयिनोविभवास्ततः किं
कल्पंस्थितास्तनुभृतान्तनवस्ततः किम् ॥ ६५ ॥
भक्तिर्भवे मरणजन्मभयं हृदिस्थं
स्नेहो न बन्धुषु च मन्मथजा विकाराः
संसर्गदोषरहिताविजना वनान्ता
वैराग्यमस्ति किमतः परमर्थनीयम् ॥ ६६ ॥

Digitized by Google

अश्नीमहि वयं भिक्षामाशावासो वसीमहि ।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ ५५ ॥

न नटा न विटा न गायका न च सभ्येतरवादचञ्चवः ।
नृपसंसदि नाम के वयं स्तनभारानमिता न योषितः ॥ ५६ ॥

विपुलहृदयैरीशैः कैश्चिज्जगज्जनितं पुरा
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥ ५७ ॥

अभुक्तायां यस्यां क्षणमपि न यातं नृपशतैः
भुवस्तस्या लाभे क इह बहुमानः क्षितिभृताम् ।
तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो
विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥ ५८ ॥

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदय ! क्लेशमफलम् ।
प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगुणे
विविक्तः सङ्कल्पः किमभिलषितं पुष्यति न ते ॥ ५९ ॥

परिभ्रमसि किं वृथा क्व च न चित्त विश्राम्यतां
स्वयम्भवति यद्यथा भवति नान्यथा तत्तथा ।
अतीतमपि न स्मरन्नपि च भाव्यसङ्कल्पयन्
न तर्कितगमागमाननुभवस्व भोगानिह ॥ ६० ॥

एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रयात्
श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् ।

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्ठे वा कुसुमशयने वा दृषदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित्पुण्येऽरण्ये शिवशिवशिवेति प्रलपतः ॥ ४९ ॥

एकाकी निस्पृहः शान्तः पाणिपात्रो दिगम्बरः ।
कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥ ५० ॥

पाणिं पात्रयतां निसर्गशुचिना भैक्ष्येण सन्तुष्यताम्
यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यताम् ।
अत्यागेऽपि तनोरखण्डपरमानन्दावबोधस्पृहां
मध्वः कोऽपि शिवप्रसादसुलभां सम्पत्स्यते योगिनाम् ॥ ५१ ॥

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदर्थं
शूरस्त्वं वादिदर्पज्वरशमनविधावक्षयं पाटवं मे ।
सेवन्ते त्वां धनाढ्या मतिमलहतये मामपि श्रोतुकामा
मय्यप्यास्था न ते चेत्त्वयि मम नितरामेव राजन्! गतासीत्॥५२

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
सम इह परितोषो निर्विशेषो विशेषः ।
स तु भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥ ५३ ॥

फलमलमशनाय स्वादु पानाय तोयं
शयनमवनिपृष्ठे वाससी वल्कले च ।
धनलवमधुपानभ्रान्तिसर्वेन्द्रियाणा
मविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ ५४ ।

Digitized by Google

विद्या नाधिगता कलङ्करहिता वित्तञ्च नोपार्जितं
शुश्रूषापि समाहितेन मनसा पित्रोर्न सम्पादिता
आलोलायतलोचना युवतयः स्वप्नेऽपि नालिङ्गिताः ।
कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेषितः ॥ ४४ ॥
वयं येभ्यो जाताश्चिरपरिगताएव खलु ते
समा येषां वृद्धाः स्मृतिविषयतां तेऽपि गमिताः ।
इदानीमेतेस्मःप्रतिदिवसमापन्नपतना
गता स्तुल्यावस्थां सिकतिलनदीतीरतरुभिः ॥ ४५ ॥
आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्द्धं गतं
तस्यार्द्धस्य परस्य चार्द्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥ ४६ ॥
क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनःक्षणमपि च सम्पूर्णविभवः ।
जराजीर्णैरङ्गैर्नटइव वलीमण्डिततनुः
नरः संसारान्ते विशति यमधानीयवनिकाम् ॥ ४७ ॥

यतिन्दपतिसम्वादः ।

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।
इत्य मानधनातिदूरमुभयोरप्यावयोरन्तरं
यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततोनिस्पृहाः ॥ ४८ ॥

उन्मत्तः स च राजपुत्रनिवहस्ते वन्दिनस्ताः कथाः
सर्वं यस्य वशादगात् स्मृतिपथं कालाय तस्मै नमः॥ ३८॥

यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको
यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते ।
इत्थञ्चेमौ रजनिदिवसौ दोलयन् द्वाविवाक्षौ
कालः काल्या भुवनफलके क्रीडति प्राणिसारैः ॥ ३९ ॥

आदित्यस्य गतागतैरहरहः संक्षीयते जीवनं
व्यापारैर्बहुकार्य्यभारगुरुभिः कालो न विज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतञ्जगत् ॥ ४० ॥

रात्रिः सैव पुनः स एव दिवसो मत्वा मुधा जन्तवो
धावन्त्युद्यमिनस्तथैव निभृतं प्रारब्धतत्तत्क्रियाः ।
व्यापारैः पुनरुक्तभूतविषयैरित्थं विधेनामुना
संसारेण कदर्थिता वयमहो मोहं न जानीमहे ॥ ४१ ॥

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।
नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥ ४२ ॥

नाभ्यस्ता भुवि वादिवृन्ददमनी विद्या विनीतोचिता
खड्गाग्रैः करिकुम्भपीठदलनैर्नाकं न नीतं यशः ।
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यङ्गतमेव निष्फलमहो शून्यालये दीपवत् ॥ ४३ ॥

Digitized by Google

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीः
अर्थाः संकल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः ।
कण्ठाश्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरन्तः ॥ २३ ॥

अष्कूचामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भवासे
कान्ताविश्लेषदुःखव्यतिकरविषमे यौवने चोपभोगः ।
वामाक्षीणामवज्ञाविहसितवसतिर्वृद्धभावोऽप्यसाधुः
संसारे रे मनुष्या ! वदत यदि सुखं स्वल्पमप्यस्ति किंचित् ॥ २४ ॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहे ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रम् ॥ २५ ॥

भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवः
तत्कस्येहकृतेपरिभ्रमत हे लोकाः ! कृतं चेष्टितम् ।
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां
काम्योत्पत्तिवशे स्वधामनि यदि श्रद्धेयमस्मद्वचः ॥ २६ ॥

ब्रह्मेन्द्रादिमरुद्गणांस्तृणगणान् यत्र स्थितो मन्यते
यत्स्वादाद्विरसा भवन्ति विभवास्त्रैलोक्यराज्यादयः ।
बोधः कोऽपि सएकएव परमो नित्योदितो जृम्भते
भोः साधो ! क्षणभङ्गुरे तदितरे भोगे रतिं मा कृथाः ॥ २७ ॥

सा रम्या नगरी महान् स नृपतिः सामन्तचक्रं च तत्
पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ।

Digitized by Google

सर्वत्राम्बहमप्रयत्नसुलभं साधुप्रियं पावनं
शम्भोःसन्नमवार्यमक्षयनिधिं शंसन्ति योगीश्वराः ॥२७॥
भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
माने दैन्यभयं बले रिपुभयं रूपे तरुण्या भयम्।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥ २८ ॥
आक्रान्तं मरणेन जन्म जरसा यात्युत्तमं यौवनं
सन्तोषोधनलिप्सया शमसुखं प्रौढ़ाङ्गनाविभ्रमैः।
लोकैर्मत्सरिभिर्गुणा वनभुवोव्यालै र्नृपा दुर्जनैः
अस्थैर्य्येण विभूतयोऽप्युपहता ग्रस्तं न किंकेन वा ॥२९॥
आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वाराइव ह्यापदः।
आयु र्यातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात्
तत् किं केन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरम्॥३०॥
भोगास्तुङ्गतरङ्गतुल्यतरलाः प्राणाः क्षणध्वंसिनः
स्तोकान्येव दिनानि यौवनसुखं स्फूर्त्तिः क्रियासु स्थिता।
तत्संसारमसारमेव निखिलं बुद्धा बुधा बोधका
लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥ ३१ ॥
भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताभ्रपटलीच्छिन्नाम्बुवद्भङ्गुरं।
लोला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं
योगे धैर्य्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः। ३२ ।

Digitized by Google

गङ्गातरङ्गकणशीकरशीतलानि
विद्याधराध्युषितचारुशिलातलानि।
स्थानानि किं हिमवतः प्रलयं गतानि
यत्सावमानपरपिण्डरता मनुष्याः॥ २२॥

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः
प्रध्वस्ताः किं महीजाः सरसफलभृतो वल्कलिन्यश्च शाखाः।
वीक्ष्यन्ते किं मुखानि प्रसभमुपगतप्रश्रयाणां खलानां
दुःखोपात्ताल्पवित्तस्मयपवनवशान्नर्तितभ्रूलतानि॥ २३॥

पुष्पैर्मूलफलैः प्रियैश्च सलिलैर्वृत्तिं कुरुष्वाधुना
भूशय्यां नवपल्लवैर्वितनुतामुत्तिष्ठ यामो वनम्।
क्षुद्राणामविवेकमूढमनसां तत्रेश्वराणां सदा
वित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते॥ २४॥

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम्।
मृदुस्पर्शा शय्या सुललितलता पल्लवमयी
सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणाः॥ २५॥

ये वर्द्धन्ते धनपतिपुरः प्रार्थनादुःखभाजो
ये चाल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्धेः।
तेषामन्तःस्फुरितहसितं वासराणां स्मरेयं
ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः॥ २६॥

भिक्षाहारमदैन्यमप्रतिहतं भीतिच्छिदं सर्वदा
दुर्मात्सर्यमदाभिमानमथनं दुःखौघविध्वंसनम्।

Digitized by Google

अजानन्माहात्म्यम्पतति शलभस्तीव्रदहने
स मीनोऽप्यज्ञानाद्बडिशयुतमश्नाति पिशितम् ।
विजानन्तोऽप्येते वयमिह विपज्जालपटलान्
न मुञ्चामः कामानहह ! गहनो मोहमहिमा ॥ १७ ॥
तुङ्गं वेश्म सुताः सतामभिमताः संख्यातिगाः सम्पदः
कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ।
मत्वा विश्वमनश्वरन्निविशते संसारकारागृहे
संदृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु संन्यस्यति ॥ १८ ॥

याच्ञादैन्यदूषणम् ।

दीनादीनमुखैः स्वकीयशिशुकैराकृष्टजीर्णाम्बरां
क्रोशद्भिः क्षुधितैर्निरन्नजठरां दृश्येत चेद्गेहिनीम् ।
याच्ञाभङ्गभयेन गद्गदगलोत्रुट्यद्विलीनाक्षरं
कोदेहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥ १९ ॥
अभिमतमहामानग्रन्थिप्रभेदपटीयसी
गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।
विपुलविलसल्लज्जावल्लीविदारकुठारिका
जठरपिठरी दुष्पूरेयं करोति विडम्बनाम् ॥ २० ॥
पुण्यग्रामे वने वा महति शितपटच्छेदपालींकपालो
मादाय न्यायगर्भं द्विजहुतहुतभुग्धूमधूम्रोपकण्ठम् ।
द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो
मानीप्राणीसनाथो न पुनरनुदिनं तुल्यकुल्येषु दीनः ॥ २१ ॥

Digitized by Google

विषयपरित्यागविडम्बना।

अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत् स्वयममून्।
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयन्त्यक्तास्त्वेते शमसुखमनन्तं विदधति॥ १२॥

ब्रह्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निस्पृहाः।
न प्राप्तानि पुरा न संप्रति न च प्राप्तौ दृढ़प्रत्यया
वाञ्छामात्रपरिग्रहाण्यपि परित्यक्तुं न शक्तावयम्॥ १३॥

धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायताम्
आनन्दाश्रुकणान् पिबन्ति शकुना निःशङ्कमङ्केशयाः।
अस्माकन्तु मनोरथोपरचितप्रासादवापीतट
क्रीड़ाकाननकेलिकौतुकजुषामायुः परं क्षीयते॥ १४॥

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम्।
स्रवन्मूत्रक्लिन्नं करिवरकरस्पर्द्धि जघनं
मुहुर्निन्द्यं रूपं कविवरविशेषैर्गुरु कृतम्॥ १५॥

भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रम्।
वस्त्रं च जीर्णशतखण्डमलीनकन्था
हाहा! तथापि विषयान्न परित्यजन्ति॥ १६॥

Digitized by Google

मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णे ! ऽधुना मुञ्च माम् ॥ ५ ॥
खलोल्लापाः सोढाः कथमपि तदाराधनपरैः
निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ।
कृतश्चित्तस्तम्भः प्रतिहतधियामञ्जलिरपि
त्वमाशे ! मोघाशे किमु परमतो नर्तयसि माम् ॥ ६ ॥
अमीषां प्राणानां तुलितविसिनीपत्रपयसां
कृते किन्नास्माभिर्विगलितविवेकैर्व्यवसितम् ।
यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां
कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ ७ ॥
भोगा न भुक्ता वयमेव भुक्ता स्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातोवयमेव याता स्तृष्णा नजीर्णा वयमेव जीर्णाः॥८॥
वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ९ ॥
निवृत्ता भोगेच्छा पुरुषबहुमानोऽपि गलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो ! दुष्टः कायस्तदपि मरणोपायचकितः ॥ १० ॥
आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धर्मद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥ ११ ॥

Digitized by Google

वैराग्यशतकम्।

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभासुरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रेस्फुरन्।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयन्
चेतः सद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः॥ १॥

तृष्णादूषणम्।

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥ २॥
न संसारोत्पन्नं चरितमनुपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं मे विमृशतः।
महद्भिः पुण्यौघैश्चिरमपि गृहीताश्च विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम्॥ ३॥
भ्रान्त्वा देशमनेकदुर्गविषमं प्राप्तं न किञ्चित्फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे ! जृम्भसि पापकर्मपिशुने नाद्यापि सन्तुष्यसि॥ ४॥
उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो
निस्तीर्णःसरितांपतिर्नृपतयो यत्नेन सन्तोषिताः।

Digitized by Google

दूरादर्थं घटयति नवन्दूरतस्वापशब्दं
त्यक्त्वा भूयो भवति नियतं सत्सभारञ्जनेषु ।
मन्दम्मन्दं रचयति पदं लोकचित्तानुवृत्त्या
कामं मन्त्री कविरिव सदा खेदभारैरमुक्तः ॥ १०१ ॥
दैवेन प्रभुणा स्वयञ्जगति यद्यस्य प्रमाणीकृतं
तत्तस्योपनयेन्मनागपि महान्नैवाश्रयः कारणम् ।
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्माएव पतन्ति चातकमुखे द्वित्राः पयोविन्दवः ॥१०२॥
अभिमुखनिहतस्य सतस्तिष्टतु तावज्जयोऽथवा स्वर्गः ।
उभयबलसाधुवादः श्रवणसुखस्यैव तात्पर्य्यम् ॥ १०३ ॥
को न याति वशं लोके मुखे पिण्डेन पूरितः
मृदङ्गो मुखलेपेन करोति मधुरध्वनिम् ॥ १०४ ॥
केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं सुकुसुमं नालंकृता मूर्द्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥१०५॥
यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातम् ।
अवकारनिकरं विकिरति तत्किंकृकवाकुरिव हंसः ।।१०६॥
परिचरितव्याः सन्तो यद्यपि कथयन्ति न सदुपदेशम्
यास्त्वेषां स्वैरं कथास्ताएव भवन्ति शास्त्राणि ॥ १०७ ॥
कमठकुलाचलदिग्गजफणिपतिविधृतापि चलति वसुधेयम् ।
प्रतिपन्नममलमनसां न चलति पुंसां युगान्तेऽपि ॥ १०८ ॥

इति श्रीभर्तृहरिविरचितं नीतिशतकं समाप्तम् ।

Digitized by Google

करे श्लाघस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्यावाणी विजयभुजयोर्वीर्य्यमतुलम् ।
हृदि स्वेच्छा वृत्तिः श्रुतमधिगतञ्च श्रवणयोः
विनाप्यैश्वर्य्येण प्रकृतिमहतां मण्डनमिदम् ॥ ९४ ॥
वहति भुवनश्रेणीं फणी फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स च धार्य्यते ।
तमपि कुरुते क्रोड़ाधानं पयोनिधिरनादरात्
अहह ! महतां निःसीमानश्चरित्रविभूतयः ॥ ९५ ॥
स्पृहयतिभुजयोरन्तरमायतकरवालकर ।
कुहदोर्णां विजयश्रीर्वीराणां मत्तप्रौढ़वनितेव ॥ ९६ ॥
स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्त्तिनि संसारे मृतः कोवा न जायते ॥ ९७ ॥
लज्जां गुणौघजननीं जननीमिव स्वां
अत्यन्तशुद्धहृदयामनुवर्त्तमानाः ।
तेजस्विनः सुखमसूनपि सन्त्यजन्ति
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ॥ ९८ ॥
सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु ।
प्रकृतिरियं सत्ववतां न खलु वयस्तेजसो हेतुः ॥ ९९ ॥
किंकूर्म्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ।
किन्त्वङ्गीकृतमुत्सृजन्न मनसा श्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥ १०० ॥

Digitized by Google

येषामिते षड्गुणा न प्रवृत्ताः
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ८८ ॥

व्यालम्बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
भेत्तुं वज्रमणिं शिरीषकुसुमप्रान्ते न सन्नह्यति ।
माधुर्य्यं मधुविन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुंवाञ्छति यः सतां पथि खलान् सूक्तैः सुधास्यन्दिभिः॥८९॥

स्वायत्तमेकान्तहितं विधात्रा
विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ॥ ९० ॥

उद्भासिताखिलखलस्य विशृङ्खलस्य
प्राग्जातविस्मृतनिजाधमकर्म्मवृत्तेः ।
दैवादवाप्तविभवस्य गुणद्विषोऽस्य
नीचस्य गोचरगतैः सुखमास्यते कैः ॥ ९१ ॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तन्धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनोविदेशगमने विद्या परन्दैवतं
विद्या राजसु पूजिता शुचि धनं विद्याविहीनः पशुः॥९२

दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने क्षमा गुरुजने नारीजने धूर्त्तता ।
शौर्य्यं शत्रुजने स्मयः खलजने विद्वज्जने चार्जवं
ये त्वेवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितः ॥ ९३॥

Digitized by Google

अधःकृतस्यापि तनूनपातो
नाधःशिखा याति कदाचिदेव ॥ ८१ ॥
अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।
परपरिवादनिवृत्तैः क्वचित् क्वचिन्मण्डिता वसुधा ॥ ८२ ॥
पद्माकरन्दिनकरोविकचीकरोति
चन्द्रोविकाशयति कैरवचक्रवालम् ।
नाभ्यर्थितोऽपि जलदः सलिलन्ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः ॥ ८३ ॥
एकेनापि हि शूरेण पादाक्रान्तं चमातलम् ।
क्रियते भास्करेणेव स्फारं स्फुरिततेजसा ॥ ८४ ॥
वरं तुङ्गात् शृङ्गाद्गुरुशिखरिणः क्वापि पुलिने
पतित्वायङ्कायः कठिनदृषदन्तर्विंदलितः ।
वरं न्यस्तोहस्तः फणिपतिमुखे तीव्रदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः ॥ ८५ ॥
वह्निस्तस्य जलायते जलनिधिः कूपायते तत्क्षणात्
मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।
व्यालोमाल्यगुणायते विषरसः पियूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ ८६ ॥
यदचेतनोऽपि पादैःस्पृष्टः प्रज्वलति सवितुरविकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतं कथं सहते ॥ ८७ ॥
आज्ञा कीर्त्तिः पालनं ब्राह्मणानां
दानम्भोगोमित्रसंरक्षणञ्च ।

अपि जडविधेः कल्पापाये व्यपेतनिजक्रमाः
कुलशिखरिणः क्षुद्रा नैते न चापि जलाशयाः॥ ७४ ॥

अकरुणत्वमकारणविग्रहः परधनाय रतिः परयोषिति।
सुजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम् ७५

कान्ताकटाक्षविशिखा न खनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः।
कर्षन्ति भूरिविषयाश्च न लोभपाशा
लोकत्रयं जयति कृत्स्नमिदं स वीरः॥ ७६ ॥

आरम्भगुर्व्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलु सज्जनानाम् ७७

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनञ्चाप्युपकृतेः।
अनुत्सेकोलक्ष्म्यानिरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्॥ ७८ ॥

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः।
इति विमृशन्तः सन्तः सन्तप्यन्ते न ते विपदा॥ ७९ ॥

भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्भूमिविलम्बिनोघनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभावएवैष परोपकारिणाम्॥ ८० ॥

कदर्थितस्यापि हि धैर्य्यवृत्तेः
बुद्धेर्विनाशो न हि शङ्कनीयः।

Digitized by Google

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः
नास्ति येषां यशःकाये जरामरणजं भयम् ॥ ६८ ॥
यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत् प्राप्नोति मरुस्थलेऽपि नियतं मेरौ च नातोऽधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटा गृह्णन्ति तुल्यं जलम् ॥ ६९ ॥

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनञ्च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ ७० ॥

राजन् ! दुधुक्षसि यदि क्षितिधेनुमेतां
तेनाद्य वत्समिव लोकमिमं पुषाण ।
तस्मिंश्च सम्यगनिशम्परिपोष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ॥ ७१ ॥

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ॥ ७२ ॥

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वन्तं स्पृष्टो दहति पावकः ॥ ७३ ॥

विपदि महतां धैर्य्यध्वंसं यदीक्षितुमीहसे
विरम विरसायासादस्माद्दुरध्यवसायतः ।

दानभोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य
यो न ददाति न भुंक्ते तस्य तृतीया गतिर्भवति ॥ ६२ ॥

यस्यास्ति वित्तं स नरः कुलीनः
सएव वक्ता स च दर्शनीयः ।
स पण्डितः स श्रुतवान् गुणज्ञः
सर्वेगुणाः काञ्चनमाश्रयन्ति ॥ ६३ ॥

रत्नैर्महार्हैस्तुतुषु र्न देवाः
न भेजिरे भीमविषेण भीतिम् ।
सुधांविना न प्रययु र्विरामं
विनिश्चितार्थाद्विरमन्तिधीराः ॥ ६४ ॥

सन्त्यन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषा
स्तान् प्रत्येष विशेषविक्रमरुची राहुर्नवैरायते ।
द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः ! पर्वणि पश्य दानवपतिः शीर्षावशेषीकृतः ॥६५॥

इयत्ये तस्मिन् वा निरवधिचमत्कृत्यतिशये
वराहो वा राहुः प्रभवति चमत्कारविषयः ।
महीमेको मग्नां यदयमवहद्दन्तसलिलैः
शिरःशेषः शत्रुर्निगिलति परं सन्त्यजति च ॥ ६६ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न च कङ्कणेन ।
आभाति कायः करुणापराणां
परोपकारेण न चन्दनेन ॥ ६७ ॥

Digitized by Google

यत्रागा मदभिन्नगण्डकरटास्तिष्ठन्ति निद्रालसा
द्वारे हेमविभूषणास्तुरगमा वल्गन्ति यद्दर्पिताः ।
वीणावेणुमृदङ्गशङ्खपटहैः सुप्तस्तु यद्बोध्यते
तत्सर्वं सुरलोकदेवसदृशं धर्मस्य विस्फूर्जितम् ॥ ५५ ॥
मज्जत्वम्भसि यातु मेरुशिखरं शत्रुं जयत्वाहवे
वाणिज्यं कृषिसेवनादिसकला विद्याः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत् कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः॥५६॥
वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ।
तुषाराद्रेः सूनोरहह ! पितरि क्लेशविवशे
न चासौ सम्पातः पयसि पयसां पत्युरुचितः ॥ ५७ ॥
नेता यत्र बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावतो वाहनम्
इत्यैश्वर्यसमन्वितोऽपि बलभिद्भग्नः परैः सङ्गरे
तद्युक्तं ननु दैवमेव शरणं धिग्धिग् ! वृथा पौरुषम् ॥५८॥
कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ५९ ॥
आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः
नास्त्युद्यमसमो बन्धुःकृत्वा यं नावसीदति ॥ ६० ॥
वरं गहनदुर्गेषु भ्रान्तं वनचरैः सह
न मूर्खजनसंसर्गः सुरेन्द्रभवनेष्वपि ॥ ६१ ॥

Digitized by Google

चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशंसितम्
नारी नाम विषाङ्कुरैरिव लता दोषैः समं वर्द्धिता ॥४८॥
तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं माकृथाः
सत्यं ब्रूह्यनुयाहि साधु पदवीं सेवस्व विद्वज्जनान्।
मान्यान्मानय विद्विषोऽप्यनुनय प्रच्छादय स्वान् गुणान्
कीर्त्तिं पालय दुःखिते कुरु दयामेतत्सतां चेष्टितं ॥५०॥

गुणवदगुणवद्वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन।
अतिरभसकृतानां कर्मणामाविपत्तेः
भवति हृदयदाही शल्यतुल्यो विपाकः॥ ५१ ॥

एको देवः केशवो वा शिवो वा
एकं मित्रं भूपतिर्वा यतिर्वा।
एको वासः पत्तने वा वने वा
एका भार्या सुन्दरी वा दरी वा ॥ ५२ ॥

वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा।
सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुराकृतानि ॥ ५३ ॥

भीमं वनम्भवति तस्य पुरं प्रधानं
सर्वो जनः सुजनतामुपयाति तस्य।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ ५४ ॥

Digitized by Google

नवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा
भाग्यानि पूर्वतपसा किल सञ्चितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ४४ ॥

ऐश्वर्य्यस्य विभूषणं सुजनता शौर्य्यस्य वाक्संयमो
ज्ञानस्योपशमः शमस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकालनियमं शीलम्परम्भूषणम् ॥ ४५ ॥

ते ते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थ मुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय विघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ४६ ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्त्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥ ४७ ॥

वाञ्छा सज्जनसङ्गमे गुणिगणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
एते यत्र वसन्ति निर्मलगुणास्तेभ्योनरेभ्यो नमः ॥ ४८ ॥

अग्राह्यं हृदयन्तथैव वदनं यद्दर्पणान्तर्गतं
भावः पर्वतसूक्ष्ममार्गविषमः स्त्रीणान्न विज्ञायते ।

Digitized by Google

कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः ।
सर्वलोकस्य वा मूर्द्धि विशीर्येत वनेऽथवा ॥ ३८ ॥

मौनान्मूकः प्रवचनपटुर्वातुलोजल्पकोवा
चान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।
धृष्टः पार्श्वे स भवति जनो दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ३९ ॥

नम्रत्वेनोन्नमन्तः परगुणनुतिभिः स्वान् गुणान् ख्यापयन्तः
स्वार्थान् सम्पादयन्तोविनतपृथुतरारम्भयन्तः परार्थे ।
चान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान्दुर्मुखान्दूषयन्तः
सन्तः साश्चर्यचर्याजगति बहुमता कस्य नाभ्यर्थनीयाः ॥ ४० ॥

लोभश्चास्ति गुणेन किं ? पिशुनता यद्यस्ति किम्पातकैः ?
सत्यञ्चेत्तपसा च किं ? शुचिमनो यद्यस्ति तीर्थेन किं ?
सौजन्यं यदि किन्निजैः ? स्वमहिमा यद्यस्ति किम्मण्डनैः ?
सद्विद्या यदि किं ? धनैरपयशो यद्यस्ति किं मृत्युना ?॥ ४१ ॥

अम्भोजिनीवननिवासविलासहेतुं
हंसस्य हन्तुमपरामपि तां विधाता ।
नो तस्य दुग्धजलभेदविधौ प्रशस्ताम्
वैदग्ध्यकीर्त्तिमपहन्तुमसौ समर्थः ॥ ४२ ॥

खल्वाटो दिवसेश्वरस्य किरणैः सन्तापिते मस्तके
वाञ्छन्देशमनातपं विधिवशाद्विल्वस्य मूलङ्गतः ।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः॥ ४३ ॥

Digitized by Google

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या खादन् नरास्थि निरामिषम्।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य विशङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफलफल्गुताम्॥ २२॥
स्वल्पं स्नायुवशावशेषमलिनं निर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम्॥ २३॥

पापान्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान् प्रकटीकरोति।
आपद्गतञ्च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥ २४॥

मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम्।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति॥ २५॥

सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रे स्थितं राजते।
स्वात्यां सागरशुक्तिमध्यपतितं मुक्ताफलं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते॥ २६॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे॥२७॥

Digitized by Google

द्रुमस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥२४॥

पतितोऽपि कराघातैरुत्पतत्येव कन्दुकः।
प्रायेण साधुवृत्तीनामस्थायिन्यो विपत्तयः॥ २५ ॥

प्रायः कन्दुकपातेन पतत्यार्यः पतन्नपि।
तथात्वनार्यः पतति मृत्पिण्डपतनं यथा॥ २६ ॥

प्रीणाति यः सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम्।
तन्मित्रमापदि सुखे च समं प्रयाति
एतत्त्रयं जगति पुण्यकृतो लभन्ते॥ २७॥

सम्पत्सु महतां चित्तं भवेदुत्पलकोमलम्।
आपत्सु च महाशैलशिलासंघातकर्कशम्॥ २८ ॥

दुर्जनः परिहर्तव्यो विद्ययापि समन्वितः।
मणिनालङ्कृतः सर्पः किमसौ न भयङ्करः॥ २९ ॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ता पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः।
गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदम्
युक्तं तेन जलेन सम्प्रति सतां मैत्री पुनस्त्वीदृशी ॥३०॥

या साधून् हि खलान् करोति विदुषोमूर्खान् हितान् द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात्
तामाराधय शङ्करीम्भगवतीन्दात्रीं फलं वाञ्छितं
हे ! साधो त्वमतो गुणेषु विफलेष्वास्थां वृथा मा कृथाः ॥३१॥

इत्थं कस्य कृते कृतः स विधिना तादृक् परं सम्पदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ १८ ॥

नमस्यामो देवान्ननु हत विधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलंकर्मायत्तं यदि किममरैः किञ्च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ १९ ॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतोलालनात्
विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात्
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयात् ।
मैत्री चाप्रणयात्समृद्धिरनयात् त्यागात् प्रमादाद्धनम् ॥२०॥

रत्नत्वं कमलानां सुपुरुषाणां परोपकारित्वम् ।
असताञ्च निर्दयत्वं स्वभावसिद्धं त्रिषु त्रितयम् ॥ २१ ॥

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवम्
शूरे निर्घृणता ऋजौ विमतिता दैन्यं प्रियालापिनि ।
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत्कोनाम गुणोभवेत्सुगुणिनां योदुर्जनैर्नाङ्कितः ॥२२॥

जातिर्यातु रसातलं गुणगणस्तस्याप्यधोगच्छतु
शीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना ।
शौर्यं वैरिणि वज्रमिरस्तमस्तु च तथाप्यर्थस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥ २३ ॥

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।

Digitized by Google

असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
विपद्युच्चैः स्थेयं पदमनुविधेयञ्च महताम्
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ १३ ॥
मनसि वचसि काये पुण्यपीयूषपूर्णा
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणु पर्वतीकृत्य नित्यं
निजहृदि विकशन्तः सन्ति सन्तः कियन्तः ॥ १४ ॥
इतः स्वपिति केशवः कुलमितस्तदीयद्विषाम्
इतश्च शरणार्थिनः शिखरिपत्रिणः शेरते ।
इतश्च वड़वानलः सह समस्तसंवर्तकैः
अहो ! विततमूर्जितम्भरसहञ्च सिन्धोर्वपुः ॥ १५ ॥
उदन्वच्छिन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं कलयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमो विजयताम् ॥ १६ ॥
क्वचिद्भूमौशय्या क्वचिदपि च पर्य्यङ्कशयनः
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्य्यार्थी न गणयति दुःखन्नच सुखम् ॥ १७ ॥
ये सन्तोषसुखप्रमोदमुदितास्तेषां न भिन्ना मुदो
ये त्वन्ये धनलोभसंकुलधियस्तेषान्न तृष्णा हता ।

Digitized by Google

तज्जाड्यं वसुधाधिपस्य सुधियो ह्यर्थं विनापीश्वराः
कुत्स्याः स्युः कुपरीक्षका हि मणयो यैरर्घतः पातिताः ॥७॥

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ८ ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ९ ॥

हर्तुर्याति न गोचरं किमपि संपुष्णाति यत्सर्वदा
ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान् प्रति मानमृच्छति नृपः कस्तैः सह स्पर्धते ॥१०॥

अधिगतपरमार्थान् पण्डितान्मावमंस्था
स्तृणमिव लघुलक्ष्मीर्नैव तान् संरुणद्धि ।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति विसतन्तुर्वारणं वारणानाम् ॥ ११ ॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टान्दशा
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
उन्मत्तेभविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ १२ ॥

Digitized by Google

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन् शशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ २ ॥

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्राङ्कुरात्
समुद्रमपि सन्तरेत् चपलमूर्मिमालाकुलम् ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ३ ॥

शशी दिवसधूसरो गलितयौवना कामिनी
सरोविगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥ ४ ॥

मणिः शाणालीढः समरविजयी हेतिनिहतो
मदक्षीणो नागः शरदि सरितः श्यामपुलिनाः ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
न निम्नाः शोभन्ते गलितविभवाश्चार्थिषु जनाः ॥ ५ ॥

परिक्षीणः कश्चित् स्पृहयति यवानां प्रसृतये
स पश्चात् सम्पूर्णो गणयति धरित्रीं तृणसमाम् ।
अतश्चानैकान्ता गुरुलघुतयार्थेषु धनिनाम्
अवस्था वस्तूनि प्रथयति च सङ्कोचयति च ॥ ६ ॥

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।

नराः संस्काराहा जगति किल केचित् सुमतिनः
समानायां जात्यामपि वयसि सत्यां परधियः ।
अयं दृष्टान्तोऽत्र स्फुटकरणतोऽत्यभ्यसनतः
शुकः श्लोकान् वक्तुं प्रभवति न काकः क्वचिदपि ॥ ९७ ॥

धनमपि परदत्तं दुःखमौचित्यभाजां
भवति हृदि तदेवानन्दकारीतरेषाम् ।
मलयजरसबिन्दुर्बाधते न प्रसन्नं
नयति च रसवाह्लादेवमत्यन्तमन्न ॥ ९८ ॥

कालक्रमेण परिणामवशादनर्घ्या
भावा भवन्ति खलु पूर्वमतीवतुच्छाः ।
मुक्तामणिर्जलदतोयकणोऽप्यणीयान्
संपद्यति च चिरकीचकरन्ध्रमध्ये ॥ ९९ ॥

इयं कुसुमदेवेन कविनैकेन निर्मिता ।
दृष्टान्तकलिका नाम जृम्भतां कविमानसे ॥ १०० ॥

इति कुसुमदेवरचितं दृष्टान्तशतकं सम्पूर्णम् ।

नीतिशतकम् ।

अज्ञः सुखमाराध्यः सुखतरमाराध्यतेऽभिज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ १ ॥

Digitized by Google

मनस्विनो न मान्यन्ते परतः प्राप्य जीवनम् ।
बलिभुग्भ्यो न काकेभ्यः स्पृहयन्ति हि कोकिलाः ॥८७॥
सन्तोषक्षतये पुंसामाकस्मिकधनागमः ।
सरसां सेतुभेदाय वर्षौघः स च न स्थितः ॥ ८८ ॥
जीयते भूगतोऽप्यात्मा कालेनात्मापि स्वर्गतः ।
भवेत् श्मशानमुद्यानमुद्यानञ्च श्मशानभम् ॥ ८९ ॥
उच्चशेखरगं वस्तु शुभं स्यात्सुखकारणम् ।
उपशामयते बाधं यथैवा मृतसंस्कृतम् ॥ ९० ॥
सन्तुष्यत्युत्तमः स्तुत्या धनेन महताधमः ।
प्रसीदन्ति जयैर्देवा बलिभिर्भूतविग्रहाः ॥ ९१ ॥
स्वजातीयविघाताय माहात्म्यं दृश्यते नृणाम् ।
श्येनो विहङ्गमानेव हिनस्ति न भुजङ्गमान् ॥ ९२ ॥
गुरुप्रयोजनोद्देशादर्चयन्ति न भक्तितः ।
दुग्धदात्रीति गौर्गेहे पोष्यते न तु धर्मतः ॥ ९३ ॥
महतां तादृशं तेजो यत्र शाम्यन्त्यनोजसः ।
अस्तं यान्ति प्रकाशेन तारका हि विवस्वतः ॥ ९४ ॥

दाता दानस्यान्तरा स्यात् पृथिव्यां
गेहे गेहे याचकानां समूहः
चिन्तारत्नस्यास्ति सत्त्वे विवादो
मार्गे मार्गे रेणवः सन्त्यसंख्याः ॥ ९५ ॥

चारुता अपवशेन पदार्थे धैर्येण तदनुवादिगुणत्वात् ।
वेणुगो भवति मन्दुरसो यन्नगो हि सुखदः क्वतशब्दः ॥९६॥

निकटस्थं गरीयांसमपि लोको न मन्यते
पवित्रामपि यन्मर्त्या न नमस्यन्ति जाह्नवीम् ॥ ७६ ॥
स्वजनः श्लाघ्यतामेति गुणवान् परैः।
गोपैर्गोपवदाज्ञायि हरिर्देवैर्जगत्पतिः ॥ ७७ ॥
उत्तमस्तोषमायाति तदङ्गी पोष्यते यदि।
वृक्षः प्रसीदति प्रायः पादाभ्यङ्गेन न स्वयम् ॥ ७८ ॥
सर्वत्र गुणवानेव चकास्ति प्रथिते नरे।
मणिर्मूर्ध्नि गले बाह्वौ पादपीठेऽपि शोभते ॥ ७९ ॥
उत्तमं सुचिरं नैव विपद्दोऽभिभवत्यलम्।
राहुग्रसनसंभूतक्षणो विच्छाययेद्विधुम् ॥ ८० ॥
प्रायः स्वभावं मुञ्चन्ति सन्तःसंसर्गतोऽसताम्।
चण्डांशुसङ्गातपात् पादा हिमांशोरश्मतश्च्युतः ॥ ८१ ॥
तुल्यं परोपतापित्वं क्रुद्धयोः साधुनीचयोः।
न दाहे ज्वलतोर्भिन्नचन्दनेन्धनयोः क्वचित् ॥ ८२ ॥
न भाति वाच्छा वैजात्ये न देवा भान्ति वादिनि।
अञ्जनं दूषणं वक्त्रे भूषणं किल लोचने ॥ ८३ ॥
दुर्भगः स्यात्प्रकृत्या यो विभूत्यापि स तादृशः।
गोमयं श्रीनिवासोऽस्ति न तथापि मनोहरम् ॥ ८४ ॥
गुणानर्चन्ति जन्तूनां न जातिं केवलां क्वचित्।
स्फाटिकं भाजनं भग्नं काकिन्यापि न गृह्यते ॥ ८५ ॥
प्रागच्छदुत्सवो भाति यथैव न तथा गतः।
हिमांशोरुदयः सायं चकास्ति न तथोद्गमः ॥ ८६ ॥

गुणवान् सुचिरस्थायी दैवोऽपि नाभिजायते ।
तिष्ठत्येकां निशाश्चन्द्रः श्रीमान् सम्पूर्णमण्डलः ॥ ६५ ॥
यतएवागतो दोषस्ततएव निवर्त्तते ।
अग्निदग्धस्य विस्फोटशान्तिः स्यादग्निना ध्रुवम् ॥ ६६ ॥
स्वधियो निश्चयो नास्ति यस्य सभ्रमते स्वयम् ।
प्रवातवालपत्रस्थः पटस्तत्र निदर्शनम् ॥ ६७ ॥
कथाप्रबन्धे बन्ध्ये ऽपि कश्चिदेवानुरज्यते ।
प्रायःश्वासादपंल्यतः सम्बन्निसर्केकसम् ॥ ६८ ॥
बुद्धिमत्त्वाभिमानः को भवेत् प्रज्ञोपजीविनाम् ।
अन्यदेयैरलङ्कारैर्नाहङ्कारो विभूषणे ॥ ६९ ॥
उत्तमोऽप्यधमस्य स्याद्याच्ञानम्रकारः क्वचित् ।
कौस्तुभादीनि रत्नानि ययाचे हरिरम्बुधिम् ॥ ७० ॥
प्रयत्ने समके केचिदेव स्युः फलभागिनः ।
क्षीरोदमथनाद्दैवैरमृतं प्रापि नासुरैः ॥ ७१ ॥
गुणैः पूजा भवेत् पुंसां नैकस्माज्जायते कुलात् ।
चूड़ारत्नं शशी शम्भोः यानमुच्चैःश्रवा हरेः ॥ ७२ ॥
भोगः परोपतापेन पुंसां दुःखाय न स्थिरः ।
पानमप्यसृजः क्षिप्रं स्वपीड़ायै जलौकसाम् ॥ ७३ ॥
नोपभोगपरान् अर्थान् कोऽपि सञ्चिनुते चिरम् ।
आस्रवः किमलङ्कारानान्याहृत्य कुर्वते ॥ ७४ ॥
विवर्णवचनैर्मन्युर्गूढ़ोऽप्यन्तः प्रकाशते ।
इन्धनान्तरसंस्थैव ज्वलत्यग्नि : पयः कणैः ॥ ७५ ॥

बहुभिर्बहुभिः शूरः पुम्भिरेको न बाध्यते ।
कपोतपोतकैरेकः श्येनो जातु न बाध्यते ॥ ५४ ॥
येनात्मा पश्यतां नीतः स एवान्विष्यते जनैः ।
हस्ती हेमसहस्रेण क्रीयते न मृगाधिपः ॥ ५५ ॥
गुणो गुणान्तरापेक्षी स्वरूपख्यातिहेतवे ।
स्वभावबाल्यं लावण्यं तारुण्येन मनोहरम् ॥ ५६ ॥
सुलभं वस्तु सर्वस्य न यात्यादरणीयताम् ।
स्वदारपरिहारेण परदारार्थिनो जनाः ॥ ५७ ॥
विक्रीतं निजमात्मानं वस्त्रैः संस्कुरुते जडः ।
परेभ्यः स्वशरीरस्य को वा भूषां वितन्वते ॥ ५८ ॥
क्षणक्षयिणि सापाये भोगे रज्यन्ति नोत्तमाः ।
सन्त्यज्याम्भोजकिञ्जल्कं न प्रार्थयति शैवलम् ॥ ५९ ॥
असम्भवगुणस्तुत्या जायते स्वात्मनस्त्रपा ।
कर्णिकारं सुगन्धीति वदन् कोनोपहास्यते ॥ ६० ॥
धनाशया खलीकारः कस्य नाम न जायते ।
दूरादामिषलोभेन बध्यते खे वरः खगः ॥ ६१ ॥
तटस्थैः ख्यापितास्वैतो विशन्ति गुणिनां गुणाः ।
उत्कोचितानां पद्मानां गन्धो वायुभिराहृतः ॥ ६२ ॥
निजाशयवदाभाति पुंसां चित्तपराशयः ।
प्रतिमा मुखचन्द्राभे कृपाणे याति दीर्घताम् ॥ ६३ ॥
अधमं बाधते भूयो दुःखवेगो न तूत्तमम् ।
पादद्वयं व्रजत्याशु शीतस्पर्शो न चक्षुषी ॥ ६४ ॥

Digitized by Google

विना परीक्षां नो तत्त्वं प्रसिद्धं ज्ञायते सतः ।
स्वर्णसंबन्धास्नो बुद्धिर्ज्ञायते कर्षणं विना ॥ ४३ ॥
प्राप्य वित्तं जड़ास्तूर्णं निर्वृतिं यान्ति नान्यथा ।
तोयमासाद्य गर्जन्ति न रिक्तास्तनयित्नवः ॥ ४४ ॥
कार्यापेक्षी जनः प्रायः प्रीतिमाविष्करोत्यलम् ।
लोभार्थी सौनिकः शष्पैर्मेषं पुष्णाति पेशलैः ॥ ४५ ॥
दुर्जनो जीयते युक्त्या निग्रहेण न धीमता ।
निपात्यते महावृक्षस्तत्समीपक्षितिक्षयात् ॥ ४६ ॥
सुखदुःखे समे स्यातां जन्तूनां क्लेशहेतुके ।
मूर्ध्नि स्थितानां केशानां भवेतां छेदकेदने ॥ ४७ ॥
दुष्टदुर्जनदौरात्म्यैः सज्जने रज्यते जनः ।
आरुह्य पर्वतं पान्थः सानौ निर्वृतिमेत्यलम् ॥ ४८ ॥
स्वभावसुन्दरं वस्तु न संस्कारमपेक्षते ।
मुक्तारत्नस्य शाणाश्मघर्षणं नोपयुज्यते ॥ ४९ ॥
शोभते विदुषां मध्ये नैव निर्गुणमानसः ।
अन्तरे तमसान्दीपः शोभते नार्कतेजसाम् ॥ ५० ॥
युक्त्या परोक्षं बाधेत विपक्षक्षपणक्षमः ।
शोषयत्यचिरेणैव प्रान्तरस्थमलं पयः ॥ ५१ ॥
दुर्गदेशप्रविष्टोऽपि शूरोऽभ्येति पराभवम् ।
गाढपङ्कनिमग्नाङ्गो मातङ्गोऽप्यवसीदति ॥ ५२ ॥
नयेनाङ्कुरितं शौर्यं जयाय न तु केवलम् ।
मन्त्रयुक्तं विषं भुक्तं पथ्यं स्यादन्यथा मृतिः ॥ ५३ ॥

भोगेच्छा नोपभोगेन भोगिनां जातु शाम्यति ।
लवणेनान्तरालेन तृष्णा प्रत्युत जायते ॥ ३२ ॥
दुर्लभोऽप्युत्तमः प्रायः स्वजातीयेन लभ्यते ।
कर्णकोटरगं वारि वारिणैवापकृष्यते ॥ ३३ ॥
जन्तोर्निरुपभोगस्य दृश्यते भुवि रुग्णता ।
वाताशिनो द्विजिह्वत्वं विहितं पश्य वेधसा ॥ ३४ ॥
ऊर्जितं सज्जनं दृष्ट्वा द्वेष्टि नीचः पुनः पुनः
कवलीकुरुते स्वस्थं विधुं दिवि विधुन्तुदः ॥ ३५ ॥
न लभन्ते विनोद्योगं जन्तवः सम्पदां पदम् ।
सुराः क्षीरोदविक्षोभमनुभूयामृतं पपुः ॥ ३६ ॥
सम्पत्तौ कोमलं चित्तं साधोरापदि कर्कशम् ।
सुकुमारं मधौ पत्रं तरोः स्यात्कठिनं शुचौ ॥ ३७ ॥
आकरः कारणं जन्तोर्दौर्जन्यस्य न जायते ।
कालकूटः सुधासिन्धोः प्राणिनां प्राणहारकः ॥ ३८ ॥
गुणदोषाववाप्येते पुंसां संशीलनाद्बुधैः ।
लेभे पीयूषगरले मन्थनादम्बुधेः सुरैः ॥ ३९ ॥
स्वभावं न जहात्येव साधुरापद्गतोऽपि सन् ।
कर्पूरः पावकस्पृष्टः सौरभं लभतेतराम् ॥ ४० ॥
न व्याप्तिरेषा गुणिनो गुणवान् जायते ध्रुवम् ।
चन्दनोऽनलसन्दग्धो न भस्म सुरभि क्वचित् ॥ ४१ ॥
अप्यापत्समयः साधोः प्रयाति श्लाघनीयताम् ।
विधोर्विधुन्तुदास्कन्दविपत्कालोऽपि सुन्दरः ॥ ४२ ॥

व्यसनानन्तरं सौख्यं स्वल्पमप्यधिकं भवेत् ।
कषायरसमास्वाद्य स्वाद्वतीताम्बु विन्दते ॥ २१ ॥
गुणानामन्तरं प्रायस्तज्ज्ञो जानाति नेतरः ।
मालतीमल्लिकामोदं घ्राणं वेत्ति न लोचनम् ॥ २२ ॥
प्रभूतवयसः पुंसो धियः पाकः प्रवर्त्तते ।
जीर्णस्य चन्दनतरोरामोद उपजायते ॥ २३ ॥
कामाय स्पृहयत्यात्मा संयतोऽपि मनीषिणः ।
वीथीन्नियमितोऽप्युच्चा ग्रीष्ममासाद्य धावति ॥ २४ ॥
धनागमेऽधिकं पुंसां लोभमभ्येति मानसम् ।
निदाघकाले: प्रालेयः प्रायः शैत्यं वहत्यलम् ॥ २५ ॥
सहजोऽपि गुणः पुंसां साधुवादेन वर्धते ।
कामं सुरसलेपेन कान्तिं वहति काञ्चनम् ॥ २६ ॥
निन्दां यः कुरुते साधोस्तथा स्वं दूषयत्यसौ ।
खे भूतिं यस्त्यजेदुच्चैर्मूर्ध्नि तस्यैव सा पतेत् ॥ २७ ॥
स्वभावं नैव मुञ्चन्ति सन्तः संसर्गतोऽसताम् ।
न त्यजन्ति रुतं मञ्जु काकसम्पर्कतः पिकाः ॥ २८ ॥
सम्पत्तौ कर्कशं चित्तं खलस्यापदि कोमलम् ।
शीतलं कठिनं प्रायस्तप्तं मृदु भवत्ययः ॥ २९ ॥
प्रायः प्रकुप्यतितरां प्रीत्यैव प्रखलो जनः ।
नयनं स्नेहसम्पर्कात्कालुष्यं समुपैत्यलम् ॥ ३० ॥
शुभं वाप्यशुभं कर्म फलकालमुपेक्षते ।
शरद्येव फलत्याशु शालिर्न सुरभौ क्वचित् ॥ ३१ ॥

Digitized by Google

उत्तमः क्लेशविक्षोभं क्षमः सोढुं नहीतरः।
मणिरेव महाशाणघर्षणं नतु मृत्कणः ॥ १० ॥
स्वजातीयं विना वैरी न जय्यः स्यात् कदाचन।
विना वज्रमणिं मुक्तामणिर्भेद्यः कथं भवेत् ॥ ११ ॥
सज्जना एव साधूनां प्रथयन्ति गुणोत्करम्।
पुष्पाणां सौरभं प्रायस्तनुते दिक्षु मारुतः ॥ १२ ॥
उपकर्त्तुं यथा स्वल्पः समर्थो न तथा महान्।
प्रायः कूपस्तृषां हन्ति सततं न तु वारिधिः ॥ १३ ॥
सति शीले गुणा भान्ति पुंसां शौर्यादयो यथा।
यौवने सदलङ्काराः शोभान्बिभ्रति सुभ्रुवः ॥ १४ ॥
जडः प्रभवति प्रायो दुःखं बिभ्रति साधवः।
शीतांशावुदिते पद्माः सङ्कोचं यान्ति वारिणि ॥ १५ ॥
गुणेन स्पृहणीयः स्यान्न रूपेण युतो नरः।
सौगन्धहीनं नादेयं पुष्पं कान्तमपि क्वचित् ॥ १६ ॥
कश्चित् कस्यचिदेव स्यात् सुहृद्विस्रम्भभाजनम्।
पद्मं विकासयत्यर्कः सङ्कोचयति कैरवम् ॥ १७ ॥
ईश्वराः पिशुनान् शश्वद्विषन्तीति किमद्भुतम्।
प्रायो निश्चय एवाहीन् द्विजिह्वान् द्वेष्टितराम् ॥ १८ ॥
संपद्यास्ते परैः साकं विपदि स्वजनैर्जडः।
जृम्भत्यम्भोरुहं भृङ्गः शुष्यत्युदकशैवलैः ॥ १९ ॥
नीचावमाननमलिनां प्रभुंक्ते सम्पदं पुमान्।
लशुनाक्तां सकर्पूरचर्चां वितनुते सनो ॥ २० ॥

Digitized by Google

दृष्टान्तशतकम्।

शिवस्मरणमेवैकं संसारान्तकनाशनम्।
घनौघो घोरदावाग्नि-निर्वापणपटुर्भवेत्॥ १॥
साधुरेव प्रवीणः स्यात्सद्गुणामृतवर्णने।
नवचूताङ्कुरास्वादकुशलः कोकिलः किल॥ २॥
दुर्जनो दूषयत्येव सतां गुणगणं क्षणात्।
मलिनीकुरुते धूमः सर्वथा विमलाम्बरम्॥ ३॥
यथा दोषो विभात्यस्य जनस्य न तथा गुणः।
प्रायः कलङ्क एवेन्दोः प्रस्फुटो न प्रसन्नता॥ ४॥
विवेक एव व्यसनं पुंसां क्षययितुं क्षमः।
अपहर्त्तुं समर्थोऽसौ रविरेव निशातमः॥ ५॥
प्रायः सदुपदेशार्हा धीमन्तो न जडाशयाः।
तिलाः कुसुमसौगन्ध्यवाहिनो न यवाः क्वचित्॥ ६॥
चिन्त्यते नयएवादावमन्दं समुपेप्सुभिः।
विनम्य पूर्वं सिंहोऽपि हन्ति हस्तिनमोजसा॥ ७॥
संस्थितस्य गुणोत्कर्षः प्रायः प्रस्फुरति स्फुटम्।
दग्धस्यागुरुखण्डस्य स्फारि भवति सौरभम्॥ ८॥
मनस्विहृदयं धत्ते रोषेणैव प्रसन्नताम्।
भस्मना ज्वलदङ्गारः प्रसादं लभतेतराम्॥ ९॥

शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रोज्ज्वला
लक्ष्मीरित्यनुभूयते स्थिरमिव स्फीते शुभे कर्मणि ।
विच्छिन्ने नितरामनङ्गकलहक्रीडात्रुटत्तन्तु किम्
मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दिशो दृश्यताम् ॥ ९६ ॥

सदा योगाभ्यासव्यसनवशयोरात्ममनसो-
रविच्छिन्ना मैत्री स्फुरति यमिनस्तस्य किमु तैः ।
प्रियाणामालापैरधरमधुभिर्वक्त्रविधुभिः
सनिश्वासामोदैः सकुचकलशाश्लेषसुरतैः ॥ ९७ ॥

किं कन्दर्प ! करं कदर्थयसि ? किं कोदण्डझङ्कारितैः ?
रे रे कोकिल ! कोमलकलरवङ्किं त्वं वृथा भाषसे ?
मुग्धे ! स्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलं ?
चेतः सम्प्रति चन्द्रचूडचरणध्यानामृते वर्तते ॥ ९८ ॥

यदासीदज्ञानं स्मरतिमिरसञ्चारजनितं
तदा सर्वं नारीमयमिदमशेषं जगदभूत् ।
इदानीमस्माकं पटुतरविवेकाञ्जनदृशां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ ९९ ॥

यां चिन्तयामि सततं मयि सा विरक्ता
सा चान्यमिच्छति जनं स जनोऽन्य रक्तः ।
अस्मत् कृतेऽपि परितुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ॥ २०० ॥

इति श्रीभर्तृहरिविरचितं शृङ्गारशतकं समाप्तम् ।

जात्यन्धाय च दुर्मुखाय च जराजीर्णाखिलाङ्गाय च
ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च ।
यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया
पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रज्येत कः ॥ ९० ॥
वेश्यासौ मदनज्वालारूपेन्धनसमेधिता ।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥ ९१ ॥
कश्चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि ।
चारभटचौरचेटकनटविटनिष्ठीवनशरावम् ॥ ९२ ॥

सुवर्त्तप्रशंसा ।

धन्यास्त एव तरलायतलोचनानां
तारुण्यपूर्णघनपीनपयोधराणाम् ।
क्षामोदरोपरिलसत्त्रिवलीलतानां
दृष्ट्वाकृतिं विकृतिमेति मनो न येषाम् ॥ ९३ ॥
बाले ! लीलामुकुलितममी सुन्दरा दृष्टिपाताः
किं क्षिप्यन्ते विरम विरम व्यर्थ एष श्रमस्ते ।
संप्रत्यन्ये वयमुपरतं बाल्यमास्था वनान्ते
क्षीणो मोहस्तृणमिव जगज्जालमालोकयामः ॥ ९४ ॥
इयं बाला मां प्रत्यनवरतमिन्दीवरदल-
प्रभाचौरं चक्षुः क्षिपति किमभिप्रेतमनया ।
गतो मोहोऽस्माकं स्मरसमरबाणव्यतिकर-
ज्वरज्वालाः शान्तास्तदपि न वराकी विरमति ॥ ९५ ॥

Digitized by Google

अपसर सखे ! दूरं तस्मात् कटाक्षविषानलात्
प्रकृतिविषमाद्योषित्सर्पाद्विलासफणाभृतः ।
इतरफणिना दष्टाः शक्याश्चिकित्सितुमौषधै-
श्चतुरवनिताभोगिग्रस्तं त्यजन्ति हि मन्त्रिणः ॥ ८४ ॥

विस्तारितं मकरकेतनधीवरेण
स्त्रीसंज्ञितं बडिशमत्र भवाम्बुराशौ ।
येनाचिरात्तदधरामिषलोलमर्त्य-
मत्स्यान् विकृष्य पचतीत्यनुरागवह्नौ ॥ ८५ ॥

कामिनीकायकान्तारे कुचपर्वतदुर्गमे ।
मा संचर मनःपान्थ ! तत्रास्ते स्मरतस्करः ॥ ८६ ॥

आदीर्घेण चलेन वक्रगतिना तेजस्विना भोगिना
नीलाब्जद्युतिवाहिना वरमहं दष्टो न तच्चक्षुषा ।
धन्याः सन्ति चिकित्सका दिशि दिशि प्रायेण धर्मार्थिनो
मुग्धाक्षीक्षणवीक्षितस्य न हि मे वैद्यो न चाप्यौषधम् ॥८७॥

इह हि मधुरगीतं नृत्यमेतद्रसोऽपि
स्फुरति परिमलोऽसौ स्पर्श एष स्तनानाम् ।
इति हतपरमार्थैरिन्द्रियैर्भ्राम्यमाणै-
रहितकरणदक्षैः पञ्चभिर्वञ्चितोऽसि ॥ ८८ ॥

न गम्यो मन्त्राणां न च भवति भैषज्यविषयो
न चापि प्रध्वंसं व्रजति विविधैः शान्तिशतकैः ।
भ्रमावेगादङ्गे किमपि विदधद्भव्यमसमः
स्मरापस्मारोऽयम्भ्रमयति दृशं घूर्णयति च ॥ ८९ ॥

Digitized by Google

आवर्तः संशयानामविनयभवनं पत्तनं साहसानाम्
दोषाणां संनिधानं कपटशतमयं क्षेत्रमप्रत्ययानाम् ।
स्वर्गद्वारस्य विघ्नो नरकपुरमुखं सर्वमायाकरण्डं
स्त्रीयन्त्रं केन सृष्टं विषममृतमयं प्राणिनां मोहपाशः॥७७॥
न सत्येन शशाङ्क एष वदनीभूतो नवेन्दीवर-
द्वन्द्वे लोचनताङ्गते न कनकैरप्यङ्गयष्टिः कृता ।
किन्त्वेवं कविभिः प्रतारितमनास्तत्त्वं विजानन्नपि
त्वङ्मांसास्थिमयं वपुर्मृगदृशां मन्दो जनः सेवते ॥ ७८ ॥
लीलावतीनां सहजा विलासास्त एव मूढस्य हृदि स्फुरन्ति ।
रागो नलिन्या हि निसर्गसिद्धस्तत्र भ्रमत्येव मुदा षडंघ्रिः ॥७९॥
यदेतत् पूर्णेन्दुद्युतिहरपदाराकृतिवरं
मुखाब्जं तन्वङ्ग्याः किल वसति तत्राधरमधु ।
इदं तावत्पाकं द्रुमफलमिवातीव विरसम्
व्यतीतेऽस्मिन् काले विषमिव भविष्यत्यसुखदम् ॥ ८० ॥
उन्मीलत्त्रिवलीतरङ्गनिलया प्रोत्तुङ्गपीनस्तन-
द्वन्द्वेनोद्यतचक्रवाकमिथुनाकाराम्बुजोल्लासिनी ।
कान्ताकारधरा नदीयमभितः क्रूराशया नेष्यते
संसारार्णवमज्जनं यदि जना दूरात् परित्यज्यताम्॥८१॥
जल्पन्ति सार्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृदये चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ? ॥८२॥
मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलम् ।
अतएव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते ॥ ८३ ॥

Digitized by Google

गच्छाम: सद्म यावद्विकसितमुदेन्दीवरालोकनीनाम्
आक्रम्याक्रम्य रूपं झटिति न जरया लुप्यते प्रेयसीनाम्॥ ७०॥

रागस्यागारमेकं नरकशतमहादुःखसम्प्राप्तिहेतु-
र्मोहस्योत्पत्तिवीजं जलधरपटलं ज्ञानताराधिपस्य।
कन्दर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबन्धम्
लोकेऽस्मिन्नह्यनर्थं निजकुलदहनं यौवनादन्यदस्ति॥ ७१॥

शृङ्गारद्रुमनीरदे बहुतरक्रीड़ारसस्रोतसि।
प्रद्युम्नप्रियबान्धवे चतुरतामुक्ताफलोदन्वति।
तन्वीनेत्रचकोरपारणविधौ सौभाग्यलक्ष्मीनिधौ
धन्य: कोऽपि न विक्रियां कलयति प्राप्ते नवे यौवने॥ ७२॥

कामिनीगर्हणं।

कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युत्सुक:
पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति।
दृष्ट्वा माद्यति मोदतेऽतिरमते प्रस्तौति जानन्नपि
प्रत्यक्षाशुचिपुत्रिकां स्त्रियमहो! मोहस्य दुश्चेष्टितम्॥ ७३॥

श्रुता भवति तापाय दृष्टा चोन्मादवर्द्धिनी।
स्पृष्टा भवति मोहाय सा नाम दयिता कथम्॥ ७४॥

तावदेवामृतमयी यावल्लोचनगोचरा
चक्षु:पथादपगता विषादप्यतिरिच्यते॥ ७५॥

नामृतं न विषं किञ्चिदेकां मुक्त्वा नितम्बिनीम्।
सैवामृतलता रक्ता विरक्ता विषवल्लरी॥ ७६॥

Digitized by Google

स्त्रीमुद्रां झषकेतनस्य जननीं सर्वार्थसम्पत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः
केचित्पञ्चशिखीकृताश्च जटिलाः कापालिकाश्चापरे ॥ ६५ ॥

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशना
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयोदधियुतं ये भुञ्जते मानवा-
स्तेषामिन्द्रियनिग्रहो यदि भवेत् विन्ध्यस्तरेत्सागरम् ॥ ६६

स्त्रीणां परित्यागप्रशंसा ।

संसारेऽस्मिन्नसारे कुनृपतिभवनद्वारसेवावलम्ब-
व्यासङ्गध्वस्तधैर्याः कथममलधियो मानसं संविदध्युः ?
यद्येताः प्रोद्यदिन्दुद्युतिनिचयभृतो न स्युरम्भोजनेत्राः
प्रेङ्खत्काञ्चीकलापाः स्तनभरविनमन्मध्यभागास्तरुण्यः ॥ ६७ ॥

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावगाढद्रुमे
गङ्गाधौतशिलातले हिमवतः स्थाने स्थितः श्रेयसि ।
कः कुर्वीत शिरःप्रणाममलिनं मानं मनस्वी जनो
यद्युत्रस्तकुरङ्गशावनयना न स्युः स्मरास्त्रं स्त्रियः ॥ ६८ ॥

संसार ! तव निस्तारपदवी न दवीयसी ।
अन्तरा दुस्तरा न स्युर्यदि रे ! मदिरेक्षणाः ॥ ६९ ॥

यौवनप्रशंसा ।

राजन् ! तृष्णाम्बुराशेर्न हि जगति गतः कश्चिदेवावसानम्
को वार्थोऽन्यैः प्रभूतैः स्ववपुषि गलिते यौवने सानुरागे ।

Digitized by Google

स्वपरप्रतारकोऽसौ निन्दति योऽलीकं पण्डितो युवतीः ।
यस्मात्तपसोऽपि फलं स्वर्गः स्वर्गस्यापि फलं तथा स रसः ॥ ५८ ॥

मत्तेभकुम्भदलने भुवि सन्ति शूराः
केचित्प्रचण्डमृगराजवधेऽपि दक्षाः ।
किन्तु ब्रवीमि बलिनां पुरतः प्रसह्य
कन्दर्पदर्पदलने विरला मनुष्याः ॥ ५९ ॥

सन्मार्गे तावदास्ते प्रभवति च नरस्तावदेवेन्द्रियाणाम्
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥ ६० ॥

उन्मत्तप्रेमसंरम्भादारभन्ते यदङ्गनाः ।
तत्र प्रत्यूहमाधातुं ब्रह्मापि खलु कातरः ॥ ६१ ॥

तावन्महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता ।
यावज्ज्वलति नाङ्गेषु हतः पञ्चेषुपावकः ॥ ६२ ॥

शास्त्रज्ञोऽपि प्रथितविनयोऽप्यात्मबोधोऽपि बाढम्
संसारेऽस्मिन् भवति विरलो भाजनं सद्गतीनाम् ।
येनैतस्मिन्निरयनगरद्वारमुद्घाटयन्ती
वामाक्षीणां भवति कुटिला भ्रूलता कुञ्चिकेव ॥ ६३ ॥

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी पूयक्लिन्नः कृमिकुलशतैराप्ततनुः ।
क्षुधाक्षामो जीर्णः पिठरककपालार्पितगलः
शुनीमन्वेति श्वा हतमपि निहन्त्येव मदनः ॥ ६४ ॥

Digitized by Google

इदमनुचितक्रमश्च पुंसां
यदिह जरास्वपि मान्मथा विकाराः
तदपि च न कृतं नितम्बिनीनां
स्तनपतनावधि जीवितं रतं वा ॥ ५१ ॥

एतत्कामफलं लोके यद्द्वयोरेकचित्तता
अन्यचित्तकृते कामे शवयोरिव सङ्गमः ॥ ५२ ॥

प्रणयमधुराः प्रेमोद्गाढ़रसादलसास्तथा
भणन्ति मधुराः मुग्धप्रायाः प्रकाशितप्रमदाः।
प्रकृतिसुभगा विस्रंभार्हं स्मरोदयदायिनः
रहसि किमपि स्वैरालापा हरन्ति मृगदृशाम् ॥ ५३ ॥

आवासः क्रियतां गाङ्गे पापहारिणि वारिणि
स्तनमध्ये तरुण्या वा मनोहारिणि हारिणि ॥ ५४ ॥

प्रियपुरतो युवतीनां तावत्पदमातनोतु हृदि मानः।
भवति न यावच्चन्दनतरुसुरभिर्मधुनिर्मलः पवनः ॥ ५५ ॥

दुर्विरक्तप्रशंसा।

तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः।
यावदेव न कुरङ्गचक्षुषां ताड्यते चपललोचनाञ्चलैः ॥ ५६ ॥

वचसि भवति सङ्गत्यागमुद्दिश्य वार्ता
श्रुतिमुखरमुखानां केवलं पण्डितानाम्।
जघनमरुणरत्नग्रन्थिकाञ्चीकलापं
कुवलयनयनानां को विहातुं समर्थः ? ॥ ५७ ॥

Digitized by Google

तथाप्येतद्भूमौ नहि परहितात्पुण्यमधिकं
न चास्मिन् संसारे कुवलयदृशो रम्यमपरम् ॥ ४५ ॥

किमिह बहुभिरुक्तैर्युक्तिशून्यैः प्रलापै-
र्द्वयमिह पुरुषाणां सर्वदा सेवनीयम्।
अभिनवमदलीलालालसं सुन्दरीणां
स्तनभरपरिखिन्नं यौवनं वा वनं वा ॥ ४६ ॥

सत्यं जना! वच्मि न पक्षपातात्
लोकेषु सर्वेषु च तथ्यमेतत्।
नान्यन्मनोहारि नितम्बिनीभ्यो
दुःखैकहेतुर्न च कश्चिदन्यः ॥ ४७ ॥

प्राङ्मामेति मनागमानितगुणं जाताभिलाषं ततः
सव्रीडं तदनु श्लथोद्यतमनु प्रत्यस्तधैर्यं पुनः।
प्रेमार्द्रं स्पृहणीयनिर्भररहः क्रीडाप्रगल्भा ततो
निःशङ्काङ्गविकर्षणाधिकसुखं रम्यं कुलस्त्रीरतम् ॥ ४८ ॥

उरसि निपतितानां स्रस्तधम्मिल्लकानां
मुकुलितनयनानां किञ्चिदुन्मीलितानाम्।
सुरतजनितखेदस्वेदगण्डस्थलीनां
अधरमधु वधूनां भाग्यवन्तः पिबन्ति ॥ ४९ ॥

आमीलितनयनानां यः
सुरतरसोऽनुसंविदं कुरुते।
मिथुनैर्मिथोऽवधारित-
मवितथमिदमेव कामनिर्वहणम् ॥ ५० ॥

Digitized by Google

सम्भोगक्लान्तकान्ताशिथिलभुजलतातर्जितं कर्करान्तो
ज्योत्स्नाभिन्नाधरांशं पिबति न सलिलं शारदं मन्दभाग्यः ४०

हेमन्ते दधिदुग्धसर्पिरशना माञ्जिष्ठवासोधृताः
काश्मीरद्रवसान्द्रदिग्धवपुषः खिन्ना विचित्रैरतैः ।
पीनोरःस्थलकामिनीजनकृताश्लेषा गृहाभ्यन्तरे
ताम्बूलीदलपूगपूरितमुखा धन्याः सुखं शेरते ॥ ४१ ॥

शिशिरः ।

चुम्बन्तो गण्डभित्तीरलकवति मुखे शीत्कृतान्यादधाना
वक्षस्युत्कञ्चुकेषु स्तनभरपुलकोद्भेदमापादयन्तः ।
ऊरूनाकम्पयन्तः पृथुजघनतटात् स्रंसयन्तोऽंशुकानि
व्यक्तं कान्ताजनानां विटचरितकृतः शैशिरा वान्ति वाताः ॥ ४२ ॥

केशानाकलयन् दृशो मुकुलयन् वासो बलादाक्षिपन्
आतन्वन् पुलकोद्गमं प्रकटयन्नालिङ्ग्य कम्पं शनैः ।
वारंवारमुदारशीत्कृतकृतो दन्तच्छदान् पीड़यन्
प्रायः शैशिर एष सम्प्रति मरुत् कान्तासु कान्तायते ॥ ४३ ॥

आसाराः सन्ततोऽमी विरतिविरसायासविषया
जुगुप्सन्त्यां यद्वा ; ननु सकलदोषास्पदमिति ।
तथाप्यन्तस्तत्त्वे प्रणिहितधियामप्यतिबल-
स्त्वदीयो नाख्येयः स्फुरति हृदये कोऽपि महिमा ॥ ४४ ॥

भवन्तो वेदान्तप्रणिहितधियां सन्तु गुरवो
विदग्धालापानां वयमपि कवीनामनुचराः ।

Digitized by Google

विद्युदुपचितमेघभूमयः कन्दलिन्यो
नवकुटजकदम्बामोदिनो गन्धवाहाः ।
शिखिकुलकलकेका एव रम्या वनान्ताः
सुखिनमसुखिनं वा सर्वमुत्कण्ठयन्ति ॥ २५ ॥

उपरि घनं घनपटलं तिर्यग्गिरयोऽपि नर्तितमयूराः
वसुधा कन्दलधवला दृष्टिं पथिकः क्व पातयतु ॥ २६ ॥

इतोविद्युद्वल्लीविलसितमितः केतकितरोः
स्फुरद्गन्धः प्रोद्यज्जलदनिनदस्फूर्जितमितः ।
इतः केकिक्रीडाकलकलरवः पक्ष्मलदृशां
कथं यास्यन्त्येते विरहदिवसाः सम्भृतरसाः ॥ २७ ॥

अमुष्मिन् संसारे त्वमसि नभसि प्रोढ़जलद
ध्वनिप्राये तस्मिन् पतति दृषदां तीरनिचये ।
इदं सौदामिन्याः कनककमनीयं विलसितं
मदक्ष्णाविष्व प्रथयति पथिष्वेव सुदृशाम् ॥ २८ ॥

आसारेषु न हर्म्यतः प्रियतमैर्यातुं यदा शक्यते
शीतोत्कम्पनिमित्तमायतदृशा गाढं समालिङ्ग्यते ।
जाताः शीतलशीकराश्च मरुतो वात्यन्तखेदच्छिदो
धन्यानां बत! दुर्दिनं सुदिनतां याति प्रियासङ्गमे ॥२९॥

शरदः ।

अर्द्धं नीत्वा निशायाः सरभससुरतायासखिन्नश्लथाङ्गः
प्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृष्ठे विविक्ते ।

Digitized by Google

पान्थस्त्रीविरहानलाहुतिकलामातन्वती मञ्जरी
मा कुन्देषु पिकाङ्गनाभिरधुना सोत्कण्ठमालोक्यते ।
अप्येते नवपाटलाः परिमलाः प्राग्भारपाटच्चराः
वान्ति क्लान्तिहराः सुशीतलतराः श्रीखण्डशैलानिलाः ॥१९॥
सहकारकुसुमकेसरनिकरभरामोदमूर्च्छितदिगन्ते ।
मधुरमधुविधुरमधुपे मधौ भवेदुत्कण्ठा ॥ २० ॥

ग्रीष्मः ।

अच्छाच्छचन्दनरसार्द्रकरा मृगाक्ष्यो
धारागृहाणि कुसुमानि च कौमुदी च ।
मन्दो मरुत्सुमनसः शुचि हर्म्यपृष्ठं
ग्रीष्मे मदञ्च मदनञ्च विवर्द्धयन्ति ॥ २१ ॥
स्रजो हृद्या मोदव्यजनपवनश्चन्द्रकिरणः
परागः कासारो मलयजरजः सिन्धुविशदम् ।
शुचिः सौधोत्सङ्गः प्रतनु वसनं पङ्कजदृशो
निदाघे तूर्णं तत्सुखमुपलभन्ते सुकृतिनः ॥ २२ ॥
सुधाशुभ्रं धाम स्फुरदमलरश्मिः शशधरः
प्रियावक्त्राम्भोजं मलयजरजश्चातिसुरभि ।
स्रजो हृद्याः कोन्दास्तदिदमखिलं रागिणि जने
करोत्यन्तःक्षोभं न तु विषयसंसर्गविमुखे ॥ २३ ॥

वर्षासमयः ।

तरुणी वेश्या दीपितकामा विकसज्जातीपुष्पसुगन्धिः ।
उन्नतपीनपयोधरभारा प्रावृट् कुरुते कस्य न हर्षम् ॥२४॥

अदर्शने दर्शनमात्रकामा
दृष्टा परिष्वङ्गरसैकलोला ।
आलिङ्गितायां पुनरायताक्ष्याम्
आशास्महे विग्रहयोरभेदम् ॥ २४ ॥

मालती शिरसि जृम्भणोन्मुखी
चन्दनं वपुषि कुङ्कुमाविलम्
वक्षसि प्रियतमा मनोहरा
स्वर्ग एष परिशिष्ट आगतः ॥ २५ ॥

ऋतुवर्णनं तत्रादौ वसन्तः ।

परिमलभृतो वाताः शाखा नवाङ्कुरकोटयो
मधुरविरुतोत्कण्ठा वाचः प्रियाः पिकपक्षिणाम् ।
विरलसुरतस्वेदोद्रेका वधूवदनेन्दवः
प्रसरति मधौ रात्र्यां जातो न कस्य गुणोदयः ॥ २६ ॥

मधुरयं मधुरैरपि कोकिला-
कलकलैर्मलयस्य च वायुभिः ।
विरहिणः प्रणिहन्ति शरीरिणो
विपदि हन्त सुधापि विषायते ॥ २७ ॥

आवासः किल किञ्चिदेव दयितापार्श्वे विलासालसः
कर्णे कोकिलकाकलीकलरवस्मेरा लतामण्डपाः ।
गोष्ठीसत्कविभिः समं कतिपयैः सेव्याः सितांशोः कराः
केषाञ्चित्सुखयन्ति नेत्रहृदये चैत्रे विचित्राः क्षपाः ॥ २८ ॥

Digitized by Google

तस्याः स्तनौ यदि घनौ जघनं विहारि
वक्त्रं च चारु तव चित्त किमाकुलत्वम् ।
पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ १८ ॥

मात्सर्य्यमुत्सार्य्य विचार्य्य कार्य्यम्
आर्य्याः समर्य्यादमिदं वदन्तु ।
सेव्या नितम्बा किमु भूधराणाम् ?
उत स्मरस्मेरविलासिनीमाम् ? ॥ १९ ॥

संसारेऽस्मिन्नसारे परिणतितरले द्वे गती पण्डितानां
तत्त्वज्ञानामृताम्भःप्लुतमनसां यान्तु कालः कदाचित् ।
नोचेन्मुग्धाङ्गनानां स्तनजघनभराभोगसम्भोगिनीनां
स्थूलोपस्थस्थलीषु स्थगितकरतलस्पर्शलोलोद्यतानाम् ॥२०॥

मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ।
पाणिभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥ २१ ॥

संमोहयन्ति मदयन्ति विडम्बयन्ति
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।
एताः प्रविश्य सदयं हृदयं नराणां
किन्नाम वामनयना न समाचरन्ति ॥ २२ ॥

विश्रम्य विश्रम्य वनद्रुमाणां
छायासु तन्वी विचचार काचित् ।
स्तनोत्तरीयेण करोद्धृतेन
निवारयन्ती शशिनो मयूखान् ॥ २३ ॥

Digitized by Google

कुङ्कुमपङ्ककलङ्कितदेहा गौरपयोधरकम्पितहारा ।
नूपुरहंसरणत्पदपद्मा कं न वशीकुरुते भुवि रामा ॥१०॥

नूनं हि ते कविवरा विपरीतबोधा
ये नित्यमाहुरबला इति कामिनीनाम् ।
याभिर्विलोलतरतारकदृष्टिपातैः
शक्रादयोऽपि विजितास्त्वबलाः कथं ताः ॥ ११ ॥

नूनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः ।
यतस्तन्नेत्रसञ्चारसूचितेषु प्रवर्त्तते ॥ १२ ॥

केशाः संयमिनः श्रुतेरपि परं पारं गते लोचने
अन्तर्वक्त्रमपि स्वभावशुचिभिः कीर्णं द्विजानां गणैः ।
मुक्तानां सततादिवासरुचिरं वक्षोजकुम्भद्वयम्
इत्थं तन्वि ! वपुः प्रशान्तमपि ते क्षोभं करोत्येव नः ॥ १३॥

मुग्धे ! धनुष्मती केयमपूर्वापि च दृश्यते ।
यथाविध्यसि चेतांसि गुणैरेव न सायकैः ॥ १४ ॥

सति प्रदीपे सत्यग्नौ सत्सु तारारवीन्दुषु ।
विना मे मृगशावाक्ष्या तमोभूतमिदं जगत् ॥ १५ ॥

यद्वृत्तस्तनभार एष तरले नेत्रे चले भ्रूलते
रागान्धेषु तदोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथाम् ।
सौभाग्याक्षरपंक्तिरेव लिखिता पुष्पायुधेन स्वयं
मध्यस्थापि करोति तापमधिकं रोमावली केन सा ॥१६॥

गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता ।
शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥ १७ ॥

Digitized by Google

लीलामन्दं प्रस्थितं च स्थितञ्च
स्त्रीणामेतद् भूषणञ्चायुधञ्च ॥ ३ ॥

क्वचित्सुभ्रूभङ्गैः क्वचिदपि च लज्जापरिणतैः
क्वचिद्भीतित्रस्तैः क्वचिदपि च लीलाविलसितैः ।
नवोढानामेभिर्वदनकमलैर्नेत्रचलितैः
स्फुरन्नीलाब्जानां प्रकरपरिपूर्णा इव दिशः ॥ ४ ॥

वक्त्रं चन्द्रविकासि पङ्कजपरीहासक्षमे लोचने
वर्णः स्वर्णमपाकरिष्णुरलिनीजिष्णुः कचानाञ्चयः ।
वक्षोजाविभकुम्भसम्भ्रमहरौ गुर्वी नितम्बस्थली
वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनम् ॥५॥

स्मितं किञ्चिद्वक्त्रे सरलतरलो दृष्टिविभवः ।
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः ॥ ६ ॥
गतीनामारम्भः किसलयितलीलापरिकरः ।
स्पृशन्त्यास्तारुण्यं किमिह न हि रम्यं मृगदृशः ॥ ७ ॥

द्रष्टव्येषु किमुत्तमं ? मृगदृशां प्रेमप्रसन्नं मुखम्
घ्रातव्येष्वपि किं ? तदास्यपवनः श्राव्येषु किं ? तद्वचः ।
किं स्वाद्येषु ? तदोष्ठपल्लवरसः स्पृश्येषु किं ? तत्तनुः
ध्येयं किं ? नवयौवनं सहृदयैः सर्वत्र तद्विभ्रमः ॥ ८ ॥

एताः स्खलद्वलयसंहतिमेखलोत्थ-
झङ्कारनूपुररवाहृतराजहंसाः ।
कुर्वन्ति कस्य न मनो विवशं तरुण्यो
वित्रस्तमुग्धहरिणीसदृशैः कटाक्षैः ॥ ९ ॥

Digitized by Google

तन्वी शरत्तृणिपथमा पुलिने कपोलौ
लोले दृशौ रुचिरचञ्चलखञ्जरीटौ ।
तद्बन्धनाय सुचिरार्पितसुभ्रुचाप-
चाण्डालपाशयुगलाविव शून्यकर्णौ ॥ ९९ ॥
हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः ॥ १०० ॥

इत्यमरुशतकं परिपूर्णम् ।

शृङ्गारशतकम् ।

—०::०—

शम्भुस्वयम्भुहरयो हरिणेक्षणानां
येनाक्रियन्त सततं गृहकर्मदासाः ।
वाचामगोचरचरित्रविचित्रिताय
तस्मै नमो भगवते कुसुमायुधाय ॥ १ ॥
स्मितेन भावेन च लज्जया भिया
पराङ्मुखैरर्धकटाक्षवीक्षणैः ।
वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः ॥ २ ॥
भ्रूचातुर्याकुञ्चिताक्षाः कटाक्षाः
स्निग्धा वाचो लज्जिताश्चैव हासाः ।

उद्ग्रीवश्चरणार्धरुद्धवसुधः कृत्वाश्रुपूर्णे दृशौ
तामाशां पथिकस्तथापि किमपि ध्यायन्मुहुः वीक्षते ॥ ९३ ॥

कोपस्त्वया हृदि कृतो यदि पङ्कजाक्षि !
सोऽस्तु प्रियस्तव किमत्र विधेयमन्यत् ।
आश्लेषमर्पय मदर्पितपूर्वमुच्चैः
मह्यं समर्पय मदर्पितचुम्बनञ्च ॥ ९४ ॥

ऊरुद्वयं मृगदृशः कदलस्य काण्डौ
मध्यञ्च वेदिरतुलं स्तनयुग्ममस्याः ।
लावण्यवारिपरिपूरितशातकुम्भ-
कुम्भौ मनोजनृपतेरभिषेचनाय ॥ ९५ ॥

चपलहृदये ! किं स्वातन्त्र्यात्तथा गृहमागतः
चरणपतितः प्रेमार्द्रार्द्रः प्रियः समुपेक्षितः ? ।
तदिदमधुना यावज्जीवं निरस्तसुखोदया
रुदितशरणा दुर्जातीनां सहस्व रुषां फलम् ॥ ९६ ॥

रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रुणा
पान्थेनात्ममनोजदुःखपिशुनं गीतं तथोत्कण्ठया ।
आस्तां जीवितहारिणः प्रवसनालापस्य संकीर्त्तनं
मानस्यापि जलाञ्जलिः सरभसं लोकेन दत्तो यथा ॥ ९७ ॥

हारो जलार्द्रवसनं नलिनीदलानि
प्रालेयशीकरमुचस्तुहिनांशुभासः ।
यस्येन्धनानि सरसानि च चन्दनानि
निर्वाणमेष्यति कथं स मनोभवाग्निः ॥ ९८ ॥

Digitized by Google

लाक्षालक्ष्म ललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागोदयः ।
दृष्ट्वा कोपविधायि मण्डनमिदं प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः ॥ ८८ ॥

तप्ते महाविरहवह्निशिखावलीभि-
रापाण्डुरस्तनतटे हृदये प्रियायाः ।
रथ्यालिवीक्षणनिवेशितलोलदृष्टे-
र्नूनं छनच्छनिति बाष्पकणाः पतन्ति ॥ ८९ ॥

चिन्तामोहविनिश्चलेन मनसा मौनेन पादानतः
प्रत्याख्यानपराङ्मुखः प्रियतमो गन्तुं प्रवृत्तोऽधुना ।
सव्रीडैरलसैर्निरन्तरलुठद्बाष्पाकुलैर्लोचनैः
श्वासोत्कम्पकुचं निरीक्ष्य सुचिरं जीवाशया वारितः ॥ ९० ॥

तन्वङ्ग्या गुरुसन्निधौ नयनजं यद्वारि संस्तम्भितं
तेनान्तर्गलितेन मन्मथशिखी सिक्तोऽनुषङ्गोद्भवः ।
मन्ये तस्य निरस्यमानकिरणस्यैषा मुखेनोद्गता
श्वासामोदसमाकुलालिनिकरव्याजेन धूमावलिः ॥ ९१ ॥

भ्रूभेदो रचितः चिरं नयनयोरभ्यस्तमामीलनं
रोद्धुं शिक्षितमादरेण हसितं मौनेऽभियोगः कृतः ।
धैर्यं कर्त्तुमपि स्थिरीकृतमिदं चेतः कथञ्चिन्मया
बद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवे स्थिता ॥ ९२ ॥

देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननै-
र्यत्नेनापि न याति लोचनपथं कान्तेति जानन्नपि ।

न दृष्टेः शैथिल्यं मिलन इति चेतो दहति मे
निगूढान्तःकोपात्कठिनहृदये संवृतिरियम् ॥ ८२ ॥

एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपराङ्मुखं शयितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणात्
माभूत्सुप्त इवैष मन्दवलितग्रीवं पुनर्वीक्षितः ॥ ८३ ॥

मलयमरुतां व्राता याता विकासितमल्लिका-
परिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि ।
घन घटयितुं निस्नेहं त्वां यएव निवर्तने
प्रभवति गवां किन्नश्छिन्नं सएव धनञ्जयः ॥ ८४ ॥

त्वं दृष्ट्वा करजक्षतं मधुमदक्षीबा विचार्येर्ष्यया
गच्छन्ती क्व नु गच्छसीति विधृता बाला पटान्ते मया ।
प्रत्यावृत्तमुखी सबाष्पनयना मां मुञ्च मुञ्चेति सा
कोपात्प्रस्फुरिताधरा यदवदत्तत् केन विस्मर्यते ॥ ८५ ॥

सालक्तकं शतदलाधिककान्तिरम्यं
रत्नौघधामनिकरारुणनूपुरञ्च ।
क्षिप्तं भृशं कुपितया तरलोत्पलाक्ष्या
सौभाग्यचिह्नमिव मूर्ध्नि पदं विरेजे ॥ ८६ ॥

कपोले पत्त्रालीकरतलनिरोधेन मृदिता
निपीतो निःश्वासैरयममृतहृद्योऽधररसः ।
मुहुः कण्ठे लग्नस्तरलयति बाष्पस्तनतटं
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥ ८७ ॥

Digitized by Google

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥७७॥
जाता नोत्कलिका स्तनौ न लुलितौ गात्रं न रोमाञ्चितं
वक्त्रं स्वेदकणाञ्चितं न सहसा यावत् शठेनामुना।
दृष्टेनैव मनो हृतं धृतिमुषा प्राणेश्वरेणाद्य मे
तत्केनापि निरूप्य माननिपुणो मानः समाधीयताम्॥७८॥
दृष्टः कातरनेत्रया चिरतरं बद्ध्वाञ्जलिं याचितः
पश्चादंशुकपल्लवेन विधृतो निर्व्याजमालिङ्गितः।
इत्याक्षिप्य यदा समस्तमघृणो गन्तुं प्रवृत्तः शठः
पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः॥७९॥
अङ्गुल्यग्रनखेन बाष्पसलिलं निक्षिप्य निक्षिप्य किं
तूष्णीं रोदिषि कोपने! बहुतरं फुत्कृत्य रोदिष्यसि।
यस्यास्ते पिशुनोपदेशवचनैर्मानेऽतिभूमिं गते
निर्विण्णोऽनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति॥८०॥
तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता पादयोः
तस्यालापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया।
पाणिभ्याञ्च तिरस्कृतः सपुलकः स्वेदोद्गमो गण्डयोः
सख्यः! किं करवाणि यान्ति शतधा यत्कञ्चुके सन्धयः॥८१॥
कृतो दूरादेव स्मितमधुरमभ्युद्गमविधिः
शिरस्याज्ञा न्यस्ता प्रतिवचनमुच्चैः प्रणमितम्।

इति सरभसं मानोद्रेकादुदीर्य्य वचस्तया
रमणपदवी शारङ्गाक्ष्या ससंभ्रममीक्षिता ॥ ७१ ॥
पश्यास्नेषविशीर्णचन्दनरजःपुञ्जप्रकर्षादियं
शय्या सम्प्रति कोमलाङ्गि ! कठिनेत्यारोप्य मां वञ्चसि ।
गाढौष्ठग्रहपीडनाकुलतया पादाग्रसंदंशके-
नाकृष्टाम्बरमात्मनो यदुचितं धूर्त्तेन तत्प्रस्तुतम् ॥ ७२ ॥
कथमपि प्रत्याहृत्ते प्रिये स्खलितोत्तरे
विरहकृशया कृत्वा व्याजं प्रकल्पितमश्रुतम् ।
असहनसखीश्रोत्रप्राप्तिप्रमादससंभ्रमं
प्रचलितदृशा शून्ये गेहे समुच्छ्वसितं पुनः ॥ ७३ ॥
आदृष्टिप्रसरं प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
विच्छिन्नेषु पथिष्वहःपरिणतौ ध्वान्ते समुन्मीलति ।
दत्त्वैकं सशुचा गृहं प्रतिपदं पान्थस्त्रियास्मिन् क्षणे
सोऽभूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥ ७४ ॥
आयाते दयिते मनोरथशतैर्नीत्वा कथञ्चिद्दिनं
वैदग्ध्याऽपगमाज्जडे परिजने दीर्घां कथां कुर्वति ।
दष्टास्मीत्यभिधाय सत्वरतरं व्याधूय चीनांशुकं
तन्वाङ्ग्या रतिकातरेण मनसा नीतः प्रदीपः शमम् ॥७५॥
अनालोच्य प्रेम्णः परिणतिमनादृत्य सुहृद-
स्त्वया मुग्धे ! मानः किमिति सरले प्रेयसि कृतः ।
समाकृष्टा ह्येते प्रलयदहनोद्भासुरशिखाः
स्वहस्तेनाङ्गारास्तदलमधुनारण्यरुदितैः ॥ ७६ ॥

पुराभूदस्माकं नियतमविभिन्ना तनुरियं
ततो नु त्वं प्रेयान् वयमपि हताशाः प्रियतमाः।
इदानीं नाथ! स्त्वं वयमपि कलत्रं किमपरं
मयाप्तं प्राणानां कुलिशकठिनानां फलमिदम्॥ ६६॥

मुग्धे! मुग्धतयैव नेतुमखिलः कालः किमारभ्यते?
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो ननु स मे प्राणेश्वरः श्रोष्यति॥६७॥

पीतो यतः प्रभृति कामपिपासितेन
तस्या मयाधररसः प्रचुरः प्रियायाः।
तृष्णा ततः प्रभृति मे द्विगुणत्वमेति
लावण्यमस्ति बहु तत्र किमपि चित्रम्। ६८।

क्व प्रस्थितासि करभोरु! घने निशीथे?
प्राणाधिको वसति यत्र जनः प्रियो मे।
एकाकिनी वद कथं न बिभेषि बाले!
नन्वस्ति पुंखितशरो मदनः सहायः॥ ६९॥

लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः।
मुग्धा कुड्मलिताननेन दधती वायुं स्थिता तस्य सा
भ्रान्त्या धूर्ततया च वेपथुमती तेनानिशं चुम्बिता॥७०॥

स्फुटतु हृदयं कामः कामं करोतु तनुं तनुं
न सखि! चटुलप्रेम्णा कार्यं पुनर्दयितेन मे।

अन्तःपुष्पसुगन्धिराद्रकबरी सर्वाङ्गलग्नाम्बरं
रामाणां रमणीयतां विदधति ग्रीष्मापराह्णागमे ॥ ५९ ॥
वरमसौ दिवसो न पुनर्निशा ननु निशैव वरं न पुनर्दिवा ।
उभयमेतदुपैत्वथवा क्षयं प्रियजनेन न यत्र समागमः॥६०॥
लोलैर्लोचनवारिभिः सशपथैः पादप्रणामैः प्रियै-
रन्यास्ता विनिवारयन्ति कृपणाः प्राणेश्वरं प्रस्थितम् ।
पुण्याहं व्रज मङ्गलं सुदिवसं प्रातः प्रयातस्य ते
यत् स्नेहोचितमीप्सितं प्रियतम ! त्वं निर्गतः श्रोष्यसि ॥ ६१ ॥
लग्ना नांशुकपल्लवे भुजलता न द्वारदेशेऽपिता
नो वा पादतले तया निपतितं तिष्ठेति नोक्तं वचः
काले केवलमम्बुदातिमलिने गन्तुं प्रवृत्तः शठः
तन्व्या बाष्पजलौघकल्पितनदीपूरेण बद्धः प्रियः ॥ ६२ ॥
न जाने संमुखायाते प्रियाणि वदति प्रिये ।
सर्वाण्यङ्गानि मे यान्ति श्रोत्रतां किमु नेत्रताम् ॥ ६३ ॥
विरहविषमः कामो वामस्तनुं कुरुते तनुं
दिवसगणनादक्षश्चासौ व्यपेतघृणो यमः ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे !
किशलयमृदुर्जीवेदेवं कथं प्रमदाजनः ॥ ६४ ॥
पादासक्ते सुचिरमिह ते वामता कैव कान्ते
सन्मार्गस्थे प्रणयिनि जने कोपने ! कोऽपराधः ।
इत्थं तस्याः परिजनकथा कोपवेगोपशान्तौ
बाष्पोद्भेदैस्तदनु सहसा न स्थितं न प्रयातम् ॥ ६५ ॥

Digitized by Google

तन्वी मरत्विपथगा पुलिने कपोलौ
लोले दृशौ रुचिरचञ्चलखञ्जरीटौ ।
तद्भ्रमाय सुचिरापितसुभ्रुचाप-
चाण्डालपाशयुगलाविव शून्यकर्णौ ॥ ९९ ॥
हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः ॥ १०० ॥

शृङ्गारशतकं परिपूर्णम् ।

शृङ्गारशतकम् ।

—०::०—

शम्भुस्वयम्भुहरयो हरिणेक्षणानां
येनाक्रियन्त सततं गृहकर्म्मदासाः ।
वाचामगोचरचरित्रविचित्रताय
तस्मै नमो भगवते कुसुमायुधाय ॥ १ ॥
स्मितेन भावेन च लज्जया भिया
पराङ्मुखैरर्धकटाक्षवीक्षणैः ।
वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः ॥ २ ॥
भ्रूचातुर्याकुञ्चिताक्षाः कटाक्षाः
स्निग्धा वाचो लज्जिताश्चैव हासाः ।

Digitized by Google

उद्ग्रीवश्चरणार्धरुद्धवसुधः कृत्वाश्रुपूर्णे दृशौ
तामाशां पथिकस्तथापि किमपि ध्यायन्मुहुः वीयते ॥ ९३ ॥

कोपस्त्वया हृदि कृतो यदि पङ्कजाक्षि !
सोऽस्तु प्रियस्तव किमत्र विधेयमन्यत् ।
आश्लेषमर्पय मदर्पितपूर्वमुच्चैः
मह्यं समर्पय मदर्पितचुम्बनञ्च ॥ ९४ ॥

ऊरुद्वयं मृगदृशः कदलस्य काण्डौ
मध्यञ्च वेदिरतुलं स्तनयुग्ममस्याः ।
लावण्यवारिपरिपूरितशातकुम्भ-
कुम्भौ मनोजनृपतेरभिषेचनाय ॥ ९५ ॥

चपलहृदये ! किं स्वातन्त्र्यात्तथा गृहमागतः
चरणपतितः प्रेमार्द्रार्द्रः प्रियः समुपेक्षितः ? ।
तदिदमधुना यावज्जीवं निरस्तसुखोदया
रुदितशरणा दुर्जातीनां सहस्व रुषां फलम् ॥ ९६ ॥

रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रुणा
पान्थेनात्ममनोजदुःखपिशुनं गीतं तथोत्कण्ठया ।
आस्तां जीवितहारिणः प्रवसनालापस्य संकीर्त्तनं
मानस्यापि जलाञ्जलिः सरभसं लोकेन दत्तो यथा ॥ ९७ ॥

हारो जलार्द्रवसनं नलिनीदलानि
प्रालेयशीकरमुचस्तुहिनांशुभासः ।
यस्येन्धनानि सरसानि च चन्दनानि
निर्वाणमेष्यति कथं स मनोभवाग्निः ॥ ९८ ॥

Digitized by Google

लाक्षालक्ष्म ललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागोऽपरः ।
दृष्ट्वा कोपविधायि मण्डनमिदं प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः ॥ ८८ ॥

तप्ते महाविरहवह्निशिखावलीभि-
रापाण्डुरस्तनतटे हृदये प्रियायाः ।
रथ्यान्तवीक्षणनिवेशितलोलदृष्टे-
र्नूनं छनच्छनिति बाष्पकणाः पतन्ति ॥ ८९ ॥

चिन्तामोहविनिश्चलेन मनसा मौनेन पादानतः
प्रत्याख्यानपराङ्मुखः प्रियतमो गन्तुं प्रवृत्तोऽधुना ।
सव्रीडैरलसैर्निरन्तरलुठद्बाष्पाकुलैर्लोचनैः
श्वासोत्कम्पकुचं निरीक्ष्य सुचिरं जीवाशया वारितः ॥ ९० ॥

तन्वङ्ग्या गुरुसन्निधौ नयनजं यद्वारि संस्तम्भितं
तेनान्तर्गलितेन मन्मथशिखी सिक्तोऽस्य शुष्यन्निव ।
मन्ये तस्य निरस्यमानकिरणस्यैषा मुखेनोद्गता
श्वासामोदसमाकुलालिनिकरव्याजेन धूमावलिः ॥ ९१ ॥

भ्रूभेदो रचितः चिरं नयनयोरभ्यस्तमामीलनं
रोद्धुं शिक्षितमादरेण हसितं मौनेऽभियोगः कृतः ।
धैर्यं कर्तुमपि स्थिरीकृतमिदं चेतः कथंचिन्मया
बद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवे स्थिता ॥ ९२ ॥

देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननै-
र्यत्नेनापि न याति लोचनपथं कान्तेति जानन्नपि ।

न दृष्टेः शैथिल्यं मिलन इति चेतो दहति मे
निगूढान्तःकोपात्कठिनहृदये संवृतिरियम् ॥ ८२ ॥

एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपराङ्मुखं शयितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणात्
माभूत्सुप्त इवैष मन्दवलितग्रीवं पुनर्वीक्षितः ॥ ८३ ॥

मलयमरुतां व्राता याता विकासितमल्लिका-
परिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि ।
घन घटयितुं निःस्नेहं त्वां यएव निवर्तने
प्रभवति गवां किन्नश्छिन्नं सएव धनञ्जयः ॥ ८४ ॥

त्वं दृष्ट्वा करजक्षतं मधुमदक्षीबा विचार्य्येर्ष्यया
गच्छन्ती क्व नु गच्छसीति विधृता बाला पटान्ते मया ।
प्रत्यावृत्तमुखी सबाष्पनयना मां मुञ्च मुञ्चेति सा
कोपात्प्रस्फुरिताधरा यदवदत्तत् केन विस्मर्यते ॥ ८५ ॥

सालक्तकं शतदलाधिककान्तिरम्यं
रत्नौघधामनिकरारुणनूपुरञ्च ।
क्षिप्तं भृशं कुपितया तरलोत्पलाक्ष्या
सौभाग्यचिह्नमिव मूर्ध्नि पदं विरेजे ॥ ८६ ॥

कपोले पत्त्रालीकरतलनिरोधेन मृदिता
निपीतो निःश्वासैरयममृतहृद्योऽधररसः ।
मुहुः कण्ठे लग्नस्तरलयति बाष्पस्तनतटं
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥ ८७ ॥

Digitized by Google

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥७७॥

जाता नोत्कलिका स्तनौ न लुलितौ गात्रं न रोमाञ्चितं
वक्त्रं स्वेदकणाञ्चितं न सहसा यावत् शठेनामुना ।
दृष्टेनैव मनोहृतं धृतिमुषा प्राणेश्वरेणाद्य मे
तत्केनापि निरूप्य माननिपुणो मानः समाधीयताम् ॥७८॥

दृष्टः कातरनेत्रया चिरतरं बध्वाञ्जलिं याचितः
पश्चादंशुकपल्लवेन विधृतो निर्व्याजमालिङ्गितः ।
इत्याक्षिप्य यदा समस्तमघृणो गन्तुं प्रवृत्तः शठः
पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥ ७९ ॥

अङ्गुल्यग्रनखेन बाष्पसलिलं विक्षिप्य विक्षिप्य किं
तूष्णीं रोदिषि कोपने ! बहुतरं फुत्कृत्य रोदिष्यसि ।
यस्यास्ते पिशुनोपदेशवचनैर्मानेऽतिभूमिं गते
निर्विण्णोऽनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति ॥ ८० ॥

तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता पादयोः
तस्यालापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया ।
पाणिभ्याञ्च तिरस्कृतः सपुलकः स्वेदोद्गमो गण्डयोः
सख्यः ! किं करवाणि यान्ति शतधा यत्कञ्चुके सन्धयः ॥८१॥

कृतो दूरादेव स्मितमधुरमभ्युद्गमविधिः
शिरस्याज्ञा न्यस्ता प्रतिवचनमुच्चैः प्रणमितम् ।

इति सरभसं मानोद्रेकादुदीर्य वचस्तया
रमणपदवी शारङ्गाक्ष्या ससंभ्रममीक्षिता ॥ ७१ ॥
पश्चाश्लेषविशीर्णचन्दनरजःपुञ्जप्रकर्षादियं
शय्या सम्प्रति कोमलाङ्गि ! कठिनेत्यारोप्य मां वक्षसि ।
गाढौष्ठग्रहपीडनाकुलतया पादाग्रसंदंशके-
नाकृष्टाम्बरमात्मनो यदुचितं धूर्तेन तत्प्रस्तुतम् ॥ ७२ ॥
कथमपि प्रत्यावृत्ते प्रिये स्खलितोत्तरे
विरहकृशया कृत्वा व्याजं प्रकल्पितमश्रुतम् ।
असहनसखीश्रोत्रप्राप्तिप्रमादससंभ्रमं
प्रचलितदृशा शून्ये गेहे समुच्छ्वसितं पुनः ॥ ७३ ॥
आदृष्टिप्रसरं प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
विच्छिन्नेषु पथिष्वहःपरिणतौ ध्वान्ते समुन्मीलति ।
दत्त्वैकं सशुचा गृहं प्रतिपदं पान्थस्त्रियास्मिन् क्षणे
सोऽभूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥ ७४ ॥
आयाते दयिते मनोरथशतैर्नीत्वा कथञ्चिद्दिनं
वैदग्ध्याऽपगमाज्जडे परिजने दीर्घां कथां कुर्वति ।
दष्टास्मीत्यभिधाय सत्वरतरं व्याधूय चीनांशुकं
तन्वङ्ग्या रतिकातरेण मनसा नीतः प्रदीपः शमम् ॥ ७५ ॥
अनालोच्य प्रेम्णः परिणतिमनादृत्य सुहृद-
स्त्वया मुग्धे ! मानः किमिति सरले प्रेयसि कृतः ।
समाकृष्टा ह्येते प्रलयदहनोद्भासुरशिखाः
स्वहस्तेनाङ्गारास्तदलमधुनारण्यरुदितैः ॥ ७६ ॥

Digitized by Google

पुराभूदस्माकं नियतमविभिन्ना तनुरियं
ततो नु त्वं प्रेयान् वयमपि हताशाः प्रियतमाः।
इदानीं नाथ! त्वं वयमपि कलत्रं किमपरं
मयाप्तं प्राणानां कुलिशकठिनानां फलमिदम्॥ ६६॥

मुग्धे! मुग्धतयैव नेतुमखिलः कालः किमारभ्यते?
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो ननु स मे प्राणेश्वरः श्रोष्यति॥६७॥

पीतो यतः प्रभृति कामपिपासितेन
तस्या मयाधररसः प्रचुरः प्रियायाः।
तृष्णा ततः प्रभृति मे द्विगुणत्वमेति
लावण्यमस्ति बहु तत्र किमपि चित्रम्। ६८।

क्व प्रस्थितासि करभोरु! घने निशीथे?
प्राणाधिको वसति यत्र जनः प्रियो मे।
एकाकिनी वद कथं न बिभेषि बाले!
नन्वस्ति पुंखितशरो मदनः सहायः॥ ६९॥

लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः।
मुग्धा कुड्मलिताननेन दधती वायुं स्थिता तस्य सा
भ्रान्त्या धूर्ततया च वेपथुमती तेनानिशं चुम्बिता॥७०॥

स्फुटतु हृदयं कामः कामं करोतु तनुं तनुं
न सखि! चटुलप्रेम्णा कार्यं पुनर्दयितेन मे।

Digitized by Google

अन्तःपुष्पसुगन्धिराद्रकवरी सर्वाङ्गलग्नाम्बरं
रामाणां रमणीयतां विदधति ग्रीष्मापराह्णागमे ॥ ५९ ॥

वरमसौ दिवसो न पुनर्निशा ननु निशैव वरं न पुनर्दिवा ।
उभयमेतदुपैत्वथवा क्षयं प्रियजनेन न यत्र समागमः॥६०॥

लोलैर्लोचनवारिभिः सशपथैः पादप्रणामैः प्रियै-
रन्यास्ता विनिवारयन्ति कृपणाः प्राणेश्वरं प्रस्थितम् ।
पुण्याहं व्रज मङ्गलं सुदिवसं प्रातः प्रयातस्य ते
यत् स्नेहोचितमीहितं प्रियतम ! त्वं निर्गतः श्रोष्यसि ॥ ६१ ॥

लग्ना नांशुकपल्लवे भुजलता न द्वारदेशेऽर्पिता
नो वा पादतले तया निपतितं तिष्ठेति नोक्तं वचः
काले केवलमम्बुदातिमलिने गन्तुं प्रवृत्तः शठः
तन्व्या बाष्पजलौघकल्पितनदीपूरेण बद्धः प्रियः ॥ ६२ ॥

न जाने संमुखायाते प्रियाणि वदति प्रिये ।
सर्वाण्यङ्गानि मे यान्ति श्रोत्रतां किमु नेत्रताम् ॥ ६३ ॥

विरहविषमः कामो वामस्तनुं कुरुते तनुं
दिवसगणनादक्षश्चासौ व्यपेतघृणो यमः ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे !
किशलयमृदुर्जीवेदेवं कथं प्रमदाजनः ॥ ६४ ॥

पादासक्ते सुचिरमिह ते वामता कैव कान्ते
सन्मार्गस्थे प्रणयिनि जने कोपने ! कोऽपराधः ।
इत्थं तस्याः परिजनकथा कोपवेगोपशान्तौ
बाष्पोद्भेदैस्तदनु सहसा न स्थितं न प्रयातम् ॥ ६५ ॥

Digitized by Google

नीलोच्चैर्विच्छिपन्तः क्षततुहिनकणासारसङ्घान् परागान्
कौन्दानानन्दिताशीनतितरसुरभीन् भूरिशो दिङ्मुखेषु ।
एते ते कुङ्कुमाक्तस्तनकलस-भरास्फालनाकुञ्चदन्तः
पीत्वा शीत्कारिवक्त्रं प्रियहरिहृद्यां हैमना वान्ति वाताः ॥ ५४

श्रुत्वा तन्व्या निशीथे नवघनरसितं विश्लथाङ्गं पतित्वा
शय्यायां भूमिपृष्ठे करतलधृतया दुःखितालीजनेन ।
सोत्कण्ठं मुक्तकण्ठं कठिनकुचतटाघातशीर्णाश्रुबिन्दु
स्मृत्वा स्मृत्वा प्रियस्य स्खलितमृदुवचो रुद्यते पान्थवध्वा ॥ ५५ ॥

श्लिष्टः कण्ठे किमिति न मया मूढया प्राणनाथ-
श्चुम्बत्यस्मिन् वदनविधुतिः किं कृता किञ्च दृष्टः ।
नोक्तः कस्मादिति नववधूचेष्टितं चिन्तयन्ती
पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा ॥ ५६ ॥

श्रुत्वा नामापि यस्य स्फुटघनपुलकं जायतेऽङ्गं समन्तात्
दृष्ट्वा यस्याननेन्दुं भवति वपुरिदं चन्द्रकान्तानुकारि ।
तस्मिन्नागत्य कण्ठग्रहणसरभसस्थायिनि प्राणनाथे
भग्ना मानस्य चिन्ता भवति मम पुनर्वज्रमय्याः कदा नु ॥ ५७ ॥

रामाणां रमणीयवक्त्रशशिनः स्वेदोदबिन्दुप्लुतो
व्यालोलालकवल्लरीं प्रचलयन् धुन्वन् नितम्बाम्बरम् ।
प्रातर्वाति मधौ प्रकामविकसद्राजीवराजीरजो-
जालामोदमनोहरो रतिरसग्लानिं हरन्मारुतः ॥ ५८ ॥

अङ्गं चन्दनपाण्डुपल्लवमृदुस्ताम्बूलताम्राधरो
धारायन्त्रजलाभिषेककलुषे धौताञ्जने लोचने

Digitized by Google

मन्दं मुद्रितपांशवः परिपतज्झंकारझंझामरुद्-
वेगध्वस्तकुटीरकान्तरगतच्छिद्रेषु लब्धान्तराः ।
कर्मव्यग्रकुटुम्बिनीकुचतटस्वेदच्छिदः प्रावृषः
प्रारम्भे निपतन्ति कन्दलदलोल्लासाः पयोबिन्दवः ॥४८॥

पीतस्तुषारकिरणो मधुनैव सार्द्धम्
अन्तः प्रविश्य चषके प्रतिबिम्बवर्त्ती ।
मानान्धकारमपि मानवतीजनस्य
नूनं बिभेद यदसौ प्रससाद सद्यः ॥ ४९ ॥

नभसि जलदलक्ष्मीं सम्भृतां वीक्ष्य दिष्ट्या
प्रसरसि यदि कान्तेत्यर्द्धमुक्ता कथञ्चित् ।
मम पटमवलम्ब्य प्रोल्लिखन्ती धरित्रीं
तदनुकृतवती सा यत्र वाचो निवृत्ताः ॥ ५० ॥

इयमसौ तरलायतलोचना गुरुसमुन्नतपीनपयोधरा ।
पृथुनितम्बभरालसगामिनी प्रियतमा मम जीवितहारिणी॥५१

सालक्तकेन नवपल्लवकोमलेन
पादेन नूपुरवता मदनालसेन ।
यस्ताड्यते दयितया प्रणयापराधात्
सोऽङ्गीकृतो भगवता मकरध्वजेन ॥ ५२ ॥

बाले ! नाथ ! विमुञ्च मानिनि ! रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि ।
तत् किं रोदिषि गद्गदेन वचसा ? कस्याग्रतो रुद्यते ?
नन्वेतन्मम-का तवास्मि ? दयिता-नास्मीत्यतो रुद्यते ॥५३॥

Digitized by Google

मय्यालापवति प्रतीपवचनं सख्या सहाभाषते
तस्यास्तिष्ठतु निर्भरप्रणयिता मानोऽपि रम्योदयः ॥ ४२ ॥
सा यावन्ति पदान्यलीकवचनैरालीजनैः शिक्षिता
तावन्त्येव कृतागसो द्रुततरं व्याहृत्य पत्युः पुरः।
प्रारब्धा पुरतो यथा मनसिजस्याज्ञा तथा वर्तितुं
प्रेम्णो मौग्ध्यविभूषणस्य सहजः कोऽप्येष कान्तः क्रमः ॥ ४३ ॥
दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किञ्चिन्नतभ्रूलतम्।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो! प्रपञ्चचतुरं जातागसि प्रेयसि ॥ ४४ ॥
अङ्गानामतितानवं कथमिदं कम्पश्च कस्मात्कुतो
मुग्धे! पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति।
तन्व्या सर्वमिदं स्वभावजमिति व्याहृत्य पक्ष्मान्तर-
व्यापी बाष्पभरस्तया वलितया निःश्वस्य मुक्तोऽन्यतः ॥ ४५ ॥
पुरस्तन्व्या गोत्रस्खलनचकितोऽहं नतमुखः
प्रवृत्तो वैलक्ष्यात् किमपि लिखितुं दैवहतकः।
स्फुटो रेखान्यासः कथमपि स तादृक् परिणतो
गता येन व्यक्तिं पुनरवयवैः सैव तरुणी ॥ ४६ ॥
कठिनहृदये मुञ्च भ्रान्तिं व्यलीककथाश्रितां
पिशुनवचनैर्दुःखं नेतुं न युक्तमिमं जनम्।
किमिदमथवा सत्यं मुग्धे! त्वया हि विनिश्चितं
यदभिरुचितं तन्मे कृत्वा प्रिये! सुखमास्यताम् ॥ ४७ ॥

Digitized by Google

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम्।
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः॥ ३७॥
गते प्रेमाबन्धे प्रणयबहुमाने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः।
तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि! गतांस्तांश्च दिवसान्
न जाने को हेतुर्दलति शतधा यन्न हृदयम्॥ ३८॥
चिरविरहिणोरुत्कण्ठार्तिश्लथीकृतगात्रयो-
र्नवमिव जगज्जातं भूयश्चिरादभिनन्दतोः।
कथमपि दिने दीर्घे याते निशामधिरूढयोः
प्रसरति कथा बह्वी यूनोर्यथा न तथा रतिः॥ ३९॥
दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरैः
पुष्पाणां प्रकरः स्मितेन रचितो नो कुन्दजात्यादिभिः।
दत्तः स्वेदमुचा पयोधरयुगे नार्घ्यो न कुम्भाम्भसा
स्वैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलम्॥४०॥
कान्ते सागसि शायिते प्रियसखीवेशं विधायागते
भ्रान्त्यालिङ्ग्य मया रहस्यमुदितं तत्सङ्गमाकांक्षया।
मुग्धे! दुष्करमेतदित्यतितरामुक्त्वा सहासं बलाद्
आलिङ्ग्य छलितास्मि तेन कितवेनाद्य प्रदोषागमे॥४१॥
आशङ्क्य प्रणतिं पटान्तपिहितौ पादौ करोत्यादरात्
व्याजेनागतमावृणोति हसितं न स्पष्टमुद्वीक्षते।

यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित! प्रियसुहृत्सार्थः किमु त्यज्यते? ॥२१॥

सन्दष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती
मामामुञ्च शठेति कोपवचनैरानर्तितभ्रूलता।
सीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं सुधैव मथितो मूढैः सुरैः सागरः॥२२॥

सुप्तोऽयं सखि! सुप्यतामिति गताः सख्यस्ततोऽनन्तरं
प्रेमावासितया मया सरलया न्यस्तं मुखं तन्मुखे।
ज्ञातेऽलीकनिमीलने नयनयोर्धूर्तस्य रोमाञ्चतो
लज्जासीन्मम तेन साप्यपहृता तत्कालयोग्यैः क्रमैः॥२३॥

कोपो यत्र भ्रूकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो यत्र दृष्टिः प्रसादः।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि नहि मे मन्युमोक्षः खलायाः॥२४॥

सुतनु! जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित् कोप एवंविधोऽभूत्।
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किञ्चित्॥२५॥

गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलत्-श्रीमन्नितम्बाम्बरा।
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किंनु मृता नु किं मनसि मे लीना विलीना नु किं॥२६

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥ २६ ॥

भवतु विदितं भव्यालापैरलं खलु गम्यतां
तनुरपि न ते दोषोऽस्माकं विधिस्तु पराङ्मुखः ।
तव यदि तथाभूतं प्रेम प्रपन्नमिमां दशां
प्रकृतितरले ! का नः पीडा गते हतजीविते ॥ २७ ॥

उरसि निहितस्तारो हारः कृता जघने घने
कलकलवती काञ्ची पादौ क्वणन्मणिनूपुरौ ।
प्रियमभिसरस्येवं मुग्धे ! समाहतडिण्डिमा
यदि किमधिकत्रासोत्कम्पं दिशः समुदीक्षसे ॥ २८ ॥

प्रातः प्रातरुपागतेन जनिता निर्निद्रिता चक्षुषो-
र्मन्दायां मयि गौरवव्यपगमादुत्पादितं लाघवम् ।
किं मुग्धेन मया कृतं रमणधीर्मुक्ता त्वया गम्यतां
दुःखं तिष्ठसि यच्च पथ्यमधुना कर्तास्मि तत् श्रोष्यसि॥२९॥

सा बाला वयमप्रगल्भमनसः, सा स्त्री वयं कातराः,
सा पीनोन्नतिमत् पयोधरयुगं धत्ते, सखेदा वयम् ।
साक्रान्ता जघनस्थलेन गुरुणा, गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रितैरपटवो जाताः स्म इत्यद्भुतम् ॥३०॥

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।

इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया ॥२०॥
परिम्लाने माने मुखशशिनि तस्याः करधृते
मयि क्षीणोपाये प्रणिपतनमात्रैकशरणे।
तया पक्ष्मप्रान्तव्रजपुटनिरुद्धेन सहसा
प्रसादो बाष्पेन स्तनतटविशीर्णेन कथितः ॥ २१ ॥
तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते।
इत्युक्ते क्व तदित्युदीर्य सहसा तत् सम्प्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात् तन्व्यापि तद्विस्मृतम् ॥२२॥
त्वं मुग्धाक्षि! विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकां संस्पृशि।
शय्योपान्तनिविष्टसस्मितमुखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥ २३ ॥
भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
कार्कश्यं गमितेऽपि चेतसि तनूरोमाञ्चमालम्बते।
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिन् जने ॥२४॥
कान्ते! कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ
स्वस्ति स्वस्ति निमीलयामि नयने यावन्न शून्या दिशः।
आयाता वयमागमिष्यति सुहृद्वर्गस्य भाग्योदयैः
सन्देशो वद कस्तवाभिलषितस्तीर्थेषु तोयाञ्जलिः ॥२५॥

Digitized by Google

एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः॥ १५ ॥

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादराद्
एकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः।
ईषद्वक्रिमकन्धरः सपुलकः प्रेमोल्लसन्मानसाम्
अन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति॥ १६ ॥

चरणपतनप्रत्याख्यानात् प्रसादपराङ्मुखे
निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते।
व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता॥ १६ ॥

काञ्च्या गाढतरावरुद्धवसनप्रान्ता किमर्थं पुन-
र्मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति।
मातः स्वप्तुमपीह वारयति मामित्याहितक्रोधया
पर्यस्य स्वपितिच्छलेन शयने दत्तोऽवकाशस्तया॥ १८ ॥

एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोर्गौरवम्।
दम्पत्योः शनकैरपाङ्गवलनान्-मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसं व्यासक्तकण्ठग्रहम्॥१९॥

पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मामालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः।

Digitized by Google

इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सबाष्पमलज्जलैः ॥ ९ ॥
याताः किन्न मिलन्ति सुन्दरि ! पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतद्धाराश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥ १० ॥
धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छासमुदश्रुणा विरहिणीं बालां चिरं ध्यायता ।
अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं
ग्रामीणैर्व्रजतो जनस्य वसतिर्ग्रामे निषिद्धा यथा ॥ ११ ॥
कथमपि सखि ! क्रीड़ाकोपाद् व्रजेति मयोदिते
कठिनहृदयस्त्यक्त्वा शय्यां बलाद्गतएव सः ।
इति सरभसं ध्वस्तप्रेम्णि व्यपेतघृणे जने
पुनरपि हतव्रीड़ं चेतः प्रयाति करोमि किम् ॥ १२ ॥
दम्पत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वच-
स्तत्प्रातर्गुरुसन्निधौ निगदतस्तस्योपहारं वधूः ।
कर्णालङ्कृतिपद्मरागशकलं विन्यस्य चञ्चूपुटे
व्रीड़ार्त्ता प्रकरोति दाड़िमफलव्याजेन वाग्बन्धनम् ॥ १३॥
अज्ञानेन पराङ्मुखीं परिभवादाश्लिष्य मां दुःखितां
किं लब्धं चटुल ! त्वयेह नयता सौभाग्यमेतां दशाम् ।
पश्यैतद्दयिताकुचव्यतिकरोन्मृष्टाङ्गरागारुणं
वक्षस्ते मलतैलपङ्कशबलैर्वेणीपदैरङ्कितम् ॥ १४ ॥

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः
कथय सुकृती कोऽयं मुग्धे! त्वयाद्य विलोक्यते॥ ४॥

दत्तोऽस्याः प्रणयस्त्वयैव भवता चेयं चिरं लालिता
दैवादद्य किल त्वमेव कृतवानस्या नवं विप्रियम्।
मन्युर्दुःसह एष यात्युपशमं नो सान्त्ववादैः स्फुटं
हे निस्त्रिंश विमुक्तकण्ठकरुणं तावत् सखी रोदितु॥५॥

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने! मानमधुना॥ ६॥

नार्यस्तन्वि! हठाद्धरन्ति रमणं तिष्ठन्ति नो वारिता-
स्तत् किं ताम्यसि किञ्च रोदिषि मुधा तासां प्रियं माकृथाः
कान्तः केलिरुचिर्युवा सहृदयस्तादृक् पतिः कातरे!
किन्नो बर्करकर्करैः प्रियशतैराक्रम्य विक्रीयते॥ ७॥

कोपात् कोमललोलबाहुलतिकापाशेन बद्धा दृढं
नीत्वा केलिनिकेतनं दयितया सायं सखीनां पुरः।
भूयोऽप्येवमिति स्खलन् मृदुगिरा संसूच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन्॥ ८॥

प्रहरविरतौ मध्ये वाह्नस्ततोऽपि परेऽथ वा
किमुत सकले जाते वाह्नि प्रिय त्वमिहैष्यसि।

Digitized by Google

तद्भ्रातरो मरणमेव हि दुःखशान्तो
विज्ञापयामि भवतस्त्वरितं लुनीतम् ॥ ४९ ॥
अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु पृष्ठकेन।
अम्भोनिधिर्वहति दुःसहवाडवाग्निं
अङ्गीकृतं सुकृतिनः परिपालयन्ति ॥ ५० ॥

चोरकविकृता चौरपञ्चाशिका समाप्ता।

अमरुशतकम्।

ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥ १ ॥

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥२॥

आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं
किञ्चिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसां शीकरैः।
तन्व्या यत् सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये
तत् त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ॥३॥

Digitized by Google

अद्यापि तत्सुरतकेलिनिबद्धबुद्धिं
रङ्गोपबन्धपतितोत्थितशून्यहस्ताम् ।
दन्तोष्ठपीड़ननखक्षतरक्तसिक्तां
तस्याः स्मरामि रतिबन्धुरगात्रयष्टिम् ॥ ४४ ॥

अद्यापि तां निजवपुःकृतवेदिमध्याम्
तत्सङ्गसञ्चितसुधास्तनभारनम्राम् ।
नानाविचित्रकृतमण्डनमण्डिताङ्गीं
सुप्तोत्थितां निशि दिवा नहि विस्मरामि ॥ ४५ ॥

अद्यापि तां कनककान्तिमदालसाङ्गीं
क्रीड़ोत्सुकाभिजनभीषणवेपमानाम् ।
अङ्गाङ्गसङ्गपरिचुम्बितमोहभङ्गीं
सञ्जीवनौषधमिव प्रमदां स्मरामि ॥ ४६ ॥

अद्यापि तां नववधूसुरताभियोगे सम्पूर्ण-
केलिविधिना रचितां कदाचित् ।
पूर्णेन्दुसुन्दरमुखीं हरिणायताक्षीं
उन्निन्द्रकोकनदपत्रनखीं स्मरामि ॥ ४७ ॥

अद्यापि तद्विकसिताम्बुजगौरमध्यं
गोरोचनातिलकबिन्दुकृतैकदेशम् ।
ईषन्मदालसविघूर्णितदृष्टिपातं
कान्तामुखं सखि मया सह गच्छतीव ॥ ४८ ॥

अद्याप्यहं नववधूसुरताभियोगं
शक्नोमि नान्यविधिना रचितुं कदाचित् ।

दृष्टं तया तु सदृशं खलु तेन रूपं
शक्तो भवेदपि स एव परो न चान्यः ॥ ३८ ॥

अद्यापि निर्मलशरच्छशिगौरकान्ति
चेतो मुनेरपि हरेत् किमुतास्मदीयम् ।
वक्त्रं सुधामयमहं यदि तत् प्रपद्ये
चुम्बामि चाप्यविरतं व्यथते न चेतः ॥ ३९ ॥

अद्यापि ते प्रतिमुहुः प्रतिभाव्यमाना
चेतो हरन्ति हरिणीशिशुलोचनायाः ।
अन्तर्निमग्नमधुपाकुलकुन्दवृन्द-
सन्दर्भसुन्दरचयो नयनार्धपाताः ॥ ४० ॥

[illegible]
तत्प्रेमवारिमवारब्धजतापहारि ।
प्राप्नोम्यहं यदि पुनः सुरतैकतीर्थं
प्राणांस्त्यजामि नियतं पुनराप्तिहेतोः ॥ ४१ ॥

अद्यापि सा यदि पुनर्नलिनीवनान्ते
रोमाञ्चवीचिविलसच्चपलाङ्गयष्टिः ।
कादम्बकेसरचयः क्वणमानसङ्गात्
किञ्चित् क्रमं श्लथयति प्रियराजहंसी ॥ ४२ ॥

अद्यापि तां नृपतिशेखरराजकन्यां
सम्पूर्णयौवनमदालसभङ्गगात्रीम् ।
गन्धर्वयक्षसुरकिन्नरराजकन्यां
स्वर्गादिमां निपतितामिव चिन्तयामि ॥ ४३ ॥

Digitized by Google

अद्यापि तां मलयपङ्कजगन्धलुब्ध-
भ्राम्यद्द्विरेफचयचुम्बितगण्डदेशाम्
क्रोशावधूतकरपल्लवकङ्कणानां
त्वां नो दुनोति नियतं सुरतं मदीयम् ॥ ३३ ॥
अद्यापि सा नखपदं स्तनमण्डलेषु
दत्तं मयैव मधुपानविमोहितेन ।
उद्भिन्नरोमपुलकैर्बहुभिः समन्तात्
जागर्ति रक्षति विलोकयति प्रयत्नात् ॥ ३४ ॥
अद्यापि या शशिमुखी न कृतागसं मां
सोच्चैर्वचः प्रतिददाति यदैव नम्रम् ।
चुम्बामि रोदिमि भृशं पतितोऽस्मि पादे
दासस्तव प्रियतमे ! भज मां स्मरामि ॥ ३५ ॥
अद्यापि धावति मनः किमहं करोमि
सार्द्धं सखीभिरभिवासगृहेषु कान्ते ।
कान्तासुगीतपरिहासविचित्रवाद्यैः
क्रीड़ासुखैरिह तु यातु मदीयकालः ॥ ३६ ॥
अद्यापि तां न खलु वेद्मि किमीशपत्नी
सा वा शची सुरपतेरथ कृष्णलक्ष्मीः ।
धात्रैव किं त्रिजगतां परिमोहनाय
सृष्टा कुले युवतिराजिदिदृक्षयेव ॥ ३७ ॥
अद्यापि तां जगति वर्णयितुं न कोऽपि
शक्नोत्यदृष्टसदृशप्रतिरूपलक्ष्मीम् ।

Digitized by Google

वाचस्खलद्विगलदश्रुकलाकुलाक्षीं
सञ्चिन्तयामि गुरुशोकविनम्रवक्त्राम्॥ २७॥
अद्यापि वासगृहतो मयि नीयमाने
दुर्वारभीषणकरैर्यमदूतकल्पैः।
किं किं तया बहुविधं न कृतं मदर्थं
कर्तुं न पार्यत इति व्यथते मनो मे॥ २८॥
अद्यापि तां प्रणयिनीमविशोगमग्नां
शङ्के पुनर्बहुतया मृतशोकधाराम्।
मज्जीवधारणकरीं मदनालसाङ्गीं
किं ब्रह्मकेशवहरैः सुदतीं स्मरामि॥ २९॥
अद्यापि तां चलचकोरविलोलनेत्रां
शीतांशुमण्डलमुखीं कुटिलाग्रकेशाम्।
मत्तेभकुम्भसदृशस्तनभारनम्रां
बन्धूकपुष्पसदृशोष्ठपुटां स्मरामि॥ ३०॥
अद्यापि मे निशि दिवा हृदयं दुनोति
पूर्णेन्दुसुन्दरमुखं मम वल्लभायाः।
लावण्यनिर्जितमनोहरकामदर्पं
भूयः पुनः प्रतिमुहुर्न विलोक्यते यत्॥ ३१॥
अद्यापि तामरहितां मनसापि नित्यं
सञ्चिन्तयामि सततं मम जीवितेशाम्।
लावण्यभोगनवयौवनभारसारां
जन्मान्तरेऽपि मम सैव गतिर्यथा स्यात्॥ ३२॥

Digitized by Google

अद्यापि तां प्रणयिनीं मृगशावकाक्षीं
पीयूषपूर्णकुचकुम्भयुगं वहन्तीम्।
पश्याम्यहं यदि पुनर्दिवसावसाने
स्वर्गापवर्गनरराज्यसुखं त्यजामि॥ २२॥
अद्यापि तां स्तिमितवस्त्रमिवावलग्नां
प्रौढप्रतापमदनानलतप्तदेहाम्।
बालां मदेकशरणामनुकम्पनीयां
प्राणाधिकां क्षणमहं नहि विस्मरामि॥ २३॥
अद्याति तां क्षितितले वरकामिनीनां
सर्वाङ्गसुन्दरतया प्रथमैकरेखाम्।
संसारनाटकरसोत्तमरत्नपात्रीं
कान्तां स्मरामि कुसुमायुधबाणखिन्नाम्॥ २४॥
अद्यापि तां प्रथमतो वरसुन्दरीं मे
स्नेहैकपात्रघटितावनिनाथपुत्रीम्।
हे हे जना मम वियोगहुताशतापं
सोढुं न शक्यत इति प्रतिचिन्तयामि॥ २५॥
अद्यापि विस्मयकरी त्रिदशान् विहाय
बुद्धिर्बलाच्चलति तत् किमहं करोमि।
जानन्नपि प्रतिमुहूर्तमिवान्तकाले
कष्टा तु वल्लभतरेति ममातिधीरा:॥ २६॥
अद्यापि तां गमनमित्युदितं मदीयं
श्रुत्वैव भीतहरिणीशिशुचञ्चलाक्षीम्।

Digitized by Google

सुप्ताञ्च मे रहसि हास्यमुखीं प्रसन्नां
लज्जाभरार्द्रनयनां परिचिन्तयामि ॥ १६ ॥
अद्यापि तां गलितबन्धनकेशपाशां
स्रस्तस्रजं स्मितसुधामधुराधरोष्ठीं
पीनोन्नतस्तनयुगोपरि चारु चुम्बन्
मुक्तावलिं रहसि लोलदृशं स्मरामि ॥ १७ ॥
अद्याप्यहं विरहवह्निनिपीड़िताङ्गीं
तन्वीं कुरङ्गनयनां सुरतैकपात्रीम् ।
नानाविचित्रकृतमण्डनमावहन्तीं
तां राजहंसगमनां सुदतीं स्मरामि ॥ १८ ॥
अद्यापि तां विरहितां कुचभारनम्रां
मुक्ताकलापविमलीकृतकण्ठदेशाम् ।
तां केलिमन्दिरगतां कुसुमायुधस्य
कान्तां स्मरामि रुचिरोज्ज्वलधूमकेतुम् ॥१९ ॥
अद्यापि चाटुशतप्रोल्लसितस्मितन्तु
तस्याः स्मरामि सुरतक्लमविह्वलायाः ॥
अव्याजनिस्तनितकातरकाकुकण्ठ-
सङ्कीर्णवर्णरुचिरं वदनं प्रियायाः ॥ २० ॥
अद्यापि तां सुरतघूर्णनिमीलिताक्षीं
स्रस्ताङ्गयष्टिगलितां गुरुकेशनम्राम् ।
शृङ्गारवारिकमलाम्बुजराजहंसीम्
जन्मान्तरे निधुवनेऽप्यनुचिन्तयामि ॥ २१ ॥

अद्यापि तत् कनककुण्डलघृष्टमास्यम्
तस्याः स्मरामि विपरीतरताभियोगे ।
आन्दोलनश्रमजलस्फुटसान्द्रबिन्दु
मुक्ताफलप्रकरविच्छुरितं प्रियायाः ॥ ११ ॥
अद्यापि तत्प्रणयभङ्गुरदृष्टिपातं
तस्याः स्मरामि रतिविभ्रमगात्रभङ्गम् ।
वस्त्राञ्चलेन परिघर्षिपयोधरान्तं
दन्तच्छदं दशनखण्डनमण्डनञ्च ॥ १२ ॥
अद्याप्यशोकनवपल्लवरक्तहस्तां
मुक्ताफलप्रचयचुम्बितचूचुकाग्राम् ।
अन्तःस्मितोच्छ्वासितपाण्डुरगण्डदेशां
तां वल्लभां रहसि सञ्चलितां स्मरामि ॥ १३ ॥
अद्यापि तत् कुसुमरेणुसुगन्धिमिश्रं
न्यस्तं स्मरामि नखरक्षतलक्ष्म तस्याः ।
आकृष्टहेमरुचिराम्बरमुत्थिताया
लज्जावशात् करधृतं न कुतोव्रजन्त्याः ॥ १४ ॥
अद्यापि तां विधृतकज्जललोलनेत्रां
पृथ्वीप्रभिन्नकुसुमाकुलकेशपाशान् ।
सिन्दूरसम्बलितमौक्तिकहारभाराम्
आबद्धहेमकटिकां रहसि स्मरामि ॥ १५ ॥
अद्यापि तां धवलवेश्मनि रत्नदीप-
मालामयूखपटलैर्गलितान्धकारैः ।

शृङ्गारसारकमलाकरराजहंसीं
व्रीडावनम्रवदनामुरसि स्मरामि ॥ ५ ॥

अद्यापि तां सुरतताण्डवसूत्रधारीं
पूर्णेन्दुसुन्दरमुखीं मदविह्वलाङ्गीम्
तन्वीं विशालजघनां स्तनभारखिन्नां
व्यालोलकुन्तलकलापवतीं स्मरामि ॥ ६ ॥

अद्यापि तां मलयचन्दनचर्चिताङ्गीं
कस्तूरिकापरिमलेन विसर्पिगन्धाम् ।
अल्पेन्दुरेखपरिशीलितभालरेखां
मुग्धाभिरामनयनां शयने स्मरामि ॥ ७ ॥

अद्यापि तां निधुवने मधुपानपात्रीं
लीढ़ाम्बरां कृशतनुं चपलायताक्षीम् ।
काश्मीरपङ्कमृगनाभिकृताङ्गरागां
कर्पूरपूगपरिपूर्णमुखीं स्मरामि ॥ ८ ॥

अद्यापि तां क्लमपतन्मदिरापराग-
प्रस्वेदबिन्दुविततं वदनं प्रियायाः ।
अन्ते स्मरामि रतिखेदविलोलनेत्रं
राहूपरागपरिमुक्तमिवेन्दुबिम्बम् ॥ ९ ॥

अद्यापि तन्मुखशशी परिवर्तते मे
रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या ।
जीवेति मङ्गलवचः परिहृत्य कोपात्
कर्णे कृतं कनकपत्रमनालपन्त्या ॥ १० ॥

Digitized by Google

चौरपञ्चाशिका ।

—०::०—

.पि तां कनकचम्पकदामगौरीं
फुल्लारविन्दवदनां तनुलोमराजीम् ।
सुप्तोत्थितां मदनविह्वललालसाङ्गीं
विद्यां प्रमादगुणितामिव चिन्तयामि ॥ १ ॥
अद्यापि तां शशिमुखीं नवयौवनाढ्यां
पीनस्तनीं पुनरहं यदि गौरकान्तिम् ।
पश्यामि मन्मथशरानलपीड़ितानि
गात्राणि सम्प्रति करोमि सुशीतलानि ॥ २ ॥
अद्यापि तां यदि पुनः कमलायताक्षीं
पश्यामि पीवरपयोधरभारखिन्नाम् ।
सम्पीड्य बाहुयुगलेन पिबामि वक्त्रम्
उन्मत्तवन्मधुकरः कमलं यथेष्टम् ॥ ३ ॥
अद्यापि तां निधुवनक्लमनिःसहाङ्गीम्
आपाण्डु गण्डपतितालककुञ्चिताक्षीम् ।
प्रच्छन्नपापकृतमन्थरमावहन्तीं
कण्ठावसक्तमृदुबाहुलतां स्मरामि ॥ ४ ॥
अद्यापि तां सुरतजागरघूर्णमानां
तिर्य्यक्स्खलत्तरलतारकमावहन्तीम्

अन्तस्थं तडिदिव विविक्तव्योमवेश्माब्दपुञ्जी-
स्तम्भ्यः पाशे पशुरिव तव प्रेम्णि बद्धो यदस्ति ॥ १२६ ॥
मातर्मातर्जय जय जगन्मोहनं मोहयन्त्याः
कस्ते तत्त्वं कलयतु न यद्वेदगर्भोऽपि वेद ।
मन्तव्योऽसौ परिजनतया वल्लभस्येति तस्यै
वारं वारं तदनु दधिरे तेन दण्डप्रणामाः ॥ १२७ ॥
सर्वाङ्गीनं पुलकमुदमूदश्रु मग्ने च दृष्टी
कण्ठो भग्नस्वर इव वचः पर्यवस्थानशून्यम् ।
तस्यास्तस्याप्युभयजनि युगपद्यानकाले तदानीं
मुग्धा मूर्द्धन्यभवदुभयोरद्भुता पुष्पवृष्टिः ॥ १२८ ॥
आमन्त्र्यैकस्तदनु सकलं घोषमुत्कण्ठमानः
सद्यो राधारमणचरणप्रेक्षणाय प्रतस्थे ।
मन्त्रं चिन्तामणिमिव परा चिन्तयन्ती चिराय
प्रेयः सूक्तं वनभुवि घनानन्दमग्नावतस्थे ॥ १२९ ॥
नानारामप्रणयि-सुमनःसङ्गसौभाग्यभाजा
जाड्यापाये सुरभिसमयस्थायिना माधवेन ।
राधाबन्धोरुपहृतमिति प्रेममाध्वीकमेतन्-
निर्विघ्नेन श्रवणपुटकैः पुण्यवन्तः पिबन्तु ॥ १४० ॥
विचारपारदृश्वानः कृतं लघुधिया मया ।
करुणार्द्राः करिष्यन्ति शुद्धमुद्धवदूतकम् ॥ १४१ ॥

इति ताम्बितनगरनिवासि श्रीमाधवकवीन्द्र भट्टाचार्य-
विरचितं उद्धवदूतं खण्डकाव्यं सम्पूर्णम् ।

ज्ञातिग्रामो हसति निभृतं बन्धुवर्गो रुणद्धि
व्रीडामन्तर्दधति गुरवो गौरवो भृत्यलोकः।
चित्रीयन्ते किमपि सुजना दुर्जना: कुत्सयन्ते
श्लाघन्ते मां सदसि रसिकाः सादरं त्वत्कथासु॥१२१॥
इत्यादिष्टं भुवनगुरुणा गौरवेण क्रियाणाम्
अप्यामन्तुं किमिव ग्रथितुं भोक्तुमप्यक्षमेण।
तामौत्सुक्यादिति स कथयन्नात्मनः पादमूले
निन्नासीनः सुरभिगिरिरं निर्भरं किञ्चिदाप॥१२२॥
पश्यन्नेतत् किमिति कथयन्नश्रुधारासुदारां
मन्दाकिन्याइव तनुभृतः सुभ्रुवः सुस्थितायाः।
हा हा जातं किमिति चकितः सत्वरं प्रोच्य पादौ
भक्तिश्वासपुलकमुपादाय मूर्ध्नि ववन्दे॥१२३॥
बुद्धा बद्धाञ्जलिपुटमिमां किञ्चिदाख्यातुकामाम्
इत्याचख्यौ विरमतु परं निष्फलो देवि खेदः।
एतद्दासो नयवति हरेः श्रीमदङ्काधिरूढं
चेतोमूढं न कुरु करुणासागरे सक्तासि॥१२४॥
भास्वानस्तानयमति ततो खेलयन्नम्बरान्त
धर्मस्थित्यै भ्रमति भुवने तामसोन्मूलनाय।
प्रादक्षिण्याज्झटिति विनतानन्दनाधीनयानो
रागी चिन्तां न कुरु कुरुते पद्मिनीनां प्रबोधम्॥१२५॥
गोपीमात्रं घुणलिपिनयान्माधवप्रेमपात्रं
मत्वा यत्त्वामनतिग्रयिनी दृष्टिरन्ने ममासीत्

Digitized by Google

गन्तव्यं तद्विधिविविधकृतव्योमकेशाब्दिपुत्री-
स्तम्यः पार्श्वे पशुरिव तव प्रेम्णि बद्धो यदस्ति ॥ १३६ ॥

मातर्मातर्जय जय जगन्मोहनं मोहयन्त्याः
कस्ते तत्त्वं कलयतु न यद्दै द्रगर्भोऽपि वेद ।
मन्तव्योऽसौ परिजनतया वल्लभस्येति तस्यै
वारं वारं तदनु दधिरे तेन दण्डप्रणामाः ॥ १३७ ॥

सर्वाङ्गीनं पुलकमुदभूदश्रु मग्ने च दृष्टी
कण्ठो भग्नस्वर इव वचः पर्यवस्थानशून्यम् ।
तस्यास्तस्याप्यजनि युगपद्ध्यानकाले तदानीं
मुग्धा मूर्द्धन्यभवदुभयोरद्भुता पुष्पवृष्टिः ॥ १३८ ॥

आमन्त्र्यैकस्तदनु सकलं घोषमुत्कण्ठमानः
सद्यो राधारमणचरणप्रेक्षणाय प्रतस्थे ।
मन्त्रं चिन्तामणिमिव परा चिन्तयन्ती चिराय
प्रेयः सूक्तं वनभुवि घनानन्दमग्नावतस्थे ॥ १३९ ॥

नानारामप्रणयि-सुमनःसङ्गसौभाग्यभाजा
जाड्यापाये सुरभिसमयस्थायिना माधवेन ।
राधाबन्धोरुपहृतमिति प्रेममाध्वीकमेतन्-
निर्विघ्नेन श्रवणपुटकैः पुण्यवन्तः पिबन्तु ॥ १४० ॥

विचारपारदृश्वानः क्षतं क्षमधिया मया ।
करुणार्द्राः करिष्यन्ति शुद्धमुद्धवदूतकम् ॥ १४१ ॥

इति तालितनगरनिवासि श्रीमाधवकवीन्द्र भट्टाचार्य-
विरचितं उद्धवदूतं खण्डकाव्यं सम्पूर्णम् ।

Digitized by Google

ज्ञातिग्रामो हसति निभृतं बन्धुवर्गो रुणद्धि
व्रीडामन्तर्दधति गुरवो गौरवो भृत्यलोकः।
चित्रीयन्ते किमपि सुजना दुर्जनाः कुत्सयन्ते
श्लाघन्ते मां सदसि रसिकाः सादरं त्वत्कथासु ॥१२१॥
इत्यादिष्टं भुवनगुरुणा गौरवेण क्रियाणाम्
अन्तामन्तुं किमिव शयितुं भोक्तुमप्यक्रमेण।
तामौत्सुक्यादिति स कथयन्नात्मनः पादमूले
निन्नासीनः सुरभिगिरिरं निर्भरं किञ्चिदाप ॥१२२॥
पश्यन्नेतत् किमिति कथयन्नश्रुधारामुदारां
मन्दाकिन्यामिव तनुभृतः सुभ्रुवः सुस्थितायाः।
हा हा जातं किमिति चकितः सत्वरं प्रोच्य पादौ
भक्तिश्रद्धासपुलकमुपादाय मूर्ध्नि ववन्दे ॥१२३॥
बुद्धा बद्धाञ्जलिपुटमिमां किञ्चिदाख्यातुकामाम्
इत्याचख्यौ विरमतु परं निष्फलो देवि खेदः।
एतद्दासो नयवति हरेः श्रीमदङ्काधिरूढं
चेतोमूढं न कुरु करुणासागरे सक्तासि ॥ १२४ ॥
भास्वानश्वानयमति ततौ खेलयन्नम्बरान्त
धर्मस्थित्यै भ्रमति भुवने तामसोन्मूलनाय।
प्रादुश्चिन्ताज्झटिति विनतानन्दनाधीनयानो
रागी चिन्तां न कुरु कुरुते पद्मिनीनां प्रबोधम् ॥१२५॥
गोपीमात्रं घुणलिपिनयामाधवप्रेमपात्रं
मत्वा यत्त्वामनतिशयिनी दृष्टिरस्ने ममासीत्

Digitized by Google

दुःखं क्वापि क्वचिदपि सुखं गच्छति क्वापि मोहं
सर्वत्रैवं स्फुरति मम तु त्वन्मयी दृष्टिरेव ॥ १२५ ॥
कुञ्जामञ्जीमकरवमुरीकृत्य यन्निर्वृतत्वं
तस्यात्यर्थं विपुलमतयो नापयन्ति क्षतिः का ।
हित्वा वेशं कुवलयदृशां वेशमन्विन्तुवं वा
क्षन्तव्या मे न हि कुटिलतेत्येतदुन्नायकं तत् ॥ १२६ ॥
विद्युल्लोलं वपुरिदमितो यौवनादेः कथा का
दृश्यं मिथ्या सकलमिति मद्दासदासोऽपि वेद ।
किं ते वक्ष्ये स्वयममुमहं नैव वक्तुं समर्थो
यज्ञोपीतत् प्रणयमदिरामत्तमात्मानमेव ॥ १२७ ॥
उद्यन्नीवस्खलनमनिशं गोपिते गोपयिष्यन्
राधानाम्नीमकरवमहं सारिकामन्तिकस्थाम् ।
नीता राधे मम मुरलिकेत्येवमादीन्यकाण्डे
वक्तुः सभ्यस्मितजनयितुस्तन्ममासीद्वृथैव ॥ १२८ ॥
अस्त्रं प्रस्वापनमपि मया लब्धमुन्निद्रकेण
यस्मिन्नेतन्निहितमथ ते स्वप्नसन्दर्शनाय ।
जाग्रद्भावे भवति भवती भावनीयैव धिङ्मे
तेनाशेषस्फुरणशमनो हन्त जाता सुषुप्तिः ॥ १२९ ॥
जाने प्राणेश्वरि मम यथा निर्विवादं तथा ते
सन्तमाया युगपदभियान्त्यद्यतन्यो रजन्यः ।
यास्यन्त्येता दिनकतिपयैरङ्कपल्यङ्कभाजोः
सत्यं सत्यं निमिषनिभृतामावयोः सुस्थिता स्याः ॥ १३० ॥

Digitized by Google

दैवादद्य प्रतिपदमितो विश्वतो बन्धुपाशै-
र्दृढैर्नैव स्वजपदमनुप्रापितः संयतोऽस्मि ।
यस्मिन् बाले तपनतनयाकूलकुञ्जान्तराले
चित्तेन त्वं विरमसि न मे किन्तु केलिविनोदः ॥१२०॥

साक्षाद्दीक्षा न भवतु चिरं चिन्तिता तेन माभू-
दैवाधीनो गमयति जनः कोऽपि कुत्रापि कालम् ।
वन्दीभूतं मयि तव मनस्त्वय्यपीदं ममेति
द्वाभ्यामाभ्यां मिलनमचिरादावयोः साधवीयम् ॥१२१॥

राधे ! राधे ! क्व चलसि मनाक् तिष्ठ कान्ताक्षि ! कुञ्जे
प्रातर्जातं न हि न हि निशा सावशेषाधुनापि ।
इत्यावेशप्रलपितशतं मत्कृतं देवि ! दिग्भ्यः
संप्राप्तास्ते कथयितुममी साक्षिणः सन्ति सख्यः ॥१२२॥

रुद्धा बन्धुप्रणयपदवी लङ्घिता लोकलज्जा
मूर्ध्नि न्यस्तं पदमयशसः शङ्कितो नापमृत्युः ।
मामाराद्धुं किमिव न कृतं दुष्करं त्वादृशीभि-
स्त्यक्त्वा युष्मान् मम यदुपतेरद्य राज्यं धिगस्तु ॥१२३॥

रम्या हर्म्यावलिरियममी बान्धवाः सानुबन्धा
निर्वैरेयं जयति नगरी गुम्फिता नागरीभिः ।
एषा सम्पत् किमिह न सुखं किन्तु कान्तारकुञ्जे
युष्माभिर्यः समजनि स मे दुर्लभो हृद्विनोदः ॥१२४॥

नोपष्टम्भो गुणवति ! तव स्यादयं चेत् तदानीं
नाहं नासावतिनवघनश्यामलो देहबन्धः ।

को जानीते किमभवत परं सत्वरं सापि तन्वी
किञ्चित् किञ्चित् कथय कथयेत्युत्थिता कौतुकेन ॥ ११४ ॥
आदायास्यै मलयजजलैर्मर्मरीभूतमन्त-
र्म्लानीनाभोगं नयनपयसः प्रोञ्छनात् साञ्जनस्य ।
किञ्च प्रीतं बहुभिरभितः शुष्कशैवालखण्डैः
सारं शौरेरखिलमपि तद्वर्णयामास भूयः ॥ ११५ ॥
पश्चादूचे पुनरयमिदं पेलवाङ्गीं धुनान
स्तस्मादस्याः शपथशतकैः सन्निवृत्तः कथञ्चित् ।
लक्ष्मीर्यस्मान्निवसति वहिस्त्वं तदन्तर्निमग्ना
मन्योरस्यो भवतु विषयः सा किमेवं विधासि ॥ ११६ ॥
धारावाहि व्यसनकथनाङ्कतवत्याः प्रियायाः
सूत्रासक्तिव्यवधिभयतो यत्र मध्ये मयोक्तम् ।
मौढ्यादेवं मम किमु महानेव न स्यादनर्थ-
स्तस्यायं चेद्वसनपवनः पावनो नाभविष्यत् ॥ ११७ ॥
यस्ते मग्नो मनसि, हृदये यस्य च त्वं विलीना
मन्यन्ते यच्चरणशरणा भूतिमैन्द्रीं तृणाय ।
यस्यालाभात् पुरयुवतयो नालशैवालशय्याः ॥
सूर्य्यापाये ज्वलितवपुषो यामिनीर्यापयन्ति ॥ ११८ ॥
यस्याद्य त्वद्विरहदहनज्वालया पाण्डुभासो
वासो नीलं गमयति भिदामक्ष नीलाम्बरेण ।
दासो रासोत्सवनटगुरोरस्य सोऽहं समोऽहं
स त्वामावेदयति यदिदं मन्मुखेन प्रतीहि ॥ ११९ ॥

Digitized by Google

इत्युद्बाष्पुर्विमलपुलकाकम्पमानाखण्डा
छिन्ना मूले पतति भुवि सा हेमवल्लीव यावत्।
भृङ्गारैस्तैः शिशिरसलिलैस्तावदेवोद्धवोऽस्याः
सिञ्चन्नास्यं तदुपरि विभोरुत्तरीयं दुधाव॥ १०९॥
चक्रे चैतन्मनसि चतुरायेटकावप्रपात-
लग्नं यस्मात् तदपि यदसौ मामिहैकां न्ययुङ्क्त।
एतत् सम्भावनसमुचितं साध्वभूलैपुणं मे
यद्रक्षायामहमधिकृतो मामितीयं मयैव॥ ११०॥
सम्यग्जातं सुचिरविरहज्वालया दूयमाना
सेयं साध्वी विशति परमानन्दधामव्यनन्ते।
मन्त्री वैमानिक इति वृथा मानमासाद्यमाद्यन्
अद्य स्वीयां मतिपरिणतिं बुद्धवानुद्धवोऽपि॥ १११॥
शृण्वन्नेतन्मधुपुरपतिर्मेस्थले कीदृशं मां
किं वा भावी कथमिव भवा दृश्यतामास्वमसौ।
ध्यायन्नेतत् पुलकमुकुलारम्भिसस्यन्दतारं
पश्यन्नस्या मुखमकथयत् प्राणिति प्राणितीति॥ ११२॥
नष्टं प्राप्तं निधिमिव मुखं वीक्षमाणोऽयमस्या
भूयः सिञ्चन्मधुपुरपतेरुत्तरीयानिलेन।
उच्चैराह श्रुतिपरिसरे किङ्करं कंसभर्त्तो-
र्दूतं राधे! त्वयि विनिहितं विद्धिमामुद्धवोऽस्मि॥ ११३॥
सातिस्वादुर्दवथुदमनी तुल्यपीयूषवाणी
वर्णश्रेणि श्रवणपुटकेनान्तरस्या विशन्ती।

द्रष्टव्योऽसौ पुनरपि मया मन्यते कीदृशं वा
मानिन्यम्बा तव च रुदती पृच्छती दन्दहीति ॥ १०३ ॥
अत्रागच्छ त्वरितमथवा तिष्ठ तत्राब्दलक्षं
शृण्वन्त्वेते जनपदजना मुक्तकण्ठा ब्रवीमि।
यामि स्वर्गं निरयमथवा प्राणिमीह म्रियै वा
श्यामादन्यो नहि नहि नहि प्राणनाथो ममास्ते ॥१०४
राधाबन्धुर्लिखितपठितो विस्मृतो यत्त्वमासीः
साहं साहंकृतिरुदभवं यत्तवातिप्रियेति।
लक्ष्मीकान्त ! प्रणयसुधया सिञ्च वा मां नवा त्वम्
एतज्ज्ञातं ननु मम जनुर्धन्य एतावतैव ॥ १०५ ॥
यान्ति प्राणा मम यदि न ते प्रक्षनीयः पुरोधा
देया मह्यं किसलयरुचा पाणिनैव त्वयापः।
याचे तत्र व्यवधिरहितिनः क्षालनं क्षारनीरः
कर्तव्यं ते मधुपुरवधूपादलाक्षारसस्य ॥ १०६ ॥
सीदत्यङ्गं दलति हृदयं किं नु कुर्वन्ति हन्त !
प्राणाः श्यामाश्रय मम बधाभद्रभागी त्वमेव।
हा धिक् कीदृग् वदसि रसने ! तत्त्वतो यत्तदास्तां
वन्दीभूय स्वयमिह मया मोचितः प्राणनाथः ॥ १०७ ॥
श्याम श्याम स्मर सहचरी मन्दकारी कृतं मे
केनाकस्मात् भ्रमति भुवनं मज्जति घोरवन्याम्
काहं क्वाहं क्व मम दयितः कुत्र तस्यैष दासो,
हा हा हा हा ! हरि हरि हरि ! क्षीणमध्य प्रसीद ॥१०८॥

Digitized by Google

दूरादेव स्मितत्तरसुधासिच्यमानाधरौष्ठं
गण्डोद्यत्पुलककमलाकारविस्फारदृष्टि ।
एह्येहीति स्वयमवगतः प्रेयसः प्रार्थनं या
लेभे तस्यामनतिशयनी माननैवापमृत्युः ॥९८॥

रूक्षा लोकाः कटुकुवचसः स्वालये सर्व एव
क्षीणासि त्वं कथमिति बहिर्ग्राम्यवाचो दहन्ति ।
ग्रामस्यान्ते तपनतनयाकूलमुद्यानमूलं
शून्यं लीलाशरणमपि ते कुत्र तन्निर्विशामि ॥ ९९ ॥

वैमुख्यन्ते किमपि मदनो माद्यति क्रूरकर्मा
नर्मालापेष्वपि कुवचनैर्बाधते बन्धुवर्गः ।
चेतो नाथ ! त्वयि विनिहितं वाचमुल्लंघ्य यासा
मासामुक्तिः स्मितकलुषिता कल्पते किं करोमि ॥१००॥

कुञ्जे कुञ्जे रतिरुपहिता धिक्कृतं धाम धौतं
मग्नं वेणोर्वचसि विहितो बन्धुवाचां विसर्गः ।
दृष्टः स्वामी कपिरिव कृतः प्राणसारोऽसि जारो
हीनोपाया कथमहममूनद्य भूयो नियोक्ष्ये ॥ १०१ ॥

एते नित्यं नवपरिमलोद्गारिणः सन्तु कुञ्जाः
सन्तु क्लेशा न च मम तनोरत्र वीभत्सभावः ।
एतद्दृष्ट्वा रमयति हरिर्गूढमागत्य राधाम्
इत्यद्यापि व्रजयुवतयोमह्यमीर्ष्यां वहन्ति ॥ १०२ ॥

राधे राधे कथय कथय त्वय्यसौ नन्दनो मे
बाल्यादेव प्रभृति कुरुते वत्सलो छत्रप्रकाशम् ।

Digitized by Google

तेन त्यागः किमयमुचितो वच्मि सङ्कोचहीना
पान्थो यत्र त्वमसि रसिकैरीचितो नैष पन्थाः ॥ ९२ ॥
पाण्डुक्षामं वपुरिदममी कुन्तलाः क्लान्तभाराः
वासोऽप्येवंविधमिति भिदा भिक्षुकीभिः कुतो नः ।
एषा क्षोभाः क्वाति च मथुरा यामि चेदत्र किं तन्-
नेत्रद्वन्द्वं न भवति हाति श्रीमुखालोकनाय ॥ ९३ ॥
कुब्जागारादहहरपि यदि प्राणनाथ ! प्रयासि
प्राणैः स्थेयं क्षणमपि तदा नैव मे सत्यमेतत् ।
भूयोभूयो विलुभितवती त्वामिति व्यक्तलज्जा
दूराद्दूरं कथमतिचिरादाननं दर्शयिष्ये ॥ ९४ ॥
त्वच्चेदानीं नगरतरुणीसार्थसर्वस्वभूत-
स्ता अप्येवं तव किमितरास्तुभ्यमद्य स्वदन्ते ।
अत्यौत्सुक्यात्तदपि भवतः सम्मुखी वा यदि स्यां
किं स्यादेतन्न खलु निपुणं भावयन्त्यप्यवैमि ॥ ९५ ॥
न स्यादस्या यदि मम तनोः प्रत्यभिज्ञेयता वा
स्यादेवाथ स्फुटमुभयथा मामकीनो विडम्बः ।
आद्ये नो न स्पृशति भवतो दृष्टिरौदास्यमुद्राम्
अन्यत्रापि प्रणयलघुता तादवस्थ्यं व्यनक्ति ॥ ९६ ॥
सांमुख्यं ते भवति यदि मे तद्गृहे वा वहिर्वा
सौजन्ये न स्मरसि यदि तत् सा कथा दुर्लभैव ।
पूर्वावस्थास्मरणलघिमा दुर्निवारः सभायाम्
गृहान्ते चेच्चतुरतरुणीसार्थसौहार्दभङ्गः ॥ ९७ ॥

Digitized by Google

दूरं दूरादपि च विषमं कश्चिदेत्य प्रहारं
कुर्वन्नेकं पशुमिव जगन्नाथ ! किं नावधीर्माम् ।
वाटीसीमप्रसरणपटु श्रूयमाणैरजस्रं
किं दुःशीलप्रहरणशतैरङ्गमङ्गं लुनासि ॥ ८७ ॥
सोढव्यं ते सकलमधुना संभृतब्रह्मचर्य्या
राजर्षित्वं कलयसि यदि स्वीयवंशानुरूपम् ।
लब्धा शोभिः पुरयुवतिषु श्रूयमाणा नवीना
किं कुर्य्याम स्पृशति हृदयं शासिता सर्वलेव ॥ ८८ ॥
यान्ति प्राणा न हि वहिरमी नुद्यमानाश्च गाढं
सत्यं गत्यन्तरमपि न मे किञ्चिदस्ति स्वसत्याः ।
मग्नं चेतः कुलिशकठिने त्वय्यनुद्यार्थ्यमेतत्
तेनैवाहं भवदनुगतिं संश्रिता किं करोमि ॥ ८९ ॥
किं नो दण्डप्रहररजनीपश्चिमीपचरीत्या
स्फीतस्फीतां विरहविपदं साहयन्नामहासीः ।
दत्तो यस्मै न खलु निमिषो दृष्टिविघ्नोऽपि तस्मै
दूरस्थित्यै वितरसि विभो ! यौगपद्याद् युगानि ॥ ९० ॥
स्वामिन्नेकं वचसि भवतः स्वान्तविश्रान्तमन्यत्
कर्म्मण्यन्यन्मुहुरिदमभिव्यक्तमन्धोऽपि वेद ।
भूयोभूयस्तदपि मुषिता नाम गृह्णामि किं ते
तिष्ठत्यस्मिन् जगति यदि नो जीवनस्थानमन्यत् ॥ ९१ ॥
त्वत्सेवासु स्खलनमभवन्मादृशः कस्य किं वा
सेवाधर्म्मो गहन इति यन्नीतिनिष्ठाः पठन्ति ।

Digitized by Google

हीना याचे विधिमहमतस्त्वत्कृते मन्मथस्ते
यद्गर्भायाः किमपि निपुणे तस्य: सत्यमस्तु ॥ ८१ ॥
आगः कस्मिन्नहनि न कृतं तिष्ठतापि त्वयेह
प्रस्थानेन प्रकटितमहो वीर ! वैरं वरीयः ।
कृच्छ्रं नो न जयितुमियानेव यत्नस्तवाभूद्
एतच्चेतस्त्वयि तु न गुणादन्यदङ्गीकरोति ॥ ८२ ॥
तुभ्यं दातुं विषमुपनता पूतनाख्यापि युक्तं
विश्लेषाग्निष्वपि समुचितो निग्रहः पूरुषेषु ।
अन्या योषित् प्रकृतिकमनाप्यन्यहृत्सिन्न या ते
तन्नोन्मादे किमपयशसः पातकाद्वाप्यदृष्टि ॥ ८३ ॥
संभोग्योऽभूर्दिनकतिपयं मादृशीनामतस्त्वं
माधुर्यं येऽह्निनकतिपयं भुञ्जते सह्यमेतत् ।
अस्माभिर्यो भवदनुभवः सोऽपि सर्वात्मना यन्-
निःसंस्कारः समजनि मनो दृश्यमेतावतैव ॥ ८४ ॥
तुल्याकारं समम भवतोरत्र दुःखं सुखञ्च
क्रीडाकारी त्वमहमिति नो यद्भिदेकोऽपि जातः ।
स त्वं योषित्कुलरतिगुरुः साहमेवं वराकी
सा किं नाहं त्वमसि न स किं नाथ ! किं जातमेतत् ॥ ८५ ॥
धैर्य्यात् काश्चित् कतिचन सखीभिश्चया लज्जयान्या
भीत्या काश्चित् कतिचन रुषा काश्चिदालस्यतोऽपि ।
स्वाधीनेऽपि त्वयि रतिगुरौ केलिकुञ्जावलम्बि-
न्यस्वाध्यायाः कति कति निशामादृशामत्र नासन् ॥ ८६ ॥

न स्मर्तव्यस्त्वदयमदयः कर्हिचिद्बर्हचूडो
निश्चित्येति स्पृहयति मनो यावदर्थान्तराय ।
किं ते वैरं विहितमघ रे लक्ष्य लक्ष्याग्निवान्त-
धारावाहिस्मरणपदवीं गाहसे तावदेव ॥ ७६ ॥

गुञ्जाहारं कतिचन तदा पत्रशृङ्गाणि काचित्
केचिद् बर्हस्तवकमपरे वेत्रमन्ये प्रतोदम्
वंशीं काचित् त्वदधरसुधासारसौरभ्यरम्यां
निन्युर्धन्या निजमविदुषी दीर्घमायुर्हतास्मि ॥ ७७ ॥

आयास्यामि स्वयमिति पुरः प्रस्थितो यत् त्वयोक्तं
मय्येवास्तु प्लुतमिव तदा नाथ ! निःक्षिप्तमक्षि ।
आस्थामत्र प्रणिहितवती प्राणिमि प्राणबन्धो !
चिन्ताम्भोऽमकरथ भवेः सत्यसन्धो न वेति ॥ ७८ ॥

सेयं सिन्धुर्विकचकमला काननं फुल्लमेतन्-
नीपस्थायं कुसुमनमितः श्रूयते भृङ्गगीतम् ।
स त्वं साहं स च रतिपतिः किं वदामः परन्तु
भावोऽभिन्नः सपदि विरहे सर्वमन्यादृगेव ॥ ७९ ॥

योषिल्लक्षं रमय दमय क्षेपिणो दुर्विनीतान्
सम्राडेधि प्रणयसुमुखो बन्धुवृन्दं पुराणम् ।
क्लेशानेषा वहतु बहुशः कान्त ! किं तेन वार्तां
कल्याणीं ते भवतु मम तु श्रोतुमेवेदमायुः ॥ ८० ॥

यत्तन्मेऽस्तु त्वयि तु चरितं युक्तिकर्म व्यतीतं
सम्पश्यन्ती किमपि किमपि प्राणबन्धो ! बिभेमि ।

योवाऽन्योवा भव नवघनश्याम तस्यैव धाम्नो
दासीभूता वयमिति परे बन्धवस्त्वा विवस्त्राः ॥ ७० ॥
नायासि त्वं नच नयसि मामात्मनः पादमूलं
नो वा दूतं विसृजसि नवा लेखलेशं ददासि ।
निश्वासाग्निर्निपतति न ते काचिदाश्वासवार्त्ता
कस्मिन्नास्थामुपहितवती जीवितं धारयामि ॥ ७१ ॥
यत् पूर्वेद्युर्गमनदिवसाश्वासनभङ्गाभिलाषी
लक्ष्मीकान्त त्वमपि पतितः पादमूले ममासीः ।
स्पृष्टोऽङ्गुल्या तदपि न मया नापि नेत्रान्तपीतः
चित्ते शल्यं सविषमिव तन्मामके लग्नमस्ति ॥ ७२ ॥
को जानाति त्वदपहरणक्रूरमक्रूरमात्तं
कः प्रत्येति त्वमपि सहसा गोकुलं त्यक्ष्यसीति ।
त्यक्त्वा नायास्यसि पुनरिदं नाथ ! केनाद्य मेवं
मद्दैवान्यहह सुमहादुर्घटं साधयन्ति ॥ ७३ ॥
भूयस्त्वच्चेन्मिलसि महिलासम्प्रदायं विहाय
द्वाभ्यां दृग्भ्यां युगपदपि तद्रूपमादौ पिबीषे ।
आश्लिष्य त्वामहह ! तदनु स्पन्दसम्बन्धहीना
कल्पक्रूरामपि निमिषतां यामिनीं यापयिष्ये ॥ ७४ ॥
यात्राकाले कथमपि चलच्चन्द्रपत्नीकरान्त-
व्यस्तान्यस्तेन च सुरुचिरं रोचनाचित्रकेण ।
आशीर्दूर्वाक्षतचितमनुस्मर्यमाणं मुखं ते
सर्वक्लेशापहमपि जगन्नाथ ! मर्म छिनत्ति ॥ ७५ ॥

सौभाग्येन व्रजकुलवधूसार्थसीमन्तरत्नं
या कंसारेरतिगुणवती स्कन्धमप्यारुरोह ।
सेयं राधा किमिदमिति मामुद्दिशन्तोऽङ्गुलीभिः
लोकानन्न स्नपितनयनाः प्राश्विनो रोदयन्ति ॥ ६५ ॥
यो विद्यायां तपसि भवतो ज्येष्ठएवादिदेवो
मायम्मायाविभव भवता वञ्चितः सोऽपि दृष्टः ।
या त्वामम्बा शरणमविशद्दुःखकस्यापि तस्या-
स्त्वामुद्दामा कथय न कथं लोकलज्जा रुणद्धि ॥ ६६ ॥
आदावेव त्वत्प्रणयकारं कृष्ण कल्पान्तभोग्य-
क्लेशारम्भि त्वयि मम महत् पातकं प्रेम मन्ये ।
प्रायश्चित्तं भवति नच मे दुर्गताया विधेयं
तेनैव त्वामहमविरतं सानुतापा स्मरामि ॥ ६७ ॥
मातुर्नापि स्मरणमियता लङ्घितं लौकिकं ते
धर्माधीनो यदसि तदपि व्यक्तमेतावतैव ।
किन्तु ब्रूते तव रसिकतां निग्रहः कामिनीनां
को जानीते कितव! भवतः कुत्र तात्पर्यमस्ति ॥ ६८ ॥
तत्त्वज्ञानं कथय शतधा प्रेषय प्रेषलक्षं
चिन्तारत्नं वितर कुरु वा सानुतापप्रसङ्गान् ।
यावद्दोर्भ्यां तव नवघनश्यामलं धाम गाढं
नाश्लिष्यामि लुठति नहि मे तावदेवैष तापः ॥ ६९ ॥
लक्ष्मीकान्तं कतिचन चिदानन्दमन्ये विदुस्त्वां
मायाकारं कतिचिदपरे साधकाः सिद्धिमाहुः ।

Digitized by Google

वैदग्ध्यं ते किमिदमधुना तद्बहिर्वीथिकान्ते
वासोरासोल्लसवनट विभो दुर्लभो यत्समापि ॥ ५८ ॥
किं नो दृष्ट्या न किमशनिभिर्भूभृता वाहताः स्म
किं न प्लुष्टा दवहुतवहैर्दंशिताः किं न सर्पैः।
प्रेम प्रौढं किमपि जनयन् नव्यलीलांश मुञ्चन्
अस्मानेवं कथमपयशो घोरमङ्गीकरोषि ॥ ६० ॥
अस्मत्प्राणास्तवपदनखच्छायनीराजनाय
त्वं यातोऽभूः सपदि यदि ते यान्ति को वा विषादः।
एकं किन्तु व्यथयति मनश्छद्मना किङ्करीणां
प्राणान्निन्ये यदुपतिरिति त्वद्गता किं वदन्ती ॥ ६१ ॥
सङ्कोचो यस्तव गुरुजने यश्च पौराङ्गनासु
व्यक्तीभूतं तदुभयमभूत् कुब्जिकोपग्रहेण।
अस्मानेव क्षिपसि सहसा देव दूराद्वीयः
कर्तुं यः पारयति स कृती किं करोत्येवमेव ॥ ६२ ॥
एतस्मादप्यधिकमधिकं यत्तदस्मासु कुर्या
न स्वप्नेऽपि त्वयि विसदृशं चिन्तयत्येतदन्तः।
दन्ते कृत्वा तृणमिति महासभ्यमभ्यर्थयामि
स्वामिन्नेवं नहि मधुपुरीं क्षीणमध्यां विदध्याः ॥ ६३ ॥
द्रोणीरादौ मलयजयुताः शोचिताः सश्चिमुध्वं
वापीर्निम्नीकुरुत शतशो नालशैवालपूर्णाः।
सख्यं सख्यो यदि यदुपतौ याति तोयं तदेति
प्रेष्यो वश्यो मिलति यदि तन्माथुरीर्वैस्त्वयिष्ये ॥ ६४ ॥

Digitized by Google

स्वामी वामी भवति यदि तत्सन्निधौ सञ्चरिष्णुः
पथ्यं प्रत्याययति समयः सोऽयमीशानयानाम् ।
लोकद्विष्टं किमपि भवते कुर्वते युक्तवादी
साधुस्तस्मिन्न किमु मथुरामण्डले कश्चिदस्ति ॥ ५४ ॥
येनागत्य त्वमपि मथुरां यानमारोप्य नीतो
यत्राविष्टस्तव चरणयोश्चक्रचिह्ने लुलोठ ।
अस्माकं त्वद्गमनसमये सा दशा येन दृष्टा
सोऽपि स्वामिन् ! किमपि करुणाकातरो न ब्रवीति ॥ ५५ ॥
अस्मन्मर्मच्छिदुरमकरोत् कृत्यमत्युत्कटं यत्
कंसस्तेन त्रिभिरपि दिनैस्तत्फलं साधु लेभे ।
त्वामुत्थाप्य त्वरिततुरगं येन यानं वितेने
कोऽस्वत्तस्य प्रभुवर कुतः श्रूयत नाधुनापि ॥ ५६ ॥
श्यामं तेजः प्रकृतिविमलत्वेन संक्रान्तसर्वं
प्रत्यक्षञ्च व्यवधिबहुलं विश्वरूपप्रकाशि ।
आन्ध्यं जन्मावधि जनयताशेषलोकैकरत्नं
हा हा तेन त्वमपि मुषितं तारकं चक्षुषोर्नः ॥ ५७ ॥
सूक्ष्मं सूक्ष्मादपि च कलयन्नन्धवच्चेष्टते यो
नाभ्यं तस्मात्तिरयति रसैरश्विनीनन्दनोऽपि ।
विख्यातः स त्वमपि रचयन्नेवमङ्क व्यवस्थां
वक्रीकार्य्यः कथमिव वृथा किं परं दूषयामि ॥ ५८ ॥
तत्ते चित्तं शरणमपि नः सर्वतो भद्ररूपं
व्याहत्यास्मान् वसति बलवन्नागरीवृन्दमत्र ।

विक्रीतं ते युगपदुभयं स्वीकृतश्च त्वयायो
हृद्यस्फूर्जसि त्यजसि च वपुर्नाथ कोऽयं विचारः ॥ ४८ ॥
यत्राधर्मः प्रभवतितरां यत्र भूयाननर्थो
यत्राकामः सपरसुदयो यत्र नो नास्ति मोक्षः ।
त्यागे तस्मिन्नपि परिजने गोचरे यत् त्वमर्थी
तस्मादर्थी भवति विदुषां पौरुषव्यत्ययेऽपि ॥ ४९ ॥
शैलोद्धर्ता दमितभुजगः पीतदावाग्निचक्रो
भाग्यभागायुतबलगजाधीशमौजेन्द्रहन्ता ।
स त्वं दोषेऽप्यसति कुरुषे किङ्करीणामभद्रं
वक्तुं नास्ते जन इति न भोः कर्तुमेवं युनक्ति ॥ ५० ॥
लोकातीतं य इह कुरुते कर्म किं धर्मधारा
[illegible] ।
त्यक्ता सीता तदपि सुचिरं सैव हैमी प्रियाभूत्
त्यक्ता यस्मिन्नहमि तु वयं तत्र कुतारतोऽसि ॥ ५१ ॥
व्यावर्तध्वं स्वभवनमितः कुत्र रे यात मुग्धा
गच्छोरस्य स्मरतु स कथं वल्लभः कुब्जिकायाः ।
संभूय त्वच्चरणकमलस्पर्शलोभेन यान्ती-
रित्थं गोपीः पथि पथि बलाद्व्यगा मध्यरुन्धन् ॥ ५२ ॥
पीयूषात्मा तव कुलगुरुर्जन्मदातावदातो
माता यामुन्नियमपि जगत्पावनीति प्रसिद्धम् ।
एकैकान्ते जयति जगदानन्दि चित्रं चरित्रं
कस्मादेवं विरहदहने देव दासीर्जुहोषि ॥ ५३ ॥

Digitized by Google

साक्षाद्दीक्षां घटयति घनश्याम यत्ते कुतस्तत्
तल्लावण्यं कथय कृतिना केन चित्रेण लेख्यम् ।
अक्रूरस्यागमनदिवसान्निद्रया नाथ नष्टं
कुत्र स्वप्नः शिव शिव दृशौ वाष्पदुष्ट्यै परं नः ॥ ४३ ॥

दत्तस्वप्नो भवसि यदि मे दर्शनीयः कदाचिद्
वर्हापीडं मधुरमुरलीधाम तद्दाम दध्याः ।
अस्मादन्यद् यदि वितनुषे दीयते दिव्यमुग्रं
पादस्पर्शः पुरमृगदृशां दुर्लभस्तत्तव स्यात् ॥ ४४ ॥

मद्भावेन स्थिरमथ चरं भावयन्त्यो भवत्यः
सन्तुष्यन्तु त्वमिति बहुधा सत्यमस्मानवादीः ।
आख्यातव्यं किमिह भवतः किञ्चिदूनो नवासौ
नैवास्माकं मदयति मनो नाम नीलाम्बरोऽपि ॥ ४५ ॥

व्यक्तीभूतः स्वयमयमसि श्लाघनीयः समृद्ध्या
ऋज्वीषु त्वं कथमिह परीतोषमस्मासु यायाः ।
तत्तद्दन्धुप्रकरपुरतस्तत्र कापि त्रिवक्रा
धृत्वा यत्त्वामधिनिवसनं नाथ निर्व्रीचकार ॥ ४६ ॥

गव्यस्ते नः प्रथममुदभूर्वत्सपालश्च पश्चात्
तत्रेदानीं तदनु तदनु छिद्रनौकर्णधारः ।
लुण्ठाकोऽभूरथ कुलवधूजातिजीवार्थसार्थे
धिग्धातारं भवति निहितो येन भूचक्रभारः ॥ ४७ ॥

भक्तिप्रीतिप्रणयसहितं मानदम्भाद्यपेतं
चेतोऽस्माकं गुणवदगुणं गोदुहां देहमेतत् ।

Digitized by Google

औदासीन्यं किमपि सकला बन्धुवृन्दे वहन्त्यो
गोप्यो लीलाचितिषु भवतो योगिनीवत् भ्रमन्ति ॥३७॥
स्वार्थं नैतत् समुचिततया वच्मि कर्मातितीव्रं
सद्यं यस्मिन्नजनि समये नाथ ! यातः स कालः ।
अद्य त्वस्यस्त्रिभुवनवशीकारमाधुर्यधुर्यै
र्लब्धातुर्यैर्न भवति यथा लाञ्छनं तद्विदध्याः ॥ ३८ ॥
एकैकाभिर्विहितमसकृत् तत्तदेहानुगत्यं
यस्मै कस्मिन्नपि गणयति श्रीतमात्मानमन्यः ।
धिग्वैदग्ध्यं त्र तव तदिह ताः सिन्धुपारे विहाय
स्वैरी वैरी परमइव यन्निर्भरं निर्वृतोऽसि ॥ ३९ ॥
कूलक्रोडे तपनदुहितुः श्यानपङ्के निमग्नं
यत्नादुत्थापितमथ कृतोपस्क्रियं कोमलेन ।
न्यस्तं पीठे तव चरणयोश्चक्रचिह्नं पदं तत्
शालग्रामोपलमिव सदा मद्विधाः पूजयन्ति ॥ ४० ॥
युक्ता सर्वात्मनि मयि मनः सच्चिदानन्दरूपे
चेतस्तापं जहित न हितः कश्चिदेवाङ्गसङ्गः ।
इत्युद्देशान् कथयसि वृथा मादृशां बालिशानाम्
एते हि त्वद्विरहशिखिनः सन्निधिनीं भजन्ति ॥ ४१ ॥
वेशे वाम्यं तदपि मुदिरश्याम सावर्ण्यतस्ते
मुग्धा हस्ते मरकतमयी कङ्कणश्रेणिरीदृक् ।
अङ्गालेपो मृगमदरसैः स्निग्धनीलं दुकूलं
सर्वाङ्गीनं व्रजपुरजुषामङ्गनानामिदानीम् ॥ ४२ ॥

Digitized by Google

ये वै गोवर्द्धनधर ! तव स्निग्धगम्भीरघोषैः
केकावाचः स्तिमितनयनास्तेनिरे ताण्डवानि ।
अद्य प्रावृड्घनघनघटागर्जितेऽपि प्रवृत्ते
भुग्नग्रीवाः किमपि न हि ते पुच्छमुल्लासयन्ति ॥ २२ ॥

यस्य स्कन्धो मसृणसुरभिस्तावकैरङ्गसङ्गै-
र्यन्नास्माकं सिचयनिचयं चोरयन्नुत्थितोऽसि ।
यस्याधस्तात्तव चरणयोरब्जचिह्ना धरित्री
धन्यो नीपः समभवदसौ देव ! दोग्धुं द्रुमो नः ॥ २३ ॥

पाण्डुच्छायाः कुसुमरजसा भृङ्गमालाजटालाः
संवीताङ्गाः किसलयरुचा पाटलेनाम्बरेण ।
भोगाभावादपगतरुजः पावनाभ्यासभाजः
सर्वे वृन्दावनविटपिनो योगिचर्य्यां चरन्ति ॥ २४ ॥

शृङ्गस्वानप्रियसखसमाहूतिगोरक्षहिक्काः
प्रत्याख्याय व्रजपुरपथस्योपकण्ठे विभिष्य ।
स्वग्रोतद्वास्थाः सहसुरभयस्तोककृष्णादयस्ते
सायं प्रातर्नगरसरणौ चौरवत् सञ्चरन्ति ॥ २५ ॥

विस्मृत्य त्वन्मधुपुरगतिं वासरान्ते पुरान्तः
श्रीदामादौ विशति विशती हस्तहैयङ्गवीना ।
वत्स क्वासि क्व च मम सुतेत्युन्मदेव भ्रमन्ती
त्वामप्राप्य व्रजपतिवधूः क्रन्दयत्यश्मनोऽपि ॥ २६ ॥

वीतासङ्गाः शयनवसनस्नानपानाशनादौ
गायन्तस्त्वच्चरितगुणिताः सन्ततं गीतगाथाः ।

पर्वस्वन्तः किमपि विरजन्नामसामानुकारी
विच्छेदस्ते तमपि कृतवान् नन्दमस्पन्दमेव ॥ २६ ॥
दोग्धुः प्रायो न भवति गवां दोहनं चेन्न पाकः
क्षीराणां स्यात् स भवति यदा दुर्लभं तद्दधिलम् ।
दध्नः सिद्धौ क्व खलु मथनं मन्थने क्वोपयोग-
स्तक्रादीनामिति गतिरभूदत्र गोधुग्गृहेषु ॥ २७ ॥
तत्र क्षौणीखुरविलिखनं वप्रभङ्गो न शृङ्गै-
र्नैवास्पर्द्धी नवजलमुचां घोरहम्बानिनादः ।
कामोन्मादैरुदयति न वा सोपचर्या सपर्या
नामी वाहा मधुपुरपथादन्यदालोकयन्ति ॥ २८ ॥
वत्सालोकस्मरणसुलभप्रस्नवप्लावनीयं
धूलीजालं नयनसलिलैरध्वसु प्लावयन्त्यः ।
त्वामन्विष्य व्रजपुरसरित्तीरभूषु भ्रमन्त्यः
सद्योजातानपि सुरभयो नार्भकान् पाययन्ति ॥ २९ ॥
निःप्रेमाणो ललितयवसश्यामसीमन्यरण्ये
न्यस्य न्यस्य त्वदनुसृतये चक्षुषी दिक्षु दिक्षु ।
आजिघ्रन्ति व्यथितमनसः किञ्च सिञ्चन्ति बास्पैः
क्रीड़ानीपं तव यदुपते ! वत्सला वत्सतर्यः ॥ ३० ॥
भास्वत्कन्याकमलविपिनं कर्णिकाशेषमेतद्
वृन्दारण्यद्रुमकिशलयाः पाण्डुपत्री भवन्ति ।
ग्रस्तैः पङ्कैः पिहितमभितस्त्वद्विलासानुकूलं
मूलं धत्ते स तव कमलाकान्त केलीकदम्बः ॥ ३१ ॥

वाक्चातुर्य्यं त्वयि बत वृथा सन्ततान्तश्चरेण
ज्ञातं चैतच्चरितमखिलं मन्मथेन त्वया च ।
विभ्रमिमं तदपि मथुरानाथ ! नेयं विदग्धा
सन्तमादेवं वसि विदितं पीनरक्तं न दोषः ॥ २१ ॥
गोरक्षत्वं समजनि यदा तावदीमं तदैव
स्वच्छन्दत्वं तव तिरयितुं नाथ ! माभूम शक्ताः ।
वश्यः कस्य त्वमथ जगतामीशिता किन्तु वाचा-
माविस्कारैरदय ! हृदयग्रन्थिमुद्घाटयामि ॥ २२ ॥
किन्ते जन्मान्तरमुपगतं पारसञ्चारकाले
धौतं नद्याः किमिदमथवा कामधी माथुरीणाम् ।
विस्मर्तव्यं यदिह न तनौ यत्र बन्धः पयोर-
प्यत्र प्रम्नाथ चणकातपयनाथ ! ।नलपना।ऽास ॥ २३ ॥
कर्त्ता कृष्णो नियतमधुना गोकुलं राजधानी-
बन्धुभ्योऽपि प्रगुणमसुना गोदुहो माननीयाः ।
काचिद् गोपी भवति महिषीत्युक्तमग्रे नवा के-
स्त्वद्वैदग्धेन तु पिलवनप्रे तवत् कारिताः स्म ॥ २४ ॥
नीते नामन्यपि च भवतः प्रस्नुवाना स्तनाभ्यां
बिभ्रत्यङ्गं पुलकिनि भवद्वेणुवेत्रप्रतोदान् ।
सोरस्ताडं न वहतु तवाक्रन्दमम्बा कथं वा
यस्मादद्य प्रमुमितपरो राजराजेश्वरोऽसि ॥ २५ ॥
तैरुत्साहैः क्व खलु चलितं कुत्र ते नर्मवादाः
कण्ठो भग्नः करुणकरुणैस्तात कृष्णेति शब्दैः ।

एतद्बीजं किमपि बहुधा मद्विधा भावयन्त-
स्तस्यानन्त्यं किमपि न पुनः कल्यमालोकयन्ति ॥ १५ ॥
तेन प्राप्तौ सपदि जनकौ पोषकाभ्यां किमाभ्यां
किं गोरचैः सखिभिरधुना राजपुत्राः सखायः ।
तस्य द्वारे कति करटिनस्तर्णकाद्यैः क्व चिन्ता
हन्ताभीरीः स्मरतु स कथं संवृतो नागरीभिः ॥ १६ ॥
आस्तामेतन्मम किमनया कूटकल्यानुवृत्त्या
सारं फल्गु प्रियमथ परं पथ्यमन्याहृग्यं वा
धर्माधीनैरिति मम वचः पुण्डरीकाक्षसाक्षाद्
आख्यातव्यं यदनुकरणे कुत्रचिन्नैव दोषः ॥ १७ ॥
विख्यातोऽभूद्दिनकतिपयं नन्दसूनुर्यशोदा-
नन्दानन्दो व्रजजनपतिवल्लभो वल्लवीनाम् ।
अद्य ख्यातो मधुपुरपतिर्माधवीप्राणनाथः
सूनुः शौरेरगणितगुणो देवकीनन्दनोऽसि ॥ १८ ॥
गोपीष्वेष्विव तव समो भोगकालः कलानां
भर्तुः कर्तुर्निखिलनयनानन्द इन्दोरिवासीत् ।
तासां मध्ये तदपि रमणी रोहिणीव प्रसिद्धा
सा त्वां नत्वा रहसि परमाकिञ्चना किञ्चिदाह ॥१९ ॥
इत्यन्यत्यैरुपधिभिरपि स्निग्धसम्बोधनं ते
जायेतावन्तुदमुदयिनी रीतिरन्याद्य यद्वः ।
प्राक्संस्कारास्तदपि यदि मां तेऽनुबध्नन्ति दोषः
क्षन्तव्योऽयं भवतु भवता वाचिकप्रक्रियासु ॥ २० ॥

Digitized by Google

राधे! मन्युं परिहर हरिः पादमूले तवायं
जातं दैवादसदृशमिदं वारमेकं क्षमस्व।
एतानाकर्णयसि नयवन्! कुब्जकीरानुवादान्
एभिः क्रूरैर्वयमविरतं वञ्चिता वञ्चिताः स्म॥ १०॥
त्वञ्चेदस्मैरिह विमुखतामत्र बाले तमाले
प्राणान्मोक्ष्ये वनलतिकया कण्ठमुद्बध्य सद्यः।
आतङ्को वा क इह भवतां सेवकास्तस्य यूयं
यस्योद्देश्यं न खलु किमपि स्त्रीवधादन्यदस्ति॥ ११॥
पीतप्राणा प्रथममुना पूतना स्तन्यदात्री
दिष्टस्यान्तं कति न गमिता वेणुगीतेन गोप्यः।
तस्य प्रीत्या जगति विदितं यत् कृतं यत्नपत्या
स्वातन्त्र्येण प्रविशति मनस्तत्र तत् किं करोमि॥ १२॥
अश्रुस्निग्धं नयनयुगलं रूढरोमाञ्चराजि
प्रत्यङ्गं ते तदलमनया देव दुःशङ्कया नः।
एतद्दीनोद्धरणपटवे तुभ्यमभ्यर्थनीयं
मत्सन्दिष्टं मुदिर महसि प्रेयसि प्रापयेति॥ १३॥
नन्दो न त्वां त्यजति निमिषं नापि देवी यशोदा
श्रीदामाद्या अपि न शिशवो नापि पौराः सदाराः।
स त्वं लब्धो रहसि च मया केनचिन्नापि दृष्ट-
स्तन्निर्णीतं किमपि सुकृतं शिष्टमस्माकमस्ति॥ १४॥
द्वित्रानत्रावससि दिवसानास्पदं घोषभर्त्तु-
स्तेनाशङ्के पुरमिदमसि प्रेषितो माधवेन।

यद्वा तद्वा भवतु विधिना वञ्चितेयं वराकी
यत्ते विज्ञापयति निमिषं पातनीयोऽत्र कर्णः ॥ ४ ॥
नैषा योषित् प्रकृतिचपला पामरी कातरा च
ज्यायान् यातो यदुकुलपतेर्वल्लभत्वं क्व च स्वम्।
विस्रम्भो मे तदपि भवता भव्य! नोदासितव्यं
सानुक्रोशं वहति हि मनो दुर्गते दुर्जनोऽपि ॥ ५ ॥
त्वं कल्याणी ननु कुलवधूः सार्धमन्येन पुंसा
संलापस्ते सपदि समुदाचारसेतुं भिनत्ति।
जल्पन्नेवं नहि जहि घनश्यामदासोन्मदानां
लोकातीतं किमपि चरितं केन नालोकितं नः ॥ ६ ॥
अभ्रश्यामं स्मरसि न मनागित्यमुष्माभिषीणां
प्राणत्राणप्रवणमनसो गोदुहो गेहिनीनाम्।
एताः शश्वत्कुसुमशयने शाययित्वा सखीव
मन्दं मन्दं सरसनलिनीपल्लवैर्वीजयन्ति ॥ ७ ॥
सिंहव्याघ्रप्रभृतिभिरपि प्रेक्ष्यमाणाः प्रवाष्पै-
राक्रन्देषु प्रखरकुररीसंसदं शिक्षयन्त्यः।
एकाकिन्यस्तरुणतिमिरास्त्वत्पदस्पर्शपुण्ये
वृन्दारण्ये कति युवतयो यामिनीर्यापयन्ति ॥ ८ ॥
पश्यन्नक्षिद्वयमविरलस्यन्दमानाश्रुधारा
क्लिन्नाभोगं मम च किमभूर्लङ्घितो विस्मयेन।
गोगोपानां विरमतु कथा नेह भीरस्ति गत्वा
शारङ्गाणामपि वनभुवां पश्य कीदृक्क्षमङ्घि ॥ ९ ॥

यत्नो कृष्णपदाङ्कदूतरचनं विद्वन्मनोरञ्जनं
श्रीमच्छ्रीयुतरामजीवनमहाराजाधिराजाहृतः ॥ ४६ ॥

इति महामहोपाध्याय श्रीकृष्णसार्वभौम विरचितं
पदाङ्कदूतकाव्यं समाप्तम् ।

उद्धवदूतः ।

गोपीबन्धोरनवधिकृपादाढ्यदाक्षिण्यसिन्धो-
रादेशेन प्रणयपटुना प्रापितं गोकुलाय ।
गोधुग्वृन्दव्यसनविसरालोकदुःस्थं रहस्यं
मध्ये कृत्य प्रियसहचरीमुद्धवं काचिदूचे ॥ १ ॥
कस्त्वं साध्वी ! कुवलयदलश्यामविस्तीर्णदृष्टे !
दृष्टे सद्यो भवति भवति स्निग्धमत्यन्तमन्तः ।
किंवा प्रश्नैरहह ! मथुरानाथभुक्तं तदेतत्
यत्ते मौलौ कनककपिशं सौरभोद्गारि वासः ॥ २ ॥
तत् त्वं तस्य मधुपुरपतेर्लब्धलोभ्यप्रसाद-
स्तद्विश्रम्भस्थलमतिमहन्नेह सन्देहलेशः ।
वक्ष्यत्येतन्मम च किमिदं कथ्यते दृश्यते वा
जातं यस्मादखिलमधुना हन्त ! हास्यास्पदं नः ॥ ३ ॥
प्रस्थानं ते भवतु भगवन्नत्र वाप्यन्यतो वा
गम्भीरत्वं भजतु स भवानित्यमुत्तानतां वा ।

Digitized by Google

वक्तव्यं च स्फुटमिति यदा निर्जगत्यो मुकुन्दः
पद्याद्यद्वैरतिसुललितैरङ्कितं तत्पदाद्यैः ।
वृन्दारण्यं स्मरसि न कथं श्रीपते ! प्रत्युतुष्यं
प्रातं प्रातं यदिह न परीरम्भणं कुब्जिकायाः ॥ ४१ ॥
आकाङ्क्षाया व्यपयति मनो माद्दशां वासना सा
शाब्दे धर्मे सति न भविता हानिरेव क्रमाद्य !
साकाङ्क्षोक्त्या मुरहरपदे सर्वमेतद्विधेयं
नोचेत्तस्य प्रमितिजनने केन हेतुस्तवोक्तिः ॥ ४२ ॥
आगन्तव्यं सरसिजदृशा बोधितेन त्वयुक्त्या
नाप्रत्यक्षं प्रमितिकरणं वाक्यमेतन्न युक्तम् ।
स्वीकर्तव्यं नयनविरहापत्तिभीत्येति सर्वै-
र्मानाभावात् दृशि न हि भवेन्मानमव्यहितीयात् ॥४३ ॥
बौद्धस्यैतन्मतविटपिनो मूलमाच्छादितं स्यात्
युक्तिस्तस्मात्तवचनतो यन्मया पूर्वमुक्तम् ।
यद्यस्माकं सततमतनोः श्रायकत्वस्वदेहः
प्रामाण्ये स्यात् कुसुमविशिखोऽस्तीति वाक्ये न साक्षी ॥४४॥
मूर्खा एव क्षणिकमनिशं विश्वमाहुर्न धीराः
खेदोऽस्माकं हरिविरहजः सर्वदैवास्ति चित्ते ।
नान्यः शब्दो वचनमपि यत्ताद्दशं तस्य किन्तु
प्रेमैवास्मत्प्रियतमकृतं तच्च गोपाङ्गनासु ॥ ४५ ॥
शाके शायकवेदमोङ्शमिते श्रीकृष्णशर्मार्पयन्
आनन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि ।

Digitized by Google

वाणेनातः सततमतनुर्जातकोपाहितुल्यैः
क्रूरैरस्मान् दहति कुसुमैः शायकैः पञ्चसंख्यैः ॥ ३५ ॥
यल्लोकानामपकृतिभयात् कालकूटोऽपि पीत-
स्तानीवायं दहति गरलैस्तादृशैराचितेन।
वाणेनेति त्रिपुररिपुणा जातकोपेन दग्धो
नेत्रोत्थेन प्रबलशिखिना निर्दयं शम्बरारिः ॥ ३६ ॥
नैवं न्यूनः स गरजगरः शम्बरारेः शरस्य
ब्रह्मादीनामयमपि यतो धैर्य्यविध्वंसहेतुः।
एतद्वाक्यं गिरिशचरणैः खण्डितं मण्डिताद्यै-
रन्यासङ्गाद्व्यथितहृदयैर्निर्दयं दग्धकामैः ॥ ३७ ॥
उत्तापोऽयं मदनजनितो वर्द्धते नित्यमुच्चै-
र्वृन्दारण्ये वसतिरधुना केवलं दुःखहेतुः।
किञ्चास्माकं नयनसलिलैर्वर्द्धते चेन्नदीयं
केन स्थेयं द्रुतगतिजलैराचिते कुञ्जमध्ये ॥ ३८ ॥
यस्य ध्यानं जनयति सुखं यादृशं तादृशं न
स्वर्लोकादावपि किमपरं ब्रह्मसाक्षात्कृतौ च।
श्रेयस्त्वेतन्मुनिवरमुखाम्भोजतः कीदृशो ते
बुद्धिस्तादृग् जनकविधये दर्शने नास्ति यत्नः ॥ ३९ ॥
वक्तव्यं यन्मदनजनितं दुःखमस्माकमेतद्
भूयोभूयः प्रियतमपदे गोपयित्वा स्वदेहम्।
दृष्टे तेन त्वयि नयनयोर्निस्तुलप्रीतिहेतौ
यास्यत्येव क्षणमपि मनस्तत्कथायां न तस्य ॥ ४० ॥

क्षीणैवास्ते तरणितनया वस्तुतस्त्वद्वियोगे
कृष्णा वा पीता भवति वचनं कस्यचिन्नेति युक्तम् ।
गोपस्त्रीणां नयनसलिलैर्वर्धते सा त्रिवेणी
अन्ये नन्दव्रजयुवजना नूनमत्यर्थकं यत् ॥ २० ॥
सामग्री चेन्न फलविरहो व्याप्तिरस्तीति तत्त्वं
तत्त्वं गोपीनयनसलिले केवलेऽप्यस्ति नैवम् ।
उत्कण्ठायां हृदि न कुरुते कारणानां सहस्रं
लब्धं वापि क्षणमपि यतः पीवरत्वं जनानाम् ॥ २१ ॥
तस्मात्तस्या विरतिरथवा हेतुरग्राह्यमोऽस्या
न स्यादेव क्वचिदपि फलं कारणासन्निधाने ।
नष्टे हेतौ प्रभवति कुतः कार्यमित्यभ्युपेतं
यागेऽपूर्वादिव जनकताद्वारतस्तस्य सिद्धा ॥ २२ ॥
क्षेमोऽस्माकं भवतु भवनैर्मूर्च्छया चोपकार-
स्तस्मात् सर्वं किल विधिकृतं कारणं कारणं न ।
अम्भोजानामच्युतकिरणज्योतिषा म्लानिरवै-
रव्यज्योतिः किरणमिलनाज्जायते च प्रकाशः ॥ ॥ २३ ॥
स्त्रीभिः प्रेम प्रियतमकृतं नैव शक्यं विहातुं
प्राप्तेऽतस्त्वां किल मधुपुरीं चंक्रमाय क्रमात्तु ।
दग्धेनापि व्यथितहृदया पञ्चबाणेन बाणैः
क्रूरैरुच्चैर्मदनदमनी लज्जते रोदिति च ॥ २४ ॥
आस्ते चित्ते किल कलयितुं वासना शम्बरारे-
रेकैकेन व्रजकुलवधूनामशेषैकमन्तः ।

दूरस्थश्च ग्लपयति मनो निस्वनो यस्य तस्मा-
न्नैवप्रीतिप्रदमिति वचो न श्रुतं क्वापि केन ॥ २४ ॥
आस्ते चैवं नवजलधरो यं विलोक्य प्रमोदात्
नृत्यन्नुच्चैर्विषधरभुजो निस्वनोऽप्यस्य भीमः ।
मिथ्यैवायं यदवधि मया वीक्षितस्तावदेषोऽयं
कन्दर्पो मां तदवधि दृहत्येव बाणैरसह्यैः ॥ २५ ॥
क्षेमस्यान्ते चरणयुगलं चालयन् सूरजायां
यायाः किञ्च क्षणामपि तरोर्मूलमासाद्य तिष्ठेः ।
उत्कृष्ठं यज्जनयति पदं सेवकानां जनानां
पद्मयां हीनं तदिति जगतां प्रत्ययः कूर्मलोम ॥ २६ ॥
आरुह्यास्मत्हृदयमथवा गच्छ तुङ्गं तुरङ्गं
सौरं तेजः सजलजलदच्छाययया वारणीयम् ।
वृष्टिं नैव त्वदुपरि करिष्यत्ययं चण्डरश्मिः
खेदाशङ्की सरसिजसखस्त्वत्कृताम्भोरुहस्य ॥ २७ ॥
एतेन स्यान्मधुपुरगतिः केन मे पङ्किलोऽभूत्
पन्था नन्दव्रजकुलभुवां लोचनाम्भोभिरुच्चैः ।
नो वा शुष्को हरिविरहजोत्तापितोऽपीन्दुवक्त्रे
नित्योत्पत्तेर्नयनपयसां वाक्यमेतन्निरस्तम् ॥ २८ ॥
अङ्गैस्ताभिस्तरणितनया पीनतां नैव लब्धा
गोपीभर्तुर्विरहदहनैः प्रत्युत क्षीणतां च ।
नोचेदेवं सलिलतरसा गोकुले मास्तु किन्तु
प्रस्थानं ते किल मधुपुरे निर्विरोधं क्रमाद्ध !॥ २९ ॥

Digitized by Google

त्वत्तश्चेयं चिरपरिचिता जन्मभूमीति बुद्ध्या
मा खिद्यस्व त्रिभुवनजनत्राणहेतो! क्षमाङ्क!।
किं न त्याज्यं भवति महतां चेत् परस्योपकारो
वाराणस्या मुनिरपि गतो दक्षिणाशामगस्त्यः॥ १९॥
कर्पूराद्यैः सलिलमभवत् शैलेरन्नुतुल्यं
वात्यागम्यं नदति कठिनं कोकिलः षट्पदोऽपि।
वृन्दारण्ये किरति गरलं दुःसहं शीतरश्मि-
र्नैतद् वाच्यं सकृदपि सखे! सन्निधौ केशवस्य॥ २०॥
प्रस्थानं ते कुलिशकलनाङ्कितं पक्षिताये-
श्चित्तेऽस्माकं तदपि रमते याहि याहीति वाणी।
अप्रामाण्यं जनयति सदा नन्दसूनोर्वियोगो
व्याप्यज्ञानाद् व्रजकुलभुवां व्यापकस्यापि सिद्धौ॥ २१॥
उक्तप्रायं तरणितनयानागयोस्तत्कथायाम्
आस्ते को वा जगति भवतां भीतिहेतुः क्षमाङ्क!।
किञ्च स्वान्ते क्षणमपि भवत्सङ्गमे याति दूरं
भीतिर्मृत्योरपि किमशनिं लोकरीत्या दधासि॥ २२॥
येनारूढं विषधरशिरो भूरि वक्तव्यमन्यत्
किं वाकारि स्तनगिरिवरारोहणं च श्रुतश्च।
उत्पन्नस्य प्रियतमपदात् तेन भीतिस्तवास्ते
को वा ब्रूयादिति हि सदृशं कारणेनैव कार्यम्॥ २३॥
ज्ञातं ज्ञातं कुलिशसदृशं चिह्नमेतन्न वज्रं
नोचेदेवं जनयति कथं लोचनप्रीतिधाराम्।

Digitized by Google

मोदिष्ये च क्षणमपि हरे रामचन्द्राश्रितेन
ग्रामप्राप्ता सुरभिकुसुमामोदिते मञ्जुकुञ्जे ॥ १३ ॥
सम्पर्कात्ते तरणितनयातीरसोपानवृन्दं
रामः पश्चात्स्थलमपि तरोराचितं पद्मरागैः ।
शोभां यास्यत्यचिरमतुलां स्वीयकार्यानुरोधाद्
उच्चैरेतैर्मुहुरपि सखे ! तत्र न स्थेयमेव ॥ १४ ॥
ये वीक्षन्ते सततमधुना श्रीपतेरङ्घ्रिपद्मं
मञ्जीराद्यैः कनककलितैर्भूषणैर्भूषितञ्च ।
तेषां च त्वं किमु न भविता लोचनप्रीतिहेतु-
र्व्यक्तैरेतैः कुलिशकमलस्यन्दनाङ्कादिचिह्नैः ॥ १५ ॥
यस्यासङ्गादलभत तनुं मानुषीं गौतमस्त्री
ध्यानेनैव प्रथितमहिमा श्रीपतिं नारदादिः ।
तस्माज्जाते त्वयि मधुरिपोरङ्घ्रिपद्माद्विच्छिन्नः
किं दीनानामुपरि करुणालिङ्गितो दृष्टिपातः ॥ १६ ॥
एकं चिह्नं हरिपदभवं पन्नगस्योत्तमाङ्गे
तादृक् शोभामपि खगपतेर्निर्भयत्वं चकार ।
पिण्डेनान्यस्तरणिरभवद् घोरसंसारसिन्धौ
ध्यातं तादृक् त्वमपि महतां जन्म विश्वोपकृत्यै ॥ १७ ॥
उत्फुल्लानामतिसुरभयः सौरभैरम्बुजानाम्
अम्भोलेशैस्तरणिदुहितुः शीतलैः शीतलाश्च ।
अद्यावश्यं सततगतयः स्वैरमाधूतवर्हा
वर्तिष्यन्ते भवदभिमतप्रीतये लाञ्छनाय ॥ १८ ॥

Digitized by Google

तूर्णं तस्यां गमनमुचितं तेन मे तद्वियोग-
व्याधेः शान्तिस्तव च भविता तत्पुरीसर्वसौख्यम्।
दृष्ट्वा रम्यां भवतु सुकृतं भूरि तेनैव किं स्यात्
नाकाङ्क्षा किं भवति विपुलश्रीमतोऽर्थान्तरेषु ॥ ८ ॥
अक्रूरस्य व्रजकुलवधूप्राणपानोद्यतस्य
प्रीतिर्भूयो भवतु भवतो दर्शनात्तेन किं वा।
कार्यासिद्धिर्भवति यदहो मादृशां दुःखहेतु-
र्नैवोन्नत्यं सकलभुवनप्रार्थनीयं रिपूणाम् ॥ ९ ॥
सन्त्येवास्मत्कलुषकरिणः कोटिशो वारणीया-
स्तेऽप्यस्माभिः स्मृतिकरवरेणाङ्कुशं ते गृहीत्वा।
स्वच्छन्देन व्रज मधुपुरीं को भवेद्वा विरोधी
गोपीभर्तुर्विरहजलधिं गोपकन्यास्तरन्तु ॥ १० ॥
आस्ते नूनं यदुषु मथुरामण्डले चक्रपाणिः
कूजद्भृङ्गैरमलकमलैराकुले गोकुले वा।
तस्माद्गच्छेरतिलघुपुरीं तां च जन्मावनीवद्
बालक्रीडां रचयति मुहुर्यत्र तत्रानुरागः ॥ ११ ॥
आस्तां मध्ये तरणितनया भीषणा भूरिनक्र-
रावर्ताद्यैर्नयनभयदैस्तां तरिष्यस्यवश्यम्।
संसाराब्धिं तरति सहसा यत् क्षणं चिन्तयित्वा
तस्यासाध्यं भवति किमहो ! पारयानं तटिन्याः ॥ १२ ॥
दृष्ट्वैव त्वां विदितमधुना पूर्ववत् पद्मनाभं
प्राप्यावश्यं विरहजलधेः पारमासादयिष्ये।

Digitized by Google

तस्योपान्ते कुलिशकमलस्यन्दनाङ्कादियुक्तं
पद्माकारं मुरहरपदस्यास्य चिह्नं ददर्श ॥ २ ॥
तस्मिन्नुद्यन्नवजलधरध्वानमाकर्ण्य भूयः
कन्दर्पेण व्यथितहृदयोत्कण्ठतुल्या ययाचे ।
प्रज्ञाहीनं वचनरहितं निश्चलं श्रोत्रहीनं
दौत्यं कर्त्तुं मुरहरपदो लक्षणं पक्ष्मलाक्षी ॥ ३ ॥
रम्यं यावन् मुरहरपदे शोभते तावदेव
त्वय्यप्यास्ते कुलिशकमलस्यन्दनाङ्काङ्कुशादि ।
गोपीदौत्यप्रकटनभिया सन्निधौ चक्रपाणे-
र्याने धीरप्रमुख मुखरो नूपुरो नो गृहीतः ॥ ४ ॥
युक्तं चैतत् त्वयि मधुपुरीं प्रस्थिते पुण्यशीलाः
कीलालोत्थैः सुरभिकुसुमैरर्चयन्तोऽपि भक्त्या ।
पश्यन्तस्त्वां नयनसुभगं साश्रुधाराक्षियुग्मं
यास्यन्त्युच्चैः पुलकिततनु प्रेमधारामुदाराम् ॥ ५ ॥
चेतः प्रस्थापितमणुतया दौत्यकर्मोपयुक्तं
तत्रैवास्ते मुरहरपदस्पर्शमासाद्य मुग्धम् ।
आकाङ्क्षेयं तनुगुरुतया नैव गन्तुं समर्था
कोऽन्यो गच्छेदिह मधुपुरीं गोपिकानां हिताय ॥ ६ ॥
आगन्तव्यं झटिति मथुरामण्डलाद्गोपकान्ते
शान्तेति त्वं भव मधुरिपुः प्रस्थितः प्रोच्य चेदम् ।
वाक्यं तच्च श्रवणमभवत् तेन मेने क्षमाङ्के
प्रायः सत्यं मतमिदमहो कारणं कार्य्यमिव ॥ ७ ॥

चिरं कोऽपि श्रीमान् जयति विदितः साकरतया
धुरीणो धीराणामधिधरणि वैयासकिरिव ॥ १४१ ॥
रसानामाधारैरपरिचितदोषः सहृदयै-
र्मुरारातिक्रीडानिविडघटनारूपसहितः ।
प्रबन्धोऽयं बन्धोरखिलजगतां तस्य सरसां
प्रभोरन्तः सान्द्रां प्रमदलहरीं पल्लवयतु ॥ १४२ ॥

इति श्रीरूपगोस्वामिविरचितं हंसदूताख्यं काव्यं
समाप्तम् ।

पदाङ्कदूतः ।

गोपी भर्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी निःश्वसन्ती विशालम् ।
अत्रैवास्ते मुररिपुरिति भ्रान्तिदूतीसहाया
त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम ॥ १ ॥
अप्राप्यैव व्रजपतिसुतं तत्र कालं कियन्तं
मूर्च्छाप्रायप्रियतमसखीसङ्गता सङ्गमय्य ।

Digitized by Google

न रागं सर्व्वत्र क्वचिदपि विधत्ते नरपतिं
मुहुर्द्दृष्टि द्रोहं कलयति बलादिष्टविषये ।
चिरं ध्यानासक्ता निवसति सदासौ गतरति-
स्तथाप्यस्यां हंहो सदयहृदयस्त्वं न दयसे ॥ १२६ ॥
परिक्लेशं म्लेच्छान् समदमधुपालीमधुरया
निकृन्तन् नेत्रान्तप्रणयरचनाखड्गलतया ।
त्वमासन्नः कर्म्मिन्निह च तुरगोपाहितरुचिः
स्वदेशं कुर्व्वीथाः प्रतिमुदितधौराधिकमिदम् ॥ १२७ ॥
इति प्रेमोन्माद्स्वपुटितवचो भङ्गिरखिलं
त्वमावेद्य क्लिद्यन्मुखपरिसरो लोचनजलैः ।
ततो गोविन्दस्य प्रतिचरणमाध्वीकपदवीम्
उपासीनो दृग्भ्यां क्षणमवदधीथाः खगपते ॥ १२८ ॥
प्रणेतव्यो दृष्टेरनुभवपथं नन्दतनयो
विधेया गोपीनां स्मरपरिहृतानामुपकृतिः ।
इयं यामैर्गम्या चतुर मथुरापि त्रिचतुरै-
रिति द्वैधं नान्तः कलय कलहंसीकुलपते ! ॥ १२९ ॥
अपूर्व्वा यस्मात्त्वं विलसति मुदा सारसरुचि-
र्व्विवेक्तुं शक्नोतिं सपदि मिलिते येन पयसी ।
कथङ्कारं युक्तो भवतु भवतस्तस्य कृतिनो
विलम्बः कादम्बीरमण मथुरासङ्गमविधौ ॥ १४० ॥
प्रपन्नः प्रेमाणं भगवति सदा भागवतभाक्
पराचीनो जन्मावधिभवरसाद् भक्तिमधुरः ।

यतः सा सैरिन्ध्री मलयजरसप्रश्रयिणी
तया क्रोडीचक्रे परमरभसादाशु दयिता ॥ ११० ॥
चिरादन्तर्भूता नरहरिमयी मूर्त्तिरभित-
स्तदीयो व्यापारस्तव हि न यतो विस्मृतिपथम् ।
विनीतप्रह्लादस्त्वमिह परमक्रूरचरित-
प्रयुक्तो यद्भूयः परहृदयभेदं जनयसि ॥ १११ ॥
यदाम्नानं दर्पादगणितगुरुर्वामन मुदा
मनोवाञ्छे गाढं त्वयि बलितया कल्पितवती ।
प्रपेदे तस्येदं फलमुचितमेव प्रियसखी
विदूरे यत् क्षिप्ता व्यसनकुलपाशैर्निगडिता ॥ ११२ ॥
इदं नाथ क्रूरा भृगुपतनमाकाङ्क्षति ततो
मदस्यां काठिन्यं तव समुचितं तद् भृगुपतेः ।
इयं ते दुर्वोधाकृतिरथ भवद्विस्मृतिपथं
यतो यातः साक्षाद् गुरुरपि स नन्दीश्वरपतिः ॥ १२३ ॥
निरानन्दा गावश्चिरमुपहृता दूषणकुलैः
स्वरायन्ते सख्यो रघुतिलक गोवर्द्धनतटाः ।
विराधत्वं योषी व्रजति भवदीयप्रवसनाद्
इदानीं मारीचः स्फुटमिह नरीनर्त्ति पथितः ॥ १२४ ॥
प्रपन्नः कालोऽयं पुनरुदयितुं रासभजने-
र्विलासिन्यश्चापि स्फुटमनपराधा वयमपि ।
वितन्वानः कान्तिं वपुषि शरदाकाशवनितां
कथं न त्वं सीरध्वज भजसि वृन्दावनमिदम् ॥ १२५ ॥

Digitized by Google

नवीनस्त्वं कम्बो पशुपरमणीभिः परिचयं
न धत्से राधाया गुणगरिमगन्धेऽपि न कृती ।
तथापि त्वां याचे हृदयनिहितं दोहदमहं
वहन्ते हि क्लान्ते प्रणयमवदातप्रकृतयः ॥ १२५ ॥
गृहीत्वा गोविन्दं जलधिहृदयानन्दन सखे !
सुखेन श्रीवृन्दावनपरिसरे नन्दतु भवान् ।
कथं वा ते गोष्ठं भवतु दयितं हन्त बलवान्
यदेतस्मिन् वेणोर्जयति चिरसौभाग्यमहिमा ॥ १२६ ॥
इति प्रेमोद्गारप्रभवणमनुनीय क्रमवशात्
परीवारान् भ्रातर्निशमयति चानूरमथने ।
पुनः कोपोज्झितप्रणयचटुलं तस्य निकटे
कथामाचचीथा दशभिरवतारैर्विलसिताम् ॥ १२७ ॥
गृहीतुं त्वां प्रेमामिषपरिवृतं चित्तवडिशं
महामीनं क्षिप्रं न्यधित रसपुरे मम सखी
विवेकाख्यं छित्वा गुणमथ तदशासि भवता
हताशेयं किं वा शिव शिव ! विधातुं प्रभवति ॥ १२८ ॥
वराकीयं दृष्ट्वा सुभग ! वपुषो विभ्रमभरं
तवाभ्यर्णं भेजे परमकुतुकोल्लासितमतिः ।
तिरोधाय स्वाङ्गं प्रकटयसि यत्त्वं कठिनतां
तदेतत् किं न स्यात् तव कमठमूर्तेः समुचितम् ॥ १२९ ॥
सदा कंसाराते स्फुरति चिरमद्यापि भवतः
स्फुटं क्रीडाकारे वपुषि निविडप्रेमलहरी ।

Digitized by Google

चिरं कंसारातेरुरसि सहवासप्रणयिनीं
किमेनामेणाक्षीं गुणवति विसस्मार भवति ॥ ११९ ॥
इदं किं वा हन्त स्मरसि रसिके सम्भ्रमरुषा
परीताङ्गी गोवर्द्धनगिरिनितम्बे मम सखी।
भिया संभ्रान्ताक्षं यदिह विपक्षं त्वयि बलात्
गृहीत्वा विभ्रश्यन्नवशिखिशिखं गोकुलपतिम् ॥ १२० ॥
ततः सम्भाषेथाः श्रुतिमकरमुद्रामिति मुदा
भवत्यां कर्त्तव्यः किमिति कुशलप्रश्नजड़िमा।
रुचिस्मेरा या त्वं रचयसि वालाचुम्बनकलाम्
अपाङ्गेन स्पृष्टा सखि मुररिपोर्गण्डकुहरे ॥ १२१ ॥
निवासस्ते देवि श्रवणलतिकायामिति धिया
प्रयत्नात्त्वामेव प्रणयहृदया यामि शरणम्।
परोक्षं वृष्णीनां निभृतनिभृतं कर्णकुहरे
हरेः काकूमिश्रां कथय सखि! राधाविधुरताम् ॥१२२॥
परीरम्भं प्रेम्णा मम सांवनयं कौस्तुभमणे
नवाणः कुर्वीथाः पतगवर! विज्ञापनमिदम्।
अगाधा राधायामपि तव सखे! विस्मृतिरभूत्
कथं वा कल्याणं वहति तरले हि प्रणयिता ॥ १२३ ॥
मुहुः कूजत्काञ्चीमणिवलयमञ्जीरमुरली-
वरालम्बी भ्राम्यद्युवतिकलगीतैः सुरमणे।
स किं साक्षाद्भावी पुनरपि हरेस्ताण्डवरसै-
रमन्दः कालिन्दीपुलिनभुवि तौर्य्यत्रिकभरः ॥ १२४ ॥

Digitized by Google

अहो कष्टं बाल्यादहमिह सखीं दुष्टहृदया
मुहुर्मानग्रन्थिं सहजसरलां ग्राहितवती ।
तदारम्भाद् गोपीगणरतिगुरो निर्भरमसौ ।
न लेभे लब्धापि त्वदमलभुजस्तम्भरभसम् । ११४ ॥
अलिन्दे कालिन्दीकमलसुरभौ कुञ्जवसते-
र्वसन्तीं वासन्तीनवपरिमलोद्गारचिकुराम् ।
त्वदुत्सङ्गे लीनां मदकुलिताक्षीं पुनरिमां
कदाहं सेविष्ये किसलयकलापव्यजनिनी ॥ ११५ ॥
धृतानन्दां वृन्दावनपरिसरे शारदनिशा
विलासोल्लासेन श्लथितकबरीस्फुल्लकुसुमाम् ।
तव स्कन्धोपान्ते विनिहितभुजावल्लरिमहं
कदा कुञ्जे लीना रहसि विहसिष्यामि सुमुखीम् ॥११६।
विदूरादाहर्तुं कुसुममुपयामि त्वमधुना
पुरस्तीरे नीरे कलय तुलसीपल्लवमिदम् ।
इति व्याजादेनां विदितभवदीयस्थितिरहं
कदा कुञ्जे गोपीरमण गमयिष्यामि समये ॥ ११७ ॥
इति श्रीकंसारेः पदकमलयोर्गोकुलकथां
निवेद्य प्रत्येकं भज परिजनेषु प्रणयिताम् ।
निजाङ्के कादम्बीसहचर वहन्मण्डनतया
स यात्युच्चैः प्रेमप्रवणमनुजग्राह भगवान् ॥ ११८ ॥
मिलन्तीं हंसीरमण ! वनमालां प्रथमतो
मुदा चेमं पृच्छन्निदमुपहरेथा मम वचः ।

Digitized by Google

द्विधीर्षन्त्यां हर्षोत्तरलनयनान्तः स कुतुकी
न वंशीमग्रासीद्भुवि करसरोजाद्विगलिताम् ॥ १०८ ॥
अयन्तां गन्तव्ये कलितनववेलाच्छलतया
लतालीभिः पुष्पस्मितशबलिताभिर्विरुधतीम्।
परीहासारम्भी प्रियसखि समालम्बितसुखीम्
प्रपेदे चुम्बाय स्फुरदधरबिम्बस्तव सखा ॥ १०९ ॥
ततोऽहं धम्मिल्ले स्थगितमुरलीका सखि यने-
रलीकामर्षेण भ्रमदविरलभ्रूरुदचलम्।
कचाकृष्टिक्रीडाक्रमपरिचिते चौर्य्यचरिते
हरिर्लब्धोपाधिः प्रसभमनयत्त्वां गिरिदरीम् ॥ ११० ॥
कदाचिद्दासन्तीकुहरभुवि दृष्टः सरभसम्
हसन् पृष्ठालम्बी स्थगयति कराभ्यां मम दृशौ।
द्विधीर्षां जातेर्ष्ये मयि सखि तदीयाङ्गुलिशिखाम्
न जाने कुत्रायं व्रजति कितवानां कुलगुरुः ॥ १११ ॥
अतीतेयं वार्ता विरमतु पुरः पश्य सरले
वयस्यस्ते सोऽयं स्मितमधुरिमोन्मृष्टवदनः।
भुजस्तम्भोल्लासादभिमतपरीरम्भरभसः
स्मरक्रीडासिन्धुः क्षिपति मयि बन्धूककुसुमम् ॥ ११२ ॥
तदुत्तिष्ठ व्रीडावति निबिडमुक्तालतिकया
बधानैनं धूर्त्तं सखि मधुपुरीं याति न यथा।
इति प्रेमोन्मीलन्नवदनुभवारूढजडिमा
सखीनामाक्रन्दं न किल कतिधः कन्दलयति ॥ ११३ ॥

Digitized by Google

रणद्भृङ्गश्रेणीसुहृदि शरदारम्भमधुरे
वनान्ते चान्द्रीभिः किरणलहरीभिर्धवलिते ।
कदा प्रेमोद्दण्डस्मरकलहवैतण्डिकमहं
करिष्ये गोविन्दं निविडभुजबन्धप्रणयिनम् ॥ १०३ ॥
मनो मे हा कष्टं ज्वलति किमहं हन्त करवै
न पारं नावारं किमपि कलयाम्यस्य जलधेः ।
इयं वन्दे मूर्ध्ना सपदि तमुपायं कथय मे
परामृश्ये यस्माद्धृतिकलिकयापि क्षणिकया ॥ १०४ ॥
प्रयातो मां हित्वा यदि विबुधचूडामणिरसौ
प्रयातु स्वच्छन्दं मम समयधर्मः किल गतिः ।
इदं सोढुं का वा प्रभवति यतः स्वप्नकपटाद्
इहायातो वृन्दावनभुवि बलान्मां रमयति ॥ १०५ ॥
मनोचित्तं तस्य व्यथयति मनो हन्त मथुरां
त्वमासाद्य स्वैरं चपलहृदयं धावय हरिम् ।
सखि ! स्वप्नारम्भे पुनरपि यथा विभ्रममदाद्
इहायातो धूर्तः क्षपयति न मे किञ्चिनिगुणम् ॥ १०६ ॥
अयि स्वप्नो दूरे निवसतु समक्षं शृणु हठाद्
अविश्वस्ता मा भूरिह सखि मनोविभ्रमधिया ।
वयस्यस्ते गोवर्द्धनविपिनमासाद्य कुतुकाद्
अकाण्डे यद्भूयः स्मरकलहपाण्डित्यमकरोत् ॥ १०७ ॥
अमर्षाद्यावन्तीं गहनकुहरे सूचितपथां
तुलाकोटिक्वाणैस्त्वकितपदपातद्विगुणितैः ।

कदाचित् कल्याणी विलपति यदुत्कण्ठितमति-
स्तदाख्यामि स्वामिन्! गमय मकरोत्तंससविधम् ॥९७॥

अभूत् कोऽपि प्रेमा मयि मुररिपोर्यः सखि पुरा
परार्द्धं धर्मापेक्षामपि तदवलम्बादलघयन्।
तथेदानीं हा धिक्! समजनि तटस्थः स्फुटमहं
भजे लज्जां येन क्षणमिह पुनर्जीवितुमपि ॥ ९८ ॥

अमी कुञ्जाः पूर्वं मम न दधिरे कामपि मुदं
द्रुमालीयं चेतः सखि न कतिशो नन्दितवती।
इदानीं पश्यैते युगपदुपतापं विदधते
प्रभौ मुक्तापेक्षे भजति न हि को वा विमुखताम् ॥९९॥

गरीयान् मे प्रेमा त्वयि परमितिस्नेहलघुता
न जीविष्यामीति प्रणयगरिमाख्यापनविधिः।
कथं नायासीति स्मरणपरिपाटीप्रकटनं
हरौ सन्देशाय प्रियसखि! न मे वागवसरः ॥ १०० ॥

ययौ कालः कल्यान्यवकलितकेलीपरिमलां
विलासार्थी यस्मिन् न चलकुहरे लीनवपुषीम्।
स मां धृत्वा धूर्तः क्षतकपटरोषां सखि हठाद्-
अकार्षीदाकर्षन्नुरसि शशिलेखाशतलताम् ॥ १०१ ॥

कदा प्रेमोन्मीलन्-मदनमदिराक्षी समुदयं
बलादाकर्षन्तं मधुरमुरलीकाकलिकया।
मुहुर्भ्रंस्यच्चिल्ली चुलुकितकुलस्त्री व्रतमहं
विलोकिष्ये लीलामदमिलदपाङ्गी मुरभिदम् ॥ १०२ ॥

Digitized by Google

गुरोरन्तेवासी स भजति यदूनां सचिवतां
सखी कालिन्दीयं किल भवति कालस्य भगिनी ।
भवेदन्यः को वा नरपतिपुरे मत्परिचितो
दशामस्याः शंसन् यदुतिलक ! यस्त्वामनुनयेत् ॥ ८२ ॥
विशीर्णाङ्गीमन्तर्व्रणविलुठनादुत्कलिकया
परीतां भूयस्या सततमपरागव्यतिकराम् ।
परिध्वस्तामोदां विरमितसमस्तालिकुतुकां
विधो पादस्पर्शादपि सुखय राधाकुमुदिनीम् ॥ ८३ ॥
विपत्तिभ्यः प्राणान् कथमपि भवत्सङ्गमसुख-
स्पृहाधीना शौरे मम सहचरी रक्षितवती ।
अतिक्रान्ते सम्प्रत्यवधिदिवसे जीवनविधौ
हताशा निःशङ्कं वितरति दृशौ चूतमुकुले ॥ ८४ ॥
प्रतीकारारम्भश्लथमतिभिरुद्यत्परिणतै-
र्विमुक्तायां व्यक्तस्मरकदनभाजः परिजनैः ।
अमुञ्चन्ती सङ्गं कुवलयदृशः केवलमसौ
बलादद्य प्राणानवति भवदाशासहचरी ॥ ८५ ॥
अये रासक्रीडारसिक ! मम सख्यां नवनवा
पुरा बद्धा येन प्रणयलहरी हन्त गहना ।
स चेन्मुक्तापेक्षस्त्वमसि धिगिमां तूलशकलं
यदेतस्या नासानिहितमिदमद्यापि चलति ॥ ८६ ॥
मुकुन्द भ्रान्ताक्षी किमपि यदसङ्कल्पितशतं
विधत्ते तद्वक्तुं जगति मनुजः कः प्रभवति ।

यदेषा कंसारे भिदुरहृदयं त्वामवयती
सतीनां मूर्द्धन्या भिदुरहृदयाऽभूदनुदिनम् ॥ ८६ ॥
समक्षं सर्व्वेषां निवससि समाधिप्रणयिनाम्
इति श्रुत्वा नूनं गुरुतरसमाधिं कलयति ।
सदा कंसाराते भजसि यमिनां नेत्रपदवीम्
इति व्यक्तं सङ्गीभवति यममालम्बितुमपि ॥ ८७ ॥
मुरारे ! कालिन्दीसलिलचलदिन्दीवररुचे !
मुकुन्द ! श्रीवृन्दावनमदनवृन्दारकमणे ! ।
व्रजानन्दिनन्दीश्वरदयितनन्दात्मजहरे !
सदेति क्रन्दन्ती परिजनशुचं कन्दलयति ॥ ८८ ॥
समन्तादुत्तप्तस्तव विरहदावाग्निशिखया
कृतोद्वेगः पञ्चाशुगमृगयुवेधव्यतिकरैः
तनूभूतं सद्यस्तनुवनमिदं हास्यति हरे
हठादद्य श्वो वा मम सहचरी प्राणहरिणः ॥ ८९ ॥
पयोराशिस्फीतत्विषि हिमकरोत्तंसमधुरे
दधाने दृग्भङ्ग्या स्मरविजयिरूपं मम सखी ।
हरे दत्तस्वान्ता भवति तदिमां किं प्रभवति
स्मरो हन्तुं किन्तु व्यथयति भवानेव कुतुकी ॥ ९० ॥
विजानीषे भावं पशुप-रमणीनां यदुपते !
न जानीमः कस्मात् तदपि बत मायां रचयसि ।
समन्तादध्यात्मं यदिह पवनव्याधिरलपद्-
बलादस्यास्तेन व्यसनकुलमेव द्विगुणितम् ॥ ९१ ॥

नवीनेयं सम्प्रत्यकुशलपरीपाकलहरी
नरीनर्त्ति स्वैरं मम सहचरीचित्तकुहरे ।
जगन्नेत्रश्रेणी-मधुरमधुरायां निवसत-
श्चिरादार्त्ता वार्त्तामपि तव यदेषा न लभते ॥ ८१ ॥
जनान् सिद्धादेशान् नमति भजते मान्त्रिकगणान्
विधत्ते शुश्रूषामधिकविनये नौषधिविदाम् ।
त्वदीच्छादीक्षायै परिचरति भक्त्या गिरिसुतां
मनीषा हि व्यग्रा किमपि सुखहेतुं न मनुते ॥ ८२ ॥
पशूनां पातारं भुजगरिपुपत्रप्रणयिनं
स्मरोद्दामक्रीडं निविडघनसारद्युतिहरम् ।
सदाभ्यर्णं नन्दीश्वरगिरिभुवो रङ्गरसिकं
भवन्तं कंसारे भजति भवदाशैव मम सखी ॥ ८३ ॥
भवन्तं सन्तप्ता विदलिततमालाङ्कुररसै-
र्विलिख्य भ्रूभङ्गीकृतमदनकोदण्डकदनम् ।
निधास्यन्ती कण्ठे तव निजभुजावल्लरिमसौ
धरण्यामुन्मीलज्जडिमनिविडाङ्गी विलुठति ॥ ८४ ॥
कदाचिन्-मूढेयं निविडभवदीयस्मृतिमदा-
दमन्दादात्मानं कलयति भवन्तं मम सखी ।
तथास्या राधाया विरहदहनाकल्पितधियो
मुरारे ! दुःसाधा क्षणमपि न राधा विरमति ॥ ८५ ॥
त्वया सन्तापानामुपरि परिमुक्तापि रभसा-
दिदानीमापेदे तदपि तव चेष्टां प्रियसखी ।

यदद्य त्वं वृन्दावनकुसुमपालीपरिमलै-
र्दुरालोकं शोकास्पदमथ कथं नेष्यति सखी ॥ ७५ ॥

तरङ्गैः कुर्वाणा शमनभगिनीलाघवमसौ
नदीं काश्चिन्नोष्ठे नयनजलपूरैरजनयत्।
इतीवास्याद्दैषादभिमतदशाप्रार्थनमयीं
मुरारे विज्ञप्तिं निशमयति मानो न शमनः ॥ ७६ ॥

कृताकृष्टिक्रीडं किमपि तव रूपं मम सखी
सकृद्दृष्ट्वा दूरादहितहितबोधोज्झितमतिः।
हताशेयं प्रेमानलमनुविशन्ती सरभसं
पतङ्गीवात्मानं मुरहर! मुहुर्दाहितवती ॥ ७७ ॥

मया वाच्यः किं वा त्वमिह निजदोषात् परमसौ
ययौ मन्दा वृन्दावनकुमुदबन्धो विधुरताम्।
यदर्थं दुःखाग्निर्दहति न तमथापि हृदयात्
न यस्माद्दुर्मेधा लवमपि भवन्तं द्रवयति ॥ ७८ ॥

त्रिवक्राहो धन्या हृदयमिव ते स्वं वपुरियं
समासाद्य स्वैरं यदिह विलसन्ती निवसति।
ध्रुवं पुण्यभ्रंशादजनि सरलेयं मम सखी
प्रवेशस्तत्रासीत् क्षणमपि यदस्या न सुलभः ॥ ७९ ॥

किमाविष्टा भूतैः सपदि यदि वा क्रूरफणिना
क्षतापस्मारेण च्युतमतिरकस्मात् किमपतत्।
इति व्यग्रैरस्यां गुरुभिरभितो वेणुनिनद-
श्रवाद्विभ्रष्टायां मुरहर विकल्पा विदधिरे ॥ ८० ॥

Digitized by Google

त्वया नागन्तव्यं कथमिह हरे ! गोष्ठमधुना
लताश्रेणी वृन्दावनभुवि यतोऽभूद्विषमयी ।
प्रसूनानां गन्धं कथमितरथा वातनिहितं
भजन् सद्यो मूर्च्छां वहति निवहो गोपसुदृशाम् ॥ ७० ॥
कथं सङ्गोऽस्माभिः सह समुचितः सम्प्रति हरे !
वयं ग्राम्या नार्य्यस्त्वमसि नृपकन्यार्चितपदः ।
गतः कालो यस्मिन् पशुपरमणीसङ्गमकृते
भवान् व्यग्रस्तस्थौ तमसि गृहवाटीविटपिनः ॥ ७१ ॥
वयं त्यक्ताः स्वामिन् ! यदिह तव किं दूषणमिदं
निसर्गः श्यामानामयमतितरां दुष्परिहरः ।
कुहूकण्ठैरण्डावधिसहनिवासात् परिचिता
विसृज्यन्ते सद्यः कलितनवपक्षैर्वलिभुजः ॥ ७२ ॥
अयं पूर्वो रङ्गः किल विरचितो यस्य तरसा
रसादाख्यातव्यं परिकलय तन्नाटकमिदम् ।
मया प्रष्टव्योऽसि प्रथममिति वृन्दावनपते !
किमाहो राधेति स्मरसि कृपणं कर्णयुगलम् ॥ ७३ ॥
अये कुञ्जद्रोणीकुहरगृहमेधिन् ! किमधुना
परोक्षं वक्ष्यन्ते पशुपरमणीदुर्नियतयः ।
प्रवीणा गोपीनां तव चरणपद्मेऽर्पितमना
ययौ राधा साधारणसमुचितप्रश्नपदवीम् ॥ ७४ ॥
त्वया गोष्ठं गोष्ठीतिलक ! किल चेद्विस्मृतमिदं
न तूर्णं भूमीर्णापतिरपि विधत्ते यदि कृपाम् ।

अहह्व न्दं वृन्दावनकुसुमपालीपरिमलै-
र्दुरालोकं शोकास्पदमथ कथं नेष्यति सखी ॥ ७५ ॥
तरङ्गैः कुर्वाणा श्रमनभगिनीलाघवमसौ
नदीं काञ्चिन्नेष्ठे नयनजलपूरैरजनयत्।
इतीवास्याद्दैषादभिमतदशाप्रार्थनमयीं
मुरारे विज्ञप्तिं निशमयति मानी न शमनः ॥ ७६ ॥
क्षताकृष्टिक्रीडं किमपि तव रूपं मम सखी
सकृद्दृष्टा दूराद्हितहितबोधोज्झितमतिः।
हुताशेयं प्रेमानलमनुविशन्ती सरभसं
पतङ्गीवात्मानं मुरहर! मुहुर्दाहितवती ॥ ७७ ॥
मया वाच्यः किं वा त्वमिह निजदोषात् परमसौ
ययौ मन्दा वृन्दावनकुमुदबन्धो विधुरताम्।
यदर्थं दुःखाग्निर्दहति न तमद्यापि हृदयात्
न यस्माद्दुर्मेधा लवमपि भवन्तं द्रवयति ॥ ७८ ॥
त्रिवक्राहो धन्या हृदयमिव ते स्वं वपुरियं
समासाद्य स्वैरं यदिह विलसन्ती निवसति।
ध्रुवं पुण्यभ्रंशादजनि सरलेयं मम सखी
प्रवेशस्तत्रासीत् क्षणमपि यदस्या न सुलभः ॥ ७९ ॥
किमाविष्टा भूतैः सपदि यदि वा क्रूरफणिना
क्षतापस्मारेण च्युतमतिरकस्मात् किमपतत्।
इति व्यग्रैरस्यां गुरुभिरभितो वेणुनिनद-
श्रवाद्विभ्रष्टायां मुरहर विकल्पा विदधिरे ॥ ८० ॥

त्वया नागन्तव्यं कथमिह हरे ! गोष्ठमधुना
लताश्रेणी वृन्दावनभुवि यतोऽभूद्विषमयी ।
प्रसूनानां गन्धं कथमितरथा वातनिहितं
भजन् सद्यो मूर्च्छां वहति निवहो गोपसुदृशाम् ॥ ७० ॥

कथं सङ्गोऽस्माभिः सह समुचितः सम्प्रति हरे !
वयं ग्राम्या नार्य्यस्त्वमसि नृपकन्यार्चितपदः ।
गतः कालो यस्मिन् पशुपरमणीसङ्गमकृते
भवान् व्यग्रस्तस्थौ तमसि गृहवाटीविटपिनः ॥ ७१ ॥

वयं त्यक्ताः स्वामिन् ! यदिह तव किं दूषणमिदं
निसर्गः श्यामानामयमतितरां दुष्परिहरः ।
कुहूकण्ठैरण्डावधिसहनिवासात् परिचिता
विमुज्यन्ते सद्यः कलितनवपक्षैर्वलिभुजः ॥ ७२ ॥

अयं पूर्वो रङ्गः किल विरचितो यस्य तरसा
रसादाख्यातव्यं परिकलय तन्नाटकमिदम् ।
मया प्रष्टव्योऽसि प्रथममिति वृन्दावनपते !
किमाहो राधेति स्मरसि कृपणं कर्णयुगलम् ॥ ७३ ॥

अये कुञ्जद्रोणीकुहरगृहमेधिन् ! किमधुना
परोक्षं वक्ष्यन्ते पशुपरमणीदुर्नियतयः ।
प्रवीणा गोपीनां तव चरणपद्मेऽर्पितमना
ययौ राधा साधारणसमुचितप्रश्नपदवीम् ॥ ७४ ॥

त्वया गोष्ठं गोष्ठीतिलक ! किल चेद्विस्मृतमिदं
न तूर्णं धूमोर्णापतिरपि विधत्ते यदि कृपाम् ।

Digitized by Google

द्विधीर्ष्यन्मां हर्षोत्तरलनयनान्तः स कुतुकी
न वंशीमध्यासीद्भुवि करसरोजाद्विगलिताम् ॥ १०८ ॥
अशक्तां गन्तव्ये कलितनवचेलाञ्चलतया
लतालीभिः पुष्पस्मितशबलिताभिर्विरुधतीम्।
परीहासारम्भी प्रियसखि समालम्बितमुखीम्
प्रपेदे चुम्बाय स्फुरदधरबिम्बस्तव सखा ॥ १०९ ॥
ततोऽहं धम्मिल्ले स्थगितमुरलीका सखि शनै-
रलीकामर्षेण भ्रमदविरलभ्रूरुदचलम्।
कचाकृष्टिक्रीड़ाक्रमपरिचिते चौर्य्यचरिते
हरिर्लब्धोपाधिः प्रसभमनयन्मां गिरिदरीम् ॥ ११० ॥
कदाचिद्वासन्ती कुहरभुवि हृष्टः सरभसम्
हसन् पृष्ठालम्बी स्थगयति कराभ्यां मम दृशौ।
द्विधीर्षां जातेर्ष्ये मयि सखि तदीयाङ्गुलिमिषाम्
न जाने कुत्रायं व्रजति कितवानां कुलगुरुः ॥ १११ ॥
अतीतेयं वार्त्ता विरमतु पुरः पश्य सरले
वयस्यस्ते सोऽयं स्मितमधुरिमोन्मृष्टवदनः।
भुजस्तम्भोल्लासादभिमतपरीरम्भरभसः
स्मरक्रीड़ासिन्धुः क्षिपति मयि बन्धूककुसुमम् ॥ ११२ ॥
तदुत्तिष्ठ व्रीड़ावति निबिड़मुक्तालतिकया
बधानैनं धूर्त्तं सखि मधुपुरीं याति न यथा।
इति प्रेमोन्मीलन्नवदशुभवारूढ़जड़िमा
सखीनामाक्रन्दं न किल कतिशः कन्दलयति ॥ ११३ ॥

Digitized by Google

रथाङ्गश्रेणीसुहृदि शरदारम्भमधुरे
वनान्ते चान्द्रीभिः किरणलहरीभिर्धवलिते ।
कदा प्रेमोद्दण्डस्मरकलहवैतण्डिकमहं
करिष्ये गोविन्दं निविड़भुजबन्धप्रणयिनम् ॥ १०३ ॥

मनो मे हा कष्टं ज्वलति किमहं हन्त करवै
न पारं नावारं किमपि कलयाम्यस्य जलधेः ।
इयं वन्दे मूर्ध्ना सपदि तमुपायं कथय मे
परामृश्ये यस्माद्धृतिकलिकयापि क्षणिकया ॥ १०४ ॥

प्रयातो मां हित्वा यदि विबुधचूड़ामणिरसौ
प्रयातु स्वच्छन्दं मम समयधर्मः किल गतिः ।
इदं सोढुं का वा प्रभवति यतः स्वप्नकपटाद्
इहायातो वृन्दावनभुवि बलान्मां रमयति ॥ १०५ ॥

अनोचित्तं तस्य व्यथयति मनो हन्त मथुरां
त्वमासाद्य स्वैरं चपलहृदयं धावय हरिम् ।
सखि ! स्वप्नारम्भे पुनरपि यथा विभ्रममदाद्
इहायातो धूर्तः क्षपयति न मे किञ्चिनिगुणम् ॥ १०६ ॥

अयि स्वप्नो दूरे निवसतु समक्षं शृणु हठाद्
अविश्वस्ता मा भूरिह सखि मनोविभ्रमधिया ।
वयस्यस्ते गोवर्धनविपिनमासाद्य कुतुकाद्
अकाण्डे यद्भूयः स्मरकलहपाण्डित्यमकरोत् ॥ १०७ ॥

अमर्षाद्धावन्तीं गहनकुहरे सूचितपथां
तुलाकोटिक्वाणैश्चकितपदपातद्विगुणितैः ।

कदाचित् कल्याणी विलपति यदुत्कण्ठितमति-
स्तदाख्यामि स्वामिन्! गमय मकरोत्तंसस्रविधम् ॥९७॥

अभूत् कोऽपि प्रेमा मयि मुररिपोर्यः सखि पुरा
पराद्धं धर्मापेक्षामपि तदवलम्बादलवयन्।
तथेदानीं हा धिक्! समजनि तटस्थः स्फुटमहं
भजे लज्जां येन क्षणमिह पुनर्जीवितुमपि ॥ ९८ ॥

अमी कुञ्जाः पूर्वं मम न दधिरे काममपि मुदं
द्रुमालीयं चेतः सखि न कतिशो नन्दितवती।
इदानीं पश्यैते युगपदुपतापं विदधते
प्रभौ मुक्तापेक्षे भजति न हि को वा विमुखताम् ॥९९॥

गरीयान् मे प्रेमा त्वयि परमितिस्नेहलघुता
न जीविष्यामीति प्रणयगरिमाख्यापनविधिः।
कथं नायासीति स्मरणपरिपाटीप्रकटनं
हरौ सन्देशाय प्रियसखि! न मे वागवसरः ॥ १०० ॥

ययौ कालः कल्यान्यवकलितकेलीपरिमलां
विलासार्थी यस्मिन् न चलकुहरे लीनवपुषीम्।
स मां धृत्वा धूर्तः कृतकपटरोषां सखि हठाद्-
अकार्षीदाकर्षन्नुरसि शशिलेखाग्रतप्तताम् ॥ १०१ ॥

कदा प्रेमोन्मीलन्-मदनमदिराक्षी समुदयं
बलादाकर्षन्तं मधुरमुरलीकाकलिकया।
मुहुर्भ्रंश्यन्नीवी चुलुकितकुलस्त्री व्रतमहं
विलोकिष्ये लीलामदमिलदपाङ्गी मुरभिदम् ॥ १०२ ॥

Digitized by Google

गुरोरन्तेवासी स भजति यदूनां सचिवतां
सखी कालिन्दीयं किल भवति कालस्य भगिनी ।
भवेदन्यः को वा नरपतिपुरे मत्परिचितो
दशामस्याः शंसन् यदुतिलक ! यस्त्वामनुनयेत् ॥ ८२ ॥
विशीर्णाङ्गीमन्तर्व्रणविलुठनादुत्कलिकया
परीतां भूयस्या सततमपरागव्यतिकराम् ।
परिध्वस्तामोदां विरमितसमस्तालिकुतुकां
विधो पादस्पर्शादपि सुखय राधाकुमुदिनीम् ॥ ८३ ॥
विपत्तिभ्यः प्राणान् कथमपि भवत्सङ्गमसुख-
स्पृहाधीना शौरे मम सहचरी रक्षितवती ।
अतिक्रान्ते सम्प्रत्यवधिदिवसे जीवनविधौ
हताशा निःशङ्कं वितरति दृशौ चूतमुकुले ॥ ८४ ॥
प्रतीकारारम्भश्लथमतिभिरुद्यत्परिणतै-
र्विमुक्तायां व्यक्तस्मरकदनभाजः परिजनैः ।
अमुञ्चन्ती सङ्गं कुवलयदृशः केवलमसौ
बलादद्य प्राणानवति भवदाशासहचरी ॥ ८५ ॥
अये रासक्रीड़ारसिक ! मम सख्यां नवनवा
पुरा बद्धा येन प्रणयलहरी हन्त गहना ।
स चेन्मुक्तापेक्षस्त्वमसि धिगिमां तूलशकलं
यदेतस्या नासानिहितमिदमद्यापि चलति ॥ ८६ ॥
मुकुन्द भ्रान्ताक्षी किमपि यदसङ्कल्पितशतं
विधत्ते तद्वक्तुं जगति मनुजः कः प्रभवति ।

Digitized by Google

यदेषा कंसारे भिदुरहृदयं त्वामवयती
सतीनां मूर्द्धन्या भिदुरहृदयाऽभूदनुदिनम् ॥ ८६ ॥
समक्षं सर्व्वेषां निवससि समाधिप्रणयिनाम्
इति श्रुत्वा नूनं गुरुतरसमाधिं कलयति ।
सदा कंसाराते भजसि यमिनां नेत्रपदवीम्
इति व्यक्तं सज्जीभवति यममालम्बितुमपि ॥ ८७ ॥
मुरारे ! कालिन्दीसलिलचलदिन्दीवररुचे !
मुकुन्द ! श्रीवृन्दावनमदनवृन्दारकमणे ! ।
व्रजानन्दिनन्दीश्वरदयितनन्दात्मजहरे !
सदेति क्रन्दन्ती परिजनशुचं कन्दलयति ॥ ८८ ॥
समन्तादुत्तप्तस्तव विरहदावाग्निशिखया
कृतोद्वेगः पञ्चाशुगमृगयुवेधव्यतिकरैः
तनूभूतं सद्यस्तनुवनमिदं हास्यति हरे
हठादद्य श्वो वा मम सहचरी प्राणहरिणः ॥ ८९ ॥
पयोराशिस्फीतत्विषि हिमकरोत्तंसमधुरे
दधाने दृग्भङ्ग्या स्मरविजयिरूपं मम सखी ।
हरे दत्तस्वान्ता भवति तदिमां किं प्रभवति
स्मरो हन्तुं किन्तु व्यथयति भवानेव कुतुकी ॥ ९० ॥
विजानीषे भावं पशुप-रमणीनां यदुपते !
न जानीमः कस्मात् तदपि बत मायां रचयसि ।
समन्तादध्यात्मं यदिह पवनव्याधिरलपद्-
बलादस्यास्तेन व्यसनकुलमेव द्विगुणितम् ॥ ९१ ॥

Digitized by Google

नवीनेयं सम्यत्यकुशलपरीपाकलहरी
नरीनर्त्ति स्वैरं मम सहचरीचित्तकुहरे ।
जगन्नेत्रश्रेणी-मधुरमथुरायां निवसत-
श्चिरादार्त्ता वार्त्तामपि तव यदेषा न लभते ॥ ८१ ॥
जनान् सिद्धादेशान् नमति भजते मान्त्रिकगणान्
विधत्ते शुश्रूषामधिकविनये नौषधिविदाम् ।
त्वदीयादीयायै परिचरति भक्त्या गिरिसुतां
मनीषा हि व्यग्रा किमपि सुखहेतुं न मनुते ॥ ८२ ॥
पशूनां पातारं भुजगरिपुपत्रप्रणयिनं
स्मरोद्दीपक्रीडं निविडघनसारद्युतिहरम् ।
सदाभ्यर्णं नन्दीश्वरगिरिभुवो रङ्गरसिकं
भवन्तं कंसारे भजति भवदाप्त्यै मम सखी ॥ ८३ ॥
भवन्तं सन्तप्ता विदलिततमालाङ्कुररसै-
र्विलिख्य भ्रूभङ्गीकृतमदनकोदण्डकदनम् ।
निधास्यन्ती कण्ठे तव निजभुजावल्लरिमसौ
धरण्यामुन्मीलज्जडिमनिविडाङ्गी विलुठति ॥ ८४ ॥
कदाचिन्-मूढेयं निविडभवदीयस्मृतिमदा-
दमन्दादात्मानं कलयति भवन्तं मम सखी ।
तथास्या राधाया विरहदहनाकल्पितधियो
मुरारे ! दुःसाधा क्षणमपि न राधा विरमति ॥ ८५ ॥
त्वया सन्तापानामुपरि परिमुक्तापि रभसा-
दिदानीमापेदे तदपि तव चेष्टां प्रियसखी ।

यदृष्ट्वन्दं वृन्दावनकुसुमपालीपरिमलै-
र्दुरालोकं शोकास्पदमथ कथं नेष्यति सखी ॥ ७५ ॥
तरङ्गैः कुर्वाणा शमनभगिनीलाघवमसौ
नदीं काश्चित्प्रोष्ठे नयनजलपूरैरजनयत्।
इतीवास्याद्देषाद्भिमतदशाप्रार्थनमयीं
मुरारे विज्ञप्तिं निशमयति मानी न शमनः ॥ ७६ ॥
कृताकृष्टिक्रीडं किमपि तव रूपं मम सखी
सकृद्दृष्ट्वा दूराद्हितहितबोधोज्झितमतिः।
हताशेयं प्रेमानलमनुविशन्ती सरभसं
पतङ्गीवात्मानं मुरहर! मुहुर्दाहितवती ॥ ७७ ॥
मया वाच्यः किं वा त्वमिह निजदोषात् परमसौ
ययौ मन्दा वृन्दावनकुमुदबन्धो विधुरताम्।
यदर्थं दुःखाग्निर्दहति न तमद्यापि हृदयात्
न यस्माद्दुर्मेधा लवमपि भवन्तं द्रवयति ॥ ७८ ॥
त्रिवक्राहो धन्या हृदयमिव ते स्वं वपुरियं
समासाद्य स्वैरं यदिह विलसन्ती निवसति।
ध्रुवं पुण्यभ्रंशादजनि सरलेयं मम सखी
प्रवेशस्तत्रासीत् क्षणमपि यदस्या न सुलभः ॥ ७९ ॥
किमाविष्टा भूतैः सपदि यदि वा क्रूरफणिना
क्षतापस्मारेण च्युतमतिरकस्मात् किमपतत्।
इति व्यग्रैरस्यां गुरुभिरभितो वेणुनिनद-
श्रवाद् विभ्रष्टायां मुरहर विकल्पा विदधिरे ॥ ८० ॥

Digitized by Google

त्वया नागन्तव्यं कथमिह हरे ! गोष्ठमधुना
लताश्रेणी वृन्दावनभुवि यतोऽभूद्विषमयी ।
प्रसूनानां गन्धं कथमितरथा वातनिहितं
भजन् सद्यो मूर्च्छां वहति निवहो गोपसुदृशाम् ॥ ७० ॥
कथं सङ्गोऽस्माभिः सह समुचितः सम्प्रति हरे !
वयं ग्राम्या नार्य्यस्त्वमसि नृपकन्यार्चितपदः ।
गतः कालो यस्मिन् पशुपरमणीसङ्गमकृते
भवान् व्यग्रस्तस्थौ तमसि गृहवाटीविटपिनः ॥ ७१ ॥
वयं त्यक्ताः स्वामिन् ! यदिह तव किं दूषणमिदं
निसर्गः श्यामानामयमतितरां दुष्परिहरः ।
कुहूकण्ठैरण्डावधिसहनिवासात् परिचिता
विसृज्यन्ते सद्यः कलितनवपक्षैर्बलिभुजः ॥ ७२ ॥
अयं पूर्वो रङ्गः किल विरचितो यस्य तरसा
रसाद्‌व्याख्यातव्यं परिकलय तन्नाटकमिदम् ।
मया प्रष्टव्योऽसि प्रथमम्मिति वृन्दावनपते !
किमाहो राधेति स्मरसि कृपणं कर्णयुगलम् ॥ ७३ ॥
अये कुञ्जद्रोणीकुहरगृहमेधिन् ! किमधुना
परोक्षं वक्ष्यन्ते पशुपरमणीदुर्नियतयः ।
प्रवीणा गोपीनां तव चरणपद्मेऽर्पितमना
ययौ राधा साधारणसमुचितप्रश्नपदवीम् ॥ ७४ ॥
त्वया गोष्ठं गोष्ठीतिलक ! किल चेद्विस्मृतमिदं
न तूर्णं भूमीर्णापतिरपि विधत्ते यदि कृपाम् ।

Digitized by Google

वहन्ते वा वाताः स्फुरितगिरिमल्लीप्रविमला
स्तदैवास्माकीनां गिरमुपहरेथा मुरभिदि । ६४ ॥
पुरा तिष्ठन् गोष्ठे निखिलरमणीभ्यः प्रियतया
भवान् यस्यां गोपीरमण ! विदधे गौरवभरम् -
सखी तस्या विज्ञापयति ललिता धीरललित !
प्रणम्य श्रीपादाम्बुजकमलपीठोपरिसरे ॥ ६५ ॥
प्रयत्नादाबाल्यं नवकमलिनीपल्लवकुलै-
स्त्वया भूयोयस्याः कृतमहह सम्बर्द्धनमभूत् ।
चिराद्दूधोभारास्फुरणगरिमाक्रान्तजघना
बभूव प्रष्ठौही मुरमथन ! सेयं कपिलिका ॥ ६६ ॥
समीपे नीपानां त्रिचतुरदला हन्त गमिता
त्वया माकन्दस्य प्रियसहचरी भावनियतिम् ।
इयं सा वासन्ती गलदमलमाध्वीकपटली-
मिषादद्य गोपीरमण ! रुदती रोदयति नः ॥ ६७ ॥
प्रसूतो देवक्या मुरमथन यः कोऽपि पुरुषः
स जातो गोपालाभ्युदयपरमानन्दवसतिः ।
धृतो यो गान्धिन्या कठिनजठरे सम्प्रति ततः
समन्तादेवास्तं शिव शिव गता गोकुलकथा ॥ ६८ ॥
अरिष्टेनाहूताः पशुपसुहृदो यान्ति विपदं
तृणावर्त्तोक्राम्त्यां रचयति भयं चत्वरचयः ।
अमी व्योमीभूता व्रजवसतिभूमीपरिसरा
वहन्ते नस्तापं मुरहर ! विदूरं त्वयि गते ॥ ६९ ॥

Digitized by Google

उरो यस्य स्फारं स्फुरति वनमालावलयितं
वितन्वानं तन्वीजनमनसि सद्यो मनसिजम् ।
मरीचीभिर्यस्मिन् रविनिवहतुल्योऽपि वहते
सदा खद्योताभां भुवनमधुरः कौस्तुभमणिः ॥ ५९ ॥
समन्तादुन्मीलद्दलभिदुपलस्तम्भयुगल-
प्रभाजैत्रं केशिद्विजलुलितकेयूरललितम् ।
स्मरत्क्षाम्यद्गोपीपटलहठकण्ठग्रहपरं
भुजद्वन्द्वं यस्य स्फुटसुरभिगन्धं विजयते ॥ ६० ॥
जिह्रीते साम्राज्यं जगति नवलावण्यलहरी
परिपाकस्यान्तर्मुदितमदनावेशमधुरम् ।
नटद्भ्रूवल्लीकं स्मितनवसुधाकेलिसदनं
स्फुरन्मुक्तापङ्क्तिप्रतिमरदनं यस्य वदनम् ॥ ६१ ॥
किमेभिर्व्याहारैः कलय कथयामि स्फुटमहं
सखे ! निःसन्देहं परिचयपदं केवलमिदम् ।
परानन्दो यस्मिन्नयनपदवीभाजि भविता
त्वया विज्ञातव्यो मधुरख ! सोऽयं मधुरिपुः ॥ ६२ ॥
विलोकेथाः कृष्णं मदकलमरालीरतिकला-
विदग्धव्यामुग्धं यदि पुरवधूविभ्रमभरैः ।
तदा नास्मान् ग्राम्याः श्रवणपदवीं तस्य गमयेः
सुधापूर्णं चेतः कथमपि न तक्रं मृगयते ॥ ६३ ॥
यदा वृन्दारण्यस्मरणलहरीहेतुरमलं
पिकानां वेवेष्टि प्रतिहरितमुच्चैः कुहुरुतम् ।

Digitized by Google

तथापि स्त्रीप्रज्ञासुलभतरलत्वादहमसौ
प्रवृत्ता तन्मूर्त्तिस्तवरतिमहासाहसरसे ॥ ५३ ॥
विराजन्ते यस्य व्रजशिशुकुलस्तेयविकल-
स्वयम्भूचूडाग्रैर्लुलितशिखराः पादनखराः।
क्षणं यानालोक्य प्रकटपरमानन्दविवशः
स देवर्षिर्मुक्तानपि तनुभृतः शोचति भृशम् ॥ ५४ ॥
सरोजानां व्यूहः श्रियमभिलषन् यस्य पदयो-
र्ययौ रागाढ्यानां विधुरमुदवासव्रतविधिम्।
हिमं वन्दे नीचैरनुचितविधानव्यसनिनां
यदेषां प्राणान्तं दमनमनुवर्षं प्रणयति ॥ ५५ ॥
कचीनामुल्लासैर्मरकतमयस्थूलकदली-
कदम्बाहङ्कारं कवलयति यस्योरुयुगलम्।
यदालानस्तम्भद्युतिमवलम्ब्य बलभृतां
मदादुद्दामानां पशुपरमणीचित्तकरिणाम् ॥ ५६ ॥
सखे! यस्याभीरीनयनसफरीजीवनविधौ
निदानं गाम्भीर्यप्रसरकलिता नाभिसरसी।
यतः कल्पस्यादौ सनकजनकोत्पत्तिवडभी-
गभीरान्तःकक्षाहृतभुवनमम्भोरुहमभूत् ॥ ५७ ॥
द्युतिं धत्ते यस्य त्रिवलिलतिका सङ्कटतरं
सखे! दामश्रेणीव्रणपरिचयाभिख्यमुदरम्।
यशोदा यस्यान्तः सुरनरभुजङ्गैः परिवृतं
मुखद्वारावारद्वयमवलुलोके त्रिभुवनम् ॥ ५८ ॥

Digitized by Google

निविष्टः पल्यङ्के मृदुलतरतूलीधवलिते
त्रिलोकीलक्ष्मीणां ककुदि दरसाचीकृततनुः ।
अमन्दं पूर्णेन्दुप्रतिममुपधानं प्रमुदितो
निधायाग्रे तस्मिन्नुपहितकपोलिद्वयभरः ॥ ४८ ॥
उदञ्चत्कालिन्दीसलिलसुभगं भावुकरुचिः
कपोलान्ते प्रेङ्खन्मणिमकरमुद्रामधुरिमा ।
वसानः कौषेयं जितकनकलक्ष्मीपरिमलं
मुकुन्दस्ते साक्षात् प्रमद सुधया सेक्ष्यति दृशौ ॥ ४९ ॥
विकत्थुः पौराणीरखिलकुलवृद्धो यदुपते-
रदूरादासीनो मधुरभणितिर्गास्यति तदा ।
पुरस्तादाभीरीगणभयदनामा स कठिनो
मणिस्तम्भालम्बी कुरुकुलकथां सङ्कलयिता ॥ ५० ॥
शिनीनामुत्तंसः स किल कृतवर्माप्युभयतः
प्रणेष्येते बालव्यजनयुगलान्दोलनविधिम् ।
स जानुभ्यामष्टापदभुवमवष्टभ्य भविता
गुरोः शिष्यो नूनं पदकमलसम्बाहनरतः ॥ ५१ ॥
विहङ्गेन्द्रो युग्मीकृतकरसरोजो भुवि पुरः
कृताशङ्को भावी प्रजविनि निदेशेऽर्पितमनाः ।
कुदृन्दे यस्य ध्वनति मथुरावासिवटवो
व्युदस्यन्ते सामस्वरकलितमन्योन्यकलहम् ॥ ५२ ॥
न निर्वक्तुं दामोदरपदकनिष्ठाङ्गुलिनख-
द्युतीनां लावण्यं भवति चतुरास्योऽपि चतुरः ।

Digitized by Google

समर्य्यादा येषां सपदि परिचर्य्यां विदधति ॥ ४२ ॥

चिरात्तृष्यन्तीनां पशुपरमणीनामपि कुलै-
रलब्धं कालिन्दीपुलिनविपिने लीनमभितः ।
मदालोकोल्लासस्मितपरिचितास्यं प्रियसखि !
स्फुरन्तं वीक्षिष्ये पुनरपि किमग्रे मुरभिदम् ॥ ४३ ॥

विषादं माकार्षीर्द्रुतमवितथव्याहृतिरसौ
समागन्ता राधे ! धृतनवशिखण्डस्तव सखा ।
इति ब्रूते यस्यां शुकमिथुनमिन्द्रानुजकृते
यदाभीरीवृन्दैरुपहृतमभूदुत्सवकरे ॥ ४४ ॥

कुलकम् ।

घनश्यामा भ्राम्यत्युपरि हरिहर्म्यस्य शिखिभिः
कृतस्तोत्रा मुग्धैरगुरुजनिता धूमलतिका ।
तदालोकाद्वीर स्फुरति तव चेन्मानसरुचि-
र्जितं तर्हि स्वैरं जनसहनिवासप्रियतया ॥ ४५ ॥

ततोमध्येकक्षं प्रतिनवगवाक्षस्तवकितं
चलन्मुक्तालम्बस्फुरितममलस्तम्भनिवहम् ।
भवान् द्रष्टा हेमोल्लिखितदशमस्कन्धचरितै-
र्लसद्भित्तिप्रान्तं मुरविजयिनः केलिनिलयम् ॥ ४६ ॥

अलिन्दे यस्यास्ते मरकतमयी यष्टिरमला
शयालुर्य्यां रात्रौ मदकलकलापी कलयति ।
निरातङ्कस्तस्याः शिखरमधिरुह्य श्रमनुदं
प्रतीक्षेथा भ्रातर्वरमवसरं यादवपतेः ॥ ४७ ॥

किमस्मानेतस्मान्मणिभवनपृष्ठाद्विनुदती
त्वमेका त्वङ्गाक्षि ! स्थगयसि गवाक्षावलिमपि ॥ ३७ ॥
मुहुः शून्यां दृष्टिं वहसि रहसि ध्यायसि सदा
शृणोषि प्रत्यक्षं न परिजनविज्ञापनशतम् ।
अतः शङ्के पङ्केरुहमुखि ! ययौ श्यामलरुचिः
स यूनामुत्तंसस्तव नयनवीथीपथिकताम् ॥ ३८ ॥
विलज्जं मा रोदीरिह सखि ! पुनर्यास्यति हरि-
स्तवापाङ्गक्रीड़ां निविड़परिचर्य्याग्रहिलताम् ।
इति स्वैरं यस्यां पथि पथि मुरारेरभिनव-
प्रवेशे नारीणां रतिरभसजल्पाववनिरे ॥ ३९ ॥

पञ्चभिः कुलकम् ।

सखि ! साक्षाद्दामोदरवदनचन्द्रावकलन-
स्फुरत्प्रेमानन्दप्रकरलहरीचुम्बितधियः ।
मुहुस्तत्राभीरीसमुदयशिरोन्यस्तविपद-
स्तवाक्षीरानन्दं विदधति पुरा पौरवनिताः ॥ ४० ॥
अथ क्रामं क्रामं क्रमघटनया सङ्कटतरान्
निवासान् वृष्णीनामनुसर पुरीमध्यविशिखान् ।
मुरारातेर्यत्र स्थगितगगनाभि विजयते
पताकाभिः सन्तर्पितभुवनमन्तःपुरवरम् ॥ ४१ ॥
यदुत्सङ्गे तुङ्गस्फटिकरचिताः सन्ति परितो
मराला माणिक्यप्रकरघटितत्रोटिचरणाः ।
सुहृद्बुद्ध्या हंसाः कलितमधुरस्याम्बुजभुवः

Digitized by Google

इति ज्ञात्वा केकाततविततिमेकाद्यवर्णो
घनीभूतं चूतैर्व्रजमगुवनं द्वादशमिदम्।
पुरी यस्मिन्नास्ते यदुकुलभुवां निर्मलयशो-
भराणां धाराभिर्धवलितधरित्रीपरिसरा॥ ३२॥
निकेतैराकीर्णा गिरिशगिरिडिम्बप्रतिभटै-
रवष्टम्भस्तम्भावलिविलसितैः पुष्पितवना।
निविष्टा कालिन्दीतटभुवि तवाधास्यति सखे!
समन्तादानन्दं मधुरजनवृन्दा मधुपुरी॥ ३३॥
वृषः शम्भोर्यस्यां दशति नवमेकत्र यवसं
विरिञ्चेरन्यस्मिन् गिलति कलहंसी विसलताम्।
क्वचित् क्रौञ्चारातेः कवलयति केकी विषधरं
विलीढे शक्रस्य बलरिपुकरी शल्लवमितः॥ ३४॥
अबोधिष्ठाः काषायमहि विघटितां प्रच्छदपटीं
विमुक्तामश्रासीः पथि पथि न मुक्तावलिमपि।
अयि श्रीगोविन्दस्मरणमदिरामत्तहृदये
सतीति ख्यातिं ते हसति कुलटानां कुलमिदम्॥ ३५॥
असव्यं बिभ्राणा पदमधृत लाक्षारसमसौ
प्रयाताहं मुग्धे! विरम मम वेशैः किमधुना।
अमन्दादाशङ्के सखि! पुरपुरन्ध्रीकलकलाद्
अलिन्दाग्रे वृन्दावनकुसुमधन्वा विजयते॥ ३६॥
अयं लीलापाङ्गस्नपितपुरवीथीपरिसरो
नवाशोकोत्तंसस्खलति पुरतः कंसविजयी।

परावर्तिष्यन्ते तुलितमुरजिन्नूपुररवात्
तव ध्यानात् तासां बहिरपि गताः क्षिप्रमसवः ॥ २६ ॥
त्वमासीनः शाखान्तरमिलितचण्डत्विषि सुखं
दधीथा भाण्डीरे क्षणमपि घनश्यामलरुचौ ।
ततो हंसा विभ्रन्निखिलनभसश्चिक्रमिषया
स वर्द्धिष्णुं विष्णुं कलितदरचक्रं तुलयिता ॥ २७ ॥
त्वमष्टाभिर्नेत्रैर्विगलदमलप्रेमसलिलै-
र्मुहुः सिक्तस्तम्भां चतुर चतुरास्यस्तुतिभुवम् ।
जिहीथा विख्यातां स्फुटमिह भवद्दान्धवरथं
प्रविष्टं मंस्यन्ते विधिमटविदेव्यस्त्वयि गते ॥ २८ ॥
उदञ्चन्नेत्राम्भःप्रसरलहरीपिच्छिलपथ
स्खलत्पादन्यासप्रणिहितविलम्बाकुलधियः ।
हरौ यस्मिन्मग्ने त्वरितयमुनाकूलगमन-
स्पृहाक्षिप्ता गोप्यो ययुरनुपदं कामपि दशाम् ॥ २९ ॥
मुहुर्लास्यक्रीड़ाप्रमदमिलदाहोपुरुषिका
विकाशेन भ्रष्टैः फणिमणिकुलैर्धूमलरुचौ ।
पुरस्तस्मिन्नीपद्रुमकुसुमकिञ्जल्कसुरभौ
त्वया पुण्ये पेयं मधुरमुदकं कालियह्रदे ॥ ३० ॥
तृणावर्तारातेर्विरहदवसन्तापिततनोः
सदाभीरीवृन्दप्रणयबहुमानोन्नतिविदः ।
प्रणेतव्यो नव्यस्तवकभरसम्बर्द्धितशुच-
स्त्वया वृन्दादेव्याः परमविनयाद्वन्दनविधिः ॥ ३१ ॥

Digitized by Google

सशृङ्गश्रीनादश्रवणमिलिताभीरवनिता-
रहःक्रीड़ासाक्षी प्रतिपदलतासद्मसुभगः।
स धेनूनां बन्धुर्मधुमथनखट्टायितशिलः
करिष्यत्यानन्दं सपदि तव गोवर्द्धनगिरिः॥ २१ ॥
तमेवार्द्रं चक्राङ्कितकरपरिष्वङ्गरसिकं
मही चक्रे शङ्के महि शिखरिणां शेखरतया।
अरातिं शातीनां ननु हरिहयं यः परिभवन्
यथार्थं स्वं नाम व्यधित भुवि गोवर्द्धन इति॥ २२ ॥
तमालस्यालोकाद्गिरिपरिसरे सन्ति चपलाः
पुलिन्द्यो गोविन्दस्मरणरभसोत्तप्तवपुषः।
शनैस्तापं तासां क्षणमपनयन् यास्यति भवान्
अवश्यं कालिन्दीसलिलशिशिरैः पक्षपवनैः॥ २३ ॥
तदन्ते श्रीकान्तस्मरसमरधाटी पुटकिता
कदम्बानां वाटी रसिकपरिपाटीं स्फुटयति।
त्वमासीनस्तस्यां न यदि परितो नन्दसि ततो
बभूव व्यर्था ते घनरसनिवेशव्यसनिता॥ २४ ॥
शरण्ये धन्ये श्रीप्रतिभटमरिष्टासुरशिर-
स्थिरं शृङ्गं वृन्दावनपरिसरे द्रक्ष्यति भवान्।
यदारोढुं दूराच्छलति किल कैलासशिखरि
भ्रमाक्रान्तस्वान्तो गिरिशसुहृदः किङ्करगणः॥ २५ ॥
रुवन् याहि स्वैरं चरमदशया चुम्बितरुचो
नितम्बिन्यो वृन्दावनभुवि सखे! सन्ति बहवः।

Digitized by Google

तमादौ पद्यानां रचय चरितार्था भवतु ते
विराजन्ती सर्वोपरि परमहंसस्थितिरियम् ॥ १५ ॥
अकस्मादस्माकं हरिरपहरन्नंशुकचयं
यमारूढो गूढप्रणयलहरीं कन्दलयितुम् ।
तव श्रान्तस्यान्तःस्थगितरविबिम्बः किसलयैः
कदम्बः कादम्ब ! त्वरितमवलम्बः स भविता ॥ १६ ॥
किरन्ती लावण्यं दिशि दिशि शिखण्डस्तवकिनी
दधाना साधीयः कनकविमलद्योतिवसनम् ।
तमालश्यामाङ्गी सरलमुरलीचुम्बितमुखी
जगौ चित्रं यत्र प्रकटपरमानन्दलहरी ॥ १७ ॥
तया भूयः क्रीडारभसविकसद्बल्लवबधू-
वपुर्वल्लीभ्रश्यन्मृगमदकणश्यामलिकया ।
विधातव्यो हल्लीसकदलितमल्लीलतिकया
समन्तादुल्लासस्तव मनसि रासस्थलिकया ॥ १८ ॥
तदन्ते वासन्तीविरचितमनङ्गोत्सवकला
चतुःशालं शौरेः स्फुरति न दृशो तत्र विकिरेः ।
तदालोकोद्भिन्दप्रमदभरविस्मारितगति-
क्रिये जाने तावत्त्वयि वत हता गोपवनिता ॥ १९ ॥
मम स्यादर्थानां क्षतिरिह विलम्बाद्यदपि ते
विलोकेथाः सर्वं तदपि हरिकेलिस्थलमिदम् ।
तवेयं न व्यर्था भवतु शुचिता कः स हि सखे !
गुणो यस्याणूरद्धिपि मयिनिवेशाय न भवेत् ॥ २० ॥

Digitized by Google

चिरं विस्मृत्यास्मान् विरहदहनज्वालविकलाः
कलावान् सानन्दं वसति मथुरायां मधुरिपुः।
तदेतं सन्देशं स्वमनसि समाधाय निखिलं
भवान् क्षिप्रं तस्य श्रवणपदवीं सङ्गमयतु ॥ १० ॥
निरस्तप्रत्यूहं भवतु भवतो वर्त्मनि शिवं
समुत्तिष्ठ क्षिप्रं मनसि मुदमाधाय सदयम्।
अधस्ताद्यावन्तो लघु लघु समुत्ताननयनै-
र्भवन्तं वीक्षन्तां कुतुकतरला गोपशिशवः ॥ ११ ॥
किशोरीवंशोऽसौ कठिनमतिना दानपतिना
यया निन्ये तूर्णं पशुप-युवतीजीवितपतिः।
तया गन्तव्या ते निखिलजनदैकप्रचितया
पदव्या भव्यानां तिलक ! किल दाशार्हनगरी ॥ १२ ॥
गलद्धारासारप्लुतधवलगण्डा मृगदृशो
विदूयन्ते यत्र प्रबलमदना वेशविवशाः।
त्वया विज्ञातव्या हरिचरणसङ्गप्रणयिनी
ध्रुवं सा चक्राङ्की रतिसरसशताङ्गस्य पदवी ॥ १३ ॥
पिबन् जम्बुश्यामं मिहिरदुहितुर्वारिमधुरं
मृणालीर्भुञ्जानो हिमकरकलाकोमलरुचः।
क्षणं हृष्टस्तिष्ठन् निविड़विटपे शाखिनि सखे !
सुखेन प्रस्थानं रचयतु भवान् हस्तिनगरे ॥ १४ ॥
बलादाक्रामन्तीरथ पथिकमक्रूरमिलितं
विदूरादाभीरीततिरनुययौ येन रमणम्।

द्रुगाभोगाभीरीकृतमिहिरपुलीलहरिभि-
र्विलीना धूलीनामुपरि परिषण्णे परिजनैः ॥ ४ ॥
ततस्तां न्यस्ताङ्गीमुरसि ललितायाः कमलिनी-
पलाशैः कालिन्दीसलिलशिशिरैर्वीजिततनुम् ।
परावृत्तश्वासाङ्कुरचलितकण्ठीं कलयतां
सखीसन्दोहानां प्रमदभरभाजी ध्वनिरभूत् ॥ ५ ॥
निधायाङ्के पङ्केरुहदलविटङ्कस्य ललिता
ततो राधां नीराहरणसरणीन्यस्तचरणा ।
मिलन्तं कालिन्दीपुलिनभुवि खेलाञ्चितगतिं
ददर्शाग्रे कञ्चिन्मधुरविरुतं श्वेतगरुतम् ॥ ६ ॥
तदालोकस्तोकोच्छ्वसितहृदया सादरमसौ
प्रणामं शंसन्ती लघु लघु समासाद्य सविधम् ।
धृतोत्कण्ठा सख्यो हरिसदसि सन्देशहरणे
वरं दूतं मेने तमतिललितं हन्त ! ललिता ॥ ७ ॥
अमर्षात् प्रेर्ष्यां सपदि दधती कंसमथने
प्रवृत्ता हंसाय स्वमभिलषितं शंसितुमसौ ।
न तस्या दोषोऽयं यदिह विहगं प्रार्थितवती
न कस्मिन् विश्रम्भं दिशति हरिभक्तिप्रणयिता ॥ ८ ॥
पवित्रेषु प्रायो विरचयसि तोयेषु वसतिं
प्रमोदं नालीके वहसि विषदात्मा स्वयमसि ।
अतोऽहं दुःखार्ता शरणमबला त्वां गतवती
न भिक्षा सत्पक्षे व्रजति हि कदाचिद्विफलताम् ॥ ९ ॥

Digitized by Google

संयोज्यैतौ विगलितशुचौ दम्पती हृष्टचित्तौ
भोगानिष्टानविरतसुखान् प्रापयामास शश्वत् ॥ ११८ ॥

इति श्रीकालिदासकृतं मेघदूताख्यं काव्यं
समाप्तम् ।

हंसदूतः ।

दुकूलं बिभ्राणो दलितहरितालद्युतिहरं
जवापुष्पश्रेणीरुचिरुचिरपादाम्बुजतलः ।
तमालश्यामाङ्गो दरहसितलीलाञ्चितमुखः
परानन्दाभोगः स्फुरतु हृदि मे कोऽपि पुरुषः ॥ १ ॥
यदा यातो गोपीहृदयमदनो नन्दसदनान्-
मुकुन्दो गान्दिन्यास्तनयमनुविन्दन् मधुपुरीम् ।
तदामाङ्क्षीच्चिन्तासरिति घनघूर्णापरिचयै-
रगाधायां बाधामयपयसि राधा विरहिणी ॥ २ ॥
कदाचित् खेदाग्निं विघटयितुमन्तर्गतमसौ
सहालीभिर्लेभे तरलितमना यामुनतटीम् ।
चिरादस्याश्चित्तं परिचितकुटीरावकलनाद्
अवस्थां तस्तार स्फुटमथ सुषुप्तेः प्रियसखीम् ॥ ३ ॥
तदा निष्पन्दाङ्गी कलितनलिनीपल्लवकुलैः
परीणाहात् प्रेम्नामकुशलशताशङ्किहृदयैः ।

Digitized by Google

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव ! रमयन् कामपि त्वं मयेति ॥ ११३ ॥
एतस्मान्-मां कुशलिनमभिज्ञानदानाद् विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ११४ ॥
आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ ११५ ॥
कच्चित् सौम्य ! व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्-न खलु भवतो धीरतां तर्कयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ११६ ॥
एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्तिनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान् देशान् जलद ! विचर प्रावृषा संभृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ ११७ ॥
श्रुत्वा वार्त्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायास्तकोपः ।

Digitized by Google

अस्रैस्तावन्-मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥ १०७ ॥

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थली देवतानां
मुक्तास्थूलास्तरुकिशलयेष्वश्रुलेशाः पतन्ति ॥ १०८ ॥

भित्वा सद्यः किशलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति ! मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ १०९ ॥

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्व्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने ! दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ ११० ॥

नन्वात्मानं बहुविगणयन्नात्मनैवावलम्बे
तत् कल्याणि ! त्वमपि सुतरां मा गमः कातरत्वम् ।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ १११ ॥

शापान्तो मे भुजगशयनाद् उत्थिते शार्ङ्गपाणौ
मासानेतान् गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगणितं तं तमात्माभिलाषं
निर्व्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ११२ ॥

Digitized by Google

तामायुष्मन् ! मम च वचनाद् आत्मनश्चोपकर्त्तुं
ब्रूया एवं तव सहचरी रामगिर्य्याश्रमस्थः ।
अव्यापन्नः कुशलमबले ! पृच्छति त्वां वियुक्तां
पूर्व्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ १०२ ॥
अङ्गेनाङ्गं प्रतनु ! तनुना गाढ़तप्तेन तप्तं
सास्रेणाश्रु द्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥ १०३ ॥
शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूद् आननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृश्य-
स्त्वामुत्कण्ठाविरचितपदं मन्-मुखेनेदमाह ॥ १०४ ॥
श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न ते चण्डि ! सादृश्यमस्ति॥१०५॥
धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले !
दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति ।
घर्म्मान्तेऽस्मिन् विगणय कथं वासराणि व्रजेयु-
र्दिक्संसक्तप्रविततघनव्यस्तसूर्य्यातपानि ॥ १०६ ॥
त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्
आत्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम् ।

Digitized by Google

त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ ९६ ॥
वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
सम्भोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः कनककदलीस्तम्भगौरश्चलत्वम् ॥ ९७ ॥
तस्मिन् काले जलद ! यदि सा लब्धनिद्रासुखा स्याद्
अन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ ९८ ॥
तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युत्कम्पस्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ ९९ ॥
भर्त्तुर्मित्रं प्रियमविधवे ! विद्धि मामम्बुवाहं
त्वत्सन्देशैर्मनसि निहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ १०० ॥
इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव ।
श्रोष्यत्यस्मात् परमवहिता सौम्य ! सीमन्तिनीनां
कान्तोदन्तः सुहृदुपगतः सङ्गमात् किञ्चिदूनः ॥ १०१ ॥

Digitized by Google

निश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम् ।
मत्सम्भोगः कथमुपनयेत् स्वप्नजोऽपीति निद्राम्
आकांक्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥ ९१ ॥

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं
गण्डाभोगात् कठिनविषमामेकवेणीं करेण ॥ ९२ ॥

पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव ।
चक्षुः खेदात् सलिलगुरुभिःपक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥ ९३ ॥

सा संन्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्व्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ९४ ॥

जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्माद्
इत्थम्भूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगंमन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद्भ्रात! रुक्तं मया यत् ॥ ९५ ॥

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।

Digitized by Google

पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्त्तुः स्मरसि रसिके! त्वं हि तस्य प्रियेति ॥ ८५ ॥
उत्सङ्गे वा मलिनवसने सौम्य! निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्
भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥ ८६ ॥
शेषान्मासान् गमनदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।
मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ ॥ ८७ ॥
सव्यापारामहनि न तथा पीडयेन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥ ८८ ॥
आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः।
नीता रात्रिः क्षण इव मया सार्द्धमिच्छारतैर्या
तामेवोष्णैर्विरहजनितैरश्रुभिर्यापयन्तीम् ॥ ८९ ॥
"स्निग्धाः सख्यः क्षणमपि दिवा तां न मोक्ष्यन्ति तन्वीम्
एकप्रेक्ष्या भवति हि जगत्यङ्गनानां प्रवृत्तिः।
स त्वं रात्रौ जलद! शयनासन्नवातायनस्थः
कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः' ॥ ९० ॥

Digitized by Google

एभिः साधो ! हृदयनिहितैर्लक्षणैर्लक्षयेथाः
द्वारोपान्ते लिखितवपुषौ शंखपद्मौ च दृष्ट्वा ।
मन्दच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्य्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥ ८० ॥
गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः
क्रीड़ाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्त्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ ८१ ॥
तन्वी श्यामा शिखरिदशना पक्वविम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ॥ ८२ ॥
तां जानीयाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥ ८३ ॥
नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः
निश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्तिलम्बालकत्वाद्
इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति ॥ ८४ ॥
आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।

सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ७४ ॥

तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योद्याने कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥ ७५ ॥

वापी चास्मिन् मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना कमलकुसुमैः स्निग्धवैदूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥ ७६ ॥

तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे ! चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ ७७ ॥

रक्ताशोकश्चलकिशलयः केशरस्तत्र कान्तः
प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
कांक्षत्यन्यो वदनमदिरां दोहदच्छद्मनाऽस्याः ॥ ७८ ॥

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्जावलयसुभगैर्नर्त्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ ७९ ॥

Digitized by Google

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
कृतच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥ ६९ ॥
नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥ ७० ॥
नेत्रानीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां स्वजलकणिकादोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ७१ ॥
"यस्यां मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरसना नित्यपुष्पा नलिन्यः ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः" ॥ ७२ ॥
यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गनानाम्
अङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ ७३ ॥
मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।

Digitized by Google

ताभ्यो मोक्षस्तव यदि सखे ! घर्मलब्धस्य न स्यात्
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥ ६३ ॥
हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन् कामात् क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन् वातैः सजलपृषतैः कल्पवृक्षांशुकानि
च्छायाभिन्नस्फटिकविशदं निर्विशेस्तं नगेन्द्रम् ॥ ६४ ॥
तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ! ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमानै-
र्मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६५ ॥
विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ ६६ ॥
हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामाननश्रीः ।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं
सीमन्तेऽपि त्वदुपगमजं यत्र नीपं वधूनाम् ॥ ६७ ॥
यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ६८ ॥

Digitized by Google

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संरक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
निर्ह्रादी चेन्मुरज इव ते कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥ ५८ ॥

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशो वर्त्म यत् क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो वलिनियमनायोद्यतस्येव विष्णोः ॥ ५९ ॥

गत्वा चोर्द्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः ॥ ६० ॥

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य ।
शोभामद्रेःस्तिमितनयनप्रेक्षणीयां भवित्रीम्
अंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ६१ ॥

तस्मिन् हित्वा भुजगवलयं शम्भुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत् पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवपुःस्तम्भितान्तर्जलौघः
सोपानत्वं व्रज पदसुखस्पर्शमारोहणेषु ॥ ६२ ॥

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।

Digitized by Google

गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५२ ॥
तस्याः पातुं सुरगज इव व्योम्नि पूर्वार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययासौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥ ५३ ॥
आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५४ ॥
तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीवालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥ ५५ ॥
ये त्वां मुक्तध्वनिमसहनाः स्वाङ्गभङ्गाय तस्मिन्
दर्पोत्सेकादुपरि शरभा लङ्घयिष्यन्त्यलङ्घ्यम् ।
तान्कुर्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥ ५६ ॥
तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत् सिद्धैरुपचितवलिं भक्तिनम्रः परीयाः ।
यस्मिन् दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
कल्पन्तेऽस्य स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५७ ॥

Digitized by Google

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद् वीणिभिर्दत्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिम् ॥ ४७ ॥

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात् प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ४८ ॥

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीयुषामात्मबिम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥ ४९ ॥

ब्रह्मावर्त्तं जनपदमधश्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यषिञ्चन् मुखानि ॥ ५० ॥

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य ! सारस्वतीनाम्
अन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥ ५१ ॥

तस्माद् गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।

Digitized by Google

प्रालेयास्रं कमलवदनात् सोऽपि हर्त्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ४१ ॥
गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्य्यात्
मोघीकर्त्तुं चटुलसफरोद्वर्त्तनप्रेक्षितानि ॥ ४२ ॥
तस्याः किञ्चित् करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे ! लम्बमानस्य भावि
ज्ञातास्वादः पुलिनजघनां को विहातं समर्थः ॥ ४३ ॥
त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्कपुण्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ ४४ ॥
तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूनाम्
अत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः ॥ ४५ ॥
ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचाप्याययेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्ज्जितैर्नर्त्तयेथाः ॥ ४६ ॥

Digitized by Google

अप्यन्यस्मिन् जलधर ! महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदभ्येति भानुः ।
कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३६ ॥
पादन्यासैः क्वणितरसनास्तत्र लीलावधूतै-
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दून्
आमोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥ ३७ ॥
पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
साम्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः ।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्याः ॥ ३८ ॥
गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामिन्या कनकनिकषच्छायया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥ ३९ ॥
तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्य्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ४० ॥
तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।

Digitized by Google

निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ ३० ॥
वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिः शीर्णपर्णैः ।
सौभाग्यं ते सुभग! विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ ३१ ॥
प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम् ॥ ३२ ॥
दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
सिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३३ ॥
जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखिन्नान्तरात्मा
त्यक्त्वा खेदं ललितवनितापादरागाङ्कितेषु ॥ ३४ ॥
भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३५ ॥

Digitized by Google

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भै र्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने फलपरिणतिश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २५ ॥
तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमतिमहत् कामुकत्वस्य लब्ध्वा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादुयुक्तं
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्म्मि ॥ २६ ॥
नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्सम्पर्कात् पुलकितमिव प्रौढ़पुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २७ ॥
विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्चन्
उद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजा क्लान्तकर्णोत्पलानां
छायादानक्षणपरिचितः पुष्पलावीमुखानाम् ॥ २८ ॥
वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।
विद्युद्दामस्फुरणचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥ २९ ॥
वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्त्तनाभेः ।

Digitized by Google

नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १९ ॥

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्त्तं
तोयोत्सर्गाद्द्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ २० ॥

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन ! तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २१ ॥

नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥ २२ ॥

अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि ॥ २३ ॥

उत्पश्यामि द्रुतमपि सखे ! मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥ २४ ॥

Digitized by Google

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
र्दृष्टोच्छायश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥ १४ ॥
रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत् पुरस्तात्
वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
वर्हेणेव स्फुरितरुचिना गोपवेशस्य विष्णोः ॥ १५ ॥
त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यःसीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित् पश्चात् व्रज लघुगतिः किञ्चिदेवोत्तरेण ॥ १६ ॥
अध्वक्लान्तं प्रतिमुखगतं सानुमांश्चित्रकूट-
स्तुङ्गेन त्वां जलद ! शिरसा वक्ष्यति श्लाघमानः ।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं
सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥ १७ ॥
त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १८ ॥
छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।

Digitized by Google

कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥
मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगर्वः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ ९ ॥
ताञ्चावश्यं दिवसगणनातत्परामेकपत्नी
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥
कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रातपत्रां
तत् श्रुत्वा ते श्रवणसुभगं गर्ज्जितं मानसोत्काः ।
आकैलासाद्विसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥
आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥
मार्गं तावत् शृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद ! श्रोष्यसि श्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य ॥ १३ ॥

Digitized by Google

तस्य स्थित्वा कथमपि पुरः केतकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥

जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥

सन्तप्तानां त्वमसि शरणं तत् पयोद! प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः ।

छायां जनः समभिवाञ्छति पादपानां
नक्तं तथेच्छति पुनः किरणं सुधांशोः।
हर्म्यं प्रयाति शयितुं सुखशीतलञ्च
कान्तांश्च गाढ़मुपगूहति शीतलत्वात्॥ २५॥
मलयपवनविद्धः कोकिलेनाभिरम्यः
सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः।
विविधमधुपयूथैर्वेष्ट्यमानः समन्ताद्
भवतु तव वसन्तः श्रेष्ठकालः सुखाय॥ २६॥

इति श्रीकालिदासकृतावृतुसंहारकाव्ये वसन्तवर्णना समाप्ता।

मेघदूतम्।

कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येन भर्त्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु॥ १॥
तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढ़स्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीड़ापरिणतगजप्रेक्षणीयं ददर्श॥ २॥

Digitized by Google

अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गं
मदनशरनिघातैर्मोहमेति प्रवासी ॥ १९ ॥
परभृतकलगीतैर्ह्लादिभिः सद्वचांसि
स्मितदशनमयूखान् कुन्दपुष्पप्रभाभिः ।
करकिसलयकान्तिं पल्लवैर्विद्रुमाभै-
रुपहसति वसन्तः कामिनीनामिदानीम् ॥ २० ॥
कनककमलकान्तैराननैः पाण्डुगण्डै-
रुपरिनिहितहारैश्चन्दनार्द्रैः स्तनान्तैः ।
मदजनितविलासैर्दृष्टिपातैर्मुनीन्द्रान्
स्तनभरनतनार्यः कामयन्ति प्रशान्तान् ॥ २१ ॥
मधुसुरभिमुखाब्जं लोचने लोध्रताम्रे
नवकुरुवकपूर्णः केशपाशो मनोज्ञः ।
गुरुतरकुचयुग्मं श्रोणिबिम्बं तथैव
न भवति किमिदानीं योषितां मन्मथाय ॥ २२ ॥
आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारकृताधिवासैः ।
सम्बाधितं परभृतस्य मदाकुलस्य
श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः ॥ २३ ॥
रम्यः प्रदोषसमयः स्फुटचन्द्रभासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः ।
मत्तालियूथविरुतं निशि शीधुपानं
सर्वं रसायनमिदं कुसुमायुधस्य ॥ २४ ॥

Digitized by Google

कुन्दैः सविभ्रमवधूहसितावदातै-
रुद्योतितान्युपवनानि मनोहराणि ।
चित्तं मुनेरपि हरन्ति निवृत्तरागं
प्रायेण रागचलितानि मनांसि पुंसाम् ॥ २४ ॥

प्रालम्बिहेमरसनाः स्तनसक्तहाराः
कन्दर्पदर्पशिथिलीकृतगात्रयष्ट्यः ।
मासे मधौ मधुरकोकिलभृङ्गनादैः
रामा हरन्ति हृदयं प्रसभं नराणाम् ॥ २५ ॥

नानामनोज्ञकुसुमद्रुमभूषिताग्रान्
हृष्टान्यपुष्टनिनदाकुलसानुदेशान् ।
शैलेयजालपरिणद्धशिलागुहान्तान्
दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः ॥ २६ ॥

नेत्रे निमीलयति रोदिति याति मोहं
घ्राणं करेण विरुणद्धि विरौति चोच्चैः ।
कान्तावियोगपरिखेदितचित्तवृत्ति-
र्दृष्ट्वाध्वगः कुसुमितान् सहकारवृक्षान् ॥ २७ ॥

समदमधुकराणां कोकिलानाञ्च नादैः
कुसुमितसहकारैः कर्णिकारैश्च रम्यैः ।
इषुभिरिव सुतीक्ष्णैर्मानसं मानिनीनां
तुदति कुसुमबाणो मन्मथोद्दीपनाय ॥ २८ ॥

रुचिरकनककान्तीन् मुञ्चतः पुष्पराशीन्
मृदुपवनविधूतान् पुष्पितांश्चूतवृक्षान् ।

Digitized by Google

कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ॥ १८ ॥

कान्ताननद्युतिमुषामचिरोद्गतानां
शोभां परां कुरवकद्रुममञ्जरीणाम् ।
दृष्ट्वा प्रिये ! हि पथिकस्य भवेन्न कस्य
कन्दर्पबाणनिकरैर्व्यथितं हि चेतः ? ॥ १९ ॥

आदीप्तवह्निसदृशैर्मरुतावधूतैः
सर्वत्र किंशुकवनैः कुसुमावनम्रैः ।
सद्यो वसन्तसमये समुपागते हि
रक्तांशुका नववधूरिव भाति भूमिः ॥ २० ॥

किं किंशुकैः शुकमुखच्छविभि र्न दग्धं ?
किं कर्णिकारकुसुमैर्न हृतं मनोज्ञैः ? ।
यत्कोकिलाः पुनरमी मधुरैर्वचोभि-
र्यूनां मनः सुवदने ! नियतं हरन्ति ॥ २१ ॥

पुंस्कोकिलैः फलरसैः समुपात्तहर्षैः
कूजद्भिरुन्मदकराणि वचांसि धीरम् ।
लज्जान्वितं सविनयं हृदयं क्षणेन
पर्याकुलं कुलगृहेऽपि कृतं वधूनाम् ॥ २२ ॥

आकम्पयन् कुसुमिताः सहकारशाखा
विस्तारयन् परभृतस्य वचांसि दिक्षु ।
वायुर्विवाति हृदयानि हरन् वधूनां
नीहारपातविगमात् सुभगो वसन्ते ॥ २३ ॥

Digitized by Google

प्रियङ्गुकालीयककुङ्कुमानि
स्तनाङ्गरागेषु विसर्जितानि।
आलिप्यते चन्दनमङ्गनाभि-
र्मदालसाभिर्मृगनाभियुक्तम् ॥ १३ ॥

गुरूणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि।
सुगन्धिकालागुरुधूपितानि
धत्ते जनः काममदानुविद्धः ॥ १४ ॥

पुंस्कोकिलश्चूतरसेन मत्तः
प्रियामुखं चुम्बति सादरोऽयम्।
गुञ्जन् द्विरेफोऽप्ययमम्बुजस्थः
प्रियं प्रियायाः प्रकरोति चाटुम् ॥ १५ ॥

ताम्रप्रबालस्तबकावनम्रा-
श्चूतद्रुमाः पुष्पितचारुशाखाः।
कुर्वन्ति कान्ते! पवनावधूताः
समुत्सुकत्वं मनसोऽङ्गनानाम् ॥ १६ ॥

आमूलतो विद्रुमरागताम्राः
सपल्लवं पुष्पचयं दधानाः।
कुर्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम् ॥ १७ ॥

मत्तद्विरेफपरिचुम्बितचारुपुष्पा
मन्दानिलाकुलितचारुमृदुप्रवालाः।

शिखासु माला नवमल्लिकायाः
प्रयान्ति शोभां प्रमदाजनस्य ॥ ७ ॥
सपत्रलेखेषु विलासिनीनां
वक्त्रेषु हेमाम्बुरुहोपमेषु ।
स्तनान्तरे मौक्तिकसङ्गजालः
स्वेदोद्गमो विस्तरतामुपैति ॥ ८ ॥
उच्छ्वासयन्त्यः श्लथबन्धनानि
गात्राणि कन्दर्पसमाकुलानि ।
समीपवर्त्तिष्वपि कामुकेषु
समुत्सुका एव भवन्ति नार्य्यः ॥ ९ ॥
तनूनि पाण्डूनि मदालसानि
मुहुर्मुहुर्जृम्भनतत्पराणि ।
अङ्गान्यनङ्गः प्रमदाजनस्य
करोति लावण्यरसोत्सुकानि ॥ १० ॥
नेत्रेष्वलोलो मदिरालसेषु
गण्डेषु पाण्डुः कठिनः स्तनेषु ।
मध्येषु नम्रो जघनेषु पीनः
स्त्रीणामनङ्गो बहुधा स्थितोऽद्य ॥ ११ ॥
अङ्गानि निद्रालसविह्वलानि
वाक्यानि किञ्चिन्मदिरालसानि ।
भ्रूक्षेपजिह्मानि च वीक्षितानि
चकार कामः प्रमदाजनानाम् ॥ १२ ॥

Digitized by Google

द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्वं प्रिये ! चारुतरं वसन्ते ॥ २ ॥
ईषत्तुषारैः कृतशीतहर्म्यैः
सुवासितं चारु शिरः सचम्पकैः ।
कुर्वन्ति नार्योऽपि वसन्तकाले
स्तनं सहारं कुसुमैर्मनोहरैः ॥ ३ ॥
वापीजलानां मणिमेखलानां
शशाङ्कभासां प्रमदाजनानाम् ।
चूतद्रुमाणां कुसुमानतानां
ददाति सौरभ्यमयं वसन्तः ॥ ४ ॥
स्तनेषु हाराः सितचन्दनार्द्रा
भुजेषु कम्बू वलयाङ्गदानि ।
प्रयान्ति निःशङ्कमनङ्गसौख्यं
नितम्बिनीनां जघनेषु काञ्च्यः ॥ ५ ॥
कुसुम्भरागारुणितैर्दुकूलै-
र्नितम्बबिम्बानि विलासिनीनाम् ।
तन्वंशुकैः कुङ्कुमरागगौरै-
रलंक्रियन्ते स्तनमण्डलानि ॥ ६ ॥
कर्णेषु योग्यं नवकर्णिकारं
स्तनेषु हारा अलकेष्वशोकः ।

Digitized by Google

उषसि वदनबिम्बैरंससंयुक्तकेशैः
श्रिय इव गृहमध्ये संस्थिता योषितोऽद्य ॥ १३ ॥
पृथुजघनभरार्त्ताः किञ्चिदानम्रमध्याः
स्तनभरपरिखेदान्मन्दमन्दं व्रजन्त्यः ।
सुरतशयनवेषं नैशमन्यत् प्रहाय
दधति दिवसयोग्यं वेषमेतास्तरुण्यः ॥ १४ ॥
नखपदक्षतभङ्गान् वीक्षमाणाः स्तनान्तान्
अधरकिसलयाग्रं दन्तभिन्नं स्पृशन्त्यः ।
अभिमतरतवेशं नन्दयन्त्यस्तरुण्यः
सवितुरुदयकाले भूषयन्त्याननानि ॥ १५ ॥
प्रचुरगुड़विकारस्वादुशालीक्षुरम्यः
प्रबलसुरतकेलिर्जातकन्दर्पदर्पः ।
प्रियजनरहितानां चित्तसन्तापहेतुः
शिशिरसमय एष श्रेयसे वोऽस्तु नित्यम् ॥ १६ ॥

इति कालिदासकृतावृतुसंहारे शिशिरवर्णना समाप्ता ।

वसन्तवर्णना ।

प्रफुल्लचूताङ्कुरतीक्ष्णशायको
द्विरेफमालाविलसद्धनुर्गुणः ।
मनांसि भेत्तुं सुरतप्रसङ्गिनां
वसन्तयोधः समुपागतः प्रिये ! ॥ १ ॥

Digitized by Google

पयोधरैः कुङ्कुमरागपिञ्जरैः
सुखोपसेव्यैर्नवयौवनोत्सवः ।
विलासिनीनां परिपीड़ितोरसः
स्वपन्ति शीतं परिभूय कामिनः ॥ ८ ॥
मनोज्ञकूर्पासकपीड़ितस्तनाः
सरागकौशेयविभूषितोरवः ।
निवेशितान्तःकुसुमैः शिरोरुहै
र्विभूषयन्तीव हिमागमं स्त्रियः ॥ ९ ॥
सुगन्धिनिःश्वासविकम्पितोत्पलं
मनोहरं कामरतिप्रबोधनम् ।
निशासु हृष्टाः सह कामिभिः स्त्रियः
पिबन्ति मद्यं मदनीयमुत्तमम् ॥ १० ॥
अपगतमदरागा योषिदेका प्रभाते
कृतविनतकुचाग्रा पत्युरालिङ्गनेन ।
प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं
व्रजति शयनवासाद्वासमन्यं हसन्ती ॥ ११ ॥
अगुरुसुरभिधूपामोदितं केशपाशं
गलितकुसुममालं कुञ्चिताग्रं वहन्ती ।
त्यजति गुरुनितम्बा निम्ननाभिः सुमध्या
उषसि शयनवासं कामिनी कामशोभा ॥ १२ ॥
कनककमलकान्तैः सद्य एवाम्बुधौतैः
श्रवणतटनिषक्तैः पाटलोपान्तनेत्रैः ।

Digitized by Google

गुरूणि वासांस्यवलाः सयौवनाः
प्रयान्ति कालेऽद्य जनस्य सेव्यताम् ॥ २ ॥

न चन्दनं चन्द्रमरीचिशीतलं
न हर्म्यपृष्ठं शरदिन्दुनिर्मलम् ।
न वायवः सान्द्रतुषारशीतला
जनस्य चित्तं रमयन्ति साम्प्रतम् ॥ ३ ॥

तुषारसंघातनिपातशीतलाः
शशाङ्कभाभिः शिशिरीकृताः पुनः ।
विपाण्डुताराणचारुभूषणाः
जनस्य सेव्या न भवन्ति रात्रयः ॥ ४ ॥

गृहीतताम्बूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपङ्कजाः ।
प्रकामकालागुरुधूपवासितं
विशन्ति शय्यागृहमुत्सुकाः स्त्रियः ॥ ५ ॥

कृतापराधान् बहुशोऽभितर्जितान्
सवेपथून् साध्वसमन्दचेतसः ।
निरीक्ष्य भर्तॄन् सुरताभिलाषिणः
स्त्रियोऽपराधान् समदा विसस्मरुः ॥ ६ ॥

प्रकामकामैर्युवभिः सुनिर्दयं
निशासु दीर्घास्वभिभाविताश्चिरम् ।
भ्रमन्ति मन्दं श्रमखेदितोरवः
क्षपावसाने नवयौवनाः स्त्रियः ॥ ७ ॥

Digitized by Google

अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं
हर्षान्विता विरचिताधरगण्डशोभा।
रक्तांशुकं परिदधाति नवं नताङ्गी
व्यालम्बिनी विलुलितालककुञ्चिताक्षी॥ १७॥
अन्याश्चिरं सुरतकेलिपरिश्रमेण
खेदं गताः प्रशिथिलीकृतगात्रयष्ट्यः।
संपीड्यमानविपुलोरुपयोधरार्त्ता
अभ्यञ्जनं विदधति प्रमदाः सुशोभाः॥ १८॥
बहुगुणरमणीयो योषितां चित्तहारी
परिनतबहुशालिव्याकुलग्रामसीमः।
विनिपतिततुषारः क्रौञ्चनादोपगीतः
प्रदिशतु हिमयुक्तः काल एष प्रियं वः॥ १९॥

इति कालिदासकृतावृतुसंहारे हेमन्तवर्णना
समाप्ता।

———

शिशिरवर्णना।

प्ररूढशालीक्षुचयावृतक्षितिं
सुखस्थितक्रौञ्चनिनादशोभितम्।
प्रकामकामं प्रमदाजनप्रियं
वरोरु! कालं शिशिराह्वयं शृणु॥ १॥
निरुद्धवातायनमन्दिरोदरं
हुताशनो भानुमतो गभस्तयः।

Digitized by Google

प्रिये ! प्रियङ्गुः प्रियविप्रयुक्ता
विपाण्डुतां याति विलासिनीव ॥ ११ ॥

पुष्पासवामोदसुगन्धिवक्त्रो
निश्वासवातैः सुरभीकृताङ्गः ।
परस्पराङ्गव्यतिसङ्गशायी
शेते जनः कामशरानुविद्धः ॥ १२ ॥

दन्तच्छदैर्दन्तविघातचिह्नैः
स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां
रतोपभोगो नवयौवनानाम् ॥ १३ ॥

काचिद्विभूषयति दर्पणसक्तहस्ता
बालातपेषु वनिता वदनारविन्दम् ।
दन्तच्छदं प्रियतमेन निपीतसारं
दन्ताग्रभिन्नमपकृष्य निरीक्षते च ॥ १४ ॥

अन्याः प्रकामसुरतश्रमखिन्नदेहा
नक्तं प्रजागरविपाटलनेत्रपद्माः ।
शय्यान्तदेशलुलिताकुलकेशपाशाः
निद्रां प्रयान्ति मृदुसूर्य्यकराभितप्ताः ॥ १५ ॥

निर्माल्यदामपरिभुक्तमनोज्ञगन्धं
मूर्ध्नोपनीय घननीलशिरोरुहान्ताः ।
पीनोन्नतस्तनभरानतगात्रयष्ट्यः
कुर्वन्ति केशरचनामपरास्तरुण्यः ॥ १६ ॥

Digitized by Google

रतिश्रमक्षामविपाण्डुवक्त्राः
प्राप्तेऽपि हर्षाभ्युदये तरुण्यः।
हसन्ति नोच्चैर्दशनाग्रभिन्नान्
प्रभिन्नरागानधरानवेक्ष्य ॥ ६ ॥
पीनस्तनोरस्थलभागशोभाम्
आपाद्य तत्पीडनजातखेदः।
तृणाग्रलग्नैस्तुहिनैः पतद्भि-
राक्रन्दतीवोषसि शीतकालः ॥ ७ ॥
प्रभूतशालिप्रसवैश्चितानि
मृगाङ्गनायूथविभूषितानि।
मनोहरक्रौञ्चनिनादितानि
सीमान्तराण्युत्सुकयन्ति चेतः ॥ ८ ॥
प्रफुल्लनीलोत्पलशोभितानि
शरारिकादम्बविघट्टितानि।
प्रसन्नतोयानि सशैवलानि
सरांसि चेतांसि हरन्ति यूनाम् ॥ ९ ॥
“मार्गं समीक्ष्यातिनिरस्तनीरं
प्रवासखिन्नं पतिमुद्वहन्त्यः।
प्रवेक्ष्यमाणा हरिणेक्षणाक्ष्यः
प्रबोधयन्तीव मनोरथानि ॥ १० ॥”
पाकं व्रजन्ती हिमसङ्गशीतै-
राधूयमाना सततं मरुद्भिः।

हेमन्तवर्णना ।

नवप्रवालोद्गमपुष्परम्यः
प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो
हेमन्तकालः समुपागतः प्रिये ! ॥ १ ॥
मनोहरैश्चन्दनरागगौरै
स्तुषारकुन्देन्दुनिभैश्च हारैः ।
विलासिनीनां स्तनशालिनीनां
नालंक्रियन्ते स्तनमण्डलानि ॥ २ ॥
न बाहुयुग्मेषु विलासिनीनां
प्रयान्ति सङ्गं वलयाङ्गदानि ।
नितम्बबिम्बेषु नवं दुकूलं
तन्वंशुकं पीनपयोधरेषु ॥ ३ ॥
काञ्चीगुणैः काञ्चनरत्नचित्रै-
र्नो भूषयन्ति प्रमदा नितम्बान् ।
न नूपुरैर्हंसरुतं भजद्भिः
पादाम्बुजान्यम्बुजकान्तिभाञ्जि ॥ ४ ॥
गात्राणि कालीयकचर्चितानि
सपत्रलेखानि मुखाम्बुजानि ।
शिरांसि कालागुरुधूपितानि
कुर्वन्ति नार्य्यः सुरतोत्सवाय ॥ ५ ॥

Digitized by Google

कुमुदमपि गतेऽस्तं लीयते चन्द्रविम्बे
हसितमिव वधूनां प्रोषितेषु प्रियेषु ॥ २२ ॥
शरदि कुमुदसङ्गाद्वायवो वान्ति शीता
विगतजलदवृन्दा दिग्विभागा मनोज्ञाः ।
विगतकलुषमम्भः शालिपक्वा धरित्री
विमलकिरणचन्द्रं व्योम ताराविचित्रम् ॥ २३ ॥
असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु
क्वणितकनककाञ्चीं मत्तहंसस्वनेषु ।
अधररुचिरशोभां बन्धुजीवे प्रियायाः
पथिकजन इदानीं रोदिति भ्रान्तचित्तः ॥२४॥
स्त्रीणां निधाय वदनेषु शशाङ्कलक्ष्मीं
हास्ये विशुद्धवदने कुमुदाकरश्रीम् ।
बन्धूककान्तिमधरेषु मनोहरेषु
क्वापि प्रयाति सुभगा शरदागमश्रीः ॥२५॥
विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
कुसुमितनवकाशा व्याकुलालम्बिवासा ।
कुमुदरुचिरहासा कामिनीवोन्मदेयं
उपदिशतु शरद्वश्चेतसः प्रीतिमग्र्याम् ॥ २६ ॥

इति कालिदासकृतावृतुसंहारे शरद्वर्णना
समाप्ता ।

हंसैर्जिता सुललिता गतिरङ्गनानां
अम्भोरुहैर्विकसितैर्मुखचन्द्रकान्तिः ।
नीलोत्पलैर्मदचलानि विलोचनानि
भ्रूविभ्रमाश्च सरितां तनुभिस्तरङ्गैः ॥ १७ ॥
श्यामा लताः कुसुमभारनतप्रवालाः
स्त्रीणां हरन्ति धृतभूषणबाहुकान्तिम् ।
दन्तावभासविशदस्मितवक्त्रकान्तिं
बन्धूकपुष्परचिता नवमालती च ॥ १८ ॥
केशान्नितान्तघननीलविकुञ्चिताग्रान्
आपूरयन्ति वनिता नवमालतीभिः ।
कर्णेषु च प्रचलकाञ्चनकुण्डलेषु
नीलोत्पलानि विकचानि निवेशयन्ते ॥ १८ ॥
हारैः सचन्दनरसैः स्तनमण्डलानि
श्रोणीतटं सुविपुलं रसनाकलापैः ।
पादाम्बुजानि वरनूपुरशेखरैश्च
नार्यः प्रहृष्टमनसोऽद्य विभूषयन्ति ॥ २० ॥
स्फुटकुमुदचितानां राजहंसाश्रितानां
मरकतमणिभासा वारिणा भूषितानाम् ।
श्रियमतिशयरूपां व्योमतोयाशयानां
वहति विगतमेघञ्चन्द्रतारावकीर्णम् ॥ २१ ॥
दिवसकरमयूखैर्बोध्यमानं प्रभाते
वरयुवतिमुखाभं पङ्कजं जृम्भतेऽद्य ।

मन्दप्रचारपवनोद्धतवीचिमाला-
न्युत्कण्ठयन्ति हृदयं सहसा सरांसि ॥ ११ ॥
नष्टं धनुर्बलभिदो जलदोदरेषु
सौदामिनी स्फुरति नाद्य वियत्पताका ।
धुन्वन्ति पक्षपवनैर्न नभो बलाकाः
पश्यन्ति नोन्नतमुखा गगनं मयूराः ॥ १२ ॥
नृत्यप्रयोगरहितान् शिखिनो विहाय
हंसानुपैति मदनो मधुरप्रगीतान् ।
त्यक्त्वा कदम्बकुटजार्जुनसर्जनीपान्
सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥ १३ ॥
शेफालिकाकुसुमगन्धमनोहराणि
स्वच्छस्थिताण्डजगणप्रतिनादितानि ।
पर्यन्तसंस्थितमृगीनयनोत्पलानि
प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम् ॥ १४ ॥
कह्लारपद्मकुसुमानि मुहुर्विधुन्वन्
तत्सङ्गमादधिकशीतलतामुपेत्य ।
सोत्कां करोति वनितां पवनः प्रभाते
पत्रान्तलग्नतुहिनानि हरंस्तरूणाम् ॥ १५ ॥
सम्पन्नशालिनिचयावृतभूतलानि
सुस्थस्थितप्रचुरगोकुलशोभितानि ।
हंसैश्च सारसकुलैः प्रतिनादितानि
सीमान्तराणि जनयन्ति जनप्रमोदम् ॥ १६ ॥

Digitized by Google

मन्दानिलाकुलितचारुविशालशाखः
पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफपरिपीतमधुप्रसेक-
श्चित्तं विदारयति कस्य न कोविदारः ? ॥ ६ ॥
तारागणप्रचुरभूषणमुद्वहन्ती
मेघोपरोधपरिमुक्तशशाङ्कवक्त्रा ।
ज्योत्स्नादुकूलममलं रजनी दधाना
वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥ ७ ॥
कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसकुलाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोरुणितास्तु नद्यः ॥ ८ ॥
नेत्रोत्सवो हृदयहारिमरीचिमालः
प्रह्लादकः शिशिरशीकरवारिवर्षी ।
पत्युर्वियोगविषदिग्धशरक्षतानां
चन्द्रो दहत्यनुदिनं तनुमङ्गनानाम् ॥ ९ ॥
आकम्पयन् फलभरानतशालिजालान्
आनर्त्तयन् कुरवकान् कुसुमावनम्रान् ।
प्रोत्फुल्लपङ्कजवनां नलिनीं विधुन्वन्
यूनां मनो मदयति प्रसभं नभस्वान् ॥ १० ॥
सोन्मादहंसमिथुनैरुपशोभितानि
स्वच्छानि फुल्लकमलोत्पलभूषितानि ।

Digitized by Google

शरद्वर्णना ।

काशांशुकाविकचपद्ममनोज्ञवक्त्रा
सोन्मादहंसरवनूपुरनादरम्या ।
आपक्वशालिललितानतगात्रयष्टिः
प्राप्ता शरन्नववधूरिव रम्यरूपा ॥ १ ॥

काशैर्मही शिशिरदीधितिना रजन्यो
हंसैर्जलानि सरितां कुमुदैः सरांसि ।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः
शुक्लीकृतान्युपवनानि च मालतीभिः ॥ २ ॥

चञ्चन्मनोज्ञशफरीरसनाकलापाः
पर्यन्तसंस्थितसिताण्डजपंक्तिहाराः ।
नद्यो विशालपुलिनोरुनितम्बबिम्बा
मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ॥ ३ ॥

व्योम क्वचिद्रजतशंखमृणालगौरै
स्त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः ।
उत्प्रेक्ष्यते पवनवेगचलैः पयोदै
राजेव चामरशतैरभिवीज्यमानः ॥ ४ ॥

भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं
बन्धूकपुष्परजसारुणिता च भूमिः ।
वप्राश्च पक्वकलमावृतभूमिभागा
उत्कण्ठयन्ति न मनो भुवि कस्य यूनः ? ॥ ५ ॥

विकचनवकदम्बैः कर्णपूरं वधूनां
रचयति जलदौघः कान्तवत् काल एषः ॥ २४ ॥
दधति कुचयुगाग्रैरुन्नतैर्हारयष्टिं
प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः ।
नवजलकणसेकादुद्गतां रोमराजीं
त्रिवलिवलिविभागैर्मध्यदेशैश्च नार्यः ॥ २५ ॥
नवजलकणसेकाच्छीततामादधानः
कुसुमभरनतानां नाशकः पादपानाम् ।
जनितसुरभिगन्धः केतकीनां रजोभि
रपहरति नभस्वान् प्रोषितानां मनांसि ॥२६॥
जलभरनमितानामाश्रयोऽस्माकमुच्चै-
रयमिति जलसेकैस्तोयदास्तोयनम्राः ।
अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः
समुपजनिततापं ह्लादयन्तीव विन्ध्यम् ॥२७॥
बहुगुणरमणीयो योषितां चित्तहारी
तरुविटपलतानां बान्धवो निर्विकारः ।
जलदसमय एष प्राणिनां प्राणहेतु
र्दिशतु तव हितानि प्रायशो वाञ्छितानि ॥२८

इति कालिदासकृतावृतुसंहारे वर्षावर्णना
समाप्ता ।

Digitized by Google

तडिल्लताः शक्रधनुर्विभूषिताः
पयोधरास्तोयभरावलम्बिनः ।
स्त्रियश्च काञ्चीमणिमेखलोज्ज्वला
हरन्ति चेतो युगपत् प्रवासिनाम् ॥ १९ ॥
मालाः कदम्बनवकेशरकेतकीभि
रायोजिताः शिरसि बिभ्रति योषितोऽद्य ।
कर्णान्तरेषु ककुभद्रुममञ्जरीभिः
श्रोत्रानुकूलरचितानवतंसकांश्च ॥ २० ॥
कालागुरुप्रचुरचन्दनचर्चिताङ्गाः
पुष्पावतंससुरभीकृतकेशपाशाः ।
श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे
शय्यागृहं गुरुगृहात् प्रविशन्ति नार्यः ॥ २१ ॥
कुवलयदलनीलैरुन्नतैस्तोयनम्रै
र्मृदुपवनविधूतैर्मन्दमन्दं चलद्भिः ।
अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः
पथिकजनवधूनां तद्वियोगक्षतानाम् ॥ २२ ॥
मुदित इव कदम्बैर्जातपुष्पैः समन्तात्
पवनचलितशाखैः शाखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिलनिषेकाच्छान्ततापो वनान्तः ॥ २३ ॥
शिरसि बकुलमालां मालतीभिः समेतां
विकसितवनपुष्पैर्यूथिकाकुड्मलैश्च ।

Digitized by Google

ससाध्वसैर्भेककुलैर्विलोकितं
प्रयाति निम्नाभिमुखं नवोदकम् ॥ १३ ॥

प्रफुल्लपत्रां नलिनीं समुत्सुका
विहाय भृङ्गा: श्रुतिहारिनिस्वना: ।
पतन्ति मूढा: शिखिनां प्रनृत्यतां
कलापचक्रेषु नवोत्पलाशया ॥ १४ ॥

वनद्विपानां नवतोयदस्वनै-
र्मदान्वितानां स्वनतां मुहुर्मुहु: ।
कपोलदेशा विमलोत्पलप्रभा:
सभृङ्गयूथैर्मदवारिभि: श्रिता: ॥ १५ ॥

सतोयनम्राम्बुदचुम्बितोपला:
समाचिता: प्रस्रवणै: समन्तत: ।
प्रवृत्तनृत्यै: शिखिभि: समाकुला:
समुत्सुकत्वं जनयन्ति भूधरा: ॥ १६ ॥

कदम्बसर्जार्जुननीपकेतकी-
र्विकम्पयंस्तत्कुसुमाधिवासित: ।
सशीकराम्भोधरसङ्गशीतल:
समीरण: कं न करोति सोत्सुकम् ॥ १७ ॥

शिरोरुहै: श्रोणितटावलम्बिभि:
कृतावतंसै: कुसुमै: सुगन्धिभि: ।
स्तनै: सुपीनैर्वदनै: सशीधुभि:
स्त्रियो रतिं सञ्जनयन्ति कामिनाम् ॥ १८ ॥

Digitized by Google

विपाटयन्त्यः पतितस्तटद्रुमान्
प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः प्रकामा इव जातविभ्रमाः
प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥ ७ ॥

तृणोद्गमैरुद्गतकोमलाङ्कुरैश्चितानि नीलैर्हरिणीमुखक्षतैः ।
वनानि रम्याणि हरन्ति मानसं विभूषितान्युद्गतपल्लवद्रुमैः ॥८॥

विलोलनेत्रोत्पलशोभिताननैर्मृगैः समन्तादुपजातसाध्वसैः ।
समाचिता सैकतिनी वनस्थली समुत्सुकत्वं प्रकरोति चेतसः ॥९॥

सुतीक्ष्णमुच्चैर्ध्वनतां पयोमुचां
घनान्धकारावृतशर्वरीष्वपि ।
तड़ित्प्रभादर्शितमार्गभूमयः
प्रयान्ति रागादभिसारिकाः स्त्रियः ॥ १० ॥

पयोधरैर्भीमगभीरनिस्वनै-
र्ध्वनद्भिरुद्वेजितचेतसो भृशम् ।
कृतापराधानपि योषितः प्रियान्
परिष्वजन्ते शयने निरन्तरम् ॥ ११ ॥

विलोचनेन्दीवरवारिविन्दुभि-
र्निषिक्तविम्बाधरचारुपल्लवाः ।
निरस्तमाल्याभरणानुलेपनाः
स्थिता निराशाः प्रमदाः प्रवासिनाम् ॥ १२ ॥

विपाण्डवं कीटरजस्तृणान्वितं
भुजङ्गवद्वक्रगतिप्रसर्पितम् ।

Digitized by Google

समागतो राजवदुद्धतध्वनि
र्घनागमः कामिजनप्रियः प्रिये ! ॥ १ ॥
नितान्तनीलोत्पलपत्रकान्तिभिः
क्वचित् प्रभिन्नाञ्जनराशिसन्निभः ।
क्वचित् सगर्भप्रमदास्तनप्रभैः
समाचितं व्योम घनैः समन्ततः ॥ २ ॥
तृषाकुलैश्चातकपक्षिणां कुलैः
प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं नववारिवर्षिणो
बलाहकाः श्रोत्रमनोहरस्वनाः ॥ ३ ॥
बलाहकाश्चाशनिशब्दभूषणाः
सुरेन्द्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनोग्रसायका
स्तुदन्ति चेतो ध्वनिभिः प्रवासिनाम् ॥ ४ ॥
प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः
समाचिता प्रोत्थितकन्दलीदलैः ।
विभाति शुक्लेतररत्नभूषिता
वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥ ५ ॥
सदा मनोज्ञाम्बुदनादसोत्सुकं
विभाति विस्तीर्णकलापशोभितम् ।
सविभ्रमालिङ्गनचुम्बनाकुलं
प्रवृत्तनृत्यं कुलमद्य बर्हिणाम् ॥ ६ ॥

Digitized by Google

प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
क्षपयति मृगयूथं प्रान्तलग्नो दवाग्निः ॥ २५ ॥
बहुतर इव जातः शाल्मलीनां वनेषु
स्फुटति कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखादुत्पतत्याशु वृक्षाद्
भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ॥ २६ ॥
गजगवयमृगेन्द्रा वह्निसन्तप्तदेहाः
सुहृद इव समेता द्वन्द्वभावं विहाय ।
हुतवहपरिखेदादाशु निर्गत्य कक्षाद्
विपुलपुलिनदेशात् निम्नगामाश्रयन्ते ॥ २७ ॥
कमलवनचिताम्बुः पाटलामोदरम्यः
सुखसलिलनिषेकः सेव्यचन्द्रांशुजालः ।
व्रजतु तव निदाघः कामिनीभिः समेतो
निशि सुललितगीतैर्हर्म्यपृष्ठे सुखेन ॥ २८ ॥

इति कालिदासकृतावृतुसंहारे काव्ये
ग्रीष्मवर्णना समाप्ता ।

वर्षावर्णना ।

ससीकराम्भोधरमत्तकुञ्जर-
स्तडित्पताकोऽशनिशब्दमर्दलः ।

रविप्रभोद्भिन्नशिरोमणिप्रभो
विलोलजिह्वाद्वयलीढमारुतः।
विषाग्निसूर्य्यातपतापितः फणी
न हन्ति मण्डूककुलं तृषाकुलः॥ २०॥

सफेनलालावृतवक्त्रसंपुटं
विनिर्गतालोहितजिह्वमुन्मुखम्।
तृषाकुलं निःसृतमद्रिगह्वराद्
गवेषमाणं महिषीकुलं जलम्॥ २१॥

पटुतरवनदाहात् प्लुष्टशस्यप्ररोहाः
परुषपवनवेगात् क्षिप्तसंशुष्कपर्णाः।
दिनकरपरितापात् क्षीणतोयाः समन्ताद्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः॥ २२॥

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जम्।
भ्रमति गवययूथः सर्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात्॥ २३॥

विकचनवकुसुम्भस्वच्छसिन्दूरभासा
प्रबलपवनवेगोद्भूतवेगेन तूर्णम्।
तरुविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन॥ २४॥

ध्वनति पवनविद्धः पर्वतानां दरीषु
स्फुटति पटुनिनादः शुष्कवंशस्थलीषु।

न हन्त्यदूरेऽपि गजान् मृगाधिपो
विलोलजिह्वश्चलिताग्रकेसरः ॥ १४ ॥
विशुष्ककण्ठोद्गतशीकराम्भसो
गभस्तिभिर्भानुमतोऽभितापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो
न दन्तिनः केसरिणोऽपि बिभ्यति ॥ १५ ॥
हुताग्निकल्पैः सवितुर्मरीचिभिः
कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्त्तिनं
कलापचक्रेषु निवेशिताननम् ॥ १६ ॥
सभद्रमुस्तं परिपाण्डुकर्दमं
सरः खनन्नायतपोत्रमण्डलैः ।
प्रदीप्तभासा रविणाभितापितो
वराहयूथो विशतीव भूतलम् ॥ १७ ॥
विवस्वता तीव्रतरांशुमालिना
सपङ्कतोयात् सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः
फणातपत्रस्य तले निषीदति ॥ १८ ॥
समुद्धृताशेषमृणालजालकं
विपन्नमीनं द्रुतभीतसारसम् ।
परस्परोत्पीडनसंहतैर्गजैः
कृतं सरः सान्द्रविमर्दकर्दमम् ॥ १९ ॥

Digitized by Google

सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य निर्यन्त्रणमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम् ॥ ९ ॥
असह्यवातोद्धतरेणुमण्डला
प्रचण्डसूर्य्यातपतापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः
प्रियावियोगानलदग्धमानसैः ॥ १० ॥
मृगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविता
निरीक्ष्य भिन्नाञ्जनसन्निभं नभः ॥ ११ ॥
सविभ्रमैः सस्मितजिह्मवीक्षितै-
र्विलासवत्यो मनसि प्रवासिनाम् ।
अनङ्गसन्दीपनमाशु कुर्वते
यथा प्रदोषाः शशिचारुभूषणाः ॥ १२ ॥
रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथि तप्तपांशुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन् मुहुः
फणी मयूरस्य तले निषीदति ॥ १३ ॥
तृषा महत्या हतविक्रमोद्यमः
श्वसन् मुहुर्भूरि विदारिताननः ।

सुतन्त्रिगीतं मदनस्य दीपनं,
शुचौ निशीथेऽनुभवन्ति कामिनः ॥ ३ ॥
नितम्बबिम्बैः सदुकूलमेखलैः
स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः
स्त्रियो निदाघं शमयन्ति कामिनाम् ॥ ४ ॥
नितान्तलाक्षारसरागलोहितै-
र्नितम्बिनीनां चरणैः सनूपुरैः ।
पदे पदे हंसरुतानुकारिभि-
र्जनस्य चित्तं क्रियते समन्मथम् ॥ ५ ॥
पयोधराश्चन्दनपङ्कचर्चिता-
स्तुषारगौरार्पितहारशेखराः ।
नितम्बदेशाश्च सहेममेखलाः
प्रकुर्वते कस्य मनो न सोत्सुकम् ॥ ६ ॥
समुद्गतस्वेदचिताङ्गसन्धयो,
विमुच्य वासांसि गुरूणि सांप्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयन्ते प्रमदाः सयौवनाः ॥ ७ ॥
सचन्दनाम्बुव्यजनोद्भवानिलैः
सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकी-काकलि-गीतनिस्वनैः
प्रबुध्यते सुप्त इवाद्य मन्मथः ॥ ८ ॥

कुसुमे कुसुमोत्पत्तिः श्रूयते न तु दृश्यते।
बाले तव मुखाम्भोजे कथमिन्दीवरद्वयम्॥ १७॥
अयि मन्मथचूतमञ्जरि! अवधायतचारुलोचने!
अपहृत्य मनः क्व यासि मे शिमराजकमत्र राजते॥ १८॥
कोपस्त्वया यदि कृतो मयि पङ्कजाक्षि!
सोऽस्तु प्रियस्तव किमन्न विधेयमन्यत्।
आश्लेषमर्पय मदर्पितपूर्व्वमुच्चै-
रुच्चैः समर्पय मदर्पितचुम्बनञ्च॥ २०॥
इति श्रीकालिदासकृतं शृङ्गारतिलकं समाप्तम्।

ऋतुसंहारः।

ग्रीष्मवर्णना।

प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षमवारिसञ्चयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये!॥ १॥
निशाः शशाङ्कः क्षतनीरराजयः
क्वचिद्विचित्रं जलयन्त्रमन्दिरम्।
मणिप्रकाराः सरसञ्च चन्दनं,
शुचौ प्रिये! यान्ति जनस्य सेव्यताम्॥ २॥
सुवासितं हर्म्यतलं मनोरमं,
प्रियामुखोच्छ्वासविकम्पितं मधु।

Digitized by Google

बालाहं नवयौवना निशि कथं स्थातव्यमस्मद्गृहे
सायं सम्प्रति वर्त्तते पथिक हे! स्थानान्तरं गम्यताम्॥११॥
यामिन्येषा बहुलजलदैर्व्वभीमान्धकारा
निद्रां यातो मम पतिरसौ क्लेशितः कर्म्मदुःखी।
बाला चाहं मनसिजभयात् प्राप्तगाढप्रकम्पा
ग्रामश्चौरैरयमुपहृतः पान्थ! निद्रां जहीहि॥१२॥
क्व भ्रान्तश्चलितोऽसि? वैद्यकगृहं, किं तत्र? मान्द्यै रुजां
किं ते नास्ति सखे! गृहे प्रियतमा सर्व्वं गदं हन्ति या? ।
वातश्चे त् कुचकुम्भमर्द्दनवशात् पित्तञ्च वक्त्रामृतात्
श्लेष्माणं विनिहन्ति हन्त! सुरतव्यापारकेलिश्रमात्॥१३

दृष्टिं देहि पुनर्बाले! कमलायतलोचने! ।
श्रूयते हि पुरा लोके विषस्य विषमौषधम्॥१४॥

अन्तर्गता मदनवह्निशिखावली या
सा बाधते किमिह चन्दनलेपनेन।
यत् कुम्भकारपवनोपरि पङ्कलेप-
स्तापाय केवलमसौ न तु तापशान्त्यै॥१५॥

दृष्ट्वा यासां नयनसुभगं वक्त्रवाराङ्गनानां
देशत्यागः परमकृतिभिः कृष्णसारैरकारि।
तासामेव स्तनयुगजिता दन्तिनः सन्ति मत्ताः
प्रायो मूर्खः परिभवविधौ नाभिमानं तनोति॥१६॥
अपूर्वो दृश्यते वह्निः कामिन्याः स्तनमण्डले।
दूरतो दहते गात्रं हृदि लग्नस्तु शीतलः॥१७॥

Digitized by Google

झटिति प्रविश गेहं मा वहिस्तिष्ठ कान्ते!
ग्रहणसमयवेला वर्त्तते शीतरश्मेः।
अयि! सुविमलकान्तिं वीक्ष्य नूनं स राहु-
र्ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय॥ ६॥

कस्तूरीवरपत्रभङ्गनिकरो भ्रष्टो न गण्डस्थले
नो लुप्तं सखि! चन्दनं स्तनतटे धौतं न नेत्राञ्जनम्।
रागो न स्खलितस्तवाधरपुटे ताम्बूलसंवर्द्धितः
किं रुष्टासि गजेन्द्रमन्दगमने! किं वा शिशुस्ते पतिः?॥७॥

समायाते कान्ते कथमपि च कालेन बहुना
कथाभिर्देशानां सखि! रजनिरर्द्धं गतवती
ततो यावल्लीलाकलहकुपितास्मि प्रियतमे
सपत्नीव प्राची दिगियमभवत् तावदरुणा॥ ८॥

श्लाघ्यं नीरसकाष्ठताड़नशतं श्लाघ्यः प्रचण्डातपः
क्लेशः श्लाघ्यतरः सुपङ्कनिचयैः श्लाघ्योऽतिदाहोऽनलैः।
यत् कान्ताकुचपार्श्वबाहुलतिकाहिल्लोललीलासुखं
लब्धं कुम्भकर! त्वया; न हि सुखं दुःखैर्विना लभ्यते॥९॥

किं मे वक्त्रमुपेत्य चुम्बसि बलात् निर्लज्ज! लज्जा न ते
वस्त्रान्तं शठ! मुञ्च मुञ्च शपथैः किं धूर्त्त! निर्बध्नसे।
खीणाहं तव रात्रिजागरवशात् तामेव याहि प्रियां
निर्माल्योज्झितपुष्पदामनिकरे का षट्पदानां रतिः॥१०॥

वाणिज्येन गतः स मे गृहपतिर्वार्त्तापि न श्रूयते
प्रातस्तज्जननी प्रसूततनया जामातृगेहं गता।

Digitized by Google

शृङ्गारतिलकम्।

बाहू द्वौ च मृणालमास्यकमलं लावण्यलीला जलं
श्रोणी तीर्थशिला च नेत्रसफरं धम्मिल्लशैवालकम्।
कान्तायाः स्तनचक्रवाकयुगलं कन्दर्पबाणानलै-
र्दग्धानामवगाहनाय विधिना रम्यं सरो निर्मितम्॥१॥

आयाता मधुयामिनी यदि पुनर्नायात एव प्रभुः
प्राणा यान्तु विभावसौ यदि पुनर्जन्माहं प्रार्थये।
व्याधः कोकिलबन्धने विधुपरिध्वंसे च राहुग्रहः
कन्दर्पे हरनेत्रदीधितिरियं प्राणेश्वरे मन्मथः॥२॥

इन्दीवरेण नयनं मुखमम्बुजेन
कुन्देन दन्तमधरं नवपल्लवेन।
अङ्गानि चम्पकदलैः स विधाय धाता
कान्ते! कथं घटितवानुपलेन चेतः॥३॥

एको हि खञ्जनवरो नलिनीदलस्थो
दृष्टः करोति चतुरङ्गबलाधिपत्यम्।
किं मे करिष्यति? भवद्वदनारविन्दे
जानामि नो नयनखञ्जनयुग्ममेतत्॥४॥

ये ये खञ्जनमेकमेव कमले पश्यन्ति दैवात् क्वचित्
ते सर्वे मनुजा भवन्ति सुतरां प्रख्यातभूमीभुजः।
त्वद्वक्त्राम्बुजनेत्रखञ्जनयुगं पश्यन्ति ये ये जना-
स्ते ते मन्मथबाणजालविकला मुग्धे! किमित्यद्भुतम्!॥५॥

चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे
सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थ-वैश्वानरे।
दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे
मोक्षार्थं कुरु चित्तवृत्तिममलामन्यैस्तु किं कर्मभिः॥१४॥
किं दानेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं?
किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्।
ज्ञात्वैतत् क्षणभङ्गुरं सपदि रे! त्याज्यं मनो दूरतः
स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम्॥१५॥
करचरणकृतं वा कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम्।
विदितमविदितं वा सर्व्वमेतत् क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शम्भो! ॥१६॥
गात्रं भस्मसितं सितञ्च हसितं हस्ते कपालं सितं
खट्वाङ्गञ्च सितं सितश्च वृषभः कर्णे सिते कुण्डले।
गङ्गाफेनसितं जटापयसि तच्चन्द्रः सितो मूर्द्धनि
सोऽयं सर्वसितो ददातु विभवं पापक्षयं शङ्करः॥१७॥

इति श्रीपरमहंसपरिव्राजकाचार्य-श्रीशङ्कराचार्य-
भगवत्कृतमपराधभञ्जनस्तोत्रं समाप्तम्।

नानीता पद्ममाला सरसि विकसिता गन्धपुष्पे त्वदर्थं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो !॥८
दुग्धैर्मध्वाज्ययुक्तैर्घटशतसहितैः स्नापितं नैव लिङ्गं
नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः ।
धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो !॥९॥
नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो
नासाग्रे न्यस्तदृष्टिर्विदितभवगुणैर्नैव दृष्टं कदाचित् ।
उन्मन्यावस्थया त्वां विगतकलिमलं शङ्करं न स्मरामि,
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो !॥१०॥
ध्यानं चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो,
हव्यं ते लक्षसंख्यं हुतवहवदने नार्पितं बीजमन्त्रैः ।
नो जप्तं गाङ्गतीरे व्रतपरिचरणैरुद्रजाप्यैर्न वेदैः,
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ! ॥११॥
स्थित्वास्थाने सरोजे प्रणवमयमरुत् कुम्भके सूक्ष्ममार्गे,
शान्ते स्वान्ते प्रलीने प्रकटितगहने ज्योतिरूपे पराख्ये ।
लिङ्गं तद्ब्रह्मवाच्यं सकलमभिमतं नैव दृष्टं कदाचित्,
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो !॥१२॥
आयुर्नश्यति पश्यतां प्रतिदिनं, याति क्षयं यौवनं,
प्रत्यायान्ति गताः पुनर्न दिवसाः, कालो जगद्भक्षकः ।
लक्ष्मीस्तोयतरङ्गभङ्गचपला, विद्युत्-चलं जीवनं,
तस्मान्मां शरणागतं शरणद ! त्वं रक्ष रक्षाधुना ॥ १३ ॥

Digitized by Google

आदौ कर्मप्रसङ्गात् कलयति कलुषं मातृकुक्षौ स्थितः सन्,
विण्मूत्रामेध्यमध्ये व्यथयति नितरां जाठरो जातवेदाः ।
यद्यद्वा तत्र दुःखं विषयति विषमं शक्यते केन वक्तुं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ! ॥ ३ ॥
बाल्ये दुखातिरेको मललुलितवपुः स्तन्यपाने पिपासा,
नो शक्यं चेन्द्रियेभ्यो भवगुणजनिता जन्तवो मां तुदन्ति ।
नानारोगोत्थदुःखादुदरपरिवशः शङ्करं न स्मरामि,
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ! ॥ ४ ॥
प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ
दष्टो नष्टो विवेकः सुतधनयुवतीस्वादुसौख्ये निषण्णः ।
शैवे चिन्ताविहीनं मम हृदयमहो ! मानगर्वाधिरूढं,
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ! ॥ ५ ॥
वार्द्धक्ये चेन्द्रियाणां विगतगतमतेराधिदैवादितापैः
पापै रोगैर्वियोगैरसहृशवपुषं प्रौढहीनञ्च दीनम् ।
मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ! ॥ ६ ॥
नो शक्यं स्मार्त्तकर्म प्रतिपदगहनं प्रत्यवायाकुलाख्यं
श्रौते वार्त्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गे च सारे ।
नष्टो धर्मो विचारः श्रवणमननयोः को निदिध्यासितव्यः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ! ॥ ७ ॥
स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गाङ्गतोयं
पूजार्थं वा कदाचिद् बहुतरगहनात् खण्डबिल्वैकपत्रम् ।

Digitized by Google

वने वने कुञ्जवने मुरारिं
भ्रमन् भ्रमन् भ्राजति राधिका च ।
सदैव कुञ्जे रमते च राधया,
पायादपायादिह कृष्ण एकः ॥ १९ ॥
अनन्त ! विश्वम्भर ! वासुदेव !
समस्तदेवैरपि वन्द्यपाद !
निरामय ! प्राणपते ! मुरारे !
हरे ! हराशेषमहाघसङ्घम् ॥ २० ॥

इति श्रीधरस्वामिना विरचितं व्रजविहाराख्यं
समाप्तम् ।

अपराधभञ्जनस्तोत्रम् ।

शान्तं पद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिनेत्रम् ।
शूलं वज्रञ्च खड्गं परशुमपि वरं दक्षिणाङ्गे वहन्तम् ।
नागं पाशञ्च घण्टां डमरुकसहितं चाङ्कुशं वामभागे
नानालङ्कारदीप्तं स्फटिकमणिनिभं पार्वतीशं भजामि ॥१॥
वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्य्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम्॥२॥

Digitized by Google

नाशाय बालकगणान् सखि कंसराजः,
तां पूतनां मानुषराक्षसीञ्च ।
संप्रेषयामास यदा तदा तां,
मायाशिशुः प्राणसमं चुचोष ॥ १३ ॥

जिघांसया समायान्तीं पूतनां राक्षसीवराम् ।
क्रोडे कृत्वा स्तन्यदात्रीं जघान बालको हरिः ॥१४॥

गोपीगणो तमिह कामदृशा भजन्ते,
यं भक्तिभाज इह केवलभक्तिभावैः ।
यं योगिनो हृदि धिया परिचिन्तयन्ति,
तं केशवं कमललोचनमाश्रयेऽहम् ॥ १५ ॥

कृष्णे कारुण्यपूर्णे शशधरवदने पीतकौशेयवस्त्रे
रत्नालङ्कारभूषे सजलजलधरश्यामले सुन्दराङ्गे ।
वंशीवाद्यप्रमोदे व्रजजनयुवतीजीवने यादवेन्द्रे
भूयाद्भक्तिर्दृढा मे सकलसुरवरैः सेव्यमाने मुरारौ ॥१६॥

वृन्दारण्ये विहरति सदा वासुदेवो दयालु,
गोपस्त्रीभिः स्मरशरशतैर्भिन्नहृत्कामुकीभिः ।
गोपैर्बालैरपि सहचरैः सार्धमानन्दयुक्तो,
योऽसौ कृष्णः परमकरुणस्तं सदा चिन्तयेऽहम् ॥ १७ ॥

वृन्दावनस्थानविहारहेतो,
राधासमं कुञ्जगृहप्रवेशम् ।
चकार गोपीजनवल्लभोऽसौ,
पायादपायादपि मां मुरारिः ॥ १८ ॥

धिक् तान् धिक् तान् धिगेतान् कथयति नितरां
कीर्त्तनस्थो मृदङ्गः । ७ ॥

केचिद् वदन्ति धनहीनजनो जघन्यः,
केचिद् वदन्ति गुणहीनजनो जघन्यः ।
व्यासो वदत्यखिलवेदविशेषविज्ञो
नारायणस्मरणहीनजनो जघन्यः ॥ ८ ॥

वृन्दावने वृक्षलताप्रताने
वृन्दावनेशस्य विहारहेतोः ।
पुरा विधात्रा रचितान् सुकुञ्जान्,
जगाम कृष्णः सह राधया सः ॥ ९ ॥

नवीनमेघोपमनीलदेहः,
सुपीतपट्टाम्बरयुग्मधारी ।
स्मिताननः कुण्डलवान् किरीटी,
वंशीधरो मालतिमाल्यधारी ॥ १० ॥

नवीननीलाम्बुदकान्तिमद्वपुः,
सकेशरवक्त्राम्बुजवेणुवादनः ।
अनेकरत्नाभरणै र्विभूषितः,
स सुन्दराङ्गो महसा महोज्ज्वलः ॥ ११ ॥

गोपीजनानन्दकरो मुरारिः
वृन्दावनेन्द्रो वनमाल्यशोभी ।
वंशीनिनादेन व्रजाङ्गनानां
मनांसि सम्मोहितवान् स कामी ॥ १२ ॥

कस्त्वं बाल ? बलानुजस्त्वमिह किं ? मन्मन्दिराशङ्कया
युक्तं तत् नवनीतकुम्भविवरे हस्तं कथं न्यस्यसि ?
कर्त्तुं तत्र पिपीलिकापनयनं सुप्ताः किमुद्बोधिताः ?
बाला वत्सगतिं विवेक्तुमिति संजल्पन् हरिः पातु वः ॥ २ ॥

जीर्णा तरिः सरिदतीवगभीरनीरा
बाला वयं सकलमित्यमनर्थहेतुः ।
निस्तारबीजमिदमेव कृशोदरीणां
यन्माधवस्त्वमसि सम्प्रति कर्णधारः ॥ ४ ॥

श्रीश्रीकृष्णो जयति जगतां जन्मदाता च पाता
हर्त्ता चान्ते हरति भजतां यश्च संसारभीतिम् ।
राधानाथः सजलजलदश्यामलः पीतवासा
वृन्दारण्ये विहरति सदा सच्चिदानन्दरूपः ॥ ५ ॥

ज्योतीरूपं परमपुरुषं निर्गुणं नित्यमेकं
नित्यानन्दं निखिलजगतामीश्वरं विश्ववीजम् ।
गोलोकेशं द्विभुजमुरलीधारिणं राधिकेशं
वन्दे वृन्दारकहरिहरब्रह्मवन्द्यांघ्रिपद्मम् ॥ ६ ॥

येषां श्रीमद्यशोदासुतपदकमले
नास्ति भक्तिर्नराणां
येषामाभीरकन्याप्रियगुणकथने
नानुरक्ता रसज्ञा ।
येषां श्रीकृष्णलीलाललितगुणकथा
सादरौ नैव कर्णौ

Digitized by Google

तीर्थानामवगाहनानि च गजज्ञानं विना यत् पद-
द्वन्द्वाम्भोरुहसंस्तुतिं विजयते देवः स नारायणः ॥ २० ॥

आनन्द गोविन्द मुकुन्द राम
नारायणानन्त निरामयेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चित्
अहो जनानां व्यसनानि मोक्षे ॥ २१ ॥

क्षीरसागरतरङ्गशीकरासारतारकितचारुमूर्तये ।
भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ॥२२॥

इति श्रीकुलशेखरेण राज्ञा विरचिता
मुकुन्दमाला समाप्ता ।

व्रजविहारः ।

गायन्तीनां गोपसीमन्तिनीनां
स्फीताकाङ्क्षामच्चिरोलम्बमालाम् ।
नित्याश्वस्यामाश्रवन्नारविन्दे
कुर्वन्नव्याद्देवकीनन्दनो वः ॥ १ ॥

सुपर्णस्वर्णाद्रौ रचितमणिशृङ्गो जलधिजा
मुखाम्भोजे भृङ्गो निगमविलसत्पञ्जरशुकः ।
त्रिलोकीकस्तूरीतिलककमनीयो व्रजवधू-
विहारी श्रीकृष्णो दिशतु भवतां शर्म सततम् ॥२॥

Digitized by Google

मिथ्यादृष्टिर्मा च मे स्यात् कदाचित्
जातौ जातौ विष्णुभक्तो भवेयम् ॥ १४ ॥
कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतिप्रमादात् ।
करोमि यद्यत् सकलं परस्मै
नारायणायैव समर्पयामि ॥ १५ ॥
यत् कृतं यत् करिष्यामि तत् सर्वं न मया कृतम् ।
त्वया कृतन्तु फलभुक् त्वमेव मधुसूदन ! ॥ १६ ॥
भवजलधिमगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मा स्म गाः कातरत्वम् ।
सरसिजदृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥ १७ ॥
तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले
दारावर्त्ते नयनसहजग्राहसङ्घाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद ! भवतो भक्तिभावे प्रसीद ॥ १८ ॥
पृथ्वीरेणुरणुः पयांसि कणिकाः फल्गुः स्फुलिङ्गो लघुः
तेजो निःश्वसनं मरुत्तनुतरं रन्ध्रं सुसूक्ष्मं नभः ।
क्षुद्रा रुद्रपितामहप्रभृतयः कीटाः समस्ताः सुरा
दृष्टे यत्र स तारको विजयते श्रीपादधूलीकणः ॥ १९ ॥
आम्नायाभ्यसनान्यरण्यरुदितं कृच्छ्रव्रतान्यन्वहं
मेदश्छेदपदानि पूर्त्तविधयः सर्वं हुतं भस्मनि ।

Digitized by Google

नवधीरितमारदारविन्दो
चरणौ ते मरणेऽपि चिन्तयामि ॥ ८ ॥
सरसिजनयने सशंखचक्रे
मुरभिदि मा विरमेह चित्त ! रन्तुम् ।
सुखतरमपरं न जातु जाने
हरिचरणस्मरणामृतेन तुल्यम् ॥ ९ ॥

मा भैर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातना
नैवामी प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदकरणे दासस्य किं न चमः ? ॥१०॥

भवजलधिगतानां द्वन्द्ववाताहतानां
सुत-दुहितृ-कलत्रत्राणभारार्दितानाम् ।
विषमविषयतोये मज्जतामप्लवानां
भवति शरणमेको विष्णुपोतो नराणाम् ॥ ११ ॥

रजसि निपतितानां मोहजालावृतानां
जननमरणदोलादुर्गसंसर्गकाणाम् ।
शरणमशरणानामेकएवातुराणां
कुशलपथनियुक्तश्चक्रपाणिर्नराणाम् ॥ १२ ॥

अपराधसहस्रसङ्कुलं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे ! कृपया केवलमात्मसात् कुरु ॥१३॥

मा मे स्त्रीत्वं मा च मे स्यात् कुभावो
मा मूर्खत्वं मा कुदेशेषु जन्म ।

Digitized by Google

नाथेति नागशयनेति जगन्निवासे-
त्यालापिनं प्रतिदिनं कुरु मां मुकुन्द! ॥ २ ॥

जयतु जयतु देवो देवकीनन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ ३ ॥

मुकुन्द! मूर्द्ध्ना प्रणिपत्य याचे
भवन्तमेकान्तमियन्तमर्थम्।
अविस्मृतिस्त्वच्चरणारविन्दे
भवे भवे मेऽस्तु तव प्रसादात् ॥ ४ ॥

श्रीगोविन्दपदाम्भोजमधुनो महदद्भुतम्।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥ ५ ॥

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे! नारकं नापनेतुम्।
रम्या रामा मृदुतनुलता नन्दने नापि रन्तुं
भावे भावे हृदयभवने भावयेऽहं भवन्तम् ॥ ६ ॥

नास्था धर्मे न वसु-निचये नैव कामोपभोगे
यद्भाव्यं तद्भवतु भगवन्! पूर्व्वकर्मानुरूपम्।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥ ७ ॥

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक! प्रकामम्।

Digitized by Google

अमन्थि मुरवैरिणा पुनरबन्धि लङ्कारिणा
क्व नाम वसुधापते ! तव यशोऽम्बुधिः कोऽम्बुधिः ॥ ९ ॥

स्वस्ति श्रीभोजराज त्रिभुवनविजयी धार्मिकः सत्यवादी
पित्रा ते मे गृहीता नव नवतियुता रत्नकोटिर्मदीया ।
तां त्वं मे देहि शीघ्रं सकलबुधजनैर्ज्ञायते सत्यमेतत्
नो वा जानन्ति केचिन्नवकृतमितिचेद् देहि लक्षं ततो मे ॥१०॥

मागाः प्रत्युपकारकातरधिया वैमुख्यमाकर्णय
श्रीकर्णाटवसुन्धराधिपसुधासिक्तानि सूक्तानि मे ।
वर्ण्यन्ते कति नाम नार्णवनदीभूगोलविन्ध्याटवी
झञ्झामारुतचन्द्रमःप्रभृतयस्तेभ्यः किमाप्तं मया ॥ ११ ॥

इति श्रीमहाकवि कालिदासकृतं महापद्मषट्कं
समाप्तम् ।

मुकुन्दमाला ।

वन्दे मुकुन्दमरविन्ददलायताक्षं
कुन्देन्दुशंखदशनं शिशुगोपवेशम् ।
इन्द्रादिदेवगणवन्दितपादपीठं
वृन्दावनालयमहं वसुदेवसूनुम् ॥ १ ॥

श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुण्ठनकोविदेति ।

Digitized by Google

कालिदासेन सहितौ भोजराजसभां ययौ।
अथ दृष्ट्वा स राजानमाशिषं प्रजगाद ह ॥ ४ ॥

राजन्! अभ्युदयोऽस्तु शङ्करकवे! किं पत्रिकायामिदं?
पद्यं—कस्य? तवैव कीर्त्तिरचना तत् पठ्यतां—पठ्यते।
किन्त्वासामरविन्दसुन्दरदृशां द्राक् चामरान्दोलना
दुद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः क्षणं वार्यताम् ॥ ५ ॥

महाराज! श्रीमन्! जगति यशसा ते धवलिते
पयः पारावारं परमपुरुषोऽयं मृगयते।
कपर्दी कैलाशं करिवरमथोयं कुलिशभृत्
कलानाथं राहुः कमलभवनो हंसमधुना ॥ ६ ॥

नीरक्षीरे गृहीत्वा सकलखगपतीन् यातिनालैकजन्मा
तक्रं धृत्वा कराब्जे सकलजलनिधीन् चक्रपाणिर्मुकुन्दः।
सर्वानुत्तुङ्ग्य शैलान्दहति पशुपतिर्भालनेत्रेण पश्यन्
व्याप्ता त्वत्कीर्त्तिकान्ता सकलवसुमतीं भोजराज! क्षितीन्द्र! ॥ ७ ॥

श्रीमद्राजशिखामणे! तुलयितुं धाता त्वदीयं यशः
कैलाशस्य निरीक्ष्य-तत्र लघुतां तत्पूर्तये पर्यधात्।
उक्षाणं तदुपर्युमासहचरं तन्मूर्ध्नि गङ्गाभरं
तस्याग्रे फणिपुङ्गवं तदुपरि स्फारं सुधादीधितीम् ॥ ८ ॥

अपायि मुनिना पुरा पुनरमायि मर्य्यादया
अतारि कपिना पुरा पुनरदाहि लङ्कारिणा।

Digitized by Google

तत्र शुक उवाच ।

परीवादस्तथ्यो भवति वितथो वापि महताम्
अतथ्यस्तथ्यो वा हरति महिमानं जनरवः ।
तुलोत्तीर्णस्यापि प्रकटितहताशेषतमसो
रवेस्तादृक्तेजो नहि भवति कन्यां गतवतः ॥ १९ ॥

राजोवाच ।

सुधांशोर्जातेयं कथमपि कलङ्कस्य कणिका
विधातुर्दोषोऽयं न च गुणनिधेस्तस्य किमपि ।
स किं नात्रेः पुत्रो न किमु हरचूडार्चनमणि-
र्न वा हन्ति ध्वान्तं जगदुपरि किं वा न वसति ॥ २० ॥

इति श्रीकविभट्टकृतः पद्यसंग्रहः समाप्तः ।

मल्हापद्यम् ।

अस्थिवद्दधिवच्चैव शंखवद्बकवत्तथा ।
राजन् ! तव यशो भाति पुनः संन्यासिदन्तवत् ॥ १ ॥
कालिदास इमं श्लोकं स्वकवित्वस्य गोपकम् ।
लिखित्वा प्रददौ पत्रं कवये शङ्कराय वै ॥ २ ॥
पठित्वा शङ्करः श्लोकं प्रहसन् कौतुकाय तत् ।
पत्रं करे समादाय सानन्दस्त्वरया तदा ॥ ३ ॥

Digitized by Google

तुरगशतसहस्रं गो-गजानाञ्च लक्षं
कनकरजतपात्रं मेदिनीं सागरान्ताम् ।
विमलकुलवधूनां कोटिकन्याश्च दद्यात्
नहि नहि सममेतैरन्नदानं प्रधानम् ॥ १४ ॥

कालिदासकविता नवं वयः माहिषं दधि सशर्करं पयः ।
ऐनमांसमबला च कोमला सम्भवन्तु मम जन्मजन्मनि ॥ १५ ॥

नाचराचि पठता किमपाठि ?
पाठितोऽपि किमु विस्मृत एव ? ।
इत्यशर्थिजनसंशयदोला
खेलनां खलु चकार नकारः ॥ १६ ॥

सरस्वतीं प्रति कवेः ।

शैत्यं नाम गुणस्तवैव सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां ! भवन्ति शुचयः स्पर्शेन यस्या परे ।
किं चातः परमं तव स्तुतिपदं त्वं जीवनं जीविनां
त्वं चेन्नीचपथेन गच्छसि पयः ! कस्त्वां निरोद्धुं क्षमः ? ॥१७॥

बह्मा उवाच ।

तापो नापगतस्तृषा न च कृशा धौता न धूली तनो
र्न स्वच्छन्दमकारि कन्दकवलः का नाम केलीकथा ।
दूरोत्क्षिप्तकरेण हन्त करिणा स्पृष्टा नवा पद्मिनी
प्रारब्धो मधुपैरकारणमहो ! झङ्कारकोलाहलः ॥ १८ ॥

Digitized by Google

वयोगते किं वनिताविलासः ?
पयोगते किं खलु सेतुबन्धः ? ॥ ८ ॥

वरमसिधारा तरुतलवासो
वरमिह भिक्षा वरमुपवासः।
वरमपि घोरे नरके पतनं
न च धनगर्वितबान्धवशरणम् ॥ ९ ॥

कुग्रामवासः कुजनस्य सेवा
कुभोजनं क्रोधमुखी च भार्य्या।
मूर्खश्च पुत्रो विधवा च कन्या
विनाग्निना संदहते शरीरम् ॥ १० ॥

वरं मौनं कार्य्यं न च वचनमुक्तं यदनृतं
वरं क्लैव्यं पुंसां न च परकलत्राभिगमनम्।
वरं भैक्ष्याशित्वं न च परधनास्वादनसुखं
वरं प्राणत्यागो न च पिशुनवादेष्वभिरतिः ॥ ११ ॥

निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपः
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेश्वरत्वं पुनः।
चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्राह्मं पदं वाञ्छति
ब्रह्मा विष्णुपदं हरिः शिवपदं त्वाशावधिं को गताः ? ॥१२॥

ख्यातः शक्रो भगाङ्को विधुरपि मलिनो माधवो गोपजातो
वेश्यापुत्रो वशिष्ठः सकृजपदयमः सर्वभक्ष्यो हुताशः।
व्यासो मत्स्योदरीयः सलवण उदधिः पाण्डवा जारजाता
रुद्रः प्रेतास्थिधारी त्रिभुवनवसतां कस्य दोषो न जातः ॥१३॥

कासारेऽपि विकाशिपङ्कजचये खेलन्मराली पुनः
क्रौञ्चस्वचुपुटेन कुञ्चितवपुः शम्बूकमन्वेषते ॥ २ ॥
अतिरमणीये काव्येऽपि पिशुनो दूषणमन्वेषयति ।
अतिरमणीये वपुषि व्रणमिव मक्षिकानिकरः ॥ ३ ॥
कीर्त्तिस्वर्गतरङ्गिणीभिरभितो वैकुण्ठमाप्लावितं
क्षौणीनाथ ! तव प्रतापतपनैः सन्तापितः क्षीरधिः ।
इत्येवं दयितायुगेन हरिणा त्वं याचितः स्वाश्रयं
हृत्पद्मं हरये श्रिये स्वभवनं कण्ठं गिरे दत्तवान् ॥ ४ ॥
रवेः कवेः किं समरस्य सारं ?
कृषेर्भयं किं किमदन्ति भृङ्गाः ? ।
सदा भयं चाप्यभयञ्च केषां ?
भागीरथीतीरसमाश्रितानाम् ॥ ५ ॥
वासः काञ्चनपिञ्जरे नृपकराम्भोजैस्तनूमार्जनं
भक्ष्यं स्वादुरसालदाडिमफलं पेयं सुधाभं पयः ।
पाठः संसदि रामनाम सततं धीरस्य कीरस्य मे
हाहा हन्त ! तथापि जन्मविटपिक्रोडं मनो धावति ॥ ६ ॥
उदयति यदि भानुः पश्चिमे दिग्विभागे
विकसति यदि पद्मं पर्वतानां शिखाग्रे ।
प्रचलति यदि मेरुः शीततां याति वह्नि
र्न चलति खलु वाक्यं सज्जनानां कदाचित् ॥ ७ ॥
निर्वाणदीपे किमु तैलदानं ?
चौरे गते वा किमु सावधानम् ? ।

Digitized by Google

शिवाकान्त! शान्त! स्मरारे! पुरारे!
त्वदन्यो वरेण्यो न मान्यो न गण्यः॥ ९॥

शम्भो! महेश! करुणामय! शूलपाणे!
गौरीपते! पशुपते! पशुपाशनाशिन्!
काशीपते! करुणया जगदेतदेक
स्त्वं हंसि पासि विदधासि महेश्वरोऽसि॥ १०॥

त्वत्तो जगद्भवति देव! भव! स्मरारे!
त्वय्येव तिष्ठति जगन्मृड! विश्वनाथ!।
त्वय्येव गच्छति लयं जगदेतदीश!
लिङ्गात्मके हर! चराचरविश्वरूपिन्!॥ ११॥

इति श्रीमद्भगवत् शङ्कराचार्यविरचितं वेदसार-
शिवस्तोत्रं सम्पूर्णम्।

पद्यसंग्रहः।

नत्वा तां परमेश्वरीं शिवकरीं श्रीभारतीं भास्वतीं
गङ्गातीरनिवासिना सुकविना लोकोपकारार्थिना।
नानापण्डितवक्त्रनिर्गतवतां निर्मीयते केनचित्
पद्यानामिह संग्रहोऽमृतकथाप्रस्तावविस्तारिणाम्॥ १॥

काव्ये भव्यतमेऽपि विज्ञनिवहैरास्वाद्यमाने मुहु
र्दोषान्वेषणमेव मत्सरयुषां नैसर्गिको दुर्ग्रहः।

Digitized by Google

शिवाकान्त ! शम्भो ! शशाङ्कार्द्धमौले !
महेशान ! शूलिन् ! जटाजूटधारिन् ! ।
त्वमेको जगद्व्यापको विश्वरूप !
प्रसीद प्रसीद प्रभो ! पूर्णरूप ! ॥ ५ ॥

परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोङ्कारवेद्यम् ।
यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वम् ॥ ६ ॥

न भूमिर्न चापो न वह्निर्न वायु-
र्न चाकाशमास्ते न तन्द्रा न निद्रा ।
न ग्रीष्मो न शीतं न देशो न वेशो
न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥ ७ ॥

अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानाम् ।
तुरीयं तमःपारमाद्यन्तहीनं
प्रपद्ये परं पावनं द्वैतहीनम् ॥ ८ ॥

नमस्ते नमस्ते विभो विश्वमूर्त्ते !
नमस्ते नमस्ते चिदानन्दमूर्त्ते ! ।
नमस्ते नमस्ते तपोयोगगम्य !
नमस्ते नमस्ते श्रुतिज्ञानगम्य ! ॥ ८ ॥

प्रभो ! शूलपाणे ! विभो ! विश्वनाथ !
महादेव ! शम्भो ! महेश ! त्रिनेत्र ! ।

Digitized by Google

आमनन्ति सूरयः सर्वे धर्मो रक्षति धार्मिकम्।
एतज्ज्ञातव्यमेवैव किमन्यच्च भविष्यति ॥ १९ ॥
जयोऽस्तु पाण्डुपुत्राणां येषां पक्षे जनार्दनः।
यतः कृष्णस्ततो धर्मो यतो धर्मस्ततो जयः ॥ २० ॥

इति श्रीमहाकविहलायुधविरचितं धर्मविवेककाव्यं समाप्तम्।

वेदसारशिवस्तवः।

पशूनां पतिं पापनाशं परेशं
गजेन्द्रस्य कृत्तिं वसानं वरेण्यम्।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं
महादेवमेकं स्मरामि स्मरारिम् ॥ १ ॥
महेशं सुरेशं सुरारातिनाशं,
विभुं विश्वनाथं विभूत्यङ्गभूषम्।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं
सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥ २ ॥
गिरीशं गणेशं गले नीलवर्णं
गवेन्द्राधिरूढं गुणातीतरूपम्।
भवं भास्वरं भस्मना भूषिताङ्गं
भवानीकलत्रं भजे पञ्चवक्त्रम् ॥ ३ ॥

जातः सूर्यकुले पिता दशरथः क्षोणीभुजामग्रणीः
सीता सत्यपरायणा प्रणयिनी यस्यानुजो लक्ष्मणः ।
दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयं
रामो येन विडम्बितोऽपि विधिना चान्ये परे का कथा ॥ १० ॥

एका भार्य्या प्रकृतिमुखरा चञ्चला च द्वितीया
पुत्रस्त्वेको भुवनविजयी मन्मथो दुर्निवारः ।
शेषः शय्या शयनमुदधौ वाहनं पन्नगारिः
स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः ॥ ११ ॥

असारे खलु संसारे सारं श्वशुरमन्दिरम् ।
हरो हिमालये शेते विष्णुः शेते महोदधौ ॥ १२ ॥

असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनम् ॥ १३ ॥

आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ १४ ॥

चिन्ता ज्वरो मनुष्याणां वस्त्राणामातपो ज्वरः ।
असौभाग्यं ज्वरः स्त्रीणामश्वानां मैथुनं ज्वरः ॥ १५ ॥

यदि कृष्णपदे चिन्ता भक्तिस्तत्पदपङ्कजे ।
विषमे दुर्गमे वापि का चिन्ता मरणे रणे ॥ १६ ॥

देवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ १७ ॥

न माता शपते पुत्रं न दोषं लभते मही ।
न हिंसां कुरुते साधुर्न देवः सृष्टिनाशकः ॥ १८ ॥

Digitized by Google

आहारे शुचिता स्वनो मधुरता नीडे पराधीनता
बन्धौ निर्ममता, वने रसिकता वाचालता माधवे ।
यस्यैते गुणराशयः पिकवरं त्यक्त्वा किमेते जना
वन्दन्ते खलु खञ्जनं कृमिभुजं चित्रा गतिः कर्मणाम् ॥४॥

कान्तं वक्ति कपोतिकाकुलतया नाथान्तकालोऽधुना
व्याधोऽधो धृतचापसज्जितशरः श्येनः परिभ्राम्यति ।
इत्थं सत्यहिना स दष्ट इषुणा श्येनोऽपि तेनाहतः
तूर्णं तौ तु यमालयम्प्रति गतौ दैवी विचित्रा गतिः ॥५॥

शुण्ठीगोक्षुरयोर्विचार्य मनसा कल्याणनं यत्तथा
प्रोक्तं तद्विपरीतकं कृतमहो गोक्षूरमात्रं ददौ ।
नार्थो मूर्खजनालये न च सुखं नो वा यशो लभ्यते
सद्वैद्ये कविभूपतौ हरिहरे लाभः परं गोवधः ॥ ६ ॥

पञ्चास्यस्य पराभवाय मघको मांसेन गोर्भूयसा
दध्यन्नैरपि पायसैः प्रतिदिनं सम्वर्द्धितो यो मया ।
सोऽयं सिंहरवाद्गृहान्तरगमक्षौत्याकुलः सम्भ्रमाद्
हन्ताशा विलयं गता हतविधेर्लाभः परं गोवधः ॥ ७ ॥

पारीन्द्रस्य पराभवाय सुरभीमांसेन दुर्मेधसा
पुष्यन्ते किल पीवराः कटुगिरः श्वानः प्रयत्नादमी ।
नत्वेतन्मदमत्तवारणचमूविद्रावणः केशरी
जेतव्यो भवता किरातनृपते लाभः परं गोवधः ॥ ८ ॥

एका भूरुभयोरैक्यमुभयोर्दलकाण्डयोः ।
आविद्यमानयोर्भेदः फलेन परिचीयते ॥ ९ ॥

Digitized by Google

कुशकण्टकविद्धोऽपि ग्रामस्थो न जीवति ॥ १९ ॥
निमग्नस्य पयोराशौ पर्वतात् पतितस्य च ।
तक्षकेणापि दृष्टस्य आयुर्मर्माणि रक्षति ॥ २० ॥
करोतु नाम नीतिज्ञो व्यवसायमितस्ततः ।
फलं पुनस्तदेव स्यात् यद्विधेर्मनसि स्थितम् ॥ २१ ॥

इति श्रीघटकर्परविरचितं
नीतिसारं समाप्तम् ।

धर्मविवेकः ।

श्रद्धाबीजो विप्रवेदाम्बुसिक्तः
शाखा विद्यास्तावतन्त्रो द्रुमापि ।
पुष्पाण्यर्थो द्वे फले स्थूलसूक्ष्मे
मोक्षः कामो धर्मवृक्षोऽयमीड्यः ॥ १ ॥

दातः क्ष्मामखिलां प्रदाय हरये पातालमूलं बलिः
अङ्गुष्ठस्य विसर्जनात् स च मुनिः स्वर्गं समारोपितः ।
चापाल्यादसती सती सुरपुरीं कुन्ती समारोहयत्
हा ! सीता पतिदेवतागमदधो धर्मस्य सूक्ष्मा गतिः ॥२॥
कानीनस्य मुनेः स्व-बान्धव वधू-वैधव्य-विध्वंसिनो
नप्तारः खलु गोलकस्य तनयाः कुण्डाः स्वयं पाण्डवाः ।
तेऽमी पञ्च समानयोनिरतयः तेषां गुणोत्कीर्तनात्
अक्षय्यं सुकृतं भवेद्व्यचिकरं धर्मस्य सूक्ष्मा गतिः ॥ ३ ॥

वयोगते किं वनिताविलासः?
पयोगते किं खलु सेतुबन्धः? ॥ ८ ॥
वरमसिधारा तरुतलवासो
वरमिह भिक्षा वरमुपवासः।
वरमपि घोरे नरके पतनं
न च धनगर्वितबान्धवशरणम् ॥ ९ ॥
कुग्रामवासः कुजनस्य सेवा
कुभोजनं क्रोधमुखी च भार्य्या।
मूर्खश्च पुत्रो विधवा च कन्या
विनाग्निना संदहते शरीरम् ॥ १० ॥
वरं मौनं कार्य्यं न च वचनमुक्तं यदनृतं
वरं क्लैव्यं पुंसां न च परकलत्राभिगमनम्।
वरं भैक्ष्याशित्वं न च परधनास्वादनसुखं
वरं प्राणत्यागो न च पिशुनवादेष्वभिरतिः ॥ ११ ॥
निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपः
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेश्वरत्वं पुनः।
चक्रेशः पुनरिन्द्रतां सुरपति ब्राह्मं पदं वाञ्छति
ब्रह्मा विष्णुपदं हरिः शिवपदं त्वाशावधिं के गताः? ॥१२॥
ख्यातः शक्रो भगाङ्को विधुरपि मलिनो माधवो गोपजातो
वेश्यापुत्रो वशिष्ठः सरुजपदयमः सर्वभक्ष्यो हुताशः।
व्यासो मत्स्योदरीयः सलवण उदधिः पाण्डवा जारजाता
रुद्रः प्रेतास्थिधारी त्रिभुवनवसतां कस्य दोषो न जातः ॥१३॥

Digitized by Google

कासारेऽपि विकाशिपङ्कजचये खेलन्मराली पुनः
क्रौञ्चश्चञ्चुपुटेन कुञ्चितवपुः शम्बूकमन्वेषति ॥ २ ॥
अतिरमणीये काव्येऽपि पिशुनो दूषणमन्वेषयति ।
अतिरमणीये वपुषि व्रणमिव मक्षिकानिकरः ॥ ३ ॥
कीर्त्तिस्वर्गतरङ्गिणीभिरभितो वैकुण्ठमाप्लावितं
क्षौणीनाथ ! तव प्रतापतपनैः सन्तापितः क्षीरधिः ।
इत्येवं दयितायुगेन हरिणा त्वं याचितः स्वाश्रयं
हृत्पद्मं हरये श्रिये स्वभवनं कण्ठं गिरे दत्तवान् ॥ ४ ॥
रवेः कवेः किं समरस्य सारं ?
कृषेर्भयं किं किमदन्ति भृङ्गाः ? ।
सदा भयं चाप्यभयञ्च केषां ?
भागीरथीतीरसमाश्रितानाम् ॥ ५ ॥
वासः काञ्चनपिञ्जरे नृपकराम्भोजैस्तनूमार्जनं
भक्ष्यं स्वादुरसालदाड़िमफलं पेयं सुधाभं पयः ।
पाठः संसदि रामनाम सततं धीरस्य कीरस्य मे
हाहा हन्त ! तथापि जन्मविटपिक्रोड़ं मनो धावति ॥६॥
उदयति यदि भानुः पश्चिमे दिग्विभागे
विकसति यदि पद्मं पर्वतानां शिखाग्रे ।
प्रचलति यदि मेरुः शीततां याति वह्नि
र्न चलति खलु वाक्यं सज्जनानां कदाचित् ॥ ७ ॥
निर्वाणदीपे किमु तैलदानं ?
चौरे गते वा किमु सावधानम् ? ।

Digitized by Google

शिवाकान्त! शान्त! स्मरारे! पुरारे!
त्वदन्यो वरेण्यो न मान्यो न गण्यः॥ ९॥

शम्भो! महेश! करुणामय! शूलपाणे!
गौरीपते! पशुपते! पशुपाशनाशिन्!
काशीपते! करुणया जगदेतदेक
स्त्वं हंसि पासि विदधासि महेश्वरोऽसि॥ १०॥

त्वत्तो जगद्भवति देव! भव! स्मरारे!
त्वय्येव तिष्ठति जगन्मृड! विश्वनाथ!।
त्वय्येव गच्छति लयं जगदेतदीश!
लिङ्गात्मके हर! चराचरविश्वरूपिन्!॥ ११॥

इति श्रीमद्भगवत् शङ्कराचार्यविरचितं वेदसार-
शिवस्तोत्रं सम्पूर्णम्।

पद्यसंग्रहः।

नत्वा तां परमेश्वरीं शिवकरीं श्रीभारतीं भास्वतीं
गङ्गातीरनिवासिना सुकविना लोकोपकारार्थिना।
नानापण्डितवक्त्रनिर्गतवतां निर्मीयते केनचित्
पद्यानामिह संग्रहोऽमृतकथाप्रस्तावविस्तारिणाम्॥ १॥

काव्ये भव्यतमेऽपि विज्ञनिवहैरास्वाद्यमाने मुहु
र्दोषान्वेषणमेव मत्सरयुषां नैसर्गिको दुर्ग्रहः।

Digitized by Google

शिवाकान्त ! शम्भो ! शशाङ्कार्द्धमौले !
महेशान ! शूलिन् ! जटाजूटधारिन् ! ।
त्वमेको जगद्व्यापको विश्वरूप !
प्रसीद प्रसीद प्रभो ! पूर्णरूप ! ॥ ४ ॥

परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोङ्कारवेद्यम् ।
यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वम् ॥ ६ ॥

न भूमिर्न चापो न वह्निर्न वायु-
र्न चाकाशमास्ते न तन्द्रा न निद्रा ।
न ग्रीष्मो न शीतं न देशो न वेशो
न यस्यास्ति मूर्त्तिस्त्रिमूर्त्तिं तमीडे ॥ ७ ॥

अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानाम् ।
तुरीयं तमःपारमाद्यन्तहीनं
प्रपद्ये परं पावनं द्वैतहीनम् ॥ ८ ॥

नमस्ते नमस्ते विभो विश्वमूर्त्ते !
नमस्ते नमस्ते चिदानन्दमूर्त्ते ! ।
नमस्ते नमस्ते तपोयोगगम्य !
नमस्ते नमस्ते श्रुतिज्ञानगम्य ! ॥ ८ ॥

प्रभो ! शूलपाणे ! विभो ! विश्वनाथ !
महादेव ! शम्भो ! महेश ! त्रिनेत्र ! ।

Digitized by Google

जल्पन्ति सूरयः सर्वे धर्मो रक्षति धार्मिकम् ।
एतज्ज्ञातव्यमेवैव किमन्न च भविष्यति ॥ १९ ॥
जयोऽस्तु पाण्डुपुत्राणां येषां पक्षे जनार्दनः ।
यतः कृष्णस्ततो धर्मो यतो धर्मस्ततो जयः ॥ २० ॥

इति श्रीमहाकविहलायुधविरचितं धर्मविवेककाव्यं समाप्तम् ।

वेदसारशिवस्तवः ।

पशूनां पतिं पापनाशं परेशं
गजेन्द्रस्य कृत्तिं वसानं वरेण्यम् ।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं
महादेवमेकं स्मरामि स्मरारिम् ॥ १ ॥
महेशं सुरेशं सुरारातिनाशं
विभुं विश्वनाथं विभूत्यङ्गभूषम् ।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं
सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥ २ ॥
गिरीशं गणेशं गले नीलवर्णं
गवेन्द्राधिरूढं गुणातीतरूपम् ।
भवं भास्वरं भस्मना भूषिताङ्गं
भवानीकलत्रं भजे पञ्चवक्त्रम् ॥ ३ ॥

Digitized by Google

जातः सूर्यकुले पिता दशरथः क्षोणीभुजामग्रणीः
सीता सत्यपरायणा प्रणयिनी यस्यानुजो लक्ष्मणः ।
दोर्दण्डेन समो नचास्ति भुवने प्रत्यक्षविष्णुः स्वयं
रामो येन विडम्बितोऽपि विधिना चान्ये परे का कथा ॥ १०

एका भार्या प्रकृतिमुखरा चञ्चला च द्वितीया
पुत्रस्त्वेको भुवनविजयी मन्मथो दुर्निवारः ।
शेषः शय्या शयनमुदधौ वाहनं पन्नगारिः
स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः ॥ ११ ॥

असारे खलु संसारे सारं श्वशुरमन्दिरम् ।
हरो हिमालये शेते विष्णुः शेते महोदधौ ॥ १२ ॥

असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनम् ॥ १३ ॥

आपदर्थं धनं रक्षेद्दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ १४ ॥

चिन्ता ज्वरो मनुष्याणां वस्त्राणामातपो ज्वरः ।
असौभाग्यं ज्वरः स्त्रीणामश्वानां मैथुनं ज्वरः ॥ १५ ॥

यदि कृष्णपदे चिन्ता भक्तिस्तत्पदपङ्कजे ।
विषमे दुर्गमे वापि का चिन्ता मरणे रणे ॥ १६ ॥

देवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ १७ ॥

न माता शपते पुत्रं न दोषं लभते मही ।
न हिंसां कुरुते साधुर्न देवः सृष्टिनाशकः ॥ १८ ॥

Digitized by Google

आहारे सुचिता स्वनो मधुरता नीडे पराधीनता
बन्धौ निर्ममता, वने रसिकता वाचालता माधवे ।
यस्यैते गुणराशयः पिकवरं त्यक्त्वा किमेते जना
वन्दन्ते खलु खञ्जनं कृमिभुजं चित्रा गतिः कर्मणाम् ॥४॥
कान्तं वक्ति कपोतिकाकुलतया नाथान्तकालोऽधुना
व्याधोऽधो धृतचापसज्जितशरः श्येनः परिभ्राम्यति ।
इत्थं सत्यहिना स दष्ट इषुणा श्येनोऽपि तेनाहतः
तूर्णं तौ तु यमालयम्प्रति गतौ दैवी विचित्रा गतिः ॥५॥
शुण्ठीगोक्षुरयोर्विचार्य्य मनसा कल्याणनं यत्नया
प्रोक्तं तद्विपरीतकं कृतमहो गोक्षूरमाचं दृढ़ौ ।
नार्यो मूर्खजनालये न च सुखं नो वा यशो लभ्यते
सद्वैद्ये कविभूपतौ हरिहरे लाभः परं गोवधः ॥ ६ ॥
पञ्चास्यस्य पराभवाय मघको मांसेन गोभूंयसा
दध्यन्नैरपि पायसैः प्रतिदिनं सम्वर्द्धितो यो मया ।
सोऽयं सिंहरवाद्गृहान्तरगमन्नौत्याकुलः सम्भ्रमाद्
हन्ताशा विलयं गता हतविधेर्लाभः परं गोवधः ॥ ७ ॥
पारीन्द्रस्य पराभवाय सुरभीमांसेन दुर्मेधसा
पुष्यन्ते किल पीवराः कटुगिरः श्वानः प्रयत्नाद्गमौ ।
नत्वेतन्मदमत्तवारणचमूविद्रावणः केशरी
जेतव्यो भवता किरातनृपते लाभः परं गोवधः ॥ ८ ॥
एका भूरुभयोरैक्यमुभयोर्दृष्टकारणयोः ।
शालिश्यामाकयोर्भेदः फलेन परिचीयते ॥ ९ ॥

Digitized by Google

कुशकण्टकविद्धोऽपि ग्रामवासी न जीवति ॥ १९ ॥
निमग्नस्य पयोराशौ पर्वतात् पतितस्य च ।
तक्षकेणापि दष्टस्य आयुर्मर्माणि रक्षति ॥ २० ॥
करोतु नाम नीतिज्ञो व्यवसायमितस्ततः ।
फलं पुनस्तदेव स्यात् यद्विधेर्मनसि स्थितम् ॥ २१ ॥

इति श्रीमहाकविघटकर्परविरचितं
नीतिसारं समाप्तम् ।

धर्मविवेकः ।

श्रद्धाबीजो विप्रवेदाम्बुसिक्तः
शाखा विद्यास्तावतस्तो दयापि ।
पुष्पाण्यर्थौ द्वे फले स्थूलसूक्ष्मे
मोक्षः कामो धर्मवृक्षोऽयमीड्यः ॥ १ ॥

दातः क्ष्मामखिलां प्रदाय हरये पातालमूलं बलिः
शक्रप्रस्थविसर्जनात् स च मुनिः स्वर्गं समारोपितः ।
प्रावाल्यादसती सती सुरपुरीं कुन्ती समारोहयत्
हा ! सीता पतिदेवतागमदधो धर्मस्य सूक्ष्मा गतिः ॥२॥
कानीनस्य मुनेः स्व-बान्धव-वधू-वैधव्य-विध्वंसिनो
नप्तारः खलु गोलकस्य तनयाः कुण्डाः स्वयं पाण्डवाः ।
तेऽमी पञ्च समानयोनिरतयः तेषां गुणोत्कीर्त्तनात्
पथ्यं सुकृतं भवेदविकलं धर्मस्य सूक्ष्मा गतिः ॥ २ ॥

सिंह उवाच ।

गच्छ शूकर ! भद्रं ते ब्रूहि सिंहो मया जितः ।
पण्डिता एव जानन्ति सिंहशूकरयोर्बलम् ॥ १२ ॥

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ १३ ॥

एका भार्या प्रकृतिमुखरा चञ्चला च द्वितीया
पुत्रस्त्वेको भुवनविजयी मन्मथो दुर्निवारः ।
शेषः शय्या शयनमुदधौ वाहनं पन्नगारिः
स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः ॥ १४ ॥

अतिदूरपथश्रान्तास्छायां वाञ्छन्ति च शीतलाम् ।
शीतलाश्च पुनर्वाञ्छि का कथा परिदेवना ॥ १५ ॥

अपमानं पुरस्कृत्य मानं कृत्वा च पृष्ठके ।
स्वकार्यमुद्धरेत् प्राज्ञः कार्यध्वंसे हि मूर्खता ॥ १६ ॥

एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोरिति यो बभाषे ।
नूनं न दृष्टं कविनापि तेन
दारिद्र्यदोषो गुणराशिनाशी ॥ १७ ॥

कृतस्य करणं नास्ति मृतस्य मरणं तथा ।
गतस्य शोचनं नास्ति ह्येतद्वेदविदां मतम् ॥ १८ ॥

नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि ।

Digitized by Google

अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित्।
इति सत्यं महाराज! बद्धोऽस्म्यर्थेन कौरवैः॥ ४॥

त्रिविक्रमोऽभूदपि वामनोऽसौ
स शूकरश्चेति स वै नृसिंहः।
नीचैरनीचैरतिनीचनीचैः
सर्वैरुपायैः फलमेव साध्यम्॥ ५॥

चलं चित्तं चलं वित्तं चलं जीवनयौवनम्।
चलाचलमिदं सर्वं कीर्तिर्यस्य स जीवति॥ ६॥

स जीवति यशो यस्य कीर्तिर्यस्य स जीवति।
अयशोऽकीर्तिसंयुक्तो जीवन्नपि मृतोपमः॥ ७॥

वृद्धस्य वचनं ग्राह्यमापत्काले ह्युपस्थिते।
सर्वत्रैवं विचारेण नाहारे न च मैथुने॥ ८॥

क्वचिद्रुष्टः क्वचित् तुष्टो रुष्टस्तुष्टः क्षणे क्षणे।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः॥ ९॥

निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य
कथं जनस्तं परितोषयिष्यति॥ १०॥

शूकर उवाच।

दश व्याघ्रा जिताः पूर्वं सप्त सिंहास्त्रयो गजाः।
पश्यन्तु देवताः सर्वा अद्य युद्धं त्वया मया॥ ११॥

Digitized by Google

नवं वस्त्रं नवच्छत्रं नव्या स्त्री नूतनं गृहम् ।
सर्वत्र नूतनं शस्तं सेवकान्ने पुरातने ॥ १५ ॥
समायाति यदा लक्ष्मीर्नारिकेलफलाम्बुवत् ।
विनिर्याति यदा लक्ष्मीर्गजभुक्तकपित्थवत् ॥ १६ ॥

इति श्रीमज्ज्ञानविवेताबलभट्टविरचितं
नीतिप्रदीपकाव्यं समाप्तम् ।

नीतिसारम् ।

गिरौ कलापी गगने पयोदा
लक्षान्तरेऽर्कश्च जलेषु पद्माः ।
इन्दुर्द्विलक्षं कुमुदस्य बन्धु-
र्यो यस्य मित्रं नहि तस्य दूरम् ॥ १ ॥

माता निन्दति नाभिनन्दति पिता भ्राता न सम्भाषते
भृत्यः कुप्यति नानुगच्छति सुतः कान्ता च नालिङ्गते ।
अर्थप्रार्थनशङ्कया न कुरुतेऽप्यालापमात्रं सुहृत्
तस्मादर्थमुपार्जयस्व च सखे ! ह्यर्थस्य सर्वे वशाः ॥ २ ॥

धनैर्निष्कुलीनाः कुलीना भवन्ति
धनैरापदं मानवा निस्तरन्ति ।
धनेभ्यः परो बान्धवो नास्ति लोके
धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥ ३ ॥

यत्त्वन्मूलनिषण्णखिन्नपथिकस्तोमः सुवन्नन्वयं
न स्वादूनि मृदूनि खादति फलान्युत्कण्ठमुत्कण्ठितम् ९
दूरे मार्गाद्विवससि पुनः कण्टकैरावृतोऽसि
छायाशून्यः फलमपि च ते वानरैरप्यभक्ष्यम् ।
निर्गन्धस्त्वं मधुपरहितः शाल्मले ! सारशून्यः
सेवास्माकं भवति विफला तिष्ठ निःस्वस्य धाम: ॥१०॥
हंसा पद्मवनाशया मधुलिहः सौरभ्यलाभाशया
पान्थाः स्वादुफलाशया बलिभुजो गृध्राश्च मांसाशया ।
दूरादुन्नतपुष्परागनिकरैर्निःसारमित्थोन्नते
रे रे शाल्मलिपादप ! प्रतिदिनं के न त्वया वञ्चिताः ॥११

किं तेन हेमगिरिणा रजताद्रिणा वा
यत्र स्थिता हि तरवस्तरवस्त एव ।
वन्दामहे मलयमेव यदाश्रयेण
शाकोटनिम्बकुटजान्यपि चन्दनानि ॥ १२ ॥

निर्वाणदीपे किमु तैलदानं
चौरे गते वा किमु सावधानम् ।
वयोगते किं वनिताविलासः
पयोगते किं खलु सेतुबन्धः ॥ १३ ॥

शीतेऽतीते वसनमशनं वासरान्ते निशान्ते
क्रीडारम्भः कुवलयदृशां यौवनान्ते विवाहः ।
सेतोर्बन्धः पयसि गलिते प्रस्थिते लग्नचिन्ता
सर्वं चैतद्भवति विफलं स्वस्वकाले व्यतीते ॥ १४ ॥

Digitized by Google

शशिदिवाकरयोर्ग्रहपीड़नं
गजभुजङ्गमयोरपि बन्धनम् ।
मतिमतां च विलोक्य दरिद्रतां
विधिरहो बलवान् इति मे मतिः ॥ ४ ॥

व्योमैकान्तविहारिणोऽपि विहगाः संप्राप्नुवन्त्यापदं
बध्यन्ते निपुणैरगाधसलिलात् मत्स्याः समुद्रादपि ।
दुर्नीते हि विधौ किमस्ति चरितं कः स्थानलाभे गुणः
कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ ५ ॥

अविरलपुष्पे बकुले यया
षट्पदालि कदापि न सेविता ।
अहह ! सा चपला विधुरे विधौ
मधुकरी बदरीमनुवर्त्तते ॥ ६ ॥

गतोऽस्मि तीरं जलधेः पिपासया
स चापि कुम्भजचुलुकीकृतो यथा ।
न दृश्यते शीकरलवोऽपि तोयधेः
ममैव तत्कर्मफलं विजृम्भते ॥ ७ ॥

सिंहक्षुण्णकरीन्द्रकुम्भगलितं रक्ताक्तमुक्ताफलं
कान्तारे बदरीधिया द्रुतमगात् भिल्लस्य पत्नी मुदा ।
पाणिभ्यामवगृह्य शुक्लकठिनं तद्वीक्ष्य दूरे जहौ
अस्थाने पततामतीव महतामेतादृशी स्याद्गतिः ॥ ८ ॥

किं ते नम्रतया किमुन्नततया किं ते घनच्छायया
किं ते पल्लवलीलया किमनया चाशोक पुष्पश्रिया ।

Digitized by Google

आलम्ब्य चाम्बु तृषितः करकोशपेयम्
भावानुरक्तवनितासुरतैः शपेयम्।
जीयेय येन कविना यमकैः परेण
तस्मै वहेयमुदकं घटकर्परेण॥२२॥

इति श्रीघटकर्परकविकृतं यमककाव्यं समाप्तम्।

नीतिप्रदीपः।

रत्नाकरः किं कुरुते स्वरत्नैः?
विन्ध्याचलः किं करिभिः करोति?।
श्रीखण्डखण्डैर्मलयाचलः किं?
परोपकाराय सतां विभूतिः॥१॥

कर्णानिलातिनिपुणेन च तापमाना
दूरीकृताः करिवरेण मदान्धबुद्ध्या।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने चरन्ति॥२॥

येनाकारि सदाम्बुपानमगमं क्रीडा करिष्यन् सह
स्वच्छन्दं भ्रमणं च कन्दरगते पीतं पयो निर्भरम्।
सोऽयं वन्यकरी करेणुपतितः पुष्णाति देहं तृणैः
यद्दैवेन ललाटपट्टलिखितं तत् प्रोज्झितुं कः क्षमः॥३॥

Digitized by Google

त्वं मञ्जरीभिः प्रवरो वनानां
नेत्रोत्सवश्चासि सखीजनानाम् ॥ १६ ॥
नवकदम्ब ! शिरोवनतास्मि ते
वसति यत् मदनः कुसुमस्थिते ।
कुटज ! किं कुसुमैरुपहस्यते
निपतितास्मि सुदुःप्रसहस्य ते ॥ १७ ॥
तरुवर ! विनतास्मि ते सदाहं
हृदयं मे प्रकरोषि किं सदाहम् ।
तव कुसुमनिरीक्षणे पटेहं
विसृजेयं सहसैव नीपदेहम् ॥ १८ ॥
कुसुमैरुपशोभिता सितै-
र्घनमुक्ताम्बुलवप्रकाशितैः ।
मधुनः समवेक्ष्य कामतां
भ्रमरश्चुम्बति यूथिकालताम् ॥ १९ ॥
तासामृतुः सफल एव हि या दिनेषु
सेन्द्रायुधाम्बुधरगर्जितदुर्दिनेषु ।
रत्युत्सवं प्रियतमैः सह मानयन्ति
मेघागमे प्रियसखीव समानयन्ति ॥ २० ॥
एतद्विचिन्त्य विरहानलपीडितायाः
तस्या वचः खलु दयासुरपीडितायाः ।
त्वं स्वारवेण कथितं जलदैरमोघैः
प्रत्याययौ स गृहमूर्नादिनैरमोघैः ॥ २१ ॥

मेघशब्दमुदिताः कलापिनः
प्रोषिता हृदयशोकलापिनः ।
तोयदागमकृशापि साद्य ते
दुर्धरेण मदनेन साद्यते ॥ ११ ॥

किं कृपापि तव नास्ति कान्तया
पाण्डुगण्डपतितालकान्तया ।
शोकसागरजलेऽद्य पातितां
त्वद्गुणस्मरणमेव पाति ताम् ॥ १२ ॥

कुसुमितकुटजेषु काननेषु
प्रियरहितेषु समुत्सुकाननेषु ।
वहति च कलुषे जले नदीनां
किमिति च मां समवेक्षसे न दीनाम् ॥ १३ ॥

मार्गेषु मेघसलिलेन विनाशितेषु
कामो धनुः स्पृशति तेन विना शितेषु ।
गम्भीरमेघरसितव्यथिता कदाहं
जह्यां सखि ! प्रियवियोगजशोकदाहम् ॥१४॥

सुसुगन्धतया वने जितानां
स्तनदम्भोधरवायुवीजितानाम् ।
मदनस्य कृते निकेतकानां
प्रतिभान्त्यद्य वनानि केतकानाम् ॥ १५ ॥

तत् साधु, यत् त्वां सुतरं ससर्ज
प्रजापतिः कामनिवास सर्जं !।

उत्कण्ठयन्ति पथिकान् जलदाः स्वनन्तः

शोकः समुद्भवति तद्वनितास्वनन्तः ॥ ५ ॥

छादिते दिनकरस्य भावने

खाञ्जले पतति शोकभावने ।

मन्मथे च हृदि हन्तुमुद्यते

प्रोषितप्रमदयेदमुच्यते ॥ ६ ॥

सर्वकालमवलम्ब्य तोयदा

आगता स्थ दयितो गतो यदा ।

निर्घृणेन परदेशसेविना

मारयिष्यथ हतेन मां विना ॥ ७ ॥

ब्रूत तं पथिकपांशुलं घनाः !

यूयमेव पथि शीघ्रलङ्घनाः ।

अन्यदेशरतिरद्य मुच्यतां

सा यथा तव वधूः किमुच्यताम् ॥ ८ ॥

हंसपङ्क्तिरपि नाथ ! सम्प्रति

प्रस्थिता वियति मानसं प्रति ।

चातकोऽपि तृषितोऽम्बु याचते

दुःखिता पथिक ! सा प्रिया च ते ॥ ९ ॥

नीलशष्पमभिभाति कोमलं

वारि विन्दति च चातकोऽमलम् ।

अम्बुदैः शिखिगणो विनाद्यते

का रतिर्दयितया विनाद्य ते ॥ १० ॥

Digitized by Google

त्वयि मयि चान्यत्रैको विष्णुः, व्यर्थं कुप्यसि मय्यसहिष्णुः।
सर्वं पश्यात्मन्यात्मानं, सर्वत्रोत्सृज भेदज्ञानम् ॥ १६ ॥
षोडशपज्झटिकाभिरशेषः, शिष्याणां कथितोऽभ्युपदेशः।
येषां नैष करोति विवेकं, तेषां कः कुरुतामतिरेकम् ॥ १७ ॥

इति श्रीशङ्कराचार्यविरचितो मोहमुद्गरः समाप्तः।

घटकर्परः।

निचितं खमुपेत्य नीरदैः प्रियहीनाहृदयावनीरदैः।
सलिलैर्निहितं रजः क्षितौ रविचन्द्रावपि नोपलक्षितौ ॥१॥
हंसा नदन्मेघभयाद् द्रवन्ति निशामुखान्यद्य न चन्द्रवन्ति।
नवाम्बुमत्ताः शिखिनो नदन्ति मेघागमे कुन्दसमानदन्ति ॥२॥

मेघावृतं निशि न भाति नभो वितारं
निद्राभ्युपैति च हरिं सुखसेवितारम्।
सेन्द्रायुधश्च जलदोधरसन्निभानां
संरम्भमावहति भूधरसन्निभानाम् ॥ ३ ॥

सतडिज्जलदार्पितं नगेषु स्वनदम्भोधरभीतपन्नगेषु।
परिधीररवं जलं दरीषु प्रपतत्यद्भुतरूपसुन्दरीषु ॥ ४ ॥

क्षिप्रं प्रसादयति सम्प्रति कोऽपि तानि
कान्तामुखानि रतिविग्रहकोपितानि।

Digitized by Google

नलिनीदलगतजलमतितरलं, तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याधिव्यालग्रस्तं, लोकं शोकहतञ्च समस्तम् ॥ ५ ॥
तत्त्वं चिन्तय सततं चित्ते, परिहर चिन्तां नश्वरवित्ते ।
क्षणमिह सज्जनसङ्गतिरेका, भवति भवार्णवतरणे नौका ॥६॥
अष्टकुलाचलसप्तसमुद्रा, ब्रह्म-पुरन्दर-दिनकर-रुद्राः ।
न त्वं, नाहं, नायं लोकः, तदपि किमर्थं क्रियते शोकः ? ॥७॥
यावद्वित्तोपार्जनशक्तः, तावत् निजपरिवारो रक्तः ।
तदनु च जरया जर्जरदेहे, वार्त्तां कोऽपि न पृच्छति गेहे ॥८॥
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं पश्य हि कोऽहम् ।
आत्मज्ञानविहीना मूढाः, ते पच्यन्ते नरकनिगूढाः ॥ ९ ॥
सुरमन्दिरतरुमूलनिवासः, शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः, कस्य सुखं न करोति विरागः ॥ १० ॥
बालस्तावत् क्रीडासक्तः, तरुणस्तावत् तरुणीरक्तः ।
वृद्धस्तावत् चिन्तामग्नः, परमे ब्रह्मणि कोऽपि न लग्नः ॥११॥
शत्रौ मित्रे पुत्रे बन्धौ, मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद् यदि विष्णुत्वम् ॥१२॥
यावज्जननं तावन्मरणं, तावज्जननीजठरे शयनम् ।
इति संसारे स्फुटतरदोषः, कथमिह मानव ! तव सन्तोषः ॥१३॥
दिनयामिन्यौ सायं प्रातः, शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुः, तदपि न मुञ्चत्याशावायुः ॥१४॥
अङ्गं गलितं पलितं मुण्डं, दन्तविहीनं यातं तुण्डम् ।
करधृतकम्पितशोभितदण्डं, तदपि न मुञ्चत्याशाभाण्डम् ॥१५॥

Digitized by Google

संसारचिन्तामणिरत्र यस्मात्
तत्तारकं सज्जनकर्णिकायाम्।
शिवोऽभिधत्ते सहसान्तकाले
तद्गीयतेऽसौ मणिकर्णिकेति॥ ८॥

मोक्षलक्ष्मीमहापीठमणिस्तच्चरणाब्जयोः।
कर्णिकेति ततः प्राहुर्यां जना मणिकर्णिकाम्॥ ९॥

मणिकर्ण्याः स्तोत्रमिदं भुक्तिमुक्तिप्रदं वरम्।
पठतां शृण्वताञ्चाशु प्रसन्ना मणिकर्णिका॥ १०॥

इति श्रीगङ्गाधरकविविरचितं श्रीमणिकर्णिका-
स्तोत्रं सम्पूर्णम्।

मोहमुद्गरः।

मूढ़! जहीहि धनागमतृष्णां, कुरु तनुबुद्धे! मनसि वितृष्णाम्
यल्लभसे निजकर्मोपात्तं वित्तं, तेन विनोदय चित्तम्॥ १॥

अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धनभाजां भीतिः, सर्वत्रैषा विहिता रीतिः॥२॥

का तव कान्ता? कस्ते पुत्रः? संसारोऽयमतीव विचित्रः।
कस्य त्वं वा? कुत आयातः? तत्त्वं चिन्तय तदिदं भ्रातः!॥३॥

मा कुरु धनजनयौवनगर्वं, हरति निमेषात् कालः सर्वम्।
मायामयमिदमखिलं हित्वा, ब्रह्मपदं प्रविशाशु विदित्वा॥४॥

यस्यां मृतो न भवमेति भवप्रसादात्
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ २ ॥
चन्द्रांशुका सुनयना नवला कुमारी
वेदैश्च पाणिकमलैर्वरमौक्तिकाख्या ।
या दृश्यते सुकृतिभिर्वरकाशिकायां,
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥
मालां सुपङ्कजमयीं करकण्ठयोर्या
धत्ते वरोद्यतकरे शुभमातुलाङ्गम् ।
वृहच्च पाणियुगलं शुभपाणिमास्यं
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ४ ॥
दानावगाहसुरपूजनतर्पणादि
यस्यामनन्तफलदं भवति प्रसङ्गात् ।
भक्त्या व्रतं यदि सदैव जगत् पुनाति
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ५ ॥
स्वर्गस्तृणं भवति चीरधरोऽपि राजा
मृत्युः सखा मुखहरोऽपि शवः शिवः स्यात् ।
पातोऽपि तत्र सुरसम्मत उत्तमाख्या
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ६ ॥
मूर्खोऽपि योगिसमतां समुपैति यत्र
मन्त्रः स्मरेद्यदि शिवं न तु कालकालः ।
यद्ग्रामतोऽप्यभयमेति च दूरवासी
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ७ ॥

Digitized by Google

सदाशिवसुतः शान्तः काश्यां गङ्गाधरः कविः ।
सर्वतीर्थवरां देवीं स्तौति श्रीमणिकर्णिकाम् ॥ २ ॥

आनन्दकाननमिदं सुखदं पुरैव
तत्रापि चक्रसरसी मणिकर्णिकाथ ।
स्वः सिन्धुसङ्गतिरथो परमास्पदञ्च
विश्वेशितुः किमिह तत्र विमुक्तते यत् ॥ ३ ॥

गर्जन्ति सर्वतीर्थानि स्वस्वधिष्ण्यगतान्यहो ।
केवलं बलमासाद्य सुमहत् माणिकर्णिकम् ॥ ४ ॥
शिवाद्या देवसङ्घाश्च सनकाद्या महर्षयः ।
ते सर्वे स्नातुमायान्ति मध्याह्ने मणिकर्णिकाम् ॥५॥
इच्छन्ति मरणं तत्र मुक्तये चामरा अपि ।
अतश्च स्वकृतैः श्लोकैस्तां देवीं प्रार्थयेऽन्वहम् ॥ ६ ॥

मणिकर्णिकाष्टकम् ।

विष्णोः सुतप्ततपसां चलितोत्तमाङ्ग-
विश्वेशितुस्तड़िदिवाम्बरतः सुकर्णात् ।
या चक्रतीर्थसलिले ललिता पपात
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ १ ॥
चिन्तामणिस्तनुभृतां सहसान्तकाले
तत्तारकं व्यपदिशत्यथ कर्णिकायाम् ।

छायामम्भोजिनीनामलिकुलमलिनां वीक्ष्य सन्ध्यामसन्ध्याम्
कान्ताविश्लेषभीरुर्दिनमपि रजनीं मन्यते चक्रवाकः ॥५॥

गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या चपलमधुपः पुष्पमध्ये पपात ।
अन्धीभूतः कुसुमरजसा कण्टकैर्लूनपक्षः
स्थातुं गन्तुं द्वयमपि सखे ! नैव शक्तो द्विरेफः ॥६॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेप एव पदमुद्धृतमर्पयन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥७॥

का काबला निधुवनश्रमपीडिताङ्गी
निद्रां गता दयितबाहुलतागुप्तया ।
सा सा तु यातु भवनं मिहिरोदयोऽयं
सङ्केतवाक्यमिति काकवधा वदन्ति ॥८॥

इति महाकविकालिदासविरचितं
शृङ्गारतिलकं समाप्तम् ।

मणिकर्णिकामहिमा ।

अनेककल्पसाहस्रतपोध्यानशिवार्चनैः ।
अद्वैतानन्दसङ्गेन लभ्यवेदान्तसत्पदः ॥ १ ॥

Digitized by Google

शृङ्गाररसाष्टकम् ।

अविदितसुखदुःखं निर्गुणं वस्तु किञ्चित्
जडमतिरिह कश्चित् मोक्ष इत्याचचक्षे ।
मम तु मतमनङ्गस्मेरतारुण्यघूर्णन्-
मदकलमदिराक्षी-नीविमोक्षो हि मोक्षः ॥ १ ॥

कदा कान्तागारे परिमलमिलत्पुष्पशयने
शयानः कान्तायाः कुचयुगमहं वक्षसि वहन् ।
अये कान्ते ! मुग्धे ! कुटिलनयने ! चन्द्रवदने !
प्रसीदेति क्रोशन् निमिषमिव नेष्यामि रजनीम् ॥२॥

सायं नायमुदेति वासरमणिः, चन्द्रो न चण्डद्युति-
र्दावाग्निः कथमम्बरे ? किमशनिः ? स्वच्छान्तरीक्षे कुतः ?
हन्तेदं ! निरवायि पान्थरमणीप्राणानिलाशाशया
धावद्घोरविभावरीद्विषधरीभोगस्य भीमो मणिः ॥ ३ ॥

आयाति याति पुनरेव जलं प्रयाति
पद्माङ्कुराणि विचिनोति धुनोति पक्षौ ।
उन्मत्तवद् भ्रमति कूजति मन्दमन्दं
कान्तावियोगविधुरो निशि चक्रवाकः ॥ ४ ॥

भंक्त्वा भोक्तुं न भुङ्क्ते कुटिलबिसलताखण्डमिन्दोर्वितर्कात्
ताराकारास्तृषार्त्तो न पिबति पयसां विप्रुषः पत्रसंस्थाः ।

चलितशशिकुलाभैस्तरङ्गैस्तरङ्गैः
अमितनदनदीनामङ्गसङ्गैरसङ्गैः ।
विहरसि जगदण्डे खण्डयन्ती गिरीन्द्रान्
रमयसि निजकान्तं सागरं कान्तकान्ते ! ॥ ५ ॥
तव परमहिमानं चित्तवाचामगम्यं
हरिहरविधिशक्ता नापि गङ्गे ! विदन्ति ।
श्रुतिकुलमभिधत्ते शङ्कितं तं शुभाङ्गं
गुणगणकुशिवापैर्नेति नेतीति सत्यम् ॥ ६ ॥
तव नुतिर्नतिनाम्नामाश्वमर्घं प्रापयन्ति
ददति परमशान्तिं दिव्यभोगान् जनानाम् ।
इति पतितशरण्ये ! त्वां प्रपन्नोऽस्मि मात-
र्ललिततरतरङ्गे चाङ्गगङ्गे प्रसीद ॥ ७ ॥
शुभतरसतयोगाद्विश्वनाथप्रसादात्
भवहरवरविद्यां प्राप्य काश्यां हि गङ्गे ।
भगवति ! तव तीरनीरसारं निपीय
मुदितहृदयकञ्जे नन्दसूनुं भजेऽहम् ॥ ८ ॥
गङ्गाष्टकमिदं कृत्वा भुक्तिमुक्तिप्रदं नृणाम् ।
सत्यज्ञानानन्दतीर्थयतिना स्वर्पितं शिवे ॥ ९ ॥
तेन प्रीयातु भगवान् शिवो गङ्गाधरो विभुः ।
करोतु शङ्करः काश्यां जनानां सततं शिवम् ॥ १० ॥

इति सत्यज्ञानानन्दतीर्थयतिना विरचितं
गङ्गाष्टकं सम्पूर्णम् ।

Digitized by Google

तेजोभूतं निगमसदनं व्यासपुत्राष्टकं यः
प्रातःकाले पठति मनसा याति निर्वाणमार्गं ॥ ८ ॥

इति श्रीपरमहंसगुरुदेवविरचितं गुर्वष्टकं समाप्तम् ।

गङ्गाष्टकम् ।

यदवधि तव नीरं पातकी नैति गङ्गे !
तदवधि मलजालैर्नैव मुक्तः कलौ स्यात् ।
तव जलकणिकालं पापिनां पापशुद्धेर्,
पतितपरमदीनान् त्वं हि पासि प्रपन्नान् ॥ १ ॥

तव शिवजललेशं वायुनीतं समेत्य
सपदि निरयजालं शून्यतामेति गङ्गे ! ।
शमलगिरिसमूहाः प्रस्फुटन्ति प्रचण्डाः,
त्वयि सखि विशतां नः पापशङ्का कुतः स्यात् ? ॥ २ ॥

तव शिवजलजालं निःसृतं यर्हि गङ्गे !
सकलभुवनजलं पूतपूतं तदाभूत् ।
यमभटकलिवार्ता देवि ! लुप्ता यमोऽपि
अधिकृतवरदेहाः पूर्णकामाः सकामाः ॥ ३ ॥

मधुमधुवनपूगै रत्नपूगैर्न पूगैः
मधुमधुवनपूगैर्देवपूगैः सुपूगैः ।
पुरहरपरमाङ्गे भासि मायेव गङ्गे !
शमयसि विषतापं देवदेवस्य वन्द्ये ॥ ४ ॥

Digitized by Google

यस्मिन् विश्वं सकलभुवनं सामरस्यैकभूतं
उर्वी ह्यापोऽनलमनिलखं जीवमेवं क्रमेण ।
यत् पाराब्धौ समरसतया सैन्धवैकत्वभूतं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥४॥
यद्वद्वयोर्दधिसमरसौ सागरत्वं ह्यवाप्तौ
तद्वज्जीवालयपरिमितौ सामरस्यैकभूतौ ।
भेदातीतं परिलयगतं सच्चिदानन्दरूपं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥५॥
दृष्ट्वा वेद्यं परमथ पदं स्वात्मबोधस्वरूपं
बुद्ध्वात्मानं सकलवपुषामेकमन्तर्बहिःस्थम् ।
भूत्वा नित्यं सदुदिततया स्वप्रकाशस्वरूपं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥६॥
कार्याकार्यं किमपि सततं नैव कर्तृत्वमस्ति
जीवन्मुक्तिस्थितिरवगतो दग्धवस्त्रावभासः ।
एवं देहे प्रविलयगते तिष्ठमानो विमुक्तो
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥७॥
कस्मात् कोऽहं किमपि च भवान् कोऽयमत्र प्रपञ्चः
स्वं स्वं वेद्यं गगनसदृशं पूर्णतत्त्वप्रकाशम् ।
आनन्दाख्यं समरसघने बाह्यमन्तर्विहीने
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥८॥
सत्यं सत्यं परममृतं सर्वकल्याणरूपं
मायारण्ये दहनमलिने शान्तनिर्वाणदीपम् ।

Digitized by Google

वरं महत्या म्रियते पिपासया
तथापि नान्यस्य करोत्युपासनाम् ॥ ६ ॥
यद्यपि चातकपक्षी चपयति जलधरमकालवेलायाम् ।
तदपि न कुप्यति जलदो गतिरिह नान्यां यतस्तस्य ॥७॥
एक एव खगमानिचिरं जीवतु चातकः ।
पिपासया वा म्रियते याचते वा पुरन्दरम् ॥ ८ ॥

इति उत्तरचातकाष्टकं समाप्तम् ।

गुरुकाष्टकम् ।

भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमुपगतौ नष्टसन्देहवृत्तेः ।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥१॥
यद्वात्मानं सकलवपुषामेकमन्तर्बहिस्थं
दृष्ट्वा पूर्णं खमिव सततं सर्वभाण्डस्थमेकम् ।
नान्यत् कार्यं किमपि च ततः कारणाद् भिन्नरूपं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥२॥
हेम्नः कार्यं हुतवहगतं हेममेवेति यद्वत्
क्षीरे क्षीरं समरसतया तोयमेवाम्बुमध्ये ।
एवं सर्वं समरसतया त्वं मदं तत्पदार्थे
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥३॥

Digitized by Google

र्व्याप्तम् विश्वं सकलभुवनं सामरस्यैकभूतं
उर्वी ह्यापोऽनलमनिलखं जीवमेवं क्रमेण ।
यत् पाराब्धौ समरसतया सैन्धवैकत्वभूतं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥४॥

यद्वन्नद्योर्दधिसमरसौ सागरत्वं ह्यवाप्तौ
तद्वज्जीवालयपरिमतौ सामरस्यैकभूतौ ।
भेदातीतं परिलयगतं सच्चिदानन्दरूपं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥५॥

दृष्ट्वा वेद्यं परमथ पदं स्वात्मबोधस्वरूपं
बुद्ध्वात्मानं सकलवपुषामेकमन्तर्बहिस्थम् ।
भूत्वा नित्यं सदुदिततया स्वप्रकाशस्वरूपं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥६॥

कार्य्याकार्य्ये किमपि सततं नैव कर्त्तृत्वमस्ति
जीवन्मुक्तिस्थितिरवगतो दग्धवस्त्रावभासः ।
एवं देहे प्रविलयगते तिष्ठमानो विमुक्तो
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥७॥

कस्मात् कोऽहं किमपि च भवान् कोऽयमत्र प्रपञ्चः
स्वं स्वं वेद्यं गगनसदृशं पूर्णतत्त्वप्रकाशम् ।
आनन्दाख्यं समरसघने बाह्यमन्तर्विहीने
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥८॥

सत्यं सत्यं परमममृतं सर्वकल्याणरूपं
मायारण्ये गहनमलिने भ्रान्तिनिर्वाणदीपम् ।

Digitized by Google

वरं महत्त्वा म्रियते पिपासया
तथापि नान्यस्य करोत्युपासनाम् ॥ ६ ॥
यद्यपि चातकपक्षी चपयति जलधरमकालवेलायाम्।
तदपि न कुप्यति जलदो गतिरिह नान्या यतस्तस्य ॥७॥
एक एव खगमणिश्चिरं जीवतु चातकः।
पिपासया वा म्रियते याचते वा पुरन्दरम्॥ ८ ॥

इति उत्तरचातकाष्टकं समाप्तम्।

शुकाष्टकम्।

भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमुपगतौ नष्टसन्देहवृत्तेः।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥१॥
यद्वात्मानं सकलवपुषामेकमन्तर्बहिस्थं
दृष्ट्वा पूर्णं खमिव सततं सर्वभाण्डस्थमेकम्।
नान्यत् कार्य्यं किमपि च ततः कारणाद् भिन्नरूपं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥२॥
हेम्नः कार्य्यं हुतवहगतं हेममेवेति यद्वत्
क्षीरे क्षीरं समरसतया तोयमेवाम्बुमध्ये।
एवं सर्वं समरसतया त्वं महं तत् पदार्थे
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥३॥

Digitized by Google

उत्तरचातकाष्टकम् ।

स्वच्छाः सौम्यजलाशयाः प्रतिदिनं ते सन्तु मा सन्तु वा ।
अल्पं वा बहुधा जलं जलधर ! त्वं देहि मा देहि वा ॥१॥

कासारेषु सरित्सु सिन्धुषु तथा नीचेषु नीरग्रहं
धिक् तत्रापि शिरोनतिः किमपरं हेयं भवेत् मानिनाम् ।
इत्यालोच्य विमुच्य चातकयुवा तेषु स्पृहामादरा-
दुद्ग्रीवस्तव वारिवाह ! कुरुते धाराधरालोकनम् ॥२॥

के वा न सन्ति भुवि तामरसावतंसा
हंसावलीवलयिनो जलसन्निवेशाः ।
किं चातकः फलमवेक्ष्य सवज्रपातां
पौरन्दरीमुपगतो नववारिधाराम् ॥ ३ ॥

रे धाराधर ! धीरनीरनिकरैरेषा रसा नीरसा
सैषा पूतकरोत्करैरतिखरैरापूरि भूरि त्वया ।
एकान्तेन भवन्तमन्तरगतं ध्यात्वे न सचिन्तकम्
आश्चर्यं परिपीडितोऽभिरमते यत् चातकस्तृष्णया ॥४॥

आत्मानमम्भोनिधिरेतु शोषं
अस्माकमाक्षिपतु वा तरङ्गैः ।
नास्ति त्वलिनीपविधिः कदापि
पयोदभक्तेः खलु चातकस्य ॥ ५ ॥

पयोद हे ! वारि ददासि वा न वा
त्वदेकचित्तः पुनरेव चातकः ।

Digitized by Google

गर्जसि मेघ ! न यच्छसि तोयं
चातकपक्षी व्याकुलितोऽहम् ।
दैवादिह यदि दक्षिणवातः
क्व त्वं क्वाहं क्व च जलपातः ॥ ४ ॥

वापी स्वल्पजलाशयो विषमयी नीचापगाहो ह्रदः
क्षुद्रात् क्षुद्रतरो महाजलनिधिर्गण्डूषमेकं मुनेः ।
गङ्गाद्याः सरितः पयोनिधिगताः सन्त्यज्य तस्मादिमान्
सन्मानी खलु चातको जलमुचामुच्चैः पयो वाञ्छति ॥ ५ ॥

बीजैरङ्कुरितं नदीभिरुदितं वल्लीभिरुज्जृम्भितं
वृक्षैः पल्लवितं जनैश्च मुदितं धाराधरे वर्षति ।
भ्रातश्चातक ! पातकं किमपि ते सम्यङ् न जानीमहे
यत्तेऽस्मिन् न पतन्ति चञ्चुपुटके द्वित्राः पयोबिन्दवः ॥ ६ ॥

नदेभ्योऽपि ह्रदेभ्योऽपि पिबन्त्यन्ये सदा पयः ।
चातकस्य तु जीमूत ! भवानेवावलम्बनम् ॥ ७ ॥

नभसि निरवलम्बे सीदता दीर्घकालं
त्वदभिमुखनिविष्टोत्तानचञ्चूपुटेन ।
जलधर ! जलधारा दूरतस्तावदास्तां
ध्वनिरपि मधुरस्ते न श्रुतश्चातकेन ॥ ८ ॥

इति पूर्वचातकाष्टकं समाप्तम् ।

Digitized by Google

सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं सुविचार्य यत् कृतं
सुदीर्घकालेऽपि न याति विक्रियाम् ॥ ७ ॥

वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टश्रियं मन्त्रिणः
सर्वः कार्यवशात् जनोऽभिरमते कस्यास्ति को वल्लभः ?

इति वानराष्टकं समाप्तम्।

पूर्वचातकाष्टकम्।

वातैर्विधूनय विभीषय भीमनादैः
संचूर्णय त्वमथवा करकाभिघातैः।
त्वद्वारिबिन्दुपरिपालितजीवितस्य
नान्या गतिर्भवति वारिद! चातकस्य ॥ १ ॥

चातकस्त्रिचतुरान् पयःकणान्
याचते जलधरं पिपासितः।
सोऽपि पूरयति भूयसाम्भसा
चित्रमत्र महतामुदारता ॥ २ ॥

शक्यते येन केनापि जीवनेनैव जीवितुम्।
किन्तु जीवनतोऽभ्रप्रसङ्गः परदुःसहः ॥ २ ॥

Digitized by Google

समर्थेष्वनुवर्त्तनं बहुविधं शान्तं जने पण्डिते
शाठ्यं पापिजने नरस्य कथिताः पर्यन्तमष्टौ गुणाः ॥ १ ॥

शास्त्रं सुचिन्तितमपि प्रतिचिन्तनीयं
स्वाराधितोऽपि नृपतिः परिशङ्कनीयः।
अङ्के स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥ २ ॥

आरोग्यमानृण्यमविप्रवासः
सम्यक्त्वया वृत्तिरभीतिवासः।
सद्भिर्मनुष्यैः सह संप्रयोगः
षड् जीवलोकेषु सुखानि राजन्! । ३ ॥

दानं दरिद्रे विभवेऽपि शान्ति-
र्यूनां तपो ज्ञानवताञ्च मौनम्।
इच्छानिवृत्तिश्च सुखोचितानां
दया च भूतेष्विदिवं नयन्ति ॥ ४ ॥

मूर्खो द्विजातिः, स्थविरो गृहस्थो,
गृही दरिद्रो धनवांस्तपस्वी
वेश्या कुरूपा नृपतिः कुधर्मी
लोके षडेतानि विडम्बितानि ॥ ५ ॥

वैद्यं पानरतं नटं कुपठितं स्वाध्यायहीनं द्विजं
युद्धे कापुरुषं हयं गतरयं मूर्खं परिव्राजकम्।
राजानञ्च कुमन्त्रिभिः परिहृतं देशञ्च सोपद्रवं
भार्य्यां यौवनगर्व्वितां पररतां मुञ्चन्ति शीघ्रं बुधाः ॥ ६ ॥

Digitized by Google

छायामम्भोजिनीनामलिकुलशबलां वीक्ष्य सन्ध्यामसन्ध्याम्
कान्ताविश्लेषभीरुर्दिनमपि रजनीं मन्यते चक्रवाकः ॥५॥

गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या चपलमधुपः पुष्पमध्ये पपात ।
अन्धीभूतः कुसुमरजसा कण्टकैर्लूनपक्षः
स्थातुं गन्तुं द्वयमपि सखे ! नैव शक्तो द्विरेफः ॥६॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेप एव पदमुद्धृतमर्पयन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥७॥

का त्वबला निधुवनश्रमपीडिताङ्गी
निद्रां गता दयितबाहुलतानुबद्धा ।
सा सा तु यातु भवनं मिहिरोद्गमोऽयं
सङ्केतवाक्यमिति काकवधा वदन्ति ॥८॥

इति महाकविकालिदासविरचितं
शृङ्गाररसाष्टकं समाप्तम् ।

मणिकर्णिकामहिमा ।

अनेकजन्मसाहस्रतपोध्यानाग्निवार्चनैः ।
अद्वैतानन्दसङ्गेन लभ्यवेदान्तसत्पदः ॥१॥

Digitized by Google

शृङ्गाररसाष्टकम् ।

अविदितसुखदुःखं निर्गुणं वस्तु किञ्चित्
जडमतिरिह कश्चित् मोक्ष इत्याचचक्षे ।
मम तु मतमनङ्गस्मेरतारुण्यघूर्णन्-
मदकलमदिराक्षी-नीविमोक्षो हि मोक्षः ॥ १ ॥

कदा कान्तागारे परिमलमिलत्पुष्पशयने
शयानः कान्तायाः कुचयुगमहं वक्षसि वहन् ।
अये कान्ते ! मुग्धे ! कुटिलनयने ! चन्द्रवदने !
प्रसीदेति क्रोशन् निमिषमिव नेष्यामि रजनीम् ॥२॥

सायं नायमुदेति वासरमणिः, चन्द्रो न चण्डद्युति-
र्दीवाग्निः कथमम्बरे ? किमशनिः ? स्वच्छान्तरीक्षे कुतः ?
हन्तेदं ! निरवाधि पान्थरमणीप्राणानिलाशाशया
धावद्घोरविभावरीविषधरीभोगस्य भीमो मणिः ॥ ३ ॥

आयाति याति पुनरेव जलं प्रयाति
पद्माङ्कुराणि विचिनोति धुनोति पक्षौ ।
उन्मत्तवद् भ्रमति कूजति मन्दमन्दं
कान्तावियोगविधुरो निशि चक्रवाकः ॥ ४ ॥

भंक्त्वा भोक्तुं न भुंक्ते कुटिलबिसलताखण्डमिन्दोर्वितर्कात्
ताराकारास्तृषार्त्तो न पिबति पयसां विप्रुषः पत्रसंस्थाः ।

चलितशशिकुलाभैस्तरङ्गैस्तरङ्गैः
अमितनरनदीनामङ्गसङ्गैरसङ्गैः ।
विहरसि जगदन्ते सञ्चरन्ती गिरीन्द्रान् ।
रमयसि निजकान्तं सागरं कान्तकान्ते ! ॥ ५ ॥

तव परमहिमानं चित्तवाचाममानं
हरिहरविधिशक्ता नापि गङ्गे ! विदन्ति ।
श्रुतिकुलमभिधत्ते शङ्कितं तं कृपाख्यं
गुणगणगुणिभावापन्नेति नेतीति सम्यक् ॥ ६ ॥

तव नुतिनतिनामान्यप्यघं प्लावयन्ति
ददति परमशान्तिं दिव्यभोगान् जनानाम् ।
इति पतितशरण्ये ! त्वां प्रपन्नोऽस्मि मातः-
ललिततरतरङ्गे चारुगङ्गे प्रसीद ॥ ७ ॥

शुभतरकृतयोगाद्विश्वनाथप्रसादात्
भवहरवरविद्यां प्राप्य काश्यां हि गङ्गे ।
भगवति ! तव तीरे नीरसारं निपीय
मुदितहृदयकञ्जे नन्दसूनुं भजेऽहम् ॥ ८ ॥

गङ्गाष्टकमिदं कृत्वा भुक्तिमुक्तिप्रदं नृणाम् ।
सत्यज्ञानानन्दतीर्थयतिना स्वर्पितं शिवे ॥ ९ ॥
तेन प्रीयातु भगवान् शिवो गङ्गाधरो विभुः ।
करोतु शङ्करः काश्यां जनानां सततं शिवम् ॥ १० ॥

इति सत्यज्ञानानन्दतीर्थयतिना विरचितं
गङ्गाष्टकं सम्पूर्णम् ।

Digitized by Google

तेजोभूतं निगमसदनं व्यासपुत्राष्टकं यः
प्रातःकाले पठति मनसा याति निर्वाणमार्गं ॥ ८ ॥

इति श्रीपरमहंसशुकदेवविरचितं शुकाष्टकं समाप्तम् ।

गङ्गाष्टकम् ।

यदवधि तव नीरं पातकी नैति गङ्गे !
तदवधि मलजालैर्नैव मुक्तः कलौ स्यात् ।
तव जलकणिकालं पापिनां पापशुद्धैर्,
पतितपरमदीनान् त्वं हि पासि प्रपन्नान् ॥ १ ॥

तव शिवजललेशं वायुनीतं समेत्य
सपदि निरयजालं शून्यतामेति गङ्गे ! ।
समलगिरिसमूहाः प्रस्फुटन्ति प्रचण्डाः,
त्वयि सति विगतां नः पापशङ्का कुतः स्यात् ॥ २ ॥

तव शिवजलजालं निःसृतं यर्हि गङ्गे !
सकलभुवनजालं पूतपूतं तदाभूत् ।
यमभटकलिवार्त्ता देवि ! लुप्ता यमोऽपि
अधिकृतवरदेहाः पूर्णकामाः सकामाः ॥ ३ ॥

मधुमधुवनपूगरत्नपूगैर्न पूगैः
मधुमधुवनपूगैर्देवपूगैः सुपूगैः ।
पुरहरपरमाङ्गे भासि मायेव गङ्गे !
शमयसि विषतापं देवदेवस्य वन्द्ये ॥ ४ ॥

वर्त्तिष्यत् विश्वं सकलभुवनं सामरस्यैकभूतं
अर्वाक् प्राणोऽनलमनिलखं जीवमेवं क्रमेण ।
यत् धाराश्री समरसतया सैन्धवैकत्वभूतं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥४॥
यद्वत्तोयोदधिसमरसौ सागरत्वं प्रयातौ
तद्वज्जीवालयपरिगतौ सामरस्यैकभूतौ ।
भेदातीतं परिलयगतं सच्चिदानन्दरूपं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥५॥
दृष्ट्वा वेद्यं परमथ पदं स्वात्मबोधस्वरूपं
बुद्ध्वात्मानं सकलवपुषामेकमन्तर्बहिःस्थम् ।
भूत्वा नित्यं सदुदिततया स्वप्रकाशस्वरूपं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥६॥
कार्य्याकार्य्ये किमपि सततं नैव कर्तृत्वमस्ति
जीवन्मुक्तिस्थितिरवगतो दग्धवस्त्रावभासः ।
एवं देहे प्रविलयगते तिष्ठमानो विमुक्तो
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥७॥
कस्मात् कोऽहं किमपि च भवान् कोऽयमत्र प्रपञ्चः
स्वं स्वं वेद्यं गगनसदृशं पूर्णतत्त्वप्रकाशम् ।
आनन्दाख्यं समरसघने बाह्यमन्तर्विहीने
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥८॥
सत्यं सत्यं परममसृतं सर्वकल्याणरूपं
मायारण्ये दहनमलिने शान्तनिर्वाणदीपम् ।

Digitized by Google

वरं महत्या म्रियते पिपासया
तथापि नान्यस्य करोत्युपासनाम् ॥ ६ ॥
यद्यपि चातकपक्षी चपयति जलधरमकालवेलायाम् ।
तदपि न कुप्यति जलदो गतिरिह नान्यां यतस्तस्य ॥७॥
एक एव खगमणिचिरं जीवतु चातकः ।
पिपासया वा म्रियते याचते वा पुरन्दरम् ॥ ८ ॥

इति उत्तरचातकाष्टकं समाप्तम् ।

शुकाष्टकम् ।

भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमुपगतौ नष्टसन्देहवृत्तेः ।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥१॥
यद्वात्मानं सकलवपुषामेकमन्तर्बहिस्थं
दृष्ट्वा पूर्णं खमिव सततं सर्वभाण्डस्थमेकम् ।
नान्यत् कार्य्यं किमपि च ततः कारणाद् भिन्नरूपं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥२॥
हेम्नः कार्य्यं हुतवहगतं हेममेवेति यद्वत्
क्षीरे क्षीरं समरसतया तोयमेवाम्बुमध्ये ।
एवं सर्वं समरसतया त्वं पदं तत् पदार्थे
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥३॥

Digitized by Google

अथ चातकाष्टकम् ।

सन्त्याः सौम्यजलाशयाः प्रतिदिनं ते सन्तु मा सन्तु वा ।
अल्पं वा बहुधा जलं जलधर ! त्वं देहि मा देहि वा ॥१॥

कासारेषु सरःसु सिन्धुषु तथा नीचेषु नीरग्रहं
धिक् तत्रापि शिरोनतिः किमपरं हेयं भवेत् मानिनाम् ।
इत्यालोच्य विमुच्य चातकयुवा तेषु स्पृहामादरा-
दुद्ग्रीवस्तव वारिवाह ! कुरुते धाराधरालोकनम् ॥२॥

के वा न सन्ति भुवि तामरसावतंसा
हंसावलीवलयिनो जलसन्निवेशाः ।
किं चातकः फलमवेक्ष्य सवज्रपातां
पौरन्दरीमनुगतो नववारिधाराम् ॥ ३ ॥

रे धाराधर ! धीरनीरनिकरैरेषा रसा नीरसा
पीता पूषकरोत्करैरतिखरैरापूरि भूरि त्वया ।
एकान्तेन भवन्तमन्तरगतं ध्यायन्नेव सचिन्तकम्
आश्चर्यं परिपीडितोऽभिरमते यत् चातकस्तृष्णया ॥४॥

यातामवम्भोनिधिरेतु शोषं
अत्याक्रमामाश्रयतु वा तरङ्गैः ।
नास्ति च्युतिर्नीपरिचितिः कदापि
पयोदभक्तेः खलु चातकस्य ॥ ५ ॥

पयोद हे ! वारि ददासि वा न वा
त्वदेकचित्तः पुनरेष चातकः ।

गर्जसि मेघ ! न यच्छसि तोयं
चातकपक्षी व्याकुलितोऽहम् ।
दैवादिह यदि दक्षिणवातः
क्व त्वं क्वाहं क्व च जलपातः ॥ ४ ॥

वापी स्वल्पजलाशयो विषमयो नीचापगाह्वो ह्रदः
क्षुद्रात् क्षुद्रतरो महाजलनिधिर्गण्डूषमेकं मुनेः ।
वक्राख्याः सरितः पयोनिधिगताः सन्त्यज्य तस्मादिमान्
सम्मानी खलु चातको जलमुचामुच्चैः पयो वाञ्छति ॥५॥

बीजैरङ्कुरितं नदीभिरुदितं वल्लीभिरुज्जृम्भितं
वृक्षैः पल्लवितं जनैश्च मुदितं धाराधरे वर्षति ।
भ्रातश्चातक ! पातकं किमपि ते सम्यङ् न जानीमहे
यत्तेऽस्मिन् न पतन्ति चञ्चुपुटके द्वित्राः पयोबिन्दवः ॥ ६ ॥

नदेभ्योऽपि ह्रदेभ्योऽपि पिबन्त्यन्ये सदा पयः ।
चातकस्य तु जीमूत ! भवानेवावलम्बनम् ॥ ७ ॥

नभसि निरवलम्बे सीदता दीर्घकालं
त्वदभिमुखनिविष्टोत्तानचञ्चूपुटेन ।
जलधर ! जलधारा दूरतस्तावदास्तां
ध्वनिरपि मधुरस्ते न श्रुतश्चातकेन ॥ ८ ॥

इति पूर्वचातकाष्टकं समाप्तम् ।

Digitized by Google

सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत् कृतं
सुदीर्घकालेऽपि न याति विक्रियाम् ॥ ७ ॥

वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः ।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टश्रियं मन्त्रिणः
सर्वः कार्यवशात् जनोऽभिरमते कस्यास्ति को वल्लभः ?

इति चाणक्याष्टकं समाप्तम् ।

पूर्वचातकाष्टकम् ।

वातैर्विधूनय विभीषय भीमनादैः
सञ्चूर्णय त्वमथवा करकाभिघातैः ।
त्वद्वारिबिन्दुपरिपालितजीवितस्य
नान्या गतिर्भवति वारिद ! चातकस्य ॥ १ ॥

चातकस्त्रिचतुरान् पयःकणान्
याचते जलधरं पिपासितः ।
सोऽपि पूरयति भूयसाम्भसा
चित्रमत्र महतामुदारता ॥ २ ॥

शक्यते येन केनापि जीवनेनैव जीवितुम् ।
किन्तु जीवनतोऽद्भुतप्रसङ्गः परदुःसहः ॥ ३ ॥

मर्मज्ञेष्वनुवर्त्तनं बहुविधं मानं जने पण्डिते
शाठ्यं पापिजने नरस्य कथिताः पर्यन्तमष्टौ गुणाः ॥ १ ॥

शास्त्रं सुचिन्तितमपि प्रतिचिन्तनीयं
स्वाराधितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्के स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥ २ ॥

आरोग्यमानृण्यमविप्रवासः
सम्प्रत्यया ह्वांत्तरभीतिवासः ।
सद्भिर्मनुष्यैः सह संप्रयोगः
षड् जीवलोकेषु सुखानि राजन् ! । ३ ॥

दानं दरिद्रे विभवेऽपि शान्ति-
र्यूनां तपो ज्ञानवताञ्च मौनम् ।
इच्छानिवृत्तिश्च सुखोचितानां
दया च भूते त्रिदिवं नयन्ति ॥ ४ ॥

मूर्खो द्विजातिः, स्थविरो गृहस्थो,
गृही दरिद्रो धनवांस्तपस्वी
वेश्या कुरूपा नृपतिः कुधर्मी
लोके षडेतानि विडम्बितानि । ५ ॥

वैद्यं पानरतं नटं कुपठितं स्वाध्यायहीनं द्विजं
युद्धे कापुरुषं हयं गतरयं मूर्खं परिव्राजकम् ।
राजानञ्च कुमन्त्रिभिः परिवृतं देशञ्च सोपद्रवं
भार्य्यां यौवनगर्विताम् पररतां मुञ्चन्ति शीघ्रं बुधाः ॥६॥

Digitized by Google

विपाककष्टव्यसनिनः सपक्षं हृतं
राज्यं प्रमत्तस्य विपक्ष नराधिपस्य । ५ ।
युद्धेऽम्बरे वह्निरपैति दर्पं
बालेषु मोक्षपदेषु कोपः ।
कान्तासु कामो निपुणेषु वित्तं
धर्मो दयावत्सु महत्सु धैर्यम् । ६ ।
जवो हि सप्तेः परमं विभूषणं,
त्रपाङ्गनायाः कृशता तपस्विनः ।
द्विजस्य विद्यैव मुनेरपि क्षमा
पराक्रमः शस्त्रबलोपजीविनाम् । ७ ।
दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः ?
सन्तापयन्ति कमपथ्यभुजं न रोगाः ? ।
कं श्री न मोहयति ? कं न निहन्ति मृत्युः ?
कं स्त्रीकृता न विषयाः परितापयन्ति ? । ८ ।

इति वानराष्टकं समाप्तम् ।

वानर्य्याष्टकम् ।

माधुर्यं शास्त्रमारोग्यं दानं मूर्खो द्विजातिषु ।
वैद्यं सजीवं इत्यत्र सनवींक्रमिष्टाष्टकम् ।

माधुर्यं प्रमदाजनेषु ललितं दाक्षिण्यमार्ये जने
शौर्यं शत्रुषु नम्रता गुरुजने धर्मिष्ठता साधुषु ।

Digitized by Google

इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त ! नलिनीं गज उज्जहार ! ॥ ८ ॥

इति भ्रमराष्टकं समाप्तम् ।

वानराष्टकम् ।

ईर्षी इष्टः क्रतौ रूपं राज्यः पुष्पोत्तमं भवः ।
दुर्मन्त्रिणमिति श्लोकाः कथिता वानराष्टके ॥

ईर्षी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते दुःखभागिनः ॥ १ ॥

इष्टः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोगी ।
उद्युक्तो विद्यां, तथा धर्मार्थयशांसि विनीतः ॥ २ ॥

क्रतौ विवाहे व्यसने रिपुक्षये
यशस्करे कर्मणि मित्रसंग्रहे ।
प्रियासु नारीषु तथैव बान्धवे-
ष्वतिव्ययो नास्ति नराधिपाष्टसु ॥ ३ ॥

रूपं जरा सर्वसुखानि तृष्णा
खलेषु सेवा पुरुषाभिमानम् ।
याच्ञा गुरुत्वं गुणमात्मपूजा
चिन्ता बलं हन्त्यदया च लक्ष्मीम् ॥ ४ ॥

राज्यस्य नश्यति यशो विषमस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः ।

Digitized by Google

वक्रस्तव निशाकरेव विधिना मन्दकरो मूढधीः
सन्तोषेण विना पराभवपदं प्राप्नोति मूढो जनः ॥ २ ॥

येऽमी ते मुकुलोद्गमादनुदिनं त्वामाश्रिताः षट्पदा-
स्ते भ्राम्यन्ति फलार्थिभिर्विहगको ! दृष्टा न सम्भाविते ।
ये कीटास्तव त्वक्पत्रस्य न गतास्ते त्वत्फलाभ्यन्तरे
धिक् त्वां चूत ! यतः परापरपरिज्ञानानभिज्ञो भवान् ॥३॥

नीतं जन्म नवीननीरजवने पीतं मधु स्वेच्छया
मालत्याः कुसुमेषु येन सततं क्रीडा कृता हेलया ।
तेनेयं मधुगन्धलुब्धमनसा गुञ्जा लता सेव्यते
हा धिग् दैवकृतं स एव मधुपः कां कां दशां नागतः ॥४॥

पलाशकुसुमभ्रान्त्या शुकतुण्डे मधुव्रतः ।
पतत्येष शुकोऽप्येनं जम्बूभ्रान्त्या जिघांसति ॥ ५ ॥

दृष्ट्वा स्फीतोऽभवदलिरसौ लेख्यपद्मं विशालं
चित्रं चित्रं किमिति किमिति व्याहरन् निष्पपात ।
नास्मिन् गन्धो न च मधुकणा नास्ति तत् सौकुमार्य्यं
घूर्णन्मूर्द्धा वत नतशिरा व्रीडया निर्जगाम ॥ ६ ॥

प्रतिरसो नलिनीवनवल्लभः
कुमुदिनीकुलकेलिकलारसः ।
विधिवशेन विदेशमुपागतः
कुटजपुष्परसं बहु मन्यते ॥ ७ ॥

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्ममालम् ।

Digitized by Google

शीतोष्णादि विसह्यतां न तु वृथावाक्यं समुच्चार्यतां
औदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम् ॥४॥
एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् ।
प्राक्कर्म प्रविलाप्यतां चितिबलान्-नाप्युत्तरैः श्लिष्यतां
प्रारब्धं त्विह भुज्यताम् अथ परब्रह्मात्मना स्थीयताम् ॥५॥

यः श्लोकपञ्चकमिदं पठते मनुष्यः
संचिन्तयत्यनुदिनं स्थिरतामुपेत्य ।
तस्याशु संसृतिदवानलतीव्रघोर-
तापः प्रशान्तिमुपयाति चितिप्रसादात् ॥ ६ ॥

इति श्रीमच्छङ्कराचार्यविरचितं
साधनपञ्चकं समाप्तम् ।

भ्रमराष्टकम् ।

गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या क्षुधितमधुपः पुष्पमध्ये पपात ।
अन्धीभूतः कुसुमरजसा कण्टकैश्छिन्नपक्षः
स्थातुं गन्तुं द्वयमपि सखे ! नैव शक्तो द्विरेफः ॥ १ ॥

गन्धाढ्यां नवमल्लिकां मधुकरस्त्यक्त्वा गतो यूथिकां
दैवात् तां च विहाय चम्पकवनं पश्चात् सरोजं गतः ।

भिक्षाशिनो दिक्षु परिभ्रमन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ५ ॥

इति श्रीपरमहंसकाचार्य-शङ्कर-भगवत्-पूज्यपाद-
कृतं यतिपञ्चकं समाप्तम् ।

साधनपञ्चकम् ।

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयताम्
आत्मेच्छा व्यवसीयतां निजगृहात् तूर्णं विनिर्गम्यताम् ॥१॥
सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढा धीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु संत्यज्यताम् ।
सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुका सेव्यतां
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् ॥२॥
वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षः समाश्रीयतां
दुस्तर्कात् सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम् ।
ब्रह्मैवास्मि विभाव्यताम् अहरहर्गर्वः परित्यज्यताम् ॥३॥
क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां
स्वाद्वन्नं न तु याच्यतां विधिवशात् प्राप्तेन सन्तुष्यताम् ।

Digitized by Google

यतिपञ्चकम् ।

वेदान्तवाक्येषु सदा रमन्तो,
भिक्षान्नमात्रेण च तुष्टिमन्तः ।
विशोकमन्तःकरणे रमन्तः,
कौपीनवन्तः खलु भाग्यवन्तः ॥ १ ॥

मूलं तरोः केवलमाश्रयन्तः,
पाणिद्वयं भोक्तुममन्त्रयन्तः ।
कन्थामिव श्रीमपि कुत्सयन्तः,
कौपीनवन्तः खलु भाग्यवन्तः ॥ २ ॥

देहादिभावं परिवर्तयन्तः,
आत्मानमात्मन्यवलोकयन्तः ।
नान्तं न मध्यं न बहिः स्मरन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ३ ॥

स्वानन्दभावे परितुष्टिमन्तः
सुशान्त सर्वेन्द्रियतुष्टिमन्तः ।
अहर्निशं ब्रह्मसुखे रमन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ४ ॥

पञ्चाक्षरं पावनमुच्चरन्तः
पतिं पशूनां हृदि भावयन्तः ।

Digitized by Google

काकस्य पक्षौ यदि हेमयुक्तौ माणिक्ययुक्तौ चरणौ च तस्य।
एकैकपक्षे गजराजमुक्ता तथापि काको न च राजहंसः ॥८॥

दिव्यं चूतरसं पीत्वा न गर्वं याति कोकिलः।
पीत्वा कर्दमपानीयं भेको मकमकायते ॥ ९ ॥

अगाधजलसञ्चारी न गर्वं याति रोहितः।
अङ्गुष्ठोदकमात्रेण सफरी फरफरायते ॥ १० ॥

भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥ ११ ॥

नाविलुण्ठति पादेषु काचः शिरसि धार्यते।
यथैवास्ते तथैवास्तां काचः काचो मणिर्मणिः ॥ १२ ॥

काकः कृष्णः पिकः कृष्णस्तत्र भेदः पिककाकयोः।
वसन्ते समुपायाते काकः काकः पिकः पिकः ॥ १३ ॥

वरं वने व्याघ्रगजेन्द्रसेवितं
द्रुमालयं पत्रफलाम्बुभोजनम्।
तृणानि शय्या वसनञ्च वल्कलं
न बन्धुमध्ये धनहीनजीवनम् ॥ १४ ॥

साध्वी स्त्रीणां दयितविरहे मानिनां मानभङ्गे
सल्लोकानामपि जनरवे निग्रहे पण्डितानाम्।
अन्योद्रेके कुटिलमनसां निर्गुणानां विदेशे
भृत्याभावे भवति मरणं किन्तु संभावितानाम् ॥ १५ ॥

इति श्रीमद्राकविवररचितविरचितं
नीतिरत्नं सम्पूर्णम्।

Digitized by Google

नीतिरत्नम् ।

चतुर्मुख मुखाम्भोज-शृङ्गाटक-विहारिणीम् ।
नित्यं प्रगल्भ-वाचालाम् उपतिष्ठे सरस्वतीम् ॥ १ ॥

इतर-तापशतानि यथेच्छया
वितर तानि सहे चतुरानन ! ।
अरसिकेषु रसस्य निवेदनं
शिरसि मा लिख मा लिख मा लिख ॥ २ ॥

संसार-विषवृक्षस्य द्वे फले अमृतोपमे ।
काव्यामृत-रसास्वाद आलापः सज्जनैः सह ॥ ३ ॥

पण्डितेषु गुणाः सर्वे मूर्खे दोषाश्च केवलाः ।
तस्मात् मूर्खसहस्रेभ्यः प्राज्ञ एको विशिष्यते ॥ ४ ॥

पुरो रेवा-पारे गिरिरतिदुरारोह-शिखरो
धनुष्पाणिः पश्चात् शबरनिकरो धावति पुनः ।
सरः सव्ये ऽसव्ये दव-दहन-दाह-व्यतिकरो
क्व यामः ! किं कुर्मो ! हरिणशिशुरेवं विलपति ॥ ५ ॥

छेदश्चन्दन-चूत-चम्पक-वने रक्षा करीरद्रुमे,
हिंसा हंस-मयूर-कोकिलकुले काकेषु लीलारतिः ।
मातङ्गेन खरक्रयः, समतुला कर्पूरकार्पासयोः,
एषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः ॥ ६ ॥

भिनत्ति भीमं करिराजकुम्भं बिभर्ति वेगं पवनादतीव ।
करोति वासं गिरिगह्वरेषु तथापि सिंहः पशुरेव नान्यः ॥ ७ ॥

Digitized by Google

वचश्च साधोर्विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय ॥ ७ ॥

मतिरेव बलात् गरीयसी
तदभावे करिणामियं दशा ।
इति घोषयतीव डिण्डिमः
करिणो हस्तिपकाहतः क्वणन् ॥ ८ ॥

वरं गर्भस्रावो वरमपि च नैवाभिगमनं,
वरं जातप्रेतो वरमपि च कन्याभिजननम् ।
वरं वन्ध्या भार्य्या वरमपि च गर्भेषु वसतिः,
न चाविद्वान् रूप-द्रविण-गुण-युक्तोऽपि तनयः ॥ ९ ॥

या राका शशि-शोभना गतघना सा यामिनी यामिनी,
या सौन्दर्य्य-गुणान्विता पति-रता सा कामिनी कामिनी ।
या गोविन्द-रस-प्रमोद-मधुरा सा माधुरी माधुरी ;
या लोकद्वय-साधनी तनुभृतां सा चातुरी चातुरी ॥ १० ॥

ज्ञातिभिर्वण्ट्यते नैव चौरेणापि न नीयते ।
दाने नैव क्षयं याति विद्यारत्नं महाधनम् ॥ ११ ॥

अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ १२ ॥

गुणेन स्पृहनीयः स्यात् न रूपेण युतो जनः ।
सौगन्ध्यवर्ज्यं नादेयं पुष्पं कान्तमपि क्वचित् ॥ १२ ॥

इति श्रीमहाकविभवभूतिविरचितं
गुणरत्नकाव्यं समाप्तम् ।

Digitized by Google

यत्कण्ठे गरलं विराजति सदा मौलौ च मन्दाकिनी,
यस्याङ्के गिरिजाननं कटितटे शार्दूलचर्माम्बरम्।
यन्माया हि वदन्ति विश्वमखिलं प्रायात् स वः शङ्करः
अम्बूवत् जलविन्दुवत् जलजवत् कम्बालवत् बालवत् ।२॥
विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्,
विद्या भोगकरी यशः-सुख-करी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं,
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः॥ ३ ॥

गुणी गुणं वेत्ति न वेत्ति निर्गुणो;
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः;
करी च सिंहस्य बलं न मूषिकः। ४ ॥

गुणा गुणज्ञेषु गुणा भवन्ति,
ते निर्गुणं प्राप्य भवन्ति दोषाः।
सुस्वादुतोयाः प्रभवन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः॥ ५ ॥

गुणायन्ते दोषाः सुजनवदने दुर्जनमुखे
गुणा दोषायन्ते किमिति जगतां विस्मयपदम्।
यथा जीमूतोऽयं लवणजलधेर्वारि मधुरं,
फणी पीत्वा क्षीरं वमति गरलं दुःसहतरम्॥ ६ ॥

विद्या विवादाय धनं मदाय,
शक्तिः परेषां परिपीड़नाय।

Digitized by Google

आशाहीनो नरेन्द्रः शुचिरपि सततं यः पराक्षोपभोगी,
वृद्धो रोगी दरिद्रः स च युवतिपतिर्धिङ् विडम्बप्रकारम् ॥६॥
स्त्रीणां यौवनमर्थिनामनुगमो राज्ञां प्रतापः सतां
सत्त्वं सत्यधनस्य सङ्गतिरसद्वृत्तस्य वाग्डम्बरः ।
स्वाचारस्य मनोदमः परिचितेर्विद्या कुलस्यैकता,
सेवाया धनमुत्तमेषु विनयः शान्तेर्विवेको बलम् ॥ ७ ॥
विद्वान् संसदि याचकः परवशो मानी दरिद्रो गृही,
वित्ताढ्यः कृपणः सुखी परवशो वृद्धो न तीर्थाश्रितः ।
राजा दुःसचिवप्रियः कुलभवो मूर्खः पुमान् स्त्रीजितो
वेदान्ती हतसत्क्रियः किमपरं हास्यास्पदं भूतले ॥ ८ ॥
उत्खातान् प्रतिरोपयन् कुसुमितांश्चिन्वन् शिशून् वर्धयन्,
प्रोत्तुङ्गान् नमयन् नतान् समुदयन् विश्लेषयन् संहतान् ।
तीव्रान् कण्टकिनो बहिर्नियमयन् म्लानान् मुहुः सेचयन्
मालाकार इव प्रयोगनिपुणो राजा चिरं नन्दतु ॥ ९ ॥

इति नवरत्नं समाप्तम् ।

गुणरत्नम् ।

सानन्दं नन्दिहस्ताहत-मुरज-रवाहूत-कौमार-बर्हि-
त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोग-सङ्कोच-भाजि ।
गण्डोड्डीनालिमाला-मुखरित-ककुभस्ताण्डवे शूलपाणे-
र्वैनायक्यश्चिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः ॥ १ ॥

Digitized by Google

मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं
कार्येण द्विजमादरेण युवतीं प्रेम्णा समैर्बान्धवान्।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिः मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं शीलेन कुर्याद्वशम्॥१॥
अर्थी लाघवमुच्छ्रितो निपतनं कामातुरो लाञ्छनं,
लुब्धोऽकीर्त्तिमसङ्गरः परिभवं दुष्टोऽन्यदोषे रतिम्।
निःस्वो वञ्चनमुन्मना विकलतां शोकाकुलः संशयं
दुर्वागप्रियतां दुरोदरवशः प्राप्नोति कष्टं मुहुः॥२॥
नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां धृति-
र्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम्।
लावण्यं वपुषः स्मृतिः सुमनसां शान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मण्डनम्॥३॥
धर्मः प्रागेव चिन्त्यः सचिवमतिगतिर्भावनीया सदैव,
ज्ञेयं लोकानुवृत्तं वरचरनयनैर्मण्डलं वीक्षणीयम्।
प्रच्छाद्यौ रागरोषौ मृदुपरुषगुणौ योजनीयौ च काले,
आत्मा यत्नेन रक्ष्यो रणशिरसि पुनः सोऽपि नापेक्षणीयः॥४॥
कार्पण्येन यशः क्रुधा गुणचयो दम्भेन सत्यं क्षुधा
मर्य्यादा व्यसनैर्धनानि विपदा स्थैर्यं प्रमादैर्द्विजः।
पैशुन्येन कुलं मदेन विनयो दुश्चेष्टया पौरुषं
दारिद्र्येण जनादरो ममतया चात्मप्रकाशो हतः॥५॥
मूर्खोऽशान्तस्तपस्वी क्षितिपतिरलसो मत्सरी धर्मशीलो,
दुःखी मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्महीनः।

Digitized by Google

अयी दिवसधूसरो गलितयौवना कामिनी,
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो,
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥ ७ ॥
निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशतां वाञ्छति ।
चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्राह्मं पदं वाञ्छति,
ब्रह्मा शैवपदं शिवो हरिपदम् आशावधिं को गतः ॥ ८ ॥

इति अष्टरत्नं समाप्तम् ।

नवरत्नानि ।

धन्वन्तरि-क्षपणकामरसिंहशङ्कु-
वेतालभट्ट-घटकर्पर-कालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥

नवरत्नम् ।

मित्रमर्थौ तथा नीतिर्धर्म-कार्पण्य-मूर्खताः ।
स्त्रीषां विद्वान् यथोत्स्वाताम् नवरत्नमिदं क्रमात् ॥

Digitized by Google

कस्य च पुत्रोऽर्थकरी च विद्या

बहुलीकलोकेषु सुखानि राजन् ! ॥ १ ॥

भौमैकान्तविहारिणोऽपि विहगाः संप्राप्नुवन्त्यापदं,

बध्यन्ते निपुणैरगाधसलिलात् मत्स्याः समुद्रादपि ।

दुर्नीते हि विधौ कुतः सुचरितं ? कः स्थानलाभे गुणः ?

कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ २ ॥

नित्यं छेदस्तृणानां क्षितिनखलिखनं पादयोरल्पपूजा,

दन्तानामल्पशौचं वदनमलिनता रूक्षता मूर्धजानाम् ।

द्वे सन्ध्ये चापि निद्रा विवसन-शयनं ग्रास हासातिरेकः

स्वाङ्गे पीठे च वाद्यं हरति धनपतेः केशवस्यापि लक्ष्मीम् ॥३॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे,

विष्णुर्येन दशावतारगहने न्यस्तो महासङ्कटे ।

रुद्रो येन कपालपाणिरटनं भिक्षाटनं कारितः,

सूर्यो धावति नित्यमेव गगने तस्मै नमः कर्मणे ॥ ४ ॥

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं,

माने दैन्यभयं बले रिपुभयं रूपे तरुण्या भयम् ।

शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं,

सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥ ५ ॥

शशिनि खलु कलङ्कः कण्टकं पद्मनाले,

युवति कुचनिपातः पक्वता केशजाले ।

जलधिजलमपेयं पण्डिते निर्धनत्वं,

वयसि धनविवेको निर्विवेको विधाता ॥ ६ ॥

Digitized by Google

वित्तेन किं ? वितरणं यदि नास्ति दीने,
किं सेवया ? यदि परोपकृतौ न यत्नः ।
किं सङ्गमेन ? तनयो यदि नेक्षणीयः,
किं यौवनेन ? विरहो यदि वल्लभायाः ॥ ५ ॥

स्वर्गः किं ? यदि वल्लभा निजवधूः किं वा विभूषाविधिः ?
लावण्यं यदि किं सुधाकरकरैः ? शृङ्गारगर्भा गिरः ।
मृत्युः किं यदि दुर्जनेष्ववनतिः ? किं धिक् यदि प्रार्थना,
प्राप्तेष्टः करिकेतनो यदि भवेत् ? किं कल्पभूमीरुहैः ? ॥६॥

धनेन किं ? यो न ददाति याचके,
बलेन किं ? यश्च रिपुं न बाधते ।
श्रुतेन किं ? यो न च धर्ममाचरेत्,
किमात्मना ? यो न जितेन्द्रियो भवेत् ॥ ७ ॥

इति सप्तरत्नं समाप्तम् ।

अष्टरत्नम् ।

अर्थो, बोध, तथा नित्यं, श्रद्धा, भोगे यथेच्छ्यपि ।
यमो, निःस्व, विप्रे चाष्टरत्नमिदं क्रमात् ॥

अर्थागमो नित्यमरोगिता च
प्रिया च भार्या प्रियवादिनी च ।

Digitized by Google

सप्तरत्नम्।

वाञ्छा, राजा, तथा छेदो, वृक्षं, विद्येन किं तथा।
कर्णो, धनेन किं, एवं सप्तरत्नमिदं क्रमात्॥

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता,
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम्।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले,
एते यत्र वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः॥ १॥
राजा धर्मविना द्विजः शुचिविना ज्ञानं विना योगिनः,
कान्ता सत्यविना हयो गतिविना भूषा च ज्योतिर्विना।
योद्धा शूरविना तपो व्रतविना छन्दो विना गीयते,
भ्राता स्नेहविना नरो हरिविना मुञ्चन्ति शीघ्रं बुधाः॥२॥
छेदश्चन्दनचूतचम्पकवने रक्षापि शाखोटके,
हिंसा हंस-मयूरकोकिलकुले काकेषु नित्यादरः।
मातङ्गेन खरक्रयः समतुला कर्पूरकार्पासयोः;
एषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः॥ ३॥
वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः,
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टश्रियं मन्त्रिणः,
सर्वः कार्यवशाज्जनोऽभिरमते कस्यास्ति को वल्लभः?॥४॥

Digitized by Google

कोऽर्थान् प्राप्य न गर्वितो ? विषयिणः कस्यापदोऽस्तं गताः ?
स्त्रीभिः कस्य न खण्डितं भुवि मनः ? को नाम राज्ञां प्रियः ?
कः कालस्य न गोचरान्तरगतः ? कोऽर्थी गतो गौरवं ?
को वा दुर्जन-वागुरा-निपतितः क्षेमेण यातः पुमान् ? ॥ २ ॥

मूर्खो द्विजातिः स्थविरो गृहस्थः,
कामी दरिद्रो, धनवान् तपस्वी ।
वेश्या कुरूपा, नृपतिः कदर्यः,
लोके षडेतानि विडम्बितानि ॥ ३ ॥

दानं दरिद्रस्य, प्रभोश्च शान्तिः
यूनां तपो, ज्ञानवताञ्च मौनम् ।
इच्छानिवृत्तिश्च सुखासितानां,
दया च भूतेषु दिवं नयन्ति ॥ ४ ॥

दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः ?
सन्तापयन्ति कमपथ्यभुजं न रोगाः ? ।
कं श्रीर्न दर्पयति ? कं न निहन्ति मृत्युः ?
कं स्त्रीकृता न विषया ननु तापयन्ति ? ॥ ५ ॥

लोभोऽप्यस्ति, परेण किं ? पिशुनता यद्यस्ति, किं पातकैः ?
सौजन्यं यदि किं गुणैः ? सुमहिमा यद्यस्ति किं मण्डनैः ?
सत्यं चेत् तपसा च किं ? शुचि मनो यद्यस्ति तीर्थेन किं ?
सद्विद्या यदि किं धनैः ?-रपयशो यद्यस्ति किं मृत्युना ? ॥५॥

इति षड्रत्नं समाप्तम् ।

Digitized by Google

राजानञ्च कुमन्त्रिभिः परिवृतं, देशञ्च सोपद्रवं,
भार्य्यां यौवनगर्विंतां पररतां मुञ्चन्ति शीघ्रं बुधाः ॥ ३ ॥
क्षान्तिश्चेत्, कवचेन किं ? किमरिभिः ? क्रोधोऽस्ति चेद्देहिनां,
ज्ञातिश्चेदनलेन किं ? यदि सुहृद्दिव्यौषधैः किं फलम् ? ।
किं सर्पैः ?-यदि दुर्जनः, किमु धनैः ?-विद्यानवद्या यदि,
व्रीड़ा चेत् किमु भूषणैः ? कविता यद्यस्ति राज्येन किम् ? ॥ ४ ॥
शक्यो वारयितुं जलेन हुतभुक्, छत्रेण सूर्य्यातपः,
नागेन्द्रो निशिताङ्कुशेन, चपलौ दण्डेन गो-गर्दभौ ।
व्याधिर्भैषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं,
सर्वस्यौषधमस्ति शास्त्रविहितं, मूर्खस्य नास्त्यौषधम् ॥ ५ ॥

इति पञ्चरत्नं समाप्तम् ।

षड्‌रत्नम् ।

शास्त्रं, कोऽर्थांस्तथा मूर्खो, दानं दुर्मन्त्रणं, तथा ।
लोभोऽप्यस्तीति विज्ञेयं क्रमात् षड्‌रत्नमीरितम् ॥

शास्त्रं सुचिन्तितमथो परिचिन्तनीयम्,
आराधितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्के स्थितापि युवतिः परिरक्षणीया,
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ? ॥ १ ॥

Digitized by Google

काव्यसंग्रहः।

पञ्चरत्नम्।

नागः, पोतस्तथा वैद्यं, शान्तिः, शक्यो, यथाक्रमम्।
पञ्चरत्नमिदं प्रोक्तं विदुषामपि दुर्लभम्॥

नागो भाति मदेन, कं जलरुहैः, पूर्णेन्दुना शर्वरी,
शीलेन प्रमदा, जवेन तुरगो, नित्योत्सवैर्मन्दिरम्।
वाणी व्याकरणेन, हंसमिथुनैर्नद्यः, सभा पण्डितैः,
सत्पुत्रेण कुलं, नृपेण वसुधा, लोकत्रयं विष्णुना॥ १॥

पोतो दुस्तर-वारिराशि-तरणे, दीपोऽन्धकारागमे,
निर्वाते व्यजनं, मदान्धकरिणां दर्पोपशान्त्यै सृणिः।
इत्थं तद् भुवि नास्ति, यस्य विधिना नोपायचिन्ता कृता
मन्ये दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः॥ २॥

वैद्यं पानरतं, नटं कुपठितं, स्वाध्यायहीनं द्विजं,
युद्धे कापुरुषं, हयं गतरयं, मूर्खं परिव्राजकम्।

Digitized by Google

४३	वैराग्यशतकम्	२५३	५९	रामकृष्णविलोमकाव्यम्	५३९
४४	सूर्य्यशतकम्	२७१	६०	काशीस्तोत्रम् ...	५४५
४५	चाणक्यशतकम्	२९०	६१	आत्मबोधः ...	५५२
४६	शान्तिशतकम्	३००	६२	भक्तामरस्तोत्रम्	५५९
४७	वृन्दावनशतकम्	३२०	६३	रावणकृतशिवस्तवः	५६८
४८	आनन्दलहरी	३४१	६४	कृष्णताण्डवस्तोत्रम्	५७१
४९	श्रीकृष्णलहरी	३६०	६५	राक्षसकाव्यम् ...	५७२
५०	गङ्गालहरी	३६१	६६	सप्तश्लोकीभागवतम्	५७६
५१	श्रुतबोधः	३७१	६७	एकश्लोकीभागवतम्	५७७
५२	आर्य्यासप्तशती	३७६	६८	एकश्लोकीरामायणम्	५७७
५३	विदग्धमुखमण्डनम्	४४३	६९	एकश्लोकीभारतम्	५७८
५४	रतिमञ्जरी	४८५	७०	विष्णुस्तवः ...	५७८
५५	नलोदयः ...	४९१	७१	रसमञ्जरी ...	५७९
५६	जगन्नाथाष्टकम्	५१२	७२	राजप्रशस्तिः ...	६१८
५७	यमुनाष्टकम्	५१३	७३	वृन्दावनयमकम्	६२८
५८	उद्धवसन्देशः	५१५	७४	विद्यासुन्दरम् ...	६३४
			७५	गीतगोविन्दम्...	६४७

Digitized by Google

सूचीपत्रम् ।

१ पञ्चरत्नम् ...	१	२२ घटकर्परः ...	३४
१ षड्रत्नम् ...	२	२१ नीतिप्रदीपः ...	३८
३ सप्तरत्नम् ...	४	२४ नीतिसारम् ...	४१
४ अष्टरत्नम् ...	५	२५ धर्मविवेकः ...	४४
५ नवरत्नानि ...	७	२६ वेदसारशिवस्तवः	४७
६ नवरत्नम् ...	७	२७ पद्यसंग्रहः ...	४९
७ गुणरत्नम् ...	९	२८ महापद्यम् ...	५२
८ नीतिरत्नम् ...	१२	२९ मुकुन्दमाला ...	५३
९ यतिपञ्चकम्	१४	३० व्रजविहारः ...	५९
१० साधनपञ्चकम्	१५	३१ अपराधभञ्जनस्तोत्रम्	६२
११ भ्रमराष्टकम्	१६	३२ शृङ्गारतिलकम् ...	६७
१२ वानराष्टकम्	१८	३३ ऋतुसंहारः ...	७०
१३ वानर्य्याष्टकम्	१९	३४ मेघदूतम् ...	९९
१४ पूर्वचातकाष्टकम्	२१	३५ हंसदूतम् ...	१२१
१५ उत्तरचातकाष्टकम्	२३	३६ पदाङ्कदूतम् ...	१४७
१६ शुकाष्टकम् ...	२४	३७ उद्धवदूतम् ...	१५६
१७ गङ्गाष्टकम् ...	२६	३८ चौरपञ्चाशिका ...	१८२
१८ शृङ्गाररसाष्टकम्	२८	३९ अमरुशतकम् ...	१९१
१९ मणिकर्णिकामहिमा	२९	४० शृङ्गारशतकम् ...	२०९
२० मणिकर्णिकाष्टकम्	३०	४१ दृष्टान्तशतकम् ...	२२६
२१ मोहमुद्गरः ...	३२	४२ नीतिशतकम् ...	२३५

Digitized by Google

Ind L 532.2

IV, 2661

HARVARD COLLEGE
14 18..
LIBRARY

Wales Fund.

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ,
২ নং রমানাথ মজুমদারের ষ্ট্রীট।

প্রিণ্টার—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
৫৬ নং আমহর্ষ্ট ষ্ট্রীট, কলিকাতা।

4539
5-1-128
36

Digitized by Google

Kāvya-saṁgrahas

काव्यसंग्रहः ।

पञ्चसप्तति-संस्कृतकाव्यात्मकः ।

बि, ए, उपाधिधारिणा

श्रीजीवानन्द-विद्यासागरभट्टाचार्य्येण

सङ्कलितः संस्कृतश्च ।

द्वितीयसंस्करणम् ।

कलिकातानगर्य्यां

सरस्वतीयन्त्रे मुद्रितः ।

इं १८८६ ।

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Ind L 532.2

Harvard College Library

VE RI TAS

FROM THE BEQUEST OF

HENRY WARE WALES, M.D.

Class of 1838

FOR BOOKS OF INTEREST TO THE
SANSKRIT DEPARTMENT

Digitized by Google

सूचीपत्रम् ।

१	पञ्चरत्नम् ...	१	२२	घटकर्परः ...	३४
१	षड्रत्नम् ...	२	२३	नीतिप्रदीपः ...	३८
३	सप्तरत्नम् ...	४	२४	नीतिसारम् ...	४१
४	अष्टरत्नम् ...	५	२५	धर्मविवेकः ...	४४
५	नवरत्नानि ...	७	२६	वेदसारशिवस्तवः	४७
६	नवरत्नम् ...	७	२७	पद्यसंग्रहः ...	४९
७	गुणरत्नम् ...	९	२८	महापद्यम् ...	५३
८	नीतिरत्नम् ...	१२	२९	मुकुन्दमाला ...	५३
९	यतिपञ्चकम्	१४	३०	ब्रजविहारः ...	५९
१०	साधनपञ्चकम्	१५	३१	अपराधभञ्जनस्तोत्रम्	६२
११	भ्रमराष्टकम्	१६	३२	शृङ्गारतिलकम् ...	६७
१२	वानराष्टकम्	१८	३३	ऋतुसंहारः ...	७०
१३	वानर्य्याष्टकम्	१९	३४	मेघदूतम् ...	९९
१४	पूर्वचातकाष्टकम्	२१	३५	हंसदूतम् ...	१२१
१५	उत्तरचातकाष्टकम्	२३	३६	पदाङ्कदूतम् ...	१४७
१६	शुकाष्टकम् ...	२४	३७	उद्धवदूतम् ...	१५६
१७	गङ्गाष्टकम् ...	२६	३८	चौरपञ्चाशिका ...	१८२
१८	शृङ्गाररसाष्टकम्	२८	३९	अमरुशतकम् ...	१९१
१९	मणिकर्णिकामहिमा	२९	४०	शृङ्गारशतकम् ...	२०९
२०	मणिकर्णिकाष्टकम्	३०	४१	दृष्टान्तशतकम् ...	२२६
२१	मोहमुद्गरः ...	३२	४२	नीतिशतकम् ...	२३५

Digitized by Google

Ind L 532.2

IV, 2661

HARVARD COLLEGE
14 1873
LIBRARY

Wales Fund.

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ,
২ নং রমানাথ মজুমদারের ষ্ট্রীট।

প্রিণ্টার—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
৫৬ নং আমহর্ষ্ট ষ্ট্রীট, কলিকাতা।

6539
1-1-28
36

Kavya-samgrahas

काव्यसंग्रहः ।

पञ्चसप्तति-संस्कृतकाव्यात्मकः ।

75 Sanskrit poems

बि, ए, उपाधिधारिणा

श्रीजीवानन्द-विद्यासागरभट्टाचार्य्येण

सङ्कलितः संस्कृतश्च ।

द्वितीयसंस्करणम् ।

कलिकातानगर्य्यां

सरस्वतीयन्त्रे मुद्रितः ।

ई॰ १८८६ ।

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Ind L 532.2

Harvard College Library

VE RI TAS

FROM THE BEQUEST OF

HENRY WARE WALES, M.D.

Class of 1838

FOR BOOKS OF INTEREST TO THE
SANSKRIT DEPARTMENT

Digitized by Google

Digitized by Google